From the end, that is, from the end of the चतुर्थपाद of the अष्टमाध्याय ।

६५ । झरो झरि सवर्णे (८।४।६५) ।

झरः किम् ? शार्ङ्गम् । रेफात् परस्य ककारस्य गकारे न लोपः । झरि किम् ? प्रियपञ्चनाम् । प्रियाः पञ्च येषां तेषाम् । अल्लोपोऽन (६।४।१३४) इत्युपधालोपः । श्चुत्वं नकारस्य ञकारः । पूर्वत्रासिद्धीये न स्थानिवदिति (१।१।५८, वा) अल्लोपो न स्थानिवत् । अत्र चकारस्य ञकारे न लोपः स्यात् । हल इत्येव । वाग्ग्मी । अत्र गस्य गकारे लोपो न भवति । प्रत्तमिति । अच उपसर्गात्तः (७।४।४७) इति दितकारः । स वादेशः । तत्कारे तस्यान्तस्य लोपः । शिण्ढीति । शिषधातो र्हेर्धिः । ष्टुत्वेन धस्य ढः । झलाञ्जश् झशीति (८।४।५३) ढकारस्य डकारः । श्नम् । श्नसोरल्लोपः (६।४।१११) अनुस्वारपर-

---

(Z) "इति महाभाष्यम्" indeed ! ! The supporters of Sristidhara, if attempting to verify this statement, will surely be as successful as was once an admirer of the military, who was determined to have an interview with and therefore in search of *Captain Towers*, whom he had heard of in :—

"Our revels now are ended ; these our actors,
As I foretold you, were all spirits and
Are melted into air, into thin air :
And like the baseless fabric of this vision,
The cloud-*Capt towers*, the gorgeous palaces,
The solemn temples, the great glove itself,
Yea, all which it inherit, shall dissolve ;
And, like this insubstantial pageant faded,
Leave not a rack behind. We are such stuff
As dreams are made of, and our little life
Is rounded with a sleep."—The Tempest, Act IV., Scene i.

The stanza एकस्मात् ङ ञ &cc.. occurs in the Kasika Vritti (काशिका वृत्ति).

संवर्त्तौ। षकारात् परस्य तकारस्य टकारे वा लोपः। वष्टीति। वषिद् आवरणे। वेविंः। धातुषकारस्य झलाञ्जश् झशीति (८।४।५३) डकारः। तस्यापि धकारे वा लोपः। वब्धुमिति। वन्ध बन्धने। अनिट्। तुमुन्। धातुधकारस्य जश्त्वेन दकारः। तस्य वा लोपः। तप्तेति। तृप प्रीणने। अनुपधस्य (७।२।८६)। तकारो ह्रस्वः। पकार लोपस्तु इति सावर्ण्याभावान्न लोपः। अत खरपूर्वे रे इति।

६६। उदात्तादनुदात्तस्य स्वरितः (८।४।६६)।

६७। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्। (८।४।६७)

अत्र नोदात्तस्वरितोदयसूत्रे उदयग्रहणं मङ्गलार्थम्। आकरं तिमङ्गलमिदम्। आदौ वृद्धिरादैजिति (१।१।१) वृद्धिशब्दः। मध्ये शिवशमरिष्टस्य करे इति (४।४।१४३) शिवशब्दः। अन्तोदयशब्द इति।

६८। अ अ इति (८।४।६८)।

आद्यो विवृतो द्वितीयः संवृतः। विवृतोऽकारः प्रयोगेषु संवृतो भवतीति। तत्तत्कार्य्यार्थं विवृतः। नतु तस्य तथा प्रयोगः। अपितु विवृतत्वेनाद्येनाकारेण प्रयोगान्न दीर्घप्लुतयोर्ग्रहणं नेष्यते। विशिष्टगुणयत उच्चारणसामर्थ्यात् अदयमपहाय तु वर्तमानाया। अकारस्वरूपेणोद्यो यः स संवृतो भवतीति वा। त्रिपाद्यामसिद्धाधिकारे संवृतत्वविधानं तस्याविवृतत्वाद् दीर्घत्वादिकार्य्यार्थमिति ज्ञेयः। इष्ट इति। विवर्णनिकटेऽपि संवृतोऽयमकारः। विहितिरिति। अनेन वृत्तिकृता मङ्गलं सूचितम्। अयशब्दो विष्णुवाचक इत्युच्चारणादेव सर्वं सम्पन्नम्। काशिकेति। काशयति प्रकाशयति सूत्रार्थमिति काशिका जयादित्यविरचिता वृत्तिः। काश्यां भवा वा। भाषावृत्तिर्भर्तृहरिणा श्रीधरसेननरेन्द्रादिष्टा विरचिता। तयोर्वृत्त्योर्मतं व्याख्यातुं प्रतिपादयितुं यदि धीः प्रतिभा वर्त्तते तदेयं भाषावृत्तिः विचिन्त्यतामिति श्लोकार्थः। विलोक्यतामिति च क्वचित् पाठः। क्वचित् काशिकार्थः क्वचिद् भाषावृत्त्यर्थो मया प्रकाशितः। न स्वमतिचापल्यादेवाभ्यामन्यत् किमपि विवृतमिति भाव इति

भाषावृत्त्यर्थविवृतावस्माध्यायसङ्गतः।
चतुर्थो विवृतः पादः श्रीसृष्टिधरशर्मणा ॥ १ ॥

इति श्रीसृष्टिधरचक्रवर्त्तिकृता भाषावृत्त्यर्थविवृतिः समाप्ता। श्रीरामः। श्रीः।

The so-called quotations in the commentary "from the Maha-bhasya" will often be found either wrong or altogether non-existent and hence probably given on hearsay (A A). If they were not the foolish manipula-

(A A) Sristidhara's attempt to explain परिवीणाख्याय in परिवीणाख्यायः शिखाय कर्णपिटामहात्, probably in immitation of वर्णवीणाख्याय सर्वे चपेटां ददाति (महाभाष्य, 1.1.1-) is curious (vide our note on 1. 4. 32). He had, it seems, no महाभाष्य

tions of the Scribes, the conclusion is irresistible that the acquaintance of Sristidhara's countrymen with the Mahabhasya had dwindled at the period to nothing. In fact a few centuries back the king Lakshmana-sena had been, if Sristidhara is to be believed, tired of the Vedic portions of Panini's Grammar. Purushottama too helped him in keeping them away from the people as much as he could. Thus the Bengalis generally neglected and ceased from studying the Astadhyayi (BB) and the Mahabhashya. The Vedic Sutras of the former were unknown to them. This state continued for a pretty long time. Even a few decades ago, the Bengali pundits were unable to

---

by him, while composing his Vivriti. In fact he based his book on the Nyasa (or the काशिकाविवरणपञ्जिका by जिनेन्द्रबुद्धि) । So he says—

न्यासमन्यार्थतात्पर्य्यपर्य्यालोचनशालिभिः ।
बोध्योऽयं करुणावद्भिः कृतिभिर्मे परिश्रमः ॥ १ ॥ इति ।

Some read here शोध्यः for बोध्यः । The Nyasa was most likely the first of the commentaries on the Kasika Vritti. (*Vide* the Introduction of our edition of the Nyasa published by the V. R. Society, Rajshahi).

(BB) There were of course some exceptions e.g. Brihaspati (बृहस्पति) the celebrated **R**ayamukuta (रायमुकुट), Raghunatha Siromani (रघुनाथशिरोमणि) of the Didhiti (चिन्तामणिदीधिति), Kulluka-Bhatta (कुल्लूकभट्ट) the commentator of the Manu-Samhita (मनुसंहिता) &c.. . The Raya-Mukuta wrote a commentary, entitled the Padachandrika on the Amarakosha. He had shown in it a profound knowledge of the Astadhyayi, though some subsequent writers on Amarasimha occasionally carped at him. That the Raya-Mukuta was a Bengali is clear from the following statements quoted from the Padachandrika.

"ज्योतिषमूलविदुषमतु बवचं हारं ज्वलत्कुण्डलैः
रत्नौघस्फुरिता दमाहुविजुषः सोपिषतीरर्मिका: ।
यः प्राप्य विरदोऽपरोत्तमन्यावनेरविन्दन् नृपा-
च्छमेभे स्वरमेव रायमुकुटाभिख्यामभिख्यावतीम् ॥ ६ ॥
यत्पुत्रा नृपमन्त्रिमौलिमणयो विश्वासरायादयः
ख्याता दिग्जयिनामपीह जयिनो लोके कवीन्द्राश्च ये ।
प्राच्यामरपादपादिसहितं मेऽदुस्तुलापूरुषं
तन्तदयज्ञविशिष्टविर्मितमतः सत्केषु शास्त्रेषु ते ॥ ७ ॥

construe and explain the hymns of the Rig-Veda and the Aphorisms of Panini's Grammar, especially those on accents. This retrogression dated probably from the 16th century A.D. Oh ! for its utter vanishment from Bengal.

SRISH CHANDRA CHAKRAVARTI

पृथ्वीं पण्डितसार्वभौमपदवीं गौडावनीपालित
यः प्राप प्रथितो बृहस्पतिरिति ख्यातोजगत्याख्यति:।
कोषस्यामरनिर्मितस्य विविधव्याख्यानदोषापह:
सानन्दं पदचन्द्रिकां स कुरुते टीकामिमां कीर्त्तये ॥८॥
एवं षोड़शटीकार्थसारमादाय निर्मिता।
अतोऽभिलिखितोऽप्यर्थोऽस्यां न हेयः सहसा बुधैः ॥९॥"

And again—"इति महिन्तापनीय-कविचक्रवर्त्ति-राजपण्डित-पण्डितसार्वभौम-पण्डितचूड़ामणि-महाचार्य्य-रायमुकुटमणि-श्रीमद्बृहस्पतिकृतायाममरकोषपञ्जिकायां पदचन्द्रिकायां लिङ्गादिसंग्रहवर्गः समाप्तः। समाप्ता चेयममरकोषपञ्जिकेति ॥"

The age of the Pada-Chandrika is ascertained from the incidental mention of a date viz : year 4532 of the Kali-Juga (कलियुग), that is, 1353 Saka which corresponds with 1431 A.D. There is a complete MS. of it, in the Varendra Research Society, Rajshahi, which appears to have been copied out within fifty years of its composition, viz : in 1396 Saka, i.e. 1474 A.D The गौडावनीपालित mentioned by the Raya-Mukuta appears to have been Jadu (यदु) or Jalaluddin Mahammed Shah who reigned over Bengal from about 1414 A.D. to 1431 A.D. He was a son to Raja Gonesha (राजा गणेश or कंसनारायण) who was called Kanas (कंस) by the Mahomedan Historians. Raja Gonesa reigned from 1409 A.D. to 1414 A. D. Jadu was succeeded by his son Samas-uddin Ahmedsha who reigned from about 1431 A.D. to 1442 A.D.

शुद्धिपत्रम् ।

The official duties compelled the editor to be at Rajshahi while the book was printed at Calcutta. So, to his great regret, some misprints as noticed below have disfigured the book. The readers are to kindly correct them and the errors of other kinds where observed :—

(1) IN THE TEXT.

पृष्ठायाम्	पङ्क्तौ	अशुद्धं	शुद्धम्
१५	२५	देवदत्ता वा	दैवदत्ता वा
४२	९	धानुष्व	धानुष्क
९९	२	रश्विक	रथिक
१४८	२४	अंकाम	कामम्
१८८	१५	जुगौत्यथ	जुगौतिथ्येथ
२२४	४	माहेन्द्रम् ।	माहेन्द्रम् । महेन्द्रियम् ।
२७५	२१	ठत्रपि । अवधिका ।	छत्रपि । अवधिकौ ।
३१८	९	आति	आति:
३५२	८	अम्बादय:	आमादय:
३६८	१३	धान्याद्युक्षेपण	धान्याद्युत्क्षेपण
३७५	१६	ईहते	ईक्षते
४२५	२१	अच्छिवतो	अक्षीवतो
४३३	५	प्रमन्द	प्रमन्दा
४३७	२२	मागन्दार्क्षा	मा गान्दार्क्षा
४७१	१	दृष्टान्येवावत	दृष्टान्व
"	३	ऊर्मितिर्विपा	ऊर्मितिर्विभावा
४९३	२२	आयथापूर्व्य	आयथापूर्व्यम्
५०२	२	जागरक	जागरक:
५१३	११	जिह्वाधायाम	जिह्वायाम्

(2) IN NOTES.

पृष्ठायाम्	पङ्क्तौ	अशुद्धं	शुद्धम्
२१	२३	अवर्तोऽपराधिफल	अवर्तोऽपराधफल
५६	२५	लोप	लोप:
१६१	२४	विदल, जनाश्विदिल	विदिल, जनविदिल
२००	२४	विधियैनी	विधियंत
२०५	२५	मौद्रै:	मौद्गै:

पृष्ठायाम्	पङ्क्तौ	अशुद्धम्	शुद्धम्
२१४	२६	विद्याधराङ्गनेत्यमरः	विद्याधराङ्गनेति शब्दार्णवे।
			तथा विद्रीणाखराङ्गना भौवरित्यमरः।
२९६	२१	भीषराम	भीषरामौ रदौ
२९६	२७	होतव्यः	होतृव्यः
५४०	२१	एत, मादयः	अव, मादसः

(3) IN INTRODUCTION.

१	२	स्फटम्	स्फुटम्।
११	१०	assers	asserts
१५	२२	निदध्यात्	निर्दध्यात्

अथ

महामहोपाध्यायश्रीपुरुषोत्तमदेवकृता

भाषावृत्तिः।

नमो बुद्धाय भाषायां यथाविमुनिलक्षणम्।
पुरुषोत्तमदेवेन लघ्वी वृत्तिर्विधीयते॥ १॥

अथ शब्दानुशासनम्। लौकिकानां प्रकृतिप्रत्ययविभागपरिकल्पनया सामान्यविशेषवता च लक्षणेन। गत्यन्तराभावात्। वर्णानामुपदेशः क्रमसन्निवेशानुबन्धासञ्जनार्थः। तदुभयं संज्ञार्थम्। संज्ञा च (1) लाघवेन शास्त्रप्रवृत्त्यर्था। अकारस्य विवृतोपदेश आकारग्रहणार्थः।

अथ प्रत्याहारसूत्राणि।

१। अइउण्। २। ऋऌक्। ३। एओङ्। ४। ऐऔच्। ५। हयवरट्। ६। लण्। ७। ञमङणनम्। ८। झभञ्। ९। घढधष्। १०। जबगडदश्। ११। खफछठथचटतव्। १२। कपय्। १३। शषसर्। १४। हल् इति प्रत्याहाराः।

अकारादीनेतान् वर्णान् क्रमेणोपदिश्यान्ते णकारादीनित्संज्ञकाननुबध्नाति। प्रत्याहारार्थम्। तत्र णकाराद्यैश्चतुर्दशभिरनुबन्धैर्यथाक्रमम्—

एकं त्रीणि पुनश्चैकं चत्वार्य्येकं त्रयं चयम्।
एकं द्वे षट् तथैवैकं चतुः पञ्च षडेव च॥ १॥ इति।

अण्। अक् इक् उक्। एङ्। अच् इच् एच् ऐच्। अट्। अण् इण् यण्। अम् यम् ङम्। यञ्। झष् भष्। अश् हश् वश् झश् जश् पुनर्वश्। छव्। यय् मय् झय् खय्। यर् झर् खर् चर् शर्। अल्

---

(१) सा च लाघवेन शास्त्रप्रवृत्त्यर्थेति पाठान्तरम्। अत्र संज्ञार्थमित्यत्र गुणीभूतः संज्ञाशब्दः शैलीन [illegible]। गुणीभूतस्यापि प्रधानसंज्ञा न्यासादौ समर्थनात्।

हल् वल् रल् अल् शल् इत्येकचत्वारिंशत् प्रत्याहारा भवन्ति। उरण् रपरः (१।१।५१)। चयो द्वितीयाः शरि पौष्करसादेः (८।४।४८, वार्त्तिकम्)। अमन्ताड्ड (उणादि, १।११४) इत्येतैश्चतुश्चत्वारिंशदिति।

अथ प्रथमोऽध्यायः।

प्रथमः पादः ॥ १।१ ॥

१। वृद्धिरादैच्।

आदैकार औकारश्च वृद्धिसंज्ञकाः स्युः।

२। अदेङ् गुणः।

अदेकार ओकारश्च गुणसंज्ञकाः स्युः।

३। इको गुणवृद्धी।

अनुक्तस्थाने ये गुणवृद्धी ते इक एव स्थाने वेदितव्ये। सार्वधातुकार्धधातुकयोरित्यङ्गस्य (७।३।८४) गुणो भवति। चेता। होता। स्तोता। भविता। तरिता। सिचि वृद्धिः (७।२।१) परस्मैपदेषु। अचैषीत्। अहौषीत्। अस्तावीत्। अलावीत्। अकार्षीत्। कथं द्यौः पन्थाः सः? गुणवृद्धिशब्देनानभिधानात्।

४। न धातुलोप आर्धधातुके।

धात्वेकदेशो धातुः। धातुलोपनिमित्त आर्धधातुके ये गुणवृद्धी प्राप्नुतस्ते न स्तः। लोलुवः। पोपुवः। मरीमृजः। पचाद्यचि यङो लुक्। इक इत्येव। अभाजि। रागः।

५। क्ङिति च।

किति ङिति च निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न स्तः। किति चितम्। स्तुतम्। भुक्तम्। मृतम्। मृष्टः। ङिति चिनुतः। चिन्वन्ति। कुरुतः। कुर्वन्ति।

मृष्टः । मृजन्ति । ममृजुः । कथं मार्जन्ति ममार्जुः ? मृजे रजादौ संक्रमे विभाषा वृद्धिरिष्यते (2) । व्यवस्थितविभाषया नित्यं तुन्द-परिमृजः (3) ।

६ । दीधीवेवीटाम् ।

दीधीवेव्यौ छान्दसौ । इटो गुणो न स्यात् । अकणिषम् । अरणिषम् । लुङि मिपि लघूपधगुणो (७।३।८६)ऽत्र निषिद्धः ।

७ । हलोऽनन्तराः संयोगः ।

संलग्ना हलः संयोग इत्युच्यन्ते । अग्निरिति गनौ । स्त्रीति सतराः ।

८ । मुखनासिकावचनोऽनुनासिकः ।

मुखसहितया नासिकया यो वर्ण उच्चार्य्यते सोऽनुनासिकसंज्ञकः स्यात् । यँ । आँ । ओँ । ङञणनमाः । दधिँ । (4)

९ । तुल्यास्यप्रयत्नं सवर्णम् ।

तुल्यमास्यं ताल्वादिस्थानं प्रयत्नः स्पृष्टतादिश्च येषां तेऽन्योन्यं सवर्णसंज्ञकाः स्युः । वर्ग्यो वर्ग्येण सवर्णः । अचः सस्थानाः । अनुस्वारस्य ययि परसवर्णः (८।४।५८) । शङ्किता । कुण्ठिता । अकः सवर्णे दीर्घः (६।१।१०१) । दण्डाग्रम् । खट्वाग्रम् ।

(क) ऋकार ऌकारयोः सवर्णसंज्ञा वक्तव्या । (5)

---

(2) एतत्तु भाष्यकारैरन्यदीयमतत्वेनैव गुणवृद्धी (१।१।१) इत्यत्रोपन्यस्तम् । तथाच—"इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते परिमृजन्ति परिमार्जन्ति परिममृजतुः परिममार्जतुरित्याद्यर्थम् ।" इति । संक्रामतौ गुणवृद्धी अस्मादिति संक्रमः कङित्प्रत्यय इत्यर्थः ।

(3) दुर्घटवृत्तावप्येवं व्यवस्थितविभाषाश्रिता । मैत्रेयरक्षितस्तु धातुप्रदीपे तुन्दपरिमृज तुन्दपरिमार्ज इत्युभावेव दर्शितवान् । वस्तुतस्तूभावेव स्तः । अतएवायंशो मृजेति भिदादिपाठादङ्, गणपाठादिव इत्याभाव इत्याह ।

(4) अणोऽप्रगृह्यस्यानुनासिकः (८।४।५७) इत्यनेनावसानेऽप्रगृह्यस्य दधिशब्दस्यान्त्यस्यानुनासिकत्वं वा भवति ।

(5) Instead of attaching star marks to the *vartikas*, we have numbered them under the aphorisms to which they belong, with letters (क), (ख), (ग),

कोऽह ऌकारो ह्रोतृकारः । ऌकारो दीर्घो नास्तीति ऋकारः ।

१० । नाज्झलौ ।

अज्झलौ परस्परं सवर्णसंज्ञकौ न स्तः । दण्डहस्तः । दधि शीतम् । वैयाघ्री मक्ष्यः । आनडुहं चर्म । यस्येति चेति (६।४।१४८) लोपो न भवति ।

११ । ईदूदेद् द्विवचनं प्रगृह्यम् ।

ईदूदेकारान्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् । अग्नी इमौ । वायू अत्र । खट्वे इह । पचेते इह । मणीवादीनां प्रतिषेधो वक्तव्य इत्येके । इवार्थे वकारोऽयमित्यन्ये । (6) मणीव । दम्पतीव ।

१२ । अदसो मात् ।

अदसो मकारात् परमीदूदेत् प्रगृह्यसंज्ञं स्यात् । अमी अत्र । अमू आसाते । मादिति किम् ? अमुकेऽत्र । अदसः किम् ? शम्यत्र ।

१३ । शे ।

शे इति सूत्रं छन्दोभागः सुपामादेशः (७।१।३९) ।

१४ । निपात एकाजनाङ् ।

एको योऽज् निपातः स प्रगृह्यसंज्ञकः स्यात् । अ अपकर्ष । उ उत्तिष्ठ । आ एवं मन्यसे । आ एवं किलैतत् । अनाङ् किम् ? आ उष्णमोष्णम् ।

ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥ १ ॥

&c...The students are to understand that they come from कात्यायन and when quoting them, they are to supply after those vartikas, either the words इति वाच्यम् or इति वक्तव्यम् or इत्युपसंख्यानम् if not already supplied, to show that they belong to him.—The नव sutras are marked here as (1,) (2), (3), &c...

(6) तथाहि कादम्बर्य्यामुत्किलितदशानिव पत्त्रानीति प्रसरित्तिलिखितानिव केशिदन्तचतानीति श्रीपतिदत्तम्। कुचौ गिरीवाचलकन्यकाया इति घृष्टिधरभृतम्। नैषधे च—

'स्फुटोत्पलाभ्यां मलिदम्पतीव तद्विलोचनाभ्यां कुचकुम्भलाभया ।
निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुः' ॥ १ ॥ इति ।

१५। ओत्।

ओदन्तो यो निपातः स प्रगृह्यसंज्ञः स्यात्। अहो अहम्। (7) उताहो इति।

१६। सम्बुद्धौ शाकल्यस्येतावनार्षे।

सम्बुद्धावोदन्तं शाकल्यस्य मतेन प्रगृह्यसंज्ञं स्यादितौ परे। भानो इति। अन्येषां भानविति। सम्बुद्धौ किम्? गवित्ययमाह। अनार्षे इत्येकवृत्ता-(8) वुपयुक्तम्।

१७। उञः।

उञ् इतौ शाकल्यस्य मतेन प्रगृह्यसंज्ञः स्यात्। उ इति। अन्येषां विति।

१८। ऊँ।

उञ इतौ ऊँ (9) चादिश्यते शाकल्यस्य मतेन। ऊँ इति। उइति। अन्येषां विति।

१९। ईदूतौ च सप्तम्यर्थे।

ईदूतौ चेति सूत्रच्छन्दोभागः। (10) उक्तं प्रगृह्यम्।

---

(7) "अहो अहं नमो मह्यं यदुह्य सुमध्यया।
उताहो नयमि दीर्घं साकाङ्क्षमहमोचितः" ॥ १ ॥
इति जाम्बवतीविजयकाव्ये जाम्बवतीदर्शनोत्तरं कृष्णोक्तिः।
अहो अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम्।
तपर्तुपूर्तावपि मेदसाम्भरा विभावरीभिर्बिभराम्बभूविरे ॥ १ ॥ इति नैषधीये।

(8) एकवृत्तौ साधारणवृत्तौ वैदिके लौकिके च विवरणे इत्यर्थः। "एकदेशाविति काशिकायां वृत्तावित्यर्थः। एकशब्दस्य मुख्यार्थत्वात् काशिकायां मुख्यवृत्ती। छन्दस्यपि व्याख्यानादिति भावः। भागवृत्तेरन्यस्यां वा। सा हि वृत्तां विवरणकर्त्री"ति भाषावृत्त्यर्थविवृतौ सृष्टिधराचार्यः।

(9) अनुनासिकपक्षस्य यरोऽनुनासिकेऽनुनासिको (८।४।४५) इति पाक्षिकानुनासिकत्वम्। यथा यदेतन्ँ इति पठसि। पक्षे यदेतद् इति पठसीति। एवं वाग् इति वाङ् इति वा। षड् इति षण् इति वा। त्रिष्टुभ् इति त्रिष्टुम् इति वा। ककुभ् इति ककुम् इति वा। प्रगृह्यत्वं त्वचि परत एव संहिता-प्रतिषेधः।

(10) कश्चे लौतम मन्वते। तथाहि भट्टोक्तिः—"न चायं सोमस्थान्दससवाधिपानामीवोदाहरणानां दृष्टत्वादिति वाच्यम्। मुनित्रयोक्तिं विनाप्यादिच्छया छान्दसककल्पनीतिप्रसङ्गात्। छांदो प्रगृह्यत्वं न

२०। दाधा घ्वदाप्।

दाम्दाण्दोदेङो धाञ्धेटौ च घुसंज्ञकाः स्युः। प्रणिददाति। प्रणिदधाति। अदाबिति किम्? दाप्दैपो मा भूत्। दातं धान्यम्। अवदातं वस्त्रम्।

२१। आद्यन्तवदेकस्मिन्।

असहाये आद्यन्तवत् कार्य्यमतिदिश्यते। वलादेरिट्। अलाविषुः। अजादावियङुवङौ। श्रियौ। भ्रुवौ। अन्तवत्त्वेऽजन्ताद् यत्। अध्येयम्। व्यपदेशिवदेकस्मिन्निति (11) वक्तव्यम्। एकाचो द्वे प्रथमस्येति (६।१।१) बहुव्रीहिं वक्ष्यति। स यथेह जजागार तथा इयाय। आर। आदेशप्रत्यययोरिति (८।३।५९) षत्वं वक्ष्यति। यथेह पक्ष्यति तथाऽपाक्षीत्।

२२। तरप्तमपौ घः।

एतौ घसंज्ञकौ स्याताम्। कुमारितरा। कुमारितमा। गौरितमा। घरूपेति (६।३।४३) ह्रस्वः।

२३। बहुगणवतुडति संख्या।

बहुगणौ प्रचुरार्थौ। वतुडती प्रत्ययौ। एते संख्यासंज्ञाः स्युः। बहुकृत्वः। गणकृत्वः। गणशः। तावत्कृत्वः। कतिधा।

२४। ष्णान्ता षट्।

२५। डति च।

षकारनकारान्ता संख्या डतिप्रत्ययान्ता च षट्संज्ञा स्यात्। षट् सन्ति पश्य वा। पञ्च सप्त नव दश पुरुषाः। एकादश। अष्टादश। कति सन्ति। कति पश्य। षड्भ्यो लुगिति (७।१।२२) जश्शसो र्लुक्।

भवतीत्यस्मिन्नर्थे प्रमाणानुपलम्भाच्च।" इति (शब्दकौस्तुभे)। यत्र निषिद्धं तदनुमतमेवेति ययी आसन्नो वातप्रमी आपतति अतः पपी उदिते पठिष्यति क्रिष्य इत्यादौ भवितव्यमेव प्रकृतिभावेन। यान्त्यनेनेति ययी मुञ्जपयोऽश्वो वा। पिबति रसान् पाति वा लोकमिति पपीः सूर्य्यः। वातं प्रमिमीत इति वातप्रमीर्मृगविशेषः। यापी किद् चेति (उण्, १।४२९) वातप्रमीरिति (उण्, ४।४४१) माङश्च ईप्रत्ययेन ययीः पपीर्वातप्रमीरिति। तत्र ङौ सवर्णदीर्घाद ययी पपी वातप्रमी इति स्युः। तत्प्रयोगे ऽपि भाषायामप्यनेन प्रकृतिभाव इत्यर्थः।

(11) व्यपदेशो विशिष्टकथनं तादृप्येण निर्देश इति यावत्। तत इनिरस्त्यर्थे। व्यपदेशी। तद्वत्।

२६। क्तक्तवतू निष्ठा।

एतौ निष्ठेत्युच्येते। भिन्नः। भिन्नवान्।

२७। सर्वादीनि सर्वनामानि।

सर्वप्रभृतीनि सर्वनामसंज्ञकानि स्युः। सर्वस्मै सर्वस्मात्। विश्वस्मै विश्वस्मात्। उभशब्दो नित्यद्विवचनटाब्विषयः। उभयोऽन्यत्र। डतर डतम इतर अन्य अन्यतर। अन्यपर्य्यायस्त्वत् त्व। नेम अर्द्धपर्य्यायो नेमभिन्नः। सम सिम पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर् त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम्।

२८। विभाषा दिक्समासे बहुव्रीहौ।

दिग्बहुव्रीहौ सर्वनामसंज्ञा वा स्यात्। उत्तरपूर्वस्यै। उत्तरपूर्वायै।

२९। न बहुव्रीहौ।

बहुव्रीहौ सा संज्ञा नास्ति। प्रियविश्वाय देहि। स्मैभावो न भवति। त्वत्कपितृको मत्कपितृकः। कुत्साद्यर्थे प्राक् टेरकज् न भवति (५।३।७१)। प्रागिवात् क (५।३।७०) एव भवति।

३०। तृतीयासमासे।

अत्र सर्वनामसंज्ञा नास्ति। मासपूर्वाय देहि। पुनः समासग्रहणाद् वाक्येऽपि। मासेन पूर्वाय।

३१। द्वन्द्वे च।

द्वन्द्वे सा संज्ञा नास्ति। पूर्वापराणाम्। कतरकतमानाम्।

३२। विभाषा जसि।

द्वन्द्वे जसि सा संज्ञा वा स्यात्। कतरकतमे कतरकतमाः।

३३। प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च।

एते जसि वा सर्वनामानि स्युः। प्रथमे प्रथमाः। चरमे चरमाः। तयप्। द्वितये द्वितयाः। द्वये द्वयाः। (12) अल्पे अल्पा इत्यादि।

---

(12) उभयशब्दस्य तु नित्या संज्ञा। नानेन विभाषा। उभये देवमनुष्याः। एतच्च व्यवस्थित-

३४ । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ।

इमानि जसि वा सर्वनामानि स्युः । पूर्वे पूर्वाः । परे पराः । व्यवस्थायां किम् ? दक्षिणा गाथकाः । प्रवीणा इत्यर्थः । असंज्ञायां किम् ? उत्तराः कुरवः ।

३५ । स्वमज्ञातिधनाख्यायाम् ।

जसि स्वं वा सर्वनाम स्यात् । स्वे गावः । स्वा गावः । अज्ञातिधनाख्यायाम् किम् ? स्वा ज्ञातयः । प्रभूताः स्वा दीयन्ते ।

३६ । अन्तरं बहिर्योगोपसंव्यानयोः ।

अन्तरं जसि वा सर्वनामसंज्ञं स्यात् । बहिर्योगे । अन्तरे अन्तरा वा गृहाः । ग्रामबाह्या इत्यर्थः । उपसंव्यानमधोवस्त्रम् । अन्तरे अन्तरा वा शाटकाः । परिधेया इत्यर्थः ।

(क) अपुरीति वक्तव्यम् । अन्तरायां पुरि वसति । सर्वादित्वात् प्राप्तेः ।

(ख) वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्त्तव्यम् । द्वितीयस्मै द्वितीयाय ।

३७ । स्वरादिनिपातमव्ययम् ।

स्वरादयो निपाताश्चाव्ययमित्युच्यन्ते । स्वर् । प्रातर् । अन्तर् । उच्चैस् । नीचैस् । दिवा । बहिस् । स्वयम् । मृषा । हे । है । स्वाहा । स्वधा । अहा । कम् । शम् । सार्धम् । समम् । सह । शुभम् । स्वस्ति । अस्ति । आभीक्ष्ण्ये निपाताः । च । वा । इव । वै । एव । ह । इति । इह स्वरादयो वाचकाश्चादयो द्योतका इति भेदः ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥

३८ । तद्धितश्चासर्वविभक्तिः ।

सर्वा विभक्तिर्यतो नोत्पद्यते स तद्धितोऽव्ययं स्यात् । ततः । यत्र ।

विभाषात्वादिति न्यासकारः । व्यवस्थितविभाषाविज्ञानात् पूर्वविप्रतिषेधाद्वेति हरदत्तः । विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वादिति भट्टोजिः ।

विना। नाना। तसिलादिरेधाच्पर्य्यन्तः। शस्तसुच् सुचौ। ग्रस्तसौ। डाच्। थमुथालौ। दार्हिलौ। च्व्यर्थाः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे (५।४।११)। किन्तराम्। वतिः। ब्राह्मणवत्।

३९। कृन्मेजन्तः।

मान्तः कृदव्ययं स्यात्। कर्तुम्। स्वादुंकारम्। स्वपोषम् पुष्टः। ईहासक्ते। एजन्तः कृच्छान्दसः।

४०। क्वातोसुन्कसुनः।

क्वान्तमव्ययं स्यात्। कृत्वा। प्रकृत्य। तोसुन्कसुनौ छान्दसौ।

४१। अव्ययीभावश्च।

अव्ययीभावो नाम समासोऽव्ययं स्यात्। उपाग्नि प्रत्यग्नि। इह लुगेव संज्ञाप्रयोजनम्। नाकजादिरिति स्मृतिः। उन्नमव्ययम्।

४२। शि सर्वनामस्थानम्।

४३। सुडनपुंसकस्य।

जश्शसोः शि (७।१।२०) रनपुंसकस्य सुट् च सर्वनामस्थानमुच्यते। शि। कुण्डानि। दधीनि। सुट्। राजा। राजानौ। राजानः। राजानम्। राजानौ। सीमा। सीमानौ। अनपुंसकस्य किम्? सामनी। धामनी।

४४। नवेति विभाषा।

नवाशब्दयोरर्थो विभाषासंज्ञः स्यात्। निषेधेन समीकृते विषये विकल्पः प्रवर्त्तते। उभयत्र विभाषाप्रयोजनम्। यथा विभाषा श्वेः (६।१।३०) संप्रसारणम्। शुशाव शिश्वाय। शुशुवतुः शिश्वियतुः।

४५। इग्यणः संप्रसारणम्।

यणः स्थाने भूतो भावी वा य इक् स संप्रसारणमुच्यते। इष्टम्। उप्तम्। गृहीतम्। औह्यत। औयत। अथ षष्ठीनिर्द्देशमधिकृत्याह—

४६। आद्यन्तौ टकितौ।

षष्ठीनिर्दिष्टस्य आदिष्टिद् भवति। अन्तः किद् भवति। लविता। भीषयते।

४७ । मिदचोऽन्त्यात् परः ।

अचां मध्येऽन्त्यादचः परो मिद् भवति । पयांसि । सिञ्चति । रुणद्धि ।

(क) मस्जेरन्त्यात् पूर्वं नुममिच्छन्ति । अनुषङ्गसंयोगादिलोपार्थम् । मङ्क्ता । मग्नः ।

४८ । एच इग् ह्रस्वादेशे ।

एचः स्थाने ह्रस्वादेश इगेव भवति । अतिरि कुलम् । अतिनु कुलम् । उपगु ।

४९ । षष्ठी स्थानेयोगा ।

अयोगा अव्यक्तसम्बन्धा षष्ठी स्थाने वेदितव्या । अस्तेर्भूः (२।४।५२) । भविता । ब्रुवो वचिः (२।४।५३) । वक्ता । अयोगा किम् ? ऊदुपधाया गोहः (६।४।८९) । उपगूहयति । निगूहयति ।

५० । स्थानेऽन्तरतमः ।

स्थाने प्राप्यमाणानां सदृशतम आदेशः स्यात् । अकः सवर्णे दीर्घः (६।१।१०१) । लताग्रम् । कण्ठ्ययोः कण्ठ्य एव दीर्घः । अर्थतः । तरुण-युवतिः । तरुण्यर्थ एव पुंवदुच्यते । गुणतः पाकस्त्यागो रागः । अल्पप्राण-योरघोषयोरवतोस्ताहगेव कुलम् । प्रमाणतः । अमुष्मै । अमूभ्याम् । ह्रस्व-दीर्घयो स्तत्प्रमाण एवोकार ऊकारश्च स्यात् । स्थानग्रहणं स्थानार्थगुणप्रमाणेषु स्थानान्तर्यं बलीयो यथा स्यात् । चेता स्तोता । प्रमाणान्तर्यादकारो मा भूत् । तमब्ग्रहणं बहुष्वन्तरेष्वन्तरतमो यथा स्यात् । वाग्घसति । त्रिष्टुब्भसति ।

५१ । उरण् रपरः ।

ऋवर्णस्य स्थानेऽण् रपरो भूत्वा प्रसजति । कर्त्ता । किरति । द्वैमातुरः कारकः । खट्वर्श्यः । तवल्कारः ।

५२ । अलोऽन्त्यस्य ।

आदेशोऽन्त्यस्यालः स्थाने वेदितव्यः । इद् गोण्याः (१।२।५०) । पञ्च

गोभिः । हन स्त च (३।१।१०८)। ब्रह्महत्या । राज्ञः क च (४।२।१४०)। राजकीयः । रुहः पः (७।३।४३) । रोपयति ।

५३ । ङिच्च ।

ङिदादेशोऽन्त्यस्यालः स्थाने स्यात् । आनङृतो द्वन्द्वे (६।३।२५)। मातापितरौ। अनङ् सौ (७।१।९३) । सखा । कर्त्ता । तातङो ङित्त्वसामर्थ्यान् नायमन्तविधिः स्मृतः । कुरुतात् ।

५४ । आदेः परस्य ।

परस्य कार्य्यमुच्यमानमादेरलः प्रत्येतव्यं यत्र पञ्चमीनिर्देशः । ईदासः (७।२।८३) । आसीनः । अलोऽन्त्यस्या-(१।२।५२) पवादोऽयं योगः परत्वाद-नेकाल्शिदित्यनेन (१।१।५५) बाध्यते । अतो भिस ऐस् (७।१।९) । वृक्षैः ।

५५ । अनेकाल्शित् सर्वस्य ।

अनेकालादेशः शिच्च सर्वस्यैव स्थाने स्यात् । अस्तेर्भूः (२।४।५२)। भविता । लिट स्तझयोरेशिरेच् (३।४।८१) । पेचे पेचिरे । जश्शसोः शिः (७।१।२०) कुण्डानि । उक्ताः षष्ठीनिर्देशाः ।

५६ । स्थानिवदादेशोऽनल्विधौ ।

आदेशाः स्थानिवद् भवन्ति । ब्रूञ् । वक्ता । वक्तुम् । वक्तव्यम् । धातोरिति (३।१।९१) तव्यदादयः। आवधिष्ट । आङो यमहन इत्यात्मनेपदम् (१।३।२८)। अनल्विधौ किम् ? वर्णविधौ मा भूत् । द्यौः पन्थाः सः । हलिति (६।१।६८) न सुलोपः ।

(क) अस्तिभुवोरीट्प्रतिषेधो वक्तव्यः । आत्थ । अभूत् । ब्रुव ईडिति । (७।३।९३) अस्तिसिचोऽपृक्ते इति (७।३।९६) च मा भूत्।

५७ । अचः परस्मिन् पूर्वविधौ ।

अल्विध्यर्थोऽयमारम्भः । नियमार्थो वा । अजादेशः परनिमित्तकः पूर्वस्मिन् विधौ कर्त्तव्ये स्थानिवत् स्यात् । पटयति । लघयति । अवधीत् । टिलोपस्यातो लोपस्य च स्थानिवद्भावाद् वृद्धि र्न भवति ।

५८। न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु।

एषु विधिष्वजादेशो न स्थानिवत्। पदान्ते कौ स्तः। आवादेशः स्यात्। द्विर्वचने दद्ध्यत्र मद्ध्वत्र। अनचि चेति (८।४।४७) द्विर्वचनं न स्यात्। वरे वरच्यतो लोपे (६।४।४८) यायावरः। आतो लोप इटि चेति (६।४।६४) स्यात्। सवर्णविधौ श्नसोरल्लोपः (६।४।१११)। शिण्टि पिण्टि। अनुस्वारस्य ययि परसवर्णो (८।४।५८) न स्यात्। अनुस्वारे शिंषन्ति। पिंषन्ति। नश्चापदान्तस्य झलीत्यनुस्वारो (८।३।२४) न स्यात्। जश्विधौ। अभ्यस्तस्याकारलोपः। धद्धे। धद्धम्। जश्त्वं न स्यात्। चर्विधौ। गमहनेत्युपधालोपः (६।४।४८)। जक्षतु जंक्षुः। खरि चेति (८।४।५५) चर्त्वं न स्यात्। अतः स्थानिवत्त्वं निषिध्यते।

(क) स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्।

तत्रैव स्वरो नोदाह्रियते। दीर्घविधौ। अल्लोपोऽनः (६।४।१३४)। प्रतिदीव्ना। हलि चेति (८।२।७७) दीर्घो न स्यात्। यलोपे क्तिच्यतो लोपः (६।४।४८)। कण्डूतिः। वलि यलोपो न स्यात्। लोपः किम्? वाय्वोः। यणादेशः स्थानिवदेव। अतो वलि यलोपो न भवति।

(ख) क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वषत्वेषु न स्थानिवत्।

लावयतेः पावयतेश्च क्विप्। लौः। पौः। क्वौ लुप्तं न स्थानिवदिति णिलोपस्य स्थानिवत्त्वनिषेधादूठ् (13)। लुकि—आमलकं फलम्। मयट्। फले लुक् (४।३।१६३)। लुक् तद्धितलुकीति (१।२।४९) स्त्रीप्रत्ययनिवृत्तौ तस्य स्थानिवत्त्वनिषेधाद् यस्येति चेति (६।४।१४८) लोपो न भवति। उपधात्वे—पारिखीयम्। चातुरर्थिकाणन्ताद् यस्येति चेति (६।४।१४८) लोपस्य स्थानिवत्त्वात् खोपधाच्छः (४।२।१४१)। चङ्परह्रस्वत्वे। अवीवदद् वीणां परिवादकेन। प्रथमस्य णिचोऽस्थानिवत्त्वाण् णौ चङीति (७।४।१) ह्रस्वत्वम्। एवं पापच्यतेः पापक्तिः। पाचयतेः पाक्तिः। यायज्यतेर्यायष्टिः।

(13) ऊडिति ठकारान्त आदेशः।

याजयते यौष्टिरिति । अल्लोपणिलोपयोः स्थानिवत्त्वनिषेधाज् झलीति कुत्वषत्वे भवतः ।

५९ । द्विर्वचनेऽचि ।

द्विर्वचननिमित्तेऽच्यजादेशः स्थानिवद् भवति । स्थानिरूपेणावतिष्ठते । क्व ? द्विर्वचन एव कर्त्तव्ये । कृते द्विर्वचने पुनरादेशरूपं नटवद् गृह्णाति । पपतुः पपुः । जघ्नतु र्जघ्नुः । जक्षतु र्जक्षुः । अतो लोपस्य (६।४।१४८) गमहनेत्युपधालोपस्य (६।४।९८) च स्थानिवत्त्वादेकाचो द्विर्वचनं सिध्यति । निनाय लुलाव । आयावोः स्थानिवत्त्वान् नैलौशब्दौ द्विरुच्येते । अचीति किम् ? जेघ्नीयते । यङीत्त्वं न स्थानिवत् । उक्तः स्थानिवद्भावः ।

६० । अदर्शनं लोपः ।

प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् । राजा । भवान् । पचेरन् ।

६१ । प्रत्ययस्य लुक्श्लुलुपः ।

प्रत्ययादर्शनस्य तद्भावितस्य संज्ञात्रयं स्यात् । अदिप्रभृतिभ्यः शपः (२।४।७२) अत्ति । जुहोत्यादिभ्यः श्लुः (२।४।७५) । जुहोति । जनपदे लुप् (४।२।८१) । अङ्गा वङ्गाः । द्व्यञ्मगधेत्यण् (४।१।१७१) ।

६२ । प्रत्ययलोपे प्रत्ययलक्षणम् ।

लुप्तेऽपि प्रत्यये तद्धेतुकं कार्य्यं स्यात् । गोमान् । सर्वनामस्थाने नुम् । अहन् । अग्निचित् । अधोक् । सुप्तिङन्तं पदम् (१।४।१४) । अद्वेट् । हलादौ ढणह इमितीम् (७।३।९२) । इह प्रत्ययस्येत्यनुवृत्तौ पुनः प्रत्ययग्रहणं कृत्स्नप्रत्ययलोपे यथा स्यात् । प्रत्ययैकदेशलोपे मा भूत् । आघ्नीयेत्यत्र सीयुट्सकारलोपे प्रत्ययलक्षणाभावाज् झलादित्वं नास्तीत्यनुनासिकलोपो न स्यात् । तल्लक्षणमिति च वाच्ये पुनः प्रत्ययग्रहणं वर्णाश्रयनिवृत्त्यर्थम् । तेन गवे हितं गोहितम् । रायः कुलं रैकुलमिति । अचीति प्रत्ययलक्षणाभावाद् वर्णाश्रया अवादयो न भवन्ति ।

६३ । न लुमताङ्गस्य ।

लुक्श्लुलुप्शब्दैर्लुप्तेऽङ्गस्य तत् कार्य्यं न स्यात् । मृष्टः । जुहुतः । गर्गाः ।

अपि यञि च गुणवृद्धी न भवतः । राजपुरुषः । कसो भत्वं न भवति । अहर्ददाति । अहर्भुङ्क्ते । रोऽसुपीति (८।२।६९) प्रतिषेधो न भवति । अन्नस्य किम् ? पयः । साम । पयः । समुदायस्य पदत्वं भवत्येव ।

(क) उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणं नास्तीति । परमवाचौ परमगोदुहौ परमदण्डिनौ । समासेऽन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वे कुत्वढत्वघत्वनलोपाः प्राप्ता न स्युः । अपदादिविधौ किम् ? दधिसेचौ । मधुसेचौ । सात्पदाद्योः (८।३।१११) रिति षत्वनिषेधो भवत्येव । सेचयतीति सेक् ।

६४ । अचोऽन्त्यादि टि ।

अचां सन्निविष्टानां मध्येऽन्त्यो योऽच् तदादि टिसंज्ञं स्यात् । आताम् । आथाम् । आम्शब्दः । पटत् । दमत् । अच्छब्दः । पचे पचेते इत्यत्रान्त्यादिवत्त्वं व्यपदेशिवद्भावात् ।

६५ । अलोऽन्त्यात् पूर्व उपधा ।

उपान्त्यो वर्ण उपधोच्यते । पाचकः । शिष्टः । भेत्ता । नन्तकः ।

६६ । तस्मिन्निति निर्द्दिष्टे पूर्वस्य ।

सप्तम्या निर्द्दिष्टे पूर्वस्य कार्य्यं स्यात् । दध्युदकम् । मध्विदम् ।

६७ । तस्मादित्युत्तरस्य ।

पञ्चम्या निर्दिष्टे परस्य कार्य्यं स्यात् । पदात् पदस्य । ग्रामो वः । पुत्रो नः । न पूर्वस्य । युष्माकं ग्रामः । अस्माकं पुत्रः ।

६८ । स्वं रूपं शब्दस्याशब्दसंज्ञा ।

शास्त्रे शब्दस्य स्वं रूपं ग्राह्यम् । नार्थः । अग्नेर्ढक् (४।२।३३) आग्नेयम् । पावकादेर्न भवति । राज्ञः क च (४।२।१४०) । राजकीयः । नृपादेर्न भवति । अशब्दसंज्ञा किम् ? टि घु घः । अर्थ एव गृह्यते । इह तु विभाषा हवमृगेति (२।४।१२) प्रत्यग्रोधं रुरुपृषतं स्वे पुषः (३।४।४०) स्वपोषं रैपोषं गोपोषमित्यादौ विशेषशब्दे पर्य्यायशब्दे च यत्न आश्रेयः ।

६९। अणुदित् सवर्णस्य चाप्रत्ययः।

अण् उदिच्च गृह्यमाणः सवर्णस्य स्वरूपस्य च ग्राहकः स्यात्। अस्य च्वौ (७।४।३२)। खट्वीस्यात्। यस्येति च (६।४।१४८)। चौड़िः। स्वरूपस्य च। मुक्तीकरोति। दाधिः। उदित् कु चु टु तु पु। अप्रत्ययः किम्? सनाशंसभिक्ष उः (३।२।१६८)। अ सांप्रतिके (४।३।९)। इह प्रतीयते विधीयते भाव्यत इति प्रत्ययः। तन्निषेधाद् भाव्यमानोऽण् सवर्णान् न गृह्णातीत्ययमर्थ इत्याहुः। तेन इदम इश् (५।३।३) अम् सम्बुद्धौ (७।१।९९) वलादेरित्यादौ (७।२।३५) च सवर्णाग्रहणम्।

७०। तपरस्तत्कालस्य।

तपरो वर्ण आत्मना तुल्यकालं ग्राहयति। अतो भिस ऐस्। (७।१।९)। वृक्षैः। नैव। खट्वाभिः। ऋत इद् धातोः (७।१।१००)। किरति। गिरति।

७१। आदिरन्त्येन सहेता।

आदिर्वर्णोऽन्त्येनेता इत्संज्ञकेन सह मिलितो मध्यपतितानां वर्णानां ग्राहकः स्यात् स्वरूपस्य च। अण्। अक्। हल्। अच्। सुप्। तिङ्। सुट्। आप्। टन्। ञ्।

७२। येन विधिस्तदन्तस्य।

येन विशेषणेन विधिरुच्यते स तदन्तस्य ग्राहकः स्यात्। एरच् (३।३।५६)। इकारेण धातोरज्विधिरितीकारस्तदन्तं ग्राहयति। चयो जयः।

(क) यस्मिन् विधिस्तदादावल्ग्रहणे। अचीत्यजादावियङुवङौ। श्रियौ। भ्रुवः। उक्तं ग्रहणकशास्त्रम्।

७३। वृद्धिर्यस्याचामादिस्तद् वृद्धम्।

अचां मध्ये यस्यादिर्वृद्धिस्तद् वृद्धसंज्ञं स्यात्। वृद्धाच्छः (४।२।११४)। पाणिनीयम्। ग्लैवीयम्। औडवीयं मतम्।

(क) वा नामधेयस्य वृद्धसंज्ञा वक्तव्या। देवदत्तीयाश्छात्रा देवदत्ता वा।

(ख) गोत्रान्तादसमस्तवत् प्रत्ययो वक्तव्यः । वृद्धभारद्वाजीयाः । वृद्धकाश्यपीयाः । अजातौल्वलीयाः ।

७४ । **त्यदादीनि च ।**

त्यदादीनि वृद्धसंज्ञकानि स्युः । तदीयम् । इदमीयम् । अदसीयम् । युष्मदीयम् । मदीयम् । अस्मदीयम् । किमीयम् ।

७५ । **एङ् प्राचां देशे ।**

एङ् यस्याचामादिस्तद्वृद्धसंज्ञं स्यात् प्राग्देशे (14) । एणीपचनीयो ग्रामः । भोजकटीयो देशः । देशे किम् ? गोमत्यां भवा गौमता मत्स्याः ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

प्रथमाध्यायस्य प्रथमःपादः ॥१।१॥

समाप्तश्च पठमा पादः ।

---

(14) इदं व्याख्यानं जयादित्यमतानुसारि । भाष्यविरुद्धञ्च । प्राचामित्यनेन प्राचामाचार्य्याणामभिधानमिति कुणिवृत्तिसमाश्रयेण भाष्यकारस्य व्याख्यानात् । तथाच कैयटः :—"कुणिना प्राग्ग्रहणमाचार्य्यनिर्देशार्थं व्यवस्थितविभाषार्थञ्चेति व्याख्यातम् । अन्येन तु प्राग्ग्रहणं देशविशेषणं व्याख्यातम् । भाष्यकारस्तु कुणिदर्शनमशिश्रियत् ।" इति । जयादित्येनानयोरपरं मतं गृहीतम् । सुगमाया देशविशेषणत्वे सम्भवाद्-व्याहर्त्तव्येन मतेनेत्यनेनान्वयो न कल्पनीय इति तस्याशयः ।

अथ श्रीपुरुषोत्तमदेवकृता

भाषावृत्तिः ।

प्रथमाध्यायस्य द्वितीयः पादः ।

१ । गाङ्कुटादिभ्योऽञ्णिन् ङित् ।

एभ्योऽञ्णितः प्रत्यया ङिद्वद् भवन्ति । इङादेशो गाङ् । अध्यगीष्ट । अध्यगीढ्वाः । "नाध्यगीढ्वं ध्रुवं स्मृतीः ।" कुटादेः । कुटिता । पुटिता । कुटितुम् । पुटितुम् । संकुटितव्यम् । अञ्णित् किम्? णिच् । कोटयति । घञ् । कोटः ।

(क) व्यचेः कुटादित्वमनसीति वक्तव्यम् । विचिता विचितुम् । अनसि किम्? असुन् । उरुव्यचाः ।

२ । विज इट् ।

विजेरिडादिप्रत्ययो ङित् स्यात् । उद्विजिता । उद्विजितुम् । "नायमुद्विजितुं कालः ।" उद्विजितव्यम् । "पुरुषादुद्विजितव्यमीदृशः" । कथ "मुद्वेजिता दृष्टिभिराश्रयन्ते?" ण्यन्तात् ।

३ । विभाषोर्णोः ।

ऊर्णोतेरिडादिप्रत्ययो वा ङित् स्यात् । प्रोर्णविता प्रोर्णुविता । प्रोर्णवितुम् प्रोर्णुवितुम् ।

४ । सार्वधातुकमपित् ।

अपित् सार्वधातुकं ङित् स्यात् । कुरुतः । कुर्वन्ति । चिनुतः । चिन्वन्ति । अपिदिति किम्? करोति । करोषि । चिनोति । इह

पूर्वमपिदिति योगं विभज्य ङिच्च पिन्न भवतीत्यर्थमाहुः । तेन स्तुयादित्यत्र यासुटो ङित्त्वेन पित्त्वनिषेधात् स्तौतीत्येतद्वदुतो वृद्धिर्लुकि हलीति (७।३।८९) पिति न वृद्धिः । ब्रूताद् भवानित्यत्र ब्रुव ईट् न भवति ।

५ । असंयोगाल्लिट् कित् ।

असंयोगान्ताद् धातो लिट् कित् स्यात् । चक्रतुश्चक्रुः । बिभिदतुर्बिभिदुः । दुद्रुवतुर्दुद्रुवुः । जुहुवतु र्जुहुवुः । ऊचतु रूचुः । असंयोगात् किम् ? "वलिर्बबन्धे जलधिर्ममन्थे ।" अपिदित्येव । बिभेद ।

६ । इन्धिभवतिभ्याञ्च ।

आभ्यां लिट् कित् स्यात् । समीधे । बभूव । अत्रेन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वादाभ्यां किद्वचनानर्थक्यमिति भाष्यम् (15) । भाषायान्त्विन्धेर्लिंव्याम् । समिन्धाञ्चक्रे । अत्रेष्टिः—ग्रन्थिश्रन्थिदम्भिस्वञ्जीनामिति जयादित्यः । ग्रेथतुः । ग्रेथुः । श्रेथतुः । श्रेथुः । देभतुर्देभुः । परिषस्वजे ।

७ । मृडमृदगुधकुषक्लिशवदवसः क्त्वा ।

एभ्यः सेडपि क्त्वा कित् स्यात् । मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा । क्लिशित्वा । उदित्वा । उषित्वा ।

८ । रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ।

एभ्यः सेडपि क्त्वा कित् स्यात् । संश्च । रुदित्वा रुरुदिषति । विदित्वा विविदिषति । मुषित्वा मुमुषिषति । गृहीत्वा जिघृक्षति । स्वपिप्रच्छ्योः सन्नर्थं वचनम् । सुषुप्सति । पिपृच्छिषति ।

९ । इको झल् ।

इगन्ताद् धातो र्झलादिः सन् कित् स्यात् । चिकीर्षति । चिचीषति । झलिति किम् ? शिश्रयिषते । इकः किम् ? पिपासति । झलादेर्विधिर्नैव-सुतराम् ।

---

(15) वस्तुतस्तत्रैव सूत्रे वार्त्तिकमेतत् कात्यायनस्य ।

१० । हलन्ताच्च ।

हलन्तादिगुपधाज् झलादिः सन् कित् स्यात् । बिभित्सति । बुभुत्सते । दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम् । धीप्सति । धिप्सति ।

११ । लिङ्सिचावात्मनेपदेषु ।

हलन्तादिगुपधादात्मनेपदविषयौ लिङ्सिचौ कितौ स्याताम् । भित्सीष्ट । भुत्सीष्ट । अभित्त । अबुद्ध । तङनुवृत्तिः षट्सूत्र्याम् ।

१२ । उश्च ।

ऋवर्णान्तात् तौ कितौ स्याताम् । कृषीष्ट । हृषीष्ट । अकृत । अहृत । तीर्षीष्ट नदी । अतीर्ष्ट नदी स्वयमेव ।

१३ । वा गमः ।

गमे स्तौ वा कितौ स्याताम् । कित्त्वादनुनासिकलोपः । संगसीष्ट संगंसीष्ट वा । त्वं युद्धे विजयेन सङ्गसीष्ठाः संगंसीष्ठा वा । समगत समगंस्त वा भ्रमरः सरोरुहेण ।

१४ । हनः सिच् ।

हन्तेस्तङि सिच् कित् स्यात् । आहत । आहसाताम् ।

१५ । यमो गन्धने ।

यमस्तङि सिच् कित् स्यात् । उदायत सूचितवानित्यर्थः । "नोपायध्वं भयं सीताम् ।" गन्धने किम् ? आयंस्त पादम् ।

१६ । विभाषोपयमने ।

स्वीकारे यमस्तङि सिच् किद्वा स्यात् । उपायत कन्याम् । "उपायंस्त महास्त्राणि ।" "सौमित्रे मामुपायंस्थाः ।"

१७ । स्थाघ्वोरिच्च ।

स्थाघ्वोस्तङि सिच् कित् स्यात् । इकारश्चान्तादेशः । स्था । उपास्थित

करेणुः । प्राखितानीकः । घु । अदित । अदिवाः । अधित । अधिषाः । अधिषातां गावौ वत्सेन ।

१८ । न क्त्वा सेट् ।

सेट् क्त्वा किन्न स्यात् । देवित्वा । वर्त्तित्वा । मृडित्वादौ कित्त्वमुक्तम् । सेड्ग्रहणात्तिर्मवस्त्रगाम् ।

१९ । निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ।

एभ्यः सेण् निष्ठा किन्न स्यात् । शयितः शयितवान् । प्रस्वेदितः प्रस्वेदितवान् । प्रक्ष्वेदितः प्रक्ष्वेदितवान् । प्रमेदितः प्रमेदितवान् । प्रधर्षितः प्रधर्षितवान् । स्विदादेर्विभाषा भावादिकर्मणोरिट् (७.२।१७) । धातुपारायणे तु भौवादिकस्य डीङोऽपि निष्ठायामकित्त्वमुक्तम् । उड्डयित उड्डयितवान् ।

२० । मृषस्तितिक्षायाम् ।

मृषेः क्षमायां निष्ठा किन्न स्यात् । मर्षितः । मर्षितवान् । तितिक्षायां किम् ? अपमृषितं वाक्यमाह ।

२१ । उदुपधाद् भावादिकर्मणोरन्यतरस्याम् ।

उदुपधाद् धातोर्भावारम्भयोर्निष्ठा किन्न स्याद्वा । द्योतितं द्युतितं वानेन । “प्रद्योतितं तावदुरुप्रतानैर्दिवाकरः प्रद्युतितो न यावत् ।” एवं मुदप्रभृतेः । शपव्विकरणानान्तु नेष्यते । निगुधितम् ।

२२ । पूङः क्त्वा च ।

पूङः क्त्वा निष्ठा च किन्न स्यात् । पवितः पवितवान् । पवित्वा । पूङश्चे-तीट् (७।२।५१) । क्त्वाग्रहणमुत्तरार्थम् ।

२३ । नोपधात् थफान्ताद्वा ।

थकारान्तान्नोपधाद् धातोः फकारान्ताच्च क्त्वा किद्वा स्यात् । श्रथित्वा श्रन्थित्वा । ग्रथित्वा ग्रन्थित्वा । गुफित्वा गुम्फित्वा । नोपधात् किम् ? रेफित्वा । थफान्तात् किम् ? स्रंसित्वा ।

२४ । वञ्चिलुञ्च्यृतश्च ।

एभ्यः क्त्वा किद्वा स्यात् । वचित्वा वञ्चित्वा । लुचित्वा लुञ्चित्वा । ऋतित्वा अर्त्तित्वा ।

२५ । तृषिमृषिकृशेः काश्यपस्य ।

एभ्यः क्त्वा किद्वा स्यात् । तृषित्वा तर्षित्वा । मृषित्वा मर्षित्वा । कृशित्वा कर्शित्वा । काश्यपग्रहणं पूजार्थम् ।

२६ । रलो व्युपधाद्धलादेः संश्च ।

उ इ वी । तदुपधाद् रलन्ताद् हलादेः धातोः क्त्वा संश्च कितौ वा स्याताम् । लिखित्वा लेखित्वा । लिलिखिषति लिलेखिषति । एवं द्युतमुदादेः । द्युतित्वा द्योतित्वा । दिद्युतिषते दिद्योतिषते । रलन्तात् किम् ? देवित्वा दिदेविषति । हलादेः किम् ? एषित्वा एषिषिषति । सेवित्वैव । भुक्त्वा बुभुक्षते । उक्तं किस्त्वम् ।

२७ । ऊकालोऽज्झ्रस्वदीर्घप्लुतः । (16)

उकाल एकमात्रिक ऊकालो द्विमात्रिक ऊ३कालस्त्रिमात्रिकोऽच् क्रमेण ह्रस्वदीर्घप्लुतसंज्ञकः स्यात् । अग्निचित् । क्रोच्छति । प्लुतो नोदाह्रियते । भाषायां व्यवहारादर्शनात् ।

२८ । अचश्च ।

तद्भाविता ह्रस्वादयोऽच एव स्थाने वेदितव्याः । ह्रस्वः । अतिरि । अतिखट्वम् । दीर्घः । लूयते । पटूभवति । अत्र च्छन्दःसूत्राणि द्वादश । (17)

---

(16) Why ऊकालः is put and not अकालः or इकालः &c...? They say

"निरन्तराः प्रमत्ताश्च ह्रस्वदीर्घप्लुता अथः ।
ऊवर्णे कुक्कुटवती प्रसिद्धा उत्तमवर्णमाक्" ॥ १ ॥ इति ।

(17) These twelve Sutras, though omitted by the author, are cited here for reference and completion of the सूत्रपाठ. In cases of such other omissions elsewhere, the aphorisms will be similarly recorded in the note.

इह भाषायामपि स्वरसूत्राणि न निबध्यन्ते। स्वरस्य भाषायामप्रचारादनर्थित्वाच्च लोकस्य। वेद एवावश्यकः स्वरप्रयोगः। विस्वरेऽनिष्टापातभयात् (18)।

४१। अपृक्त एकाल्प्रत्ययः।

एको योऽल्प्रत्ययः सोऽपृक्त उच्यते। आसीत्। अपृक्त ईट्। अर्धभाक्। भजो ण्विः (३।२।६२)। वेरपृक्तस्य लोपः (६।१।६७)।

४२। तत्पुरुषः समानाधिकरणः कर्मधारयः।

तुल्याभिधेयपदस्तत्पुरुषः कर्मधारयसंज्ञः स्यात्। पाचकवृन्दारिका। कर्मधारये पुंवत् (६।३।४२)।

४३। प्रथमानिर्दिष्टं समास उपसर्जनम्।

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्। यथा पञ्चमी भयेन (२।१।३७)। वृकभयम्। सप्तमी शौण्डैः (२।१।४०)। अक्षशौण्डः।

४४। एकविभक्ति चापूर्वनिपाते।

वाक्ये नियतविभक्तिकमुपसर्जनसंज्ञं स्यात् पूर्वनिपातं विना। निर्गतः कौशाम्ब्याः निष्कौशाम्बिः। निर्गतं तस्मा निष्कौशाम्बिं पश्येत्यादि।

(क) एकविभक्तावषष्ठ्यन्तवचनमिति कात्यायनः। अर्धपिप्पली। उपसर्जनसंज्ञो न भवति।

२९। उच्चैरुदात्तः। ३०। नीचैरनुदात्तः। ३१। समाहारः स्वरितः। ३२। तस्यादित उदात्तमर्धह्रस्वम्। ३३। एकश्रुति दूरात् सम्बुद्धौ। ३४। यज्ञकर्मण्यजपन्यूङ्खसामसु। ३५। उच्चैस्तरां वा वषट्कारः। ३६। विभाषा छन्दसि। ३७। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। ३८। देवब्रह्मणोरनुदात्तः। ३९। स्वरितात् संहितायामनुदात्तानाम्। ४०। उदात्तस्वरितपरस्य सन्नतरः।

(18) तथाचोक्तं भाष्ये—"दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" ॥ १ ॥ इति। स्वरतोऽपराधिफलञ्च—पुराकिलेन्द्रेण त्वष्टुः पुत्रे विश्वरूपाख्ये हते कुपित स्त्वष्टा इन्द्रस्याभिभवस्य कामार्थं पुत्रान्तरमुत्पिपादयिषुराभिचारिकं यागं कृतवान्। तत्रेन्द्रशत्रुर्वर्धस्वेति मन्त्रे इन्द्रशत्रुशब्दे तत्पुरुषसमासेनान्तोदात्ते प्रयोक्तव्ये प्रमादात् स आद्युदात्तः किल प्रयुक्तः। तेन पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थो लब्धः। तत इन्द्र एवास्य पुत्रान्तरस्यापि हिंसकः सम्पन्न इति श्रुतीतिहासपुराणादिषु प्रसिद्धम्। शिक्षायाञ्च पठ्यते "मन्त्रो हीनः स्वरतो वर्णतो वेत्यादि।

४५। अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

अर्थवच्छब्दरूपं प्रातिपदिकमुच्यते। वृक्षः। मल्लः। डित्थः। कुण्डम्। विप्रः। सर्वः। उच्चैः। अर्थवत् किम्? वनम्। धनम्। नान्तावधेर्मा भूत्। अधातुः किम्? हन्तेर्लङि अहन्। न लोपो हि स्यात्। अप्रत्ययः किम्? काण्डे। कुण्डे। त्रपुणी। ह्रस्वो नपुंसक (१।२।४७) इति ह्रस्वः स्यात्।

(क) निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या। अध्यागच्छति। प्रलम्बते।

४६। कृत्तद्धितसमासाश्च।

एते प्रातिपदिकसंज्ञकाः स्युः। कर्त्ता। श्रीः। दाक्षिः। वरदाः। राजपुरुषः। कुम्भकारः। अर्थवत्समुदायानां समासस्यैवेति नियमाद् वाक्यस्य प्रातिपदिकत्वाभावः। राज्ञः पुरुषः।

४७। ह्रस्वो नपुंसके प्रातिपदिकस्य।

क्लीबे प्रातिपदिकस्य ह्रस्वः स्यात्। अतिरि। अतिनु। ग्रामणि कुलम्। नेह। रमते कुलम्। काण्डीभूतं कुलम्। तिङव्यययोरलिङ्गत्वात्। नेह। वनाग्रम्। वनायेति। बहिरङ्गत्वाद् दीर्घस्य।

४८। गोस्त्रियोरुपसर्जनस्य।

गोशब्दान्तस्य स्त्रीप्रत्ययान्तस्य चोपसर्जनस्य ह्रस्वः स्यात्। चित्रगुः। स्त्री। निष्कौशाम्बिः। अतिखट्वः। उपसर्जनस्य किम्? राजकुमारी। स्त्रीति स्त्र्यधिकारविहितस्य ग्रहणान्नेह। अतितन्त्रीः। अतिश्रीः। अतिलक्ष्मीः।

(क) ईयसो बहुव्रीहौ प्रतिषेधः। बहुप्रेयसी राजा कुलं वा। ईयसश्चेति (५।४।१५६) कपो निषेधः। (19)

---

(19) अत्र भट्टोजिः :—"बहुप्रेयसी कुलम्। अत्र नपुंसकह्रस्वत्वं न। ईयसो बहुव्रीहेर्नेति ह्रस्वमात्रस्य प्रतिषेधादिति श्रीपतिपुरुषोत्तमविरूपाद्यः। अन्ये तूपसर्जनह्रस्व एव निषिध्यते। नपुंसकह्रस्वत्वं तु भवत्येव। बहुप्रेयसि बहुप्रेयसिनी इत्याहुः।"—इति (प्रौढ़मनोरमा, P. 160, Benares Edition).

४९ । लुक् तद्धितलुकि ।

स्त्रीप्रत्ययस्य लुक् स्यात् तद्धितलुकि सति । पञ्चशष्कुलिः । क्रीतार्थे ठञोऽध्यर्द्धेति (५।१।२८) लुक् । आमलकं फलम् । नित्यं वृद्धेति (४।३।१४४) मयट् । फले लुक् (४।३।१६३) ।

५० । इद् गोण्याः ।

तद्धितलुकि सति गोण्या इत् स्यात् । पञ्चगोणिः पटः । योगविभागात् पञ्चसूचिः ।

५१ । लुपि युक्तवद् व्यक्तिवचने ।

लुपि लुबर्थे युक्तवत् प्रकृत्यर्थवद् व्यक्तिवचने लिङ्गसंख्ये स्याताम् । वङ्गस्यापत्यानि बहूनि वङ्गाः । तेषां निवास (४।२।६९) इत्यणो जनपदे लुप् (४।२।८१) । वङ्गा जनपदः । पञ्चालाः । कुरवः । पुण्ड्राः । लुपि किम् ? लवणाल्लुक् (४।४।२४) । लवणः सूपः । लवणा यवागूः । अभिधेयस्यैव लिङ्गसंख्ये स्याताम् ।

(क) हरीतक्यादिषु व्यक्तिः । न वचनम् । हरीतक्या विकाराः फलानि हरीतक्यः फलानि । विकाराणो हरीतक्यादिभ्यश्चेति (४।३।१६७) लुप् ।

(ख) खलतिकादिषु वचनम् । न व्यक्तिः । खलतिकस्य गिरेरदूरभवानि खलतिकं वनानि । अदूरभवश्चेत्यणो (४।२।७०) वरणादिभ्यश्चेति (४।२।८२) लुप् ।

(ग) समास उत्तरपदस्यैव बहुवचनविषयस्य युक्तवद्भाव इति भाष्यम् । (20) । मथुरा च पञ्चालाश्च मथुरापञ्चालाः । उत्तरपदस्यैवेति किम् ? पञ्चालमथुरे ।

५२ । विशेषणानाञ्चाजातेः ।

लुबर्थस्य विशेषणानाञ्च तथा स्यात् । अङ्गाः सम्पन्ना बहुक्षीरघृताः । अजातेः किम् ? वङ्गा जनपदो रमणीयः ।

---

(20) एतदप्यत्रैव सूत्रे वार्त्तिकरूपेण विन्यस्तस्य वाक्यस्य विवरणम् । वार्त्तिकञ्चैतत् समासे उत्तरपदस्य बहुवचनस्य लुप इति ।

(क) मनुष्यलुपि प्रतिषेधः। चञ्चा मनुष्यो दर्शनीयः। चञ्चा दर्शनीयेति मा भूत्। इवे प्रतिकृतौ (५।३।९६) कन्। तस्य लुम् मनुष्य इति (५।३।९८) लुप्।

५३। तदशिष्यं संज्ञाप्रमाणत्वात्।

तदिति व्यक्तिवचनलक्षणं न कर्त्तव्यम्। संज्ञाप्रमाणत्वात्। संज्ञाशब्दा एतेऽङ्गा वङ्गा वरणा इति। नानालिङ्गसंख्या एव प्रमाणं यथापो दारा गृहा वर्षाः।

५४। लुब् योगाप्रख्यानात्।

जनपदे लुप् (४।२।८१) वरणादिभ्यश्चेति (४।२।८२) लुबप्यशिष्यः। योगस्य सम्बन्धस्यानुपलब्धेः। नहि पञ्चालानां स्वामित्वात् पञ्चाला जनपदः। वृक्षयोगाद्वरणा ग्रामः।

५५। योगप्रमाणे च तदभावेऽदर्शनं स्यात्।

यदि हि वृक्षादियोगः प्रमाणं स्यात् तदा वृक्षाद्यभावे वरणपञ्चालादेरप्रयोगः स्याद् यथा दण्डसम्बन्धाभावे दण्डिनः। तस्माद्रूढिरियम्।

५६। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्।

प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः, क्रियाप्रधानमाख्यातं, साधनप्रधानः कृदन्त, उत्तरपदार्थप्रधान स्तत्पुरुष इत्यादि वचनं, प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति च पूर्वाचार्य्यपरिभाषितं न वक्तव्यम्। कुतः? अर्थस्य शास्त्रादन्यो लोकस्तत्प्रमाणत्वात्। अनधीतव्याकरणोऽपि राजपुरुषमौपगवञ्चानयेत्युक्तो राजविशिष्टं पुरुषमुपगुविशिष्टञ्चापत्यमानयति।

५७। कालोपसर्जने च तुल्यम्।

काल उपसर्जनञ्च न परिभाष्यम्। यतः पूर्वेण तुल्यम्। लोकत एवावगतेरिति प्रत्याख्यानम्। माथुर्य्यां (21) तु हस्तावशिष्यग्रहणमापादमनुवर्त्तते।

---

(21) What work is referred to by this माथुरी वृत्ति? In the Rule तेन प्रोक्तम् (4. 3. 101) we have in the काशिका "प्रकर्षेणोक्तं प्रोक्तमित्युच्यते। न तु कृतम्। कृते ग्रन्थे (4. 3. 113) इत्यनेन गतत्वात्। अन्येन कृता माथुरेण प्रोक्ता माथुरी वृत्तिः।" माथुरेण means here

५८ । जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ।

जात्यर्थं एको बहुवद्वा स्यात् । सम्पन्नो यवः सम्पन्ना यवा वा । एकस्मिन् किम् ? सम्पन्नौ व्रीहियवौ । संख्याप्रयोगे प्रतिषेधः । एको व्रीहिः सम्पन्नः सुभिक्षकरः ।

५९ । अस्मदो द्वयोश्च ।

अस्मद एकत्वे द्वित्वे च बहुवचनं वा स्यात् । अहं करोमि वयं कुर्मो वा । आवां कुर्वो वयं कुर्मो वा । व्यवस्थितविभाषया सविशेषणानां प्रतिषेधः । अहं पटुर्ब्रवीमि । आवां पटुतरौ छात्रौ ब्रूवः (22) । युष्मदि गुरावेकेषामिति जयादित्यः । त्वं गुरु यूयं गुरवः ।

६० । फल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे ।

फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च नक्षत्रे बहुवचनं वा स्यात् । पूर्वे फल्गुन्यौ पूर्वाःफल्गुन्यो वा । पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदा वा । नक्षत्रे किम् ? फल्गुन्यौ माणविके ।

६१ । छन्दसि पुनर्वस्वोरेकवचनम् ।

६२ । विशाखयोश्च ।

छन्दःसूत्रद्वयम् ।

६३ । तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ।

तिष्य एकः पुनर्वसू द्वौ । तेषां नक्षत्रद्वन्द्वे बहुवचने प्राप्ते द्विवचनं विधीयते । उदितौ तिष्यपुनर्वसू । अर्थग्रहणात् सिध्यपुनर्वसू । बहुवचनस्य किम् ? इदं तिष्यपुनर्वसु । एतदेव ज्ञापकं सर्वो द्वन्द्वो विभाषैकवद् भवतीति (23) । उक्तः संख्यातिदेशः ।

---

according to the न्यास and पदमञ्जरी, मधुरार्था भवेन । But this one probably is not the माधुरी वृत्ति spoken of by पुरुषोत्तम ।

(22) कथं वयं तत्त्वान्वेषात् मधुकर हता त्वं खलु कृतीति शाकुन्तले, एते वयममी दाराः कन्येयं कुलजीवितमिति कुमारसम्भवे, वयं क्व वर्णाश्रमरक्षणोचिता इति भारवौ, त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इति भर्तृहरिशतके च ? न च विधेयोऽर्थो विशेषणमित्यतिदेशो भवत्वेवेत्याहुः ।

(23) सर्वो द्वन्द्वो विभाषैकवद्भवति is a परिभाषा, numbered 36, in the परिभाषापाठ which

६४। सरूपाणामेकशेष एकविभक्तौ।

तुल्यरूपाणामेकोऽवशिष्यते। वृक्षश्च वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः।

सरूपसमुदायाद्धि विभक्तिर्या विधीयते।
एकस्तत्रार्थवान् सिद्धः समुदायस्य वाचकः॥ १॥

रूपग्रहणादर्थभेदेऽपि भवति। व्रीहिश्च माषः। मानश्च माषः। मूर्खश्च माषः। माषाः। "पादा रश्म्यङ्घ्रितुर्य्यांशाः।" एकविभक्तौ किम्? विप्राभ्यां कृतं विप्राभ्यां देहि।

(क) समानार्थानाञ्च भिन्नरूपाणां क्वचिदेकशेषो वक्तव्यः। वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वा।

६५। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः।

यूना सह वचने वृद्धः शिष्यते। युवा निवर्त्तते। वृद्धयुवप्रत्ययलक्षण एव चेद्विशेषः। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। नेह। गार्ग्यवात्स्यायनौ। अपत्यमन्तर्हितं वृद्धमुच्यते (24)।

६६। स्त्री पुंवच्च।

यूना सह वचने वृद्धा स्त्री शिष्यते पुंवच्चास्यार्थः स्यात्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। दाक्षी च दाक्षायणश्च दाक्षी। वात्सी च वात्स्यायनश्च वात्स्यौ। नेह। गार्गीवात्स्यायनौ। दाक्षीवात्स्यायनौ।

६७। पुमान् स्त्रिया।

स्त्रिया सहोक्तौ पुमान् शिष्यते। देवश्च देवी च देवौ। असुरौ।

---

contains all such *Paribhashas* or Sutras composed by the Ante-Panini Grammarians. Only those of them which have been applied to and accepted by the भाष्यकार, are now taken as authoritative by the Grammarians of the Panini School. The Paribhashas are explained by सीरदेव in his परिभाषावृत्ति, पुरुषोत्तम in his ललितपरिभाषा (वा परिभाषावृत्ति) and नागोजिभट्ट in his परिभाषेन्दुशेखर।

(24) अपत्यमन्तर्हितं वृद्धम् is a Sutra of the ante-Panini Grammarians. The word वृद्ध here is what is meant in the अष्टाध्यायी by the term गोत्र, that is, पौत्रप्रभृति अपत्यम्, viz :—अपत्यं पौत्रप्रभृति गोत्रम् (४।१।१६२)।

आखरो । कुक्कुटो । मयूरो । गौरयं गौरियमिती गावौ । शिवश्च शिवा च शिवौ । "वन्दयति शिवयोः शरीरयोगम्" । तत्रश्चत्वेदित्येव । कुक्कुटमयूर्यौ ।

६८ । भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ।

स्वस्रा भ्राता दुहित्रा पुत्रश्च शिष्यते । भ्राता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ ।

६९ । नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ।

अनपुंसकेन सहोक्तौ नपुंसकं शिष्यते । एकवच्चास्य वा स्यात्तिल्लक्षण एव चेद्विशेषः । शुक्लः प्रावारः शुक्ला शाटी शुक्लं वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि वा । अनपुंसकेन किम् ? शुक्लञ्च शुक्लञ्च शुक्लञ्च शुक्लानि । एकवन्न भवति ।

७० । पिता मात्रा ।

७१ । श्वशुरः श्वश्र्वाः ।

मातृश्वश्रूभ्यां सहोक्तौ पितृश्वशुरौ वा शिष्येते । "जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ" । मातापितरौ च । श्वशुरौ श्वश्रूश्वशुरौ च ।

७२ । त्यदादीनि सर्वैर्नित्यम् ।

सर्वैरिति त्यदादिभिरन्यैश्च सहोक्तौ त्यदादीनि शिष्यन्ते । स च देवदत्तश्च तौ । यश्च विप्रश्च यौ । त्यदादीनाञ्च यद् यत् परं तत् तच्छिष्यत इत्येके । स च यश्च यौ । यश्च कश्च कौ । स च त्वञ्च युवाम् । स च त्वञ्चाहञ्च वयम् ।

७३ । ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ।

ग्राम्याणामतरुणपशूनां सङ्घेषु सहोक्तौ स्त्री शिष्यते । गाव इमाः । अजा इमाः । संघेषु किम् ? एतौ गावौ । अतरुणेषु किम् ? वत्सा इमे । अनेकशफेष्वभिधानान्नेष्ट । अश्वा इमे । गर्दभा इमे ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ प्रथमाध्यायस्य द्वितीयः पादः ॥ १।२ ॥ समाप्तश्च कृत्पादः ।

अथ

श्रीपुरुषोत्तमदेवकृता

भाषावृत्तिः।

प्रथमोऽध्यायः। तृतीयः पादः।

१। भूवादयो धातवः।

भूवादयो धातुसंज्ञकाः स्युः। भू। भवति। एधँ। एधते।

२। उपदेशेऽजनुनासिक इत्।

उपदिश्यत इत्युपदेशो धात्वादिः (25)। तत्रानुनासिकविशिष्टोऽजित्-संज्ञकः स्यात्। एधँ। स्पर्द्धँ। प्रतिज्ञानुनासिक्याः पाणिनीयाः। तेनेत्वापि स्यात्। रगेँ। लगेँ।

(क) इर उपसंख्यानं कर्त्तव्यम्। भिदिर्। अभिदत्। इरितो वेति (३।१।५७) च्लेरङ्।

३। हलन्त्यम्।

उपदेशेऽन्त्यं हलित्संज्ञं स्यात्। अइउण्। डुकृञ्। नदट्। सन्। पुक्। अनङ्।

४। न विभक्तौ तुस्माः।

विभक्तेस्तवर्गसकारमकारा इत्संज्ञा न स्युः। इध्यात्। पचेरन्। यस्मिन्। पचतः। अपचम्।

५। आदिर्ञिटुडवः।

इदित्येव। आदिभूता ञिटुडुकारा इत्संज्ञकाः स्युः। ञिमिदा मित्तः। टुनदि नन्दथुः। डुपचँष् पक्त्रिमम्।

---

(25) धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्। आगमाः प्रत्ययादेशा उपदेशाः प्रकीर्त्तिताः ॥ १ ॥ इत्याहुः। अत्र वाक्यं वार्त्तिकमित्यर्थः। लिङ्गानुशासनस्य तु प्रकृतेऽनुपयोगः।—मतान्तरे शास्त्रवाक्यानि उपदेशः। आद्यं वाक्यं वा। वस्तुतस्तूपदेशो धातुपाठप्रातिपदिकपाठौ सूत्रवार्त्तिके च। एते हि शब्दा उपदिश्यन्ते।

६। षः प्रत्ययस्य।

प्रत्ययस्यादिः षकार इत्संज्ञकः स्यात्। ष्वुन्। नर्त्तकी। खनकी। रजकी।

७। चुटू।

चवर्गटवर्गौ प्रत्ययस्यादिभूताविन्संज्ञकौ स्याताम्। च्फञ्। कौञ्जायन्यः। जस्। ब्राह्मणाः। वृक्षाः। ञ्यः। शाण्डिक्यः। टः। कुरुचरी। डः। उपसरजः। अन्नाण्णः (४/४।८५)। आन्नः। कथं केशचुञ्चुः केशचणः? चित्कार्य्याभावात् (26)। यादौ चुञ्चुप्चणपौ लुप्तनिर्दिष्टयकाराविति (27) भाष्यम्।

८। लशक्वतद्धिते।

लकारशकारकवर्गास्तद्धितवर्जिताः प्रत्ययस्यादिभूता इत्संज्ञकाः स्युः। ल्यप्। विजित्य। ल्युट्। चयनम्। शप्। भवति। क्तः। भूतम्। खच्। प्रियंवदः। घुरच्। भासुरम्। भङ्गुरम्। ङे। पटवे। अतद्धिते किम्? अवेः कः (५।४।२८)। अविकः।

९। तस्य लोपः।

यस्येत्संज्ञा विहिता तस्य लोपः स्यात्। तथैवोदाहृतम्।

१०। यथासंख्यमनुदेशः समानाम्।

समानां समसंख्यानामुद्देशिनामनुदेशिनाञ्चानुक्रमेणानुदेशः स्यात्। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (३।१।१३४)। नन्दनः। ग्राही। पचः।

---

(26) एतद्धि प्रयोजनाभावान्नेत्संज्ञेति व्यवस्थया। न हि प्रयोजनाभावे कस्यापीत्संज्ञा भवति। इदर्थाभावात् सिद्धमिति (१।३।१, वा) वार्त्तिककारवचनात्। There is a वार्त्तिक in 1. 3. 3 and again in 1. 3. 7 (viz :—इदर्थाभावात् सिद्धम्) by which कात्यायन prohibits the इत्संज्ञा of a letter if its elision do not serve any object and be thus unnecessary.

(27) पूर्वं निर्दिष्टः पश्चाल्लुप्त इति कर्मधारयः। राजदन्तादित्वात् पूर्वकालवाचिनः (२।२।३१) परनिपातः। लुप्तोऽयमिति ज्ञातो लुप्तनिर्दिष्ट इत्यर्थः। ततो यकार इत्यनेन बहुव्रीहिः। लोपो व्योर्वली-(६।१।६६) त्यनेन यकारस्य लोपः।

११। स्वरितेनाधिकारः।

स्वरितो नाम वर्णधर्मः (28) कश्चित्। तेन चिह्नेनाधिकारो ज्ञेयः। यथाऽऽत्मनेपदम् (१।३।१२)। प्रत्ययः (३।१।१)। अङ्गस्य (६।४।१)।

१२। अनुदात्तङित आत्मनेपदम्।

अनुदात्तेतो धातोर्ङितश्चात्मनेपदं स्यात्। आस्ते। वर्धते। ङितः। सूयते। शेते। इंसायते। प्लवमानः। पवमानः। शयानः। उपदेश इत्येव। ङित्त्वातिदेशे मा भूत्। उच्चुकुटिषति।

१३। भावकर्मणोः।

सर्वधातुभ्यो भावे कर्मणि चात्मनेपदं स्यात्। भावे। स्थीयते त्वया। विक्रीयते मया। कर्मणि। क्रियते कटः।

१४। कर्त्तरि कर्मव्यतिहारे।

क्रियाविनिमये धातोरात्मनेपदं स्यात् कर्त्तरि। व्यतिभवते श्रीः पद्मानाम्। व्यतिभवमानाः पुरुषाः। व्यतिलुनते वीराः। (29)

१५। न गतिहिंसार्थेभ्यः।

एभ्यः क्रियाविनिमये धातोर्नास्ति तत्। व्यतिगच्छन्ति। व्यतिहिंसन्ति।

(क) हसादीनाञ्च। व्यतिहसन्ति। व्यतिजल्पेयुः। कर्त्तरीत्येव। व्यतिगम्यन्ते ग्रामाः।

(ख) हरतेरप्रतिषेधः। संप्रहरन्ते योधाः।

१६। इतरेतरान्योन्योपपदाच्च।

आभ्यां युक्ताद् धातोर्नास्ति तत्। इतरेतरस्य व्यतिलुनन्ति। अन्योन्यस्य व्यतिपिबन्ति जलम्। चकारात् परस्परस्य व्यतिलुनन्ति।

---

(28) "नतु तस्य प्रयोगोऽस्ति। केवलमनुवर्त्तमानस्य पयिकस्येव वर्त्म दर्शयित्वा उदास्ते"—इति भाषाद्यर्थविवृती हृष्टिधरः। स्वरितो नाम स्वरदोषो ध्वनिविशेष इति क्वचित्। तत्र स्वरभिद इत्यर्थः। दोषाक्षो रजनिःप्रोक्ता भेददूषणयोः पुमानिति विश्वः। मतान्तरे उच्चारणदोष इत्यर्थः। अत्र नागोजिभट्टः—"स्वरितत्वञ्चेदं दोषविशेषरूपमनुभवसाधारणम्। स्वरूपमधिक्रियमाणपदघटकान्त्यनिष्ठं वा। तथानुनासिक्यवत् प्रतिज्ञामात्रम्"। इति। (29) विरोधाधिक्येनान्योन्यं छिन्दन्तीत्यर्थः।

१७ । नेर्विशः ।

निपूर्वाद् विशतेरात्मनेपदं स्यात् । निविशते । कथं मधुनि विशन्ति भ्रमराः ? लाक्षणिकत्वात् ।

१८ । परिव्यवेभ्यः क्रियः ।

एभ्यः क्रियस्तत् स्यात् । परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

१९ । विपराभ्याञ्जेः ।

आभ्याञ्जे स्तत् स्यात् । विजयते । पराजयते ।

२० । आङो दोऽनास्यविहरणे ।

आङो दाञ स्तत् स्यात् । आदत्ते धनम् । अनास्यविहरणे किम् ? व्याददाति मुखम् । कथं "किं व्याददत्से विहग वदनम्" ? कर्त्रभिप्राये भविष्यति ।

२१ । क्रीडोऽनुसंपरिभ्यश्च ।

एभ्य आङश्च क्रीड़ते स्तत् स्यात् । अनुक्रीड़ते । संक्रीड़ते । परि-क्रीड़ते । आक्रीड़ते ।

(क) समोऽकूजनेऽभिधानाच्चेष्ट । संक्रीड़न्ति रथाः ।

(ख) आगमेः क्षमायामात्मनेपदम् । आगमयस्व तावन्माचपलः । मा त्वरिष्ठा इत्यर्थः ।

(ग) शिक्षे र्जिज्ञासायाम् । कलासु शिक्षते । विद्यासु शिक्षते । शकेः सनि रूपम् ।

(घ) आशिष्येव नाथः । सर्पिषो नाथते मधुः ।

(ङ) हरते र्गतताच्छील्ये । गतविधप्रकारा सुखार्था इति भर्तृहरिः (30) । साहश्यमीक्षने कृञ स्तत स्यात् । अश्वमिमनुहरते नरः । पैतृकमश्वा अनुहरन्ते । गतिताच्छील्य इति तु न्यासः ।

(च) किरते र्हर्षजीविकाकुलायकरणेषु । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्ष्यार्थी । अपस्किरते श्वाऽश्रयार्थी ।

---

(३०) भाषावृत्तिचयस्य रचयिता ।

(छ) आङि नुप्रच्छ्योः। आनुते शिवा। आशास्यतीत्यर्थः। आपृच्छते। "आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्"।

(ज) शप उपलम्भने। प्रियायै शपते कामुकः।

२२। समवप्रविभ्यः स्थः।

एभ्यस्तिष्ठते स्तत् स्यात्। सन्तिष्ठते। अवतिष्ठते। प्रतिष्ठते। वितिष्ठमानः।

(क) आङः स्वःप्रतिज्ञाने। वस्तु अचिकमातिष्ठन्ते बौद्धाः।

२३। प्रकाशनस्थेयाख्ययोश्च।

अनयोः स्थः स्तत् स्यात्। धनिभ्यस्तिष्ठते वेश्या। स्वं प्रकाशयतीत्यर्थः। नृपतौ तिष्ठते जनः। तं स्थेयं करोतीत्यर्थः।

२४। उदोऽनूर्ध्वकर्मणि।

उदस्थः स्तत् स्यादनूर्ध्वचेष्टायाम्। स्वार्थेमुत्तिष्ठते। मुक्तावुत्तिष्ठते जनः। तत्रोत्सहत इत्यर्थः। अनूर्ध्वग्रहणं किम्? "अनेन पीठादुदतिष्ठदच्युतः।"

२५। उपान्मन्त्रकरणे।

उपात् स्थः स्तत् स्यान् मन्त्रश्चेत् करणम्। गायत्र्या सूर्यमुपतिष्ठते ब्राह्मणः।

(क) उपाद्देवपूजासङ्गतकरणमित्रकरणपथिष्विति वक्तव्यम्। विप्रोऽर्कमुपतिष्ठते। गङ्गा समुद्रमुपतिष्ठते। राजा राजानमुपतिष्ठते। अयं पन्थाः कपित्थीमुपतिष्ठते।

(ख) वा लिप्सायाम्। अर्थी दातारमुपतिष्ठते उपतिष्ठति वा।

२६। अकर्मकाच्च।

उपात् स्थः स्तत् स्यात्। यावद्भोजनमुपतिष्ठते। अकर्मकाद् विधिवतुः-सूत्रयाम्।

२७। उद्विभ्यां तपः।

आभ्यां तपस्तत् स्यात्। उत्तपते वितपते रविः। अकर्मकादित्येव। उत्तपति सुवर्णं सुवर्णकारः। (क) स्वाङ्गकर्मकाच्च। वितपते स्वं पृष्ठम्।

२८। आङो यमहनः।

तत् स्यात्। आयच्छते। व्यायच्छमानः। आहते। स्वाङ्गकर्मकाच्च। आहते स्वं वक्षः।

२९। समो गम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्यः (31)।

संपूर्वाद् गमादेस्तत् स्यात्। सङ्गच्छते। सञ्जग्मे। समृच्छते। समृच्छिष्यते। संपृच्छते। संस्वरते। ऋ। समृच्छते। समियृते। संशृणुते। विद ज्ञाने। संवित्ते। अकर्मकादित्येव। वाढं सङ्गच्छति।

(क) दृशेश्चेति वक्तव्यम्। सम्पश्यते।

३०। निसमुपविभ्यो ह्वः।

एभ्यो ह्वेञस्तत् स्यात्। निह्वयते त्वाम्। संह्वयते सखीम्। उपह्वयते। विह्वयते।

(क) उपसर्गादस्यत्यूह्योर्वावचनम्। निरस्यति निरस्यते। समूहन् समूहमानः।

३१। स्पर्द्धायामाङः।

आङो ह्वेञस्तत् स्यात् स्पर्द्धा चेत्। मल्लो मल्लमाह्वयते।

३२। गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः।

एष्वर्थेषु कृञस्तत् स्यात्। हिंसासूचनं गन्धनम्। उदाकुरुते। भर्त्सनमवक्षेपणम्। उत्कुरुते शत्रून्। सेवने नृपं प्रकुरुते। साहसे परस्त्रीं

(31) The real Sutra here is समो गम्यृच्छिभ्याम् and there are three *Vartikas* attached to it; viz :—(क) समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम्। (ख) अर्त्तिश्रुदृशिभ्यश्च and (ग) उपसर्गादस्यत्यूह्योर्वावचनम्। But जयादित्य interpolated the rule with the *Vartikas* as stated in the Text. The other Buddhist grammarians (न्यासकार, मैत्रेयरक्षित, पुरुषोत्तमदेव &c) too followed जयादित्य। समो गम्यृच्छिभ्यामित्येतावानेवार्षः पाठः। अन्यानामपि पारायणे धर्मं इति त्वनादियमाणैः स च वार्त्तिकप्रक्षेपादिना सौगतैर्विकृतः। वेदबाह्यत्वेन तेषां निरङ्कुशत्वात्। पारायणभङ्गाद् धर्मक्षतिभयमिव पाठस्यार्षत्वं सम्प्रदायानुगतत्वादिकमपि न तैः परिगणितम्। एवमन्यत्रापि सूत्रभङ्गो बोद्धव्यम्।

प्रकुरुते। धर्माद्युपयोगि शतं प्रकुरुते। प्रतियत्ने षष्ठी सुट् च। गुणानामुपस्कुरुते। प्रकथने सप्तमं प्रकुरुते।

३३। अधेः प्रसहने।

प्रसहनमभिभवः। उपेक्षा वा। तत्राधेः क्रञ स्तत् स्यात्। तमधिचक्रे। "भवाद्दृशाश्चेदधिकुर्वते रतिम्"।

३४। वेः शब्दकर्मणः।

वेः कञः शब्दकर्मकात् तत् स्यात्। क्रोष्टा विकुरुते स्वरान्।

३५। अकर्मकाच्च।

अकर्मकाद्वेः क्रञ स्तत् स्यात्। विकुर्वतेच्छात्राः। यथेष्टं चेष्टन्त इत्यर्थः।

३६। सम्माननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः।

एष्वर्थेषु विशेषणेषु नीञस्तत् स्यात्। शास्त्रार्थं नयते। उपपत्तिभिः सम्मानयति। वालकमुपनयते। उत्सञ्जयत्युत्क्षिपति। शिष्यमुपनयते। आत्मवदाचार्य्यीकरोति। नयतेऽर्थान् धीरः। ज्ञानविषयीकरोति। कर्मकरानुपनयते। भृत्या समीपीकरोति। विगणनमृणादिपरिशोधनम्। मद्राः कारं विनयन्ते। व्यये। शतं विनयते धर्मादौ।

३७। कर्तृस्थे चाशरीरे कर्मणि।

अशरीरे कर्मणि सति नीञस्तत् स्यात्। क्रोधं विनयते। मन्युं विनयते। कर्तृस्थे किम्? गुरोः कोपं विनयति। अशरीरे किम्? गडुं विनयति। मण्डूकशुत्वा वेरित्येव। क्रोधं समुन्नयति। "अपनय मानिनि मानम्"।

३८। वृत्तिसर्गतायनेषु क्रमः।

अप्रतिघातोत्साहस्फीतत्वेषु क्रमे स्तत् स्यात्। मन्त्रेऽस्य क्रमते बुद्धिः। युद्धाय क्रमते भटः। प्राज्ञे शास्त्राणि क्रमन्ते।

३९। उपपराभ्याम्।

आभ्यामेवोपसृष्टात् क्रमेरनन्तरसूत्रेणात्मनेपदं स्यात्। मन्त्रेऽस्योपक्रमते बुद्धिः। युद्धाय पराक्रमते भट इत्यादि।

४० । आङ उद्गमने ।

आङः क्रमे तङ् स्यात् । आक्रमते भानुः । ज्योतिरुद्गमनेऽभिधाना-देव । आक्रामति धूमो हर्म्यतलम् । उद्गमने किम् ? आक्रामति गिरिं रविः । अवष्टभ्नातीत्यर्थः ।

४१ । वेः पादविहरणे ।

वेः क्रमेः पादविक्षेपे तङ् स्यात् । सुष्ठु विक्रमतेऽश्वः ।

४२ । प्रोपाभ्यां समर्थाभ्याम् ।

आदिकर्मणि समर्थाभ्यां प्रोपाभ्यां क्रमे तङ् स्यात् । प्रक्रमते भोक्तुम् । उपक्रमते श्रोतुम् ।

४३ । अनुपसर्गाद्वा ।

अप्रादेः क्रमेस्तङ् वा स्यात् । क्रमते क्रामति वा ।

४४ । अपह्नवे ज्ञः ।

निह्नुतौ जानातेस्तङ् स्यात् । शतमपजानीते ।

४५ । अकर्मकाच्च ।

ज्ञोऽकर्मकात् तङ् स्यात् । सर्पिषो जानीते । करणे षष्ठी ।

४६ । संप्रतिभ्यामनाध्याने ।

आभ्यां ज्ञस्तङ् स्यात् । गां सञ्जानीते । कन्यां दातुं प्रतिजानीते । अनाध्याने किम् ? स्मृतौ मा भूत् । मातुः संजानाति । स्मरतीत्यर्थः ।

४७ । भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ।

एष्वर्थेषु विशेषणेषु वदेस्तङ् स्यात् । भासनं शोभा । वदते चार्वी लोकायते । वदमानः । उपसम्भाषोपसान्त्वनम् । बालकमुपवदते । ज्ञाने । शास्त्रे वदते । यत्ने । गेहे वदते । विविधमतौ । क्षेत्रे विवदन्ते कर्षकाः । उपमन्त्रणं रहः पृच्छा । परस्त्रीमुपवदते ।

४८ । व्यक्तवाचां समुच्चारणे ।

मनुष्याणां सहोक्तौ वदेस्तङ् स्यात् । सम्प्रवदन्ते विप्राः । व्यक्तवाचामिति

किम् ? "वरतनु संप्रवदन्ति कुक्कुटाः"। सह्योक्तौ किम् ? क्रमेण वदन्ति च्छात्राः।

४९। अनोरकर्मकात्।

अनोर्वदेस्तत् स्यात्। अनुवदते कठः कलापस्य। तद्वद्वदतीत्यर्थः। अकर्मकात् किम् ? पूर्वोक्तमनुवदति।

५०। विभाषा विप्रलापे।

विप्रलापात्मके सह्योच्चारणे वदेस्तद् वा स्यात्। विप्रवदन्ते गणका विप्रवदन्ति वा। सह्योक्तौ किम् ? क्रमेण वदन्ति च्छात्राः।

५१। अवाद् ग्रः।

अवाद् गिरतेस्तत् स्यात्। अवगिरते मांसम्। अवगिरन्ते माषम्।

५२। समः प्रतिज्ञाने।

सङ्गिरतेः प्रतिज्ञानार्थात् तत् स्यात्। कार्य्यं शब्दं संगिरते।

५३। उदश्चरः सकर्मकात्।

उच्चरतेस्तत् स्यात्। वनानुच्चरते रजः। उत्क्रम्य गच्छतीत्यर्थः। सकर्मकात् किम् ? शङ्खध्वनिरुदचरत्। नाद उच्चरति।

५४। समस्तृतीयायुक्तात्।

तृतीयान्तेन योगे सञ्चरतेस्तत् स्यात्। रथेन सञ्चरते विद्याधरः।

५५। दाणश्च सा चेच्चतुर्थ्यर्थे।

अशिष्टव्यवहारे चतुर्थ्यर्थे तृतीया वाच्या। तद्युक्तात् सम्प्रदाणस्तत् स्यात्। दास्या मालां संप्रयच्छते कामुकः। दास्यै मालां ददातीत्यर्थः।

५६। उपाद् यमः स्वकरणे।

उपपूर्वाद् यमेः स्वीकारे तत् स्यात्। कन्यामुपयच्छते। "उपायंस्त महास्त्राणि।" "उपायंसत नासवम्"। न स्वीचक्रुरित्यर्थः।

५७ । ज्ञाश्रुस्मृदृशां सनः ।

सन्नन्तानामेषां तत् स्यात् । धर्मं जिज्ञासते । गुरुं शुश्रूषते । सुस्मूर्षते । दिदृक्षते ।

५८ । नानोर्ज्ञः ।

अनोर्ज्ञस्तन् नास्ति । पुत्रमनुजिज्ञासति ।

५९ । प्रत्याङ्भ्यां श्रुवः ।

सन्नन्तादाभ्यां श्रुवस्तन् नास्ति । प्रतिशुश्रूषति । आशुश्रूषति ।

६० । शदेः शितः ।

शदेः शिन्निमित्तादात्मनेपदं स्यात् । शीयते । शितः किम् ? शत्स्यति ।

६१ । म्रियतेर्लुङ्लिङोश्च ।

लुङ्लिङोरेव म्रियतेः शितश्च तत् स्यात् । अमृत । मृषीष्ट । म्रियते । नियमः किम् ? मरिष्यति । ममार । कर्त्तरि नियमान् "मन्ने पतङ्गवहीरैः ।"

६२ । पूर्ववत् सनः ।

असन्नन्तवत् सन्नन्तादात्मनेपदं स्यात् । आस्ते आसिसिषते । विजयते विजिगीषते । पचति पचते पिपक्षति पिपक्षते ।

६३ । आमप्रत्ययवत् कृञोऽनुप्रयोगस्य ।

आम्प्रत्ययान्तधातुवदनुप्रयुक्तस्य कृञ तत् स्यात् । ईहते ईहाञ्चक्रे ।

६४ । प्रोपाभ्यां युजेरयज्ञपात्रेषु ।

प्रोपाभ्यां युजे तत् स्यात् । प्रयुङ्क्ते । उपयुङ्क्ते । नेह । यज्ञपात्राणि प्रयुनक्ति धीरः ।

(क) स्वराद्यन्तोपसृष्टाद् युजेरिति वक्तव्यम् । उद्युङ्क्ते । नियुङ्क्ते । उपयुङ्क्ते । कथं केवलात् "प्रजासु वृत्तिं यमयुङ्क्त वेदितु"मिति ? कर्त्रभिप्राये भविष्यति । (32)

---

(32) स्वराद्यन्तोपसृष्टात् किम् ? नियुनक्ति । संयुनक्ति । दुर्युनक्ति ।

६५। समः क्ष्णुवः ।

संक्ष्णौते स्वत् स्वात्। संक्ष्णुतं शस्त्रम् ।

६६। भुजोऽनवने ।

तत् स्यात्। भुङ्क्ते। भुञ्जाते। अनवने किम्? भुनक्ति राजा पृथ्वीं। पालयतीत्यर्थः। भुजो भक्ष इति नोक्तम्। अनुभवेऽपि यथा स्यात्। सुखमनुभुङ्क्ते।

६७। णेरणौ यत् कर्म णौ चेत् स कर्त्ताऽनाध्याने ।

अकर्त्रभिप्रायार्थोऽयमारम्भः। ण्यन्तादात्मनेपदं स्यादण्यन्ते यत् कर्म णौ चेत् स कर्त्ता भवति। आरोहति करेणुं निषादी। "करेणुरारोहयते निषादिनम्"। पश्यन्ति भृत्या नृपम्। दर्शयते भृत्यान्नृपः। अनाध्याने किम्? स्मृतौ मा भूत्। स्मरति वनगुल्मं कोकिलः। स्मरयत्येनं वनगुल्मः स्वयमेव।

६८। भीस्म्योर्हेतुभये ।

ण्यन्तयो र्भीस्मिङो स्वत् स्यात्। मुण्डो भीषयते। जटिलो विस्मापयते। हेतुभये किम्? कुञ्चिकया भाययति। करणादत्र भयम्।

६९। गृधिवञ्च्योः प्रलम्भने ।

ण्यन्तयोर्गृधिवञ्च्योर्विसंवादने तत् स्यात्। शिशुं गर्धयते। शिशुं वञ्चयते। प्रलम्भने किम्? अहिं वञ्चयति बालः।

७०। लियः सम्माननशालीनीकरणयोश्च ।

लियो ण्यन्तात् पूजापरिभवयोः प्रलम्भने च तथा स्यात्। जटाभिरालापयते। श्येनो वर्त्तिकामुल्लापयते। शिशुमुल्लापयते। अन्यत्र कन्यामुल्लापयति।

७१। मिथ्योपपदात् कृञोऽभ्यासे ।

ण्यन्तात् कृञ स्वत् स्यात्। अभ्यासे पुनःपुनरावृत्तौ। पदं मिथ्या कारयते।

७२। स्वरितञितः कर्त्रभिप्राये क्रियाफले ।

स्वरितेतो धातोर्ञितश्चात्मनेपदं स्यात् कर्त्तारञ्चेत् क्रियाफलमभिप्रैति। पचते। यजते। ञितः। कुरुते। कण्डूयते। कर्त्रभिप्राये किम्? परार्थे

मा भूत् । पचति । करोति । यजति । कथं परार्थे विक्रीणीते प्रयुङ्क्त इत्यादि ? डुक्रीञ्दाञ्ज्ञेञ्क्षञ्भृञ्नीञ्युजां विशेषविधानात् ।

७३ । अपाद्वदः ।

तत् स्यात् । धान्यार्थी न्यायमपवदते । धनार्थी न्यायमपवदते ।

७४ । णिचश्च ।

णिजन्तात् तथा स्यात् । कारयते । पाचयते । परार्थे कारयति । पाचयति ।

७५ । समुदाङ्भ्यो यमोऽग्रन्थे ।

एभ्यो यमस्तत् स्यात् । इन्द्रियाणि संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । आयंस्त पादम् । अग्रन्थविषये किम् ? चिकित्सा मुद्यच्छति वैद्यः ।

७६ । अनुपसर्गाज्ज्ञः ।

तथैव स्यात् । गां जानीते । परार्थे गां जानाति । कथं सर्पिषो जानीत इति ? अकर्मकाच्चेति (१।३।४५) परार्थे विधानात् ।

७७ । विभाषोपपदेन प्रतीयमाने ।

समीपपदावगते कर्त्रभिप्राये तद् वा स्यात् । स्वं कटं कुरुते करोति वा । एवं पञ्चसूत्र्यामुन्नेयम् । उक्तं कर्त्रभिप्राये । अथ परस्मैपदमेकादशभिः सूत्रैः ।

७८ । शेषात् कर्त्तरि परस्मैपदम् ।

आत्मनेपदहीनाद् धातोः कर्त्तरि परस्मैपदं स्यात् । याति । वाति । प्रविशति । शेषात् किम् ? रोचते ।

७९ । अनुपराभ्यां कृञः ।

एभ्यः कृञः स्वार्थेऽपि परस्मैपदं स्यात् । अनुकरोति । पराकरोति ।

८० । अभिप्रत्यतिभ्यः क्षिपः ।

एभ्यः क्षिपस्तत् स्यात् । अभिक्षिपति । प्रतिक्षिपति । अतिक्षिपति ।

८१। प्राद्वहः।

प्रवहतेस्तथा स्यात्। प्रवहति।

८२। परेर्मृषः।

तत् स्यात्। परिमृष्यति।

८३। व्याङ्परिभ्यो रमः।

एभ्यो रमेस्तत् स्यात्। विरमति। व्यरंसीत्। आरमति। परिरमति। एभ्यः किम्? अभिरमते।

८४। उपाच्च।

उपाद्रमेस्तत् स्यात्। देवदत्तमुपरमति। ण्यर्थोऽत्र गम्यते।

८५। विभाषाऽकर्मकात्।

अकर्मकादुपरमतेस्तथा स्यात्। भोजनादुपरमति उपरमते वा। अत्र णिचश्चेति (१।३।७४) प्राप्ते बाधकत्वयमाच।

८६। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः।

बुधादेर्ण्यन्तात् परस्मैपदं स्यात्। बोधयति पद्मम्। योधयति काष्ठम्। नाशयति पापम्। जनयति सुखम्। अध्यापयति शिष्यम्। प्रावयत्यश्वान् वीरः। द्रावयति लौहम्। स्रावयति कुण्डीम।

८७। निगरणचलनार्थेभ्यश्च।

भक्षणकम्पनार्थेभ्यो ण्यन्तेभ्यस्तत् स्यात्। आशयति। भोजयति। चलयति। कम्पयति शाखां वातः।

(वा) अदेः प्रतिषेधः। आदयतेऽन्नं पुत्रेण पिता।

८८। अणावकर्मकाच्चित्तवत्कर्तृकात्।

अण्यन्ते यो धातुरकर्मकश्चित्तवत्कर्तृकश्च ततो ण्यन्तात् परस्मैपदं स्यात्। आस्ते विप्रः। आसयति विप्रम्। शाययति मित्रम्। चित्तवत्कर्तृकात् किम्? शोषयति व्रीहीनातपः। कर्तरीत्येव। आस्यते विप्रो भक्ता।

८९ । न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ।

एषामनन्तरसूत्राभ्यां परस्मैपदं नास्ति । ततस्तङावेव स्याताम् । पाययते घृतम् । दमयते शत्रून् । आयामयते । आयासयते । आयासयमानः । परिमोहयते । रोचयते । नर्त्तयते । वादयते । वासयते । अकर्त्रभिप्राये तु दमयति गजम् । नर्त्तयति भुजम् । भिक्षा वासयति ।

(क) धेट उपसंख्यानं कर्त्तव्यम् । धापयते शिशुम् ।

९० । वा क्यषः ।

क्यषन्तादात्मनेपदं वा स्यात् । लोहितायति लोहितायते वा ।

९१ । द्युद्भ्यो लुङि ।

द्युतादेर्लुङ्यात्मनेपदं वा स्यात् । व्यद्युतद् व्यद्योतिष्ट वा । द्युतादयो द्वाविंशतिः ।

९२ । वृद्भ्यः स्यसनोः ।

वृतुवृधुशृधुस्यन्दूभ्यः स्ये सनि च नवा स्यात् । वर्त्स्यति वर्तिष्यते वा । अवर्त्स्यत् अवर्त्तिष्यत वा । विवृत्सति विवर्त्तिषते वा ।

९३ । लुटि च कॢपः ।

कॢपेर्लुटि स्यसनोश्च नवा स्यात् । कल्प्तासि कल्पितासे वा । कल्प्स्यति कल्पिष्यते वा । अकल्प्स्यत् । अकल्पिष्यत वा । चिक्लृप्सति चिकल्पिषते वा ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ प्रथमाध्यायस्य तृतीयः पादः ॥१।३॥

समाप्तश्च भूपादः ।

भाषावृत्तिः।

प्रथमाध्यायस्य चतुर्थः पादः।

१। आ कडारादेका संज्ञा।

कडाराः कर्मधारये (२।२।३८) इत्यतः प्रागेकैव संज्ञा बोद्धव्या। सा च क्वचिदनवकाशा यथा भसंज्ञा राजभ्यामित्यादौ सावकाशां पदसंज्ञां बाधते राज्ञा राज्ञे। क्वचित् परा यथा बहुव्रीहिसंज्ञा तत्पुरुषसंज्ञां बाधते वीर-पुरुषको ग्राम इति। इहाङ्गसंज्ञया भपदसंज्ञयोः समावेशो वक्तव्यः। तेन बाभ्रव्य इत्यङ्गत्वादादिवृद्धिः। भत्वादोर्गुणः (६।४।१४६)। धानुष्क इत्यत्रा-ङ्गत्वादादिवृद्धिः। पदत्वादिणः षत्वम्।

२। विप्रतिषेधे परं कार्य्यम्।

तुल्यबलयो र्विरोधे परं यत् तत् कार्य्यं स्यात्। सुपि चेति (७।३।१०२) दीर्घः। वृक्षाभ्याम्। बहुवचने झल्येत् (७।३।१०३)। वृक्षेषु। विरोधे परम्। वृक्षेभ्यः। नित्यानित्ययोस्तु नित्यं बलवत्। अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत्। उत्सर्गापवादयोश्चापवादः।

३। यू स्त्र्याख्यौ नदी।

इह स्त्रियमाचष्ट इति स्त्र्याख्यः शब्दः संज्ञी। ई ऊ यू इति च तद्विशेषण-मिति तदन्तविधिः। ईदूदन्तं स्त्रीलिङ्गं नदीसंज्ञं स्यात्। ईदूतोरेवेयं संज्ञेति भागवृत्तिः। कुमार्य्यै। लक्ष्म्यै। धीवध्वै। यवाग्वै। आख्याग्रहणं किम्? पदान्तरयोगे स्त्रीत्वे मा भूत्। सेनान्ये स्त्रियै। कथमतिलक्ष्म्यै विप्राय? बहुश्रेयस्यां राजनि? अवयवस्त्रीविषयत्वात् सिद्धमिति भाष्यम्।

४ । नेयङुवङ्स्थानावस्त्री ।

इयङुवङाधारौ यू नदीसंज्ञकौ न स्तः । हे श्रीः । हे धीः । हे भ्रूः । अस्त्रीति किम् ? हे स्त्रि ।

५ । वाऽऽमि ।

प्रतिषेधोऽयमामि वा स्यात् । श्रियां श्रीणाम् । भ्रुवां भ्रूणाम् ।

६ । ङिति ह्रस्वश्च ।

ङिति चासौ प्रतिषेधो वा स्यात् । श्रियै श्रिये । भ्रुवै भ्रुवे । भुवां घोते भुवि घोते । ह्रस्वश्च । ङिति ह्रस्वौ यू वा नदीसंज्ञकौ स्याताम् । मत्यै मतये । धेन्वै धेनवे । स्त्र्याख्यावित्येव । अग्नये । वायवे । इहामि ङिति च ह्रस्वयोरियङुवङ्स्थनयोश्च य्वो पाक्षिकी नदीसंज्ञा । सा स्त्रीवचन एवेष्यते । नावयवाश्रयेति स्मृतिः (33) । तेन सुमतये ऽतिश्रिये सुधिये विप्राय । सुधियां विप्राणाम् । मञ्जुश्रियि सुधियि विप्र इति भवति ।

७ । शेषो घ्यसखि ।

ह्रस्वेदुदन्तमनदी शेषो घिसंज्ञःस्यात् । घेर्ङितीति (७।३।१११) गुणः । अग्नये । विष्णवे । वायवे । मतये । धेनवे । असखि किम् ? सख्या । सख्ये । सख्युः । सख्यौ । इह ह्रस्वेदुन्मात्रं घिसंज्ञम् । तथाच द्वन्द्वे घीत्यत्र (२।२।३२) घ्यन्तं पूर्वं निपततीत्युच्यते । तेनासखीत्यत्र सखिशब्देकारस्य घित्वनिषेधात् सखिशब्दावयवत्वेऽपि बहुसख्या कृतं बहुसख्युः स्वमित्याहुः । सुसखेरागच्छतीति तु न्यासः ।

८ । पतिः समास एव ।

समासे पतिशब्दो घिसंज्ञः स्यात् । श्रीपतिना । श्रीपतये । श्रीपतेः । श्रीपतौ । नान्यत्र । पत्या । पत्ये । पत्युः । पत्यौ ।

९ । षष्ठीयुक्तश्छन्दसि वा ।

छन्दः सुगमम् ।

---

(33) स्मृतिराचार्यपारम्पर्योपदेशः प्राक्तनानामाचार्याणां व्यवस्थेति यावत् ।

१०। ह्रस्वं लघु।

ह्रस्वमक्षरं लघूच्यते। भेदनम्। गर्दनम्। वर्द्धनम्।

११। संयोगे गुरु।

संयोगे परे ह्रस्वमक्षरं गुरूच्यते। शिक्षा। भिक्षा।

१२। दीर्घञ्च।

दीर्घमक्षरं गुरूच्यते। ईहाञ्चक्रे। ऊहाञ्चक्रे।

१३। यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।

यस्मात् प्रत्ययो विधीयते तदाद्यङ्गसंज्ञं स्यात्। कर्त्ता कारकः। लविता लावकः। तदादीति किम्? करिष्यमाणः। पचामः। स्याद्यन्तस्याप्यङ्गत्वे मुगुदीर्घौ। पुनः प्रत्ययग्रहणं किम्? लुप्तेऽपि प्रत्ययेऽन्यस्मिन् परे मा भूत्। स्त्रार्थम्। द्व्यङ्ग् ग्रामः।

१४। सुप्तिङन्तं पदम्।

सुबन्तं तिङन्तञ्च पदसंज्ञं स्यात्। छात्राः पठन्ति मे।

१५। नः क्ये।

क्ये परे नान्तमेव पदं स्यात्। राजीयति। राजायते। नियमः किम्? वाच्यति। तपस्यति। पदाश्रये कुत्वसत्वे न भवतः।

१६। सिति च।

सिति पूर्वं पदं स्यात्। छस्। भवदीयम्। युस्। ऊर्णायुः। भसंज्ञां बाधते।

१७। स्वादिष्वसर्वनामस्थाने।

कप्-(५।४।१५१) पर्यन्तेषु स्वादिषु पूर्वं पदं स्यात्। राजभ्याम्। राजसु। राजत्वम्। राजतमः। असर्वनामस्थाने किम्? राजानौ। राजानः। कथं सौ? पदत्वं राजेति। न ङिसम्बुद्ध्योः (८।२।८) रिति ज्ञापकात्।

१८ । यचि भम् ।

यादावजादौ च स्वादौ पूर्वं भसंज्ञं स्यात् । यि । गार्ग्यः । अचि । राज्ञः पश्य । असर्वनामस्थान इत्येव । राजानौ । सामानि ।

(क) नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् । भसंज्ञा स्यात् । नभस्वत् । अङ्गिरस्वत् । मनुष्वत् । पदाश्रयं रुत्वं न भवति ।

(ख) वृषण्वस्वश्वयोर्भसंज्ञा वक्तव्या । वृषण्वसुः । वृषणश्वः । नकारलोपो न भवति ।

१९ । तसौ मत्वर्थे ।

मत्वर्थीये परे तान्तं सान्तञ्च भसंज्ञं स्यात् । विद्युत्वान् । मरुत्वान् । पयस्वी । तपस्वी । यशस्वी ।

२० । अयस्मयादीनि च्छन्दसि ।

इदञ्छान्दः सूत्रमेकम् ।

२१ । बहुषु बहुवचनम् ।

सुप्तिङामविशेषेण विधानादर्थेष्वपि तत्प्राप्तानीत्यादि लोकोपचारदर्शनाच्च नियमोऽयम् । बहुष्वेवार्थेषु बहुवचनं स्यात् । भिक्षवः सवर्णान् पठन्ति । विप्रैः सामानि गीयन्ते ।

२२ । द्व्येकयोर्द्विवचनैकवचने ।

अर्थयोर्द्वित्वैकत्वयोरेव द्विवचनैकवचने स्याताम् । मातापितरौ अनमतः । धर्मो रक्षति रक्षितः ।

२३ । कारके ।

अधिकारोऽयम् । अतःपरं यद्वक्ष्यति तत् कारकेषु मध्ये बोद्धव्यम् । तद् यथा—

२४ । ध्रुवमपायेऽपादानम् ।

विश्लेषे ध्रुवं कारकमपादानं स्यात् । तच्च "निर्दिष्टविषयं किञ्चित्" । वृक्षात् पत्रं पतति । जलादुत्थितः । "उपात्तविषयं तथा" । बलाहकाद्

विद्योतते विद्युत्। निःसृत्येत्यध्याहार्य्यम्। अधर्माद् विरमति। अधर्माज्जुगुप्सते। विरमज्जुगुप्समानस्ततो निवर्त्तत इत्यर्थः। "अपेक्षितक्रियश्चेति त्रिधापादानमिष्यते"। माथुराः स्रौघ्नेभ्य आढ्यतराः। नियमेनोत्कर्षक्रिया गम्यत इति। कारक इत्येव। वृक्षस्य पर्णम् पतति। बहुभ्योऽन्यः। कारकादिति (५।४।४२) न शस्।

२५। भीत्रार्थानां भयहेतुः।

भयत्राणार्थधातुप्रयोगे भयहेतुरपादानं स्यात्। चौराद् भीतः। व्याघ्रादपत्रस्तः। दस्युभ्यो रक्षितः।

२६। पराजेरसोढः।

पराजेः प्रयोगे सोढुमशक्यमपादानं स्यात्। अध्ययनात् पराजयते मन्दबुद्धिः। भोजनात् पराजयते।

२७। वारणार्थानामीप्सितः।

एषां प्रयोग ईप्सितमपादानं स्यात्। यवेभ्यो गां वारयति। कथं कूपादन्धं वारयति? बुद्ध्या प्राप्य ततो निवर्त्तयतीत्यर्थः।

२८। अन्तर्धौ येनादर्शनमिच्छति।

अन्तर्धौ तु येन हेतुनात्मनोऽदर्शनमिच्छति तदपादानं स्यात्। उपाध्यायादन्तर्धत्ते छात्रः। उपाध्यायान्निलीयते शिष्यः।

२९। आख्यातोपयोगे।

नियमाद् वाक्यग्रहणे (34) आख्याता प्रतिपादयिताऽपादानं स्यात्। पण्डितात् पुराणं शृणोति। "रामादधीतसन्देशः"।

३०। जनिकर्त्तुः प्रकृतिः।

जायमानस्य प्रकृतिः कारणमपादानं स्यात्। सामग्रीतः फलं जायते।

३१। भुवः प्रभवः।

भुवः कर्त्तुः प्रभवोऽपादानं स्यात्। हिमवतो गङ्गा प्रभवति। "वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य"।

(34) वाक्यादीनां ग्रहीतुः प्रवृत्तिर्नियम इत्येके। विद्यादिग्रहणार्थं शिष्यादिवृत्तिर्नियम इत्यन्ये।

३२ । कर्म्मणा यमभिप्रैति स सम्प्रदानम् ।

कर्म्मणा करणभूतेन यमभिसम्बध्नाति तत्कारकं सम्प्रदानं स्यात् । ब्राह्मणाय गां ददाति धार्म्मिकः । गुरवे धनं निर्यातयति वटुः । पङ्क्तिकोपाध्यायः शिष्याय कर्णचपेटामदात् (35) । शठवे भयं ददाति । "भयानि दत्त सीतायै" । कथं रजकस्य वस्त्रं ददाति । अतः पृष्ठं ददातीति ? अभिप्रेतत्वस्याविवक्षितत्वात् यथा सममब्राह्मणे दानमिति (36) । इह प्रार्थनाध्यवसानादिक्रियाभिः कर्त्तुरीप्सिततमत्वात् क्रियापि कर्म्म भवति । तत् क्रियया यदभिसम्बध्यते तत् सम्प्रदानं सूत्रेणैव । युद्धाय सन्नह्यते । पत्ये शेते । "निवेद्यतां सुग्रीवाय" । "प्रणम्य शास्त्रे सुगताय तायिने" (37) । इह च पशुना रुद्रं यजत इति पशुना देयेन रुद्रं प्रीणयति । पशुं रुद्राय ददातीति वस्त्वर्थः ।

३३ । रुच्यर्थानां प्रीयमाणः ।

रुच्यर्थधातूनां प्रयोगे प्रीयमाणः संप्रदानं स्यात् । नारदाय रोचते कलहः । नारदस्य रुचिविषयीभवति ।

३४ । श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ।

एषां प्रयोगे बोधयितुमिष्टः संप्रदानं स्यात् । नृपाय श्लाघते बन्दी । "श्लाघमानः परस्त्रीभ्यः" । पुत्रायापह्नुते वणिक् । छात्राय तिष्ठते कन्या । प्रियायै शपते कामुकः ।

---

(35) The MSS in Bengali characters generally give—"पङ्क्तिकोपाध्यायः शिष्याय कर्णचपेटामदात्. But the statement is, either in imitation, or a misquotation, of a celebrated passage of the महाभाष्य on 1.1.1.—"एवं हि दृश्यते लोके य उदात्ते कर्त्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददात्यन्यत् त्वं करोषीति" ।—The probable corruption of the word खण्डिकोपाध्याय arose from an unacquaintance of the scribes with the भाष्य । सृष्टिधर explains—"यः पङ्क्तिकायां लिखित्वा वर्णान् शिक्षयति स पङ्क्तिकोपाध्यायः" ।

(36) "सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्रमनन्तं वेदपारगे ॥१॥" इति मानवधर्म्मशास्त्रे ।

(37) तायिने दयालव इति सृष्टिधरः । पालकायेत्यन्ये । सन्तानवते कीर्त्तिमुत्ताय क्षममाणायेत्यपरे । ताय सन्तानपालनयोः ।

३५ । धारेरुत्तमर्णः ।

धारेः प्रयोगे धनिकः संप्रदानं स्यात् । विप्राय शतं धारयति ।

३६ । स्पृहेरीप्सितः ।

स्पृहेः प्रयोगेऽभीष्टः सम्प्रदानं स्यात् । धनाय स्पृहयति ।

३७ । क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।

क्रुधाद्यर्थानां प्रयोगे कोपस्थानं सम्प्रदानं स्यात् । पुत्राय क्रुध्यति । शत्रवे द्रुह्यति । एकस्मै ईर्ष्यति । अन्यस्मै असूयति । नेह । स्त्रियमीर्ष्यति कामुकः ।

३८ । क्रुधद्रुहोरुपसृष्टयोः कर्म ।

सोपसर्गयोः क्रुधद्रुहो यं प्रति कोप स्तत् कर्मसंज्ञं स्यात् । पुत्रमभि-क्रुध्यति । शत्रुमनुद्रुह्यति ।

३९ । राधीक्ष्योर्यस्य विप्रश्नः ।

राधीक्ष्योः प्रयोगे यस्य विविधं पृच्छति तत् सम्प्रदानं स्यात् । पुत्राय राध्यति । किमयं करोति किं न वेति । स्त्रीभ्य ईक्षते । का कीदृशी भवतीति । ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयमिति भट्टिः ।

४० । प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता ।

प्रत्याङ्पूर्वस्य शृणोतेः प्रयोगे पूर्वस्य प्रार्थनादेः कर्त्ता सम्प्रदानं स्यात् । तुभ्यं गां प्रतिशृणोति । मह्यं गामाशृणोति । अङ्गीकरोतीत्यर्थः ।

४१ । अनुप्रतिगृणश्च ।

अस्य च प्रयोगे पूर्वस्याः क्रियायाः कर्त्ता सम्प्रदानं स्यात् । होत्रेऽनु-गृणाति । पोत्रे प्रतिगृणाति । तं शंसन्तं शब्देनानुगच्छति । प्रोत्-साहयतीत्यर्थः ।

४२ । साधकतमं करणम् ।

क्रियासिद्धौ प्रकृष्टोपकारकं करणमुच्यते । परशुना वृक्षं छिनत्ति । बुद्ध्या जानाति । विवक्षावशात् परशुश्छिनत्ति ।

४३ । दिवः कर्म च ।

दिवः साधकतमं कर्म करणं वा स्यात् । "दुरक्षान् दीव्यता राज्ञा" । दुरक्षैर्वा ।

४४ । परिक्रयणे संप्रदानमन्यतरस्याम् ।

वेतनादिस्वीकारे करणं सम्प्रदानं स्याद्वा । शताय परिक्रीतः शतेन वा ।

४५ । आधारोऽधिकरणम् ।

आश्रयोऽधिकरणमुच्यते । गृहे तिष्ठति । स्थाल्यां पचति ।

४६ । अधिशीङ्स्थासां कर्म ।

एषामाधारः कर्म स्यात् । शय्यामधिशेते । गिरिमधितिष्ठति । ग्राममध्यास्ते । स्थलीमधिशेते ।

४७ । अभिनिविशश्च ।

अस्याप्याधारः कर्म स्यात् । ग्राममभिनिविशते ।

४८ । उपान्वध्याङ्वसः ।

अस्याप्याधारः कर्म स्यात् । ग्राममुपवसति । नदीमनुवसति । गिरिमधिवसति । पल्लीमावसति । इह ग्राम उपवसतीति ? ग्रामे वसन् संत्रिरात्रमुपवसतीत्येवम्प्रकारार्थः । यदुक्तं—

> वसतावप्रयुक्तेऽपि देशोऽधिकरणं मतम् ।
> अप्रयुक्तं त्रिरात्रादि कर्म चोपवसेः स्मृतम् ॥१॥ इति ।

४९ । कर्त्तुरीप्सिततमं कर्म ।

कर्त्तुः क्रियया व्याप्तुमिष्टतमं कर्म स्यात् । संयोगं जनयति । तण्डुलौदनं पचति । वेदमधीते ।

५० । तथायुक्तञ्चानीप्सितम् ।

ईप्सितवत् कर्त्तुः क्रियया युक्तं द्वेष्यमन्यच्च कर्म स्यात् । ओदनं बुभुक्षुर्भक्षयति । पुत्रं पश्यन् सूर्य्यं पश्यति ।

५१। अकथितञ्च।

अपादानादिसंज्ञाभिर्यदवीक्षितं तत्कर्म स्यात्। गां दोग्धि पयः। कारक इत्येव। गवां दोग्धि पयः। विवक्षावशाद् गोभ्यो दोग्धि पयः। एवं "याचमानः शिवं सुरान्।" "सीऽपृच्छल्लक्ष्मणं सीताम्।" शिष्यं धर्म्मं ब्रूते। विप्राञ् शतं जयति। गर्गाञ् शतं दण्डयति। अजां ग्रामं नयति। भारं ग्रामं हरति। इह च "प्रधाने कर्म्मण्यभिधेये लादीनाहुर्द्विकर्मणाम्"। नीयतेऽजा ग्रामम्। वोढ़व्यो भारो ग्रामम्। क्रियते काष्ठं गृहम्। आकृष्यते शाखा ग्रामम्। "अप्रधाने दुहादीनाम्।" दुह्यते गौः क्षीरम्। उच्यते शिष्यो धर्म्मम्। गर्गाः शतं दण्ड्यन्ताम्। जीयते विप्रः शतम्। "ण्यन्ते कर्त्तुश्च कर्मणः।" णिचि कर्मतां प्राप्तस्य कर्त्तुर्वाचका लादयः। प्राप्यते विप्रो ग्रामम्। पित्रा गमयितव्यः पुत्रो ग्रामम्। बोध्यते शिष्यो धर्मम्। भोज्यते विप्रो भक्तम्। पाठ्यते पुत्रः सूत्रम्। आस्यते विप्रो मासमिति।

५२। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ।

एषामणिचि यः कर्त्ता स णिचि कर्म स्यात्। याति विप्रो ग्रामम्। यापयति विप्रं ग्रामम्। "रावणं गमय प्रीतिम्।" नीवह्यो तु गत्युपसर्जन-प्रापणवचनौ। न गत्यर्थौ। नाययति वाहयति भारं दासेनेति। बुध्यर्थे बोधयति शिष्यं शास्त्रम्। ज्ञापयति नृपं हिताहितम्। उपलम्भयति विप्रं गन्धम्। प्रत्यवसानं भक्षणम्। आशयति भोजयति विप्रमोदनम्। शब्दकर्म। अध्यापयति वटुं वेदम्। पाठयति पुत्रं सूत्रम्। श्रावयति शिष्यं शब्दम्। अकर्मकात्। आसयति पुत्रम्। शाययति मित्रम्। गत्यर्थादिभ्योऽन्यत्र। पाचयत्योदनं सहायेन। इह किलाणौ यः कर्त्ता तस्य णौ कर्मत्वमपि प्रयोजकव्यापारेण कर्त्तृत्वञ्च स्वव्यापारेण स्वतन्त्रत्वादित्युभयसंज्ञासिद्धौ नियमोऽयं गत्यर्थादीनामणौ यः कर्त्ता स णौ कर्मैव न कर्त्तेति। ततश्च गत्यर्थादिव्यतिरिक्तानामणौ कर्त्तुर्णावुभयं भवति कर्त्तृत्वं कर्मत्वञ्चेति वदन्तः

केचित् पाचयत्योदनं देवदत्तं देवदत्तेनेत्याद्यपि भवतीत्याहुः। एवञ्च हृक्रोर्वेति (१।४।५७) प्रपञ्चार्थं वेदितव्यम् (38)।

(क) अल्पत्यादीनामुपसंख्यानम्। प्रयब्दकर्मकत्वात्। जल्पयति मित्रम् पुत्रम्। भाषापयति पुत्रं मित्रम्। सम्भाषयति देवदत्तं भार्य्याम्।

(ख) भादिखाद्योः प्रतिषेधो वक्तव्यः। भादयते खादयति विप्रेणौदनम्। भक्षणार्थत्वात्।

(ग) भक्षेरहिंसायाम्। भक्षयति पिण्डीं देवदत्तेन यज्ञदत्तः। हिंसायान्तु भक्षयति यवं वृषभान्।

(घ) वहेरनियन्तृकर्तृकस्येति कात्यायनः। वाहयति भारं मनुष्यैः। सनियन्तृकर्तृकस्य तु वाहयति वृषभान् भारम्।

५३। हृक्रोरन्यतरस्याम्।

हृञ्कृञोरणिचि यः कर्त्ता स णिचि कर्म वा स्यात्। हारयति भारं दासं दासेन वा। कारयति कटं पुत्रं पुत्रेण वा।

(क) अभिवादिदृशोरात्मनेपदे वा।

गुरुमभिवादयते पुत्रं पुत्रेण वा। दर्शयते नृपं भृत्यान् भृत्यैर्वा।

५४। स्वतन्त्रः कर्त्ता।

क्रियासिद्धावगुणत्वेन विवक्षितो यः स कर्त्ता स्यात्। विप्रेण पच्यते। क्रिया जायते। ओदनः सिध्यति।

५५। तत्प्रयोजको हेतुश्च।

स्वतन्त्रस्य प्रयोजकोऽर्थः कर्त्ता हेतुश्चोच्यते। कुर्वन्तं प्रयुङ्क्ते कारयति देवदत्तः। उक्तानि कारकाणि।

५६। प्राग्रीश्वरान्निपाताः।

अधिरीश्वर (१।४।९७) इत्यतः प्राङ् निपाता वेदितव्याः।

---

(38) This passage is referred to by श्रीपति in his कातन्त्रपरिशिष्ट viz:—"तथा हृक्रोः वाचयममकर्मकाभ्यवहारार्थेभ्योनित्यं मा भूदिति वचनम्? प्रपञ्चार्थमिति लघुवृत्तिकृतोक्तम्"।—(In his Rule 18 under कारक)।

५७। चादयोऽसत्त्वे ।

अद्रव्यार्थाश्चादयो निपाता स्युः। याति च वाति च। घटं वा पटं वा पश्य। च। वा। वै। स्वाहा। स्वधा। ओम्। आम्। अथ। तु। मन्ये। अस्ति। ब्रूहि। विभाषा। अन्यतरस्याम्। नञ्। नो। न इत्यादि। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः। असत्त्वे किम्? स्वाहा अग्नायी।

५८। प्रादयः।

प्र। परा। अप। सम्। अनु। अव। निर्। दुर्। निस्। दुस्। अभि। वि। अधि। सु। उद्। अति। नि। प्रति। परि। अपि।। उप। आङ्। एते निपाताः स्युः। प्रतनु। प्रविरलम्। अभिनवोऽभिलीनः।

५९। उपसर्गाः क्रियायोगे।

प्रादयो निपाताः क्रियायोगे उपसर्गाः स्युः। प्रणमति। परिषिञ्चति। क्रियायोगे किम्? प्रनायको देशः। इह दुर्नीतमवदत्तमित्यादावुपसर्गप्रतिरूपकनिपाताश्रयत्वाण् णत्वतत्त्वे न भवतः।

"प्रपरापसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्य्यपयः।

उप आङिति विंशतिरेष सखे उपसर्गविधिः कथितः कविना" (39)। इति।

६०। गतिश्च।

प्रादय उपसर्गा गतिसंज्ञकाश्च स्युः। प्रणम्य। अभिषिच्य।

६१। ऊर्य्यादिच्विडाचश्च।

एते गतिसंज्ञकाः स्युः। ऊरीकृत्य। उररीकृत्य। च्विः। शुक्लीकृत्य। शुक्लीभूय। डाच्। पटपटाकृत्य। दमदमाकृत्य।

६२। अनुकरणञ्चानितिपरम्।

अव्यक्तानुकरणं गतिः स्यात्। खाटत्कृत्य भग्नः। अनितिपरं किम्? खाटदिति कृत्वा भग्नः।

(39) श्लोकोऽयं तोटकच्छन्दसा रचितः। इह तोटकमम्बुधिसैः प्रथितमिति लक्षणात्। सर्वत्रान्त्य संहितायामपि पादान्तत्वाद् वैकल्पिकं गुरुत्वम्। निस्दुसौ त्वत्र निर्दुरिति ग्रहणाद् विंशतिरित्युक्तम्। पूर्वथा मतेन निस्दुसोरभावात्।

६३ । आदरानादरयोः सदसती ।

अनयोरेते गती स्याताम् । गुरून् सत्कृत्य गतः । खलानसत्कृत्य गतः ।

६४ । भूषणेऽलम् ।

अत्रेदं गतिः स्यात् । कन्यामलंकृत्य गतः ।

६५ । अन्तरपरिग्रहे ।

अन्तःशब्दो गतिः स्यात् । अन्तर्हत्य स्थितः खलः । मध्ये हत्वेत्यर्थः । अपरिग्रहे किम् ? अन्तर्हत्वा मूषिकां गतः श्येनः । परिगृह्येत्यर्थः ।

(क) अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या । अन्तर्धा । अन्तर्धिः । अन्तर्णयति ।

६६ । कणेमनसी श्रद्धाप्रतिघाते ।

कणेमनःशब्दौ तृष्णाविगमे गती स्याताम् । कणेहत्य मनोहत्य पयः पिबति । आतृष्णमित्यर्थः ।

६७ । पुरोऽव्ययम् ।

गतिः स्यात् । "पुरस्कृत्य शिखण्डिनम् ।" नमस्पुरसोर्गत्योरिति (८।३।४०) सत्वम् ।

६८ । अस्तञ्च ।

अस्तमव्ययं गतिः स्यात् । अस्तङ्गत्य क आगतः । मृत्वेत्यर्थः ।

६९ । अच्छ गत्यर्थवदेषु ।

अच्छेत्यव्ययमाभीमुख्यार्थवृत्तिर्गत्यर्थे वदतौ च गतिः स्यात् । अच्छगत्य । अच्छोद्य ।

७० । अदोऽनुपदेशे ।

त्यदादिरदःशब्दो गतिः स्यात् । अदःकृत्य स्थितः । अनुपदेशे किम् ? अदः कृत्वा गच्छ ।

७१। तिरोऽन्तर्द्धौ।

तिरोऽव्ययं गतिः स्यात्। तिरोभूय स्थितश्चौरः। अन्तर्धौ किम्। तिरो भूत्वा स्थितं काष्ठम्।

७२। विभाषा कृञि।

अन्तर्धौ कृञि तिरो वा गतिः स्यात्। तिरस्कृत्य तिरःकृत्वा।

७३। उपाजेऽन्वाजे।

बलाधानवृत्ती निपातावेतौ कृञि वा गती स्याताम्। उपाजेकृत्य उपाजे कृत्वा वा। अन्वाजेकृत्य अन्वाजे कृत्वा वा।

७४। साक्षात्प्रभृतीनि च।

साक्षादादीनि कृञि गतिसंज्ञकानि वा स्युः। साक्षात्कृत्य साक्षात् कृत्वा वा। मिथ्या। लवणम्। वशे। प्रादुस्। आविस्। नमस्।

७५। अनत्याधान उरसिमनसी।

एतावनुपश्लेषे कृञि वा गती स्याताम्। उरसिकृत्य उरसि कृत्वा वा अपेक्ष्यम्। मनसिकृत्य मनसि कृत्वा वा। नेह। उरसि कृत्वा हस्तं शेते।

७६। मध्येपदेनिवचने च।

एते कृञि वा गतयः स्युः। मध्येकृत्य मध्ये कृत्वा वा। पदेकृत्य पदे कृत्वा वा। निवचनेकृत्य निवचने कृत्वा वा। तूष्णीम्भूयेत्यर्थः। अनत्याधाने इत्येव। हस्तिनः पदे कृत्वा शिरः शेते।

७७। नित्यं हस्तेपाणावुपयमने।

एतौ स्वीकारे कृञि नित्यं गती स्याताम्। "तां हस्तेकृत्य मा व्रजीः"। पाणौकृत्य भुङ्क्ते।

७८। प्राध्वं बन्धने।

प्राध्वं कृञि नित्यं गतिः स्याद् बन्धनगतौ। प्राध्वंकृत्य कुटुम्बं स्थितः।

७९। जीविकोपनिषदावौपम्ये।

एतौ सादृश्ये कृञि गतौ स्याताम्। जीविकाकृत्य व्याचष्टे। उपनिषत्कृत्य कथयति।

८०। ते प्राग् धातोः।

ते गत्युपसर्गसंज्ञका धातोः प्राक् प्रयोक्तव्याः। तथैवोदाहृतम्।

८१। छन्दसि परेऽपि।

८२। व्यवहिताश्च।

छन्दः सूत्रद्वयम्।

८३। कर्मप्रवचनीयाः।

अधिकारोऽयम्।

८४। अनुर्लक्षणे।

लक्षणे कारके हेतौ द्योत्येऽनुः कर्मप्रवचनीयनामा स्यात्। होममनु वृष्टो देवः।

८५। तृतीयार्थे।

सहार्थेऽनुस्तन्नामा स्यात्। गङ्गामन्ववसिता (40) पुरी। तया सह बद्धेत्यर्थः।

८६। हीने।

हीने द्योत्येऽनुस्तन्नामा स्यात्। अन्वर्जुनं योद्धारः। ततो हीना इत्यर्थः।

८७। उपोऽधिके च।

उपोऽधिके हीने च तन्नामा स्यात्। उपखार्य्यां द्रोणः। उप गोवर्द्धनं शाब्दिकाः।

८८। अपपरी वर्जने।

एतौ वर्जने तथा स्याताम्। अप त्रिगर्त्तेभ्यः। परि सुघ्नाद् वृष्टो देवः।

---

(40) अनुवसितेति पाठान्तरम्। तथाप्यवपूर्वात् षिञ् बन्धन इत्यस्मात् क्तः। तत्र वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यनेनाकारलोपः।

८९। आङ् मर्य्यादावचने।

सीमायामाङ् तन्नामा स्यात्। आ समुद्राद्द् दृष्टो देवः। वचनग्रहणादभिव्याप्तौ च। आकुमारं यशस्तव।

९०। लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्य्यनवः।

चिह्नादौ द्योत्ये प्रतिपर्य्यनवः कर्मप्रवचनीयाः स्युः। वृक्षं प्रति विद्योतते विद्युत्। वृक्षं परि। वृक्षमनु। एवं मातरं प्रति साधुः। यदत्र मां प्रति स्यात्। वृक्षं वृक्षं प्रति सिञ्चति।

९१। अभिरभागे।

अभिर्भागवर्जितलक्षणादौ तन्नामा स्यात्। वृक्षमभि विद्योतते विद्युत्। मातरमभि साधुः। वृक्षं वृक्षमभि सिञ्चति। अभागे किम्? यदत्र मामभिष्यात्। उपसर्गाश्रयो मूर्धन्यः।

९२। प्रतिः प्रतिनिधिप्रतिदानयोः।

प्रतिः सदृशप्रत्यर्पणयोस्तथा स्यात्। यो नारायणतः प्रति। माषानस्मै तिलेभ्यः प्रति यच्छति।

९३। अधिपरी अनर्थकौ।

अनर्थका-(41) वधिपरी तथा स्याताम्। कुतोऽध्यागच्छति। कुतः पर्य्यानयति। गत्युपसर्गसंज्ञाबाधः फलम्। अनर्थकौ (41) किम्? अधिगम्य। परिणीय।

९४। सुः पूजायाम्।

पूजायां सुस्तन्नामा स्यात्। सुसिक्तं त्वया। उपसर्गाश्रयं षत्वं न भवति।

९५। अतिरतिक्रमणे च।

अतिप्रवृत्तिरतिक्रमः। तस्मिन् पूजायाञ्चाति स्तन्नामा स्यात्। अति सिक्तं त्वया। पूजायाम्। अतिस्तुतम्। अतिस्तुतिः।

---

(41) अनर्थिकावित्यपि पाठान्तरम्।

९६ । अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु ।

एषु वर्त्तमानोऽपिशब्दः कर्मप्रवचनीयः स्यादित्येकः सूत्रार्थः । सर्पिषोऽपि स्यात् । बिन्दुपदार्थेऽपिशब्दः । एषु यत् पदं वर्त्तते तत्प्रत्यपिशब्दः कर्मप्रवचनीयः स्यादिति द्वितीयः सूत्रार्थः । सर्पिषोऽपि स्यात् । बिन्द्वर्थे स्यात्पदम् । तत् प्रत्यपिशब्दः कर्मप्रवचनीयः । तेनोपसर्गाश्रयं षत्वं न भवति । सर्पिंस्तु प्रति न कर्मप्रवचनीय इति द्वितीया न स्यात् । सम्भावना योग्यता । "अपि स्थाणुं जयेद्रामः" । अन्ववसर्गः प्राकाम्यम् । अपि सिञ्च अपि स्तुहि । गर्हा निन्दा । अपि स्तुयाद्वृषलम् । समुच्चये । अपि सिञ्च अपि स्तुहि । उभयं कुरु ।

९७ । अधिरीश्वरे ।

ऐश्वर्य्ये गम्येऽधिस्तन्नामा स्यात् । अधि पञ्चालेषु ब्रह्मदत्तः ।

९८ । विभाषा कृञि ।

अधिः कृञि वा कर्मप्रवचनीयः स्यात् । यन्मामधिकरिष्यति यन्मामधि करिष्यति वा । अधिकृत्य अधि कृत्वा वा । उक्ता निपाताः ।

९९ । लः परस्मैपदम् ।

लादेशाः परस्मैपदमुच्यन्ते । तिप्तस्झिसिप्थस्थमिब्वस्मस्शतृक्वसू ।

१०० । तङानावात्मनेपदम् ।

तङ् एतौ च लादेशावात्मनेपदमुच्यन्ते । तङिति तातांझथासाथांध्वमिड्वहिमहिङ् । आन इति शानच्कानचौ ।

१०१ । तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः ।

तिङां त्रीणित्रीणि पदानि क्रमेण प्रथममध्यमोत्तमसंज्ञकानि स्युः । तिप् तस्झितातांझ इति प्रथमः । ततो मध्यमः । तत उत्तमः ।

१०२ । तान्येकवचनद्विवचनबहुवचनान्येकशः ।

तानि त्रीणित्रीणि पदानि प्रत्येकमेकवचनद्विवचनबहुवचनसंज्ञकानि स्युः । तिरित्येकवचनम् । तसिति द्विवचनम् । झीति बहुवचनम् । एवमन्यत्रापि ।

१०३। सुपः।

सुपश्च तथा स्यात्। सु इत्येकवचनम्। औ इति द्विवचनम्। जसिति बहुवचनम्। एवं सर्वत्र।

१०४। विभक्तिश्च।

सुप् तिङ् च विभक्तिरुच्यते।

१०५। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः।

लकारेण समानाधिकरणे युष्मद्युपपदे मध्यमपुरुषः स्यात्। त्वं पचसि। युवां पचथः। यूयं पचथ। त्वं दृश्यसे। युवां दृश्येथे। यूयं दृश्यध्वे। स्थानिनीति। गम्यमानेऽपि युष्मदि। ओदनं पचसि। मया दृश्यसे। भवत्प्रयोगे नेष्यते (42)। भवान् करोति। समानाधिकरणे किम्? त्वया दृश्यते।

१०६। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।

परिहासगतौ मन्योपपदस्य धातोरुत्तमे प्राप्ते मध्यमःपुरुषः स्यात्। मन्यतेश्च मध्यमे प्राप्त उत्तमः। स चैकवत् मन्तुरनेकत्वेऽपि। एहि मन्ये पयः पास्यसि? न पास्यसि। पीतं तदतिथिभिः। प्रहासे किम्? एहि मन्यसे दध्यन्नं भोक्ष्ये। साधु मन्यसे। एवं मन्यध्वेऽपि।

---

(42) युष्मद्युपपद इति सूत्रे (१।४।१०५) युष्मच्छब्दस्य युगपद्रूपपरत्वार्थपरत्वं च ग्रहणात्। ओदनं पचेत्यादौ च युष्मच्छब्दस्य रूपपरत्वेन गम्यमानत्वम्। एवञ्च भवति भिक्षां देहीत्यत्र रूपपरस्य युष्मद एव गम्यत्वे मध्यमपुरुषः। न चात्र वाक्यस्यार्थत्वकल्पनेन कश्चिदर्थः। भवान् करोतीत्यादौ तु भवच्छब्दस्य युष्मदर्थपरत्वेऽपि तद्रूपपरत्वाभावान्न मध्यमः। तथाऽस्य सूत्रस्य (१।४।१०५) व्याख्याने मैत्रेयरक्षितः—"युष्मदीत्यर्थग्रहणं वा स्याच्छब्दग्रहणं वा? तत्र यद्यर्थग्रहणं भवान् करोतीत्यत्रापि मध्यमपुरुषः प्राप्नोति। युष्मदर्थस्यात्रापि विद्यमानत्वात्। अथ शब्दस्य ग्रहणमिदं सति परमत्वं करोषीत्यत्र न स्यात्। नह्यत्र युष्मच्छब्द उपपदम्। किं तर्हि? तदन्तसमुदायः। न चात्र तदन्तविधिरस्ति। ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधात्। यद्यपि स्यात् तदन्तविधिरतित्वं करोतीत्यत्रापि स्यात्। एवं तर्हि रूपवदर्थोऽप्यपेक्षित इत्यर्थशब्दग्रहणम्। तेन युष्मच्छब्दाभावे भवान् करोतीत्यत्र न भवति। अथ भवान् करोतीत्यत्र स्थानिन्यपीति मध्यमः कस्मान्न भवति? नैवम्। नह्यत्र युष्मच्छब्दः प्रसक्तो। भवच्छब्देनैव तदर्थस्याभिधानात्। शब्दानां चाक्षेऽर्थे प्रसङ्गः। ननूक्ते।"—इति तन्त्रप्रदीपे ([illegible])।

१०७। अस्मद्युत्तमः ।

अस्मदि वाच्य उत्तमःपुरुषः स्यात् । अहं पचामि । आवां पचावः । वयं पचामः । अहं ह्रस्ये । आवां ह्रस्यावहे । वयं ह्रस्यामहे । गम्यमानेऽपि । पचामि । ह्रस्ये ।

१०८। शेषे प्रथमः ।

युष्मदस्मद्भ्यामन्यस्मिन् प्रथमःपुरुषः स्यात् । स भाति । तौ भातः । ते भान्ति ।

१०९। परः सन्निकर्षः संहिता ।

अत्यन्तप्रत्यासत्तिः संहितोच्यते । दध्यत्र । मध्वत्र ।

११०। विरामोऽवसानम् ।

परे वर्णाभावोऽवसानमुच्यते । वृक्षः । सिद्धिः ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
प्रथमाध्यायस्य चतुर्थः पादः ॥ १।४ ॥
समाप्तश्च कारकपादः । प्रथमोऽध्यायश्च ।

अथ

भाषावृत्तिः ।

द्वितीयोऽध्यायः । प्रथमः पादः ।

१ । समर्थः पदविधिः ।

यो नाम पदानां विधिः स समर्थो वेदितव्यो यथा समासः । राज्ञः पुरुषो राजपुरुषः । समर्थ इति किम् ? भार्य्या राज्ञः पुरुषो देवदत्तस्य । पदविधिग्रहणं किम् ? तिष्ठतु दध्यशान त्वं शाकेन । यथादेशो वर्णविधिः ।

२ । सुबामन्त्रिते पराङ्गवत् स्वरे ।

अतःपरं सुबित्यधिक्रियते । शेषश्छान्दसः स्वरभागः ।

३ । प्राक् कडारात् समासः ।

कडारशब्दात् (२।२।३८) प्राक् समासो वेदितव्यः ।

४ । सह सुपा ।

सुबित्येव । अतःपरं सुपा सह सुबन्तं समस्यत इत्यधिकृतं वेदितव्यम् । लक्षणमप्येतत् । पूर्वं भूतो भूतपूर्वः । विस्पष्टपटुः । तत्प्रथमः । पुनर्गवः (1) । अध्यगन्तव्य इत्यादि ।

---

(1) अत्र पुनर्गव इत्युदाहरणं तु चिन्त्यम् । टचोऽप्राप्तेः । वस्तुतस्तु कुगतिप्रादय (२।२।१८) इत्यत्र नित्याधिकारेऽव्ययं प्रवृद्धादिभिरिति इवेन विभक्त्यलोपः पूर्वपद प्रकृतिस्वरत्वञ्चेति वार्त्तिकत्रयं कात्यायनेन पठितम् । तेन हि पुनर्गव इत्यत्राव्ययं प्रवृद्धादिभिरित्यनेन नित्यसमासः । तस्य च तत्पुरुषाधिकारे पठितत्वाद् गोरतद्धित लुकीति (५।४।९२) तत्र टच् । इवेन विभक्त्यलोप इति वार्त्तिकम् भाष्यकृता सह सुपेत्यत्र समानीय पठितम् । तेनास्य इवपदेन समासस्य नित्यत्वं सूचितम् । अर्थान्तरं मुनीनां प्रामाण्यात् । न च सह सुपेत्यस्य नित्याधिकारेऽन्तर्भावः । योगविभागेनैव सिद्धे समासेऽव्ययमित्याद्युत्तरसूत्रैः (२।१।६) पुनः समासस्य विधानात् । भाष्ये चात्र विस्पष्टं पटुर्विस्पष्टपटुरिति विग्रहप्रदर्शनाच्च । न चानिष्टापत्तिः । अपसिद्धान्तात् । इतिकैयटादि महाग्रन्थविरोधाच्च । तथाहि—परट्सूत्रे (५।२।५१) दर्शितवता, भावसमूहं (६।१।१२२) इत्युदात्तनिपातन (६।१।१५८) अस्मिन्वदित्यत्र (६।४।२२) च कैयटेन च, सुप्सुपेति समासस्य विग्रहः प्रदर्शितः । अतएवैतेन

५ । अव्ययीभावः ।

अव्ययीभावो नाम समासो वाच्यः प्राक् तत्पुरुषात् । तद्यथा—

६ । अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ।

विभक्त्याद्यर्थेऽव्ययं सुपा सह समस्यते । विभक्त्यर्थे । स्त्रीष्वधिकृत्य कथा प्रवर्त्ततेऽधिस्त्रि । अधिपाणि कपोलौ । समीपार्थे । उपकुम्भम् । समृद्धौ सुमद्रम् । ऋद्ध्यभावो व्यृद्धिः । दुर्यवनम् । दुर्भिक्षम् । अर्थाभावे निर्मक्षिकम् । अत्ययो भूतत्वमतिक्रमः । निःशीतम् । असम्प्रत्यर्थे । नायमस्य कम्बलस्य भोगकालोऽतिकम्बलम् । शब्दप्रादुर्भावः प्रकाशता । इतिपाणिनि । उद्विक्रमादित्यम् । पश्चादर्थे । अनुरथम् । यथार्थाश्चत्वारः । योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यञ्चेति । योग्यतायाम् । अनुरूपमस्य दानम् । वीप्सायाम् । प्रतिदिनं ददाति । पदार्थानतिवृत्तौ । यथाबलमध्येति पाठम् । सादृश्ये । वीणावत् सवीणं ध्वनति । सहंसं गच्छति । आनुपूर्व्ये । अनुज्येष्ठं प्रविशन्तु । यौगपद्ये । सचक्रं निधेहि । अव्ययीभावे चाकाल इति (६।३।८१) सहस्य सः । गौणेऽपि सादृश्ये । सदृशः किख्या (2) सकिखि । सदृशीभिर्लक्ष्म्या सलक्ष्मि स्त्रीभिः । सम्पत्तौ ।

समासो वैकल्पिकः । तेनोपानुरिव वामन इति कथाचित्तौ विष्णुगिवागर्भो गङ्गाविल्वार्दो व्यस्तप्रयोगः । जीमूतस्येवेत्यादौ तैत्तिरीयाणां च पृथक्पदत्वेन पाठः । बह्वृचैरेव तत्र समासोऽभ्युपगम्यते । वागर्थाविवेत्यादौ त्विवशब्दः समस्तः पृथग् वा । समासफलमेकार्थीभाव ऐकपद्यमैकस्वर्यम् । तेन द्व्यन्तरस्य यथाऽग्निरिवराजो वायुरिवसस्य उर्वशीवजानिरग्निरिवकल्पो वायुरिवपाश इत्यादि । अपि च हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणी"मिति, "अद्यैतमप्यनुभवामि करस्थबिल्वतुल्यं शरीरमहिमानमस्यनीव वीक्ष्ये"त्यादिप्रयोगोऽपि साधुरिति केचित् । अन्ये त्वेतन्न सहन्ते । तथा च मार्गः—"हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणी-मित्यसाध्वेव । मातेति प्रथमाया मातृसदृशीमित्यर्थेऽसाधुत्वादि"ति । तत्रापि समासे मातरमिव हितकारिणीमित्यर्थेऽन्यस्मिन्नवशीमिवेति यथायथं विभक्तेर्विपरिणामो लोपाभावश्च स्यादित्येके ।

(2) अपचितपरिमाणा शृगाली किखीति हरदत्तादयः । सृष्टिधरस्त्वाह—"किं खादामीति या भिक्षुकी आम्यति सा किखी । पृषोदरादित्वात् सिद्धम् । तथाच किखी मर्कटीति धरणिः । तद्वदनशक्तिता" इति । इतीरेतदुदाहरणव्याख्याने पदमञ्जरीकार आह "अप्रसिद्धोदाहरणं चिरन्तनप्रयोगात् ।" इति ।

सन्ततम्। साकल्यवचने। सतृणमभ्यवहरति। तृणमपि न त्यजतीत्यर्थः। अन्तवचने। सतचितमधीते।

७। यथाऽसादृश्ये।

यथाशब्दः समस्यते। ये ये वृद्धा यथावृद्धम्। न सादृश्ये। यथा मम तथा त्वम्।

८। यावदवधारणे।

इयत्तायां यावच्छब्दःसमस्यते। यावदन्नयनं भिक्षून् वासय।

९। सुप् प्रतिना मात्रार्थे।

लेशार्थे सुबन्तं प्रतिना समस्यते। न सुखप्रति संसारे। न दोषप्रति बौद्धदर्शने।

१०। अक्षशलाकासंख्याः परिणा।

अमी परिणा समस्यन्ते। द्यूतव्यवहारेऽभिधानम्। अक्षपरि। शलाका-परि। संख्या। एकपरि। द्विपरि।

११। विभाषा।

अतःपरं विभाषा समासो वाच्यः।

१२। अपपरिबहिरञ्चवः पञ्चम्या।

एते पञ्चम्यन्तेन समस्यन्ते। अपत्रिगर्त्तम्। परित्रिगर्त्तम्। बहिर्ग्रामम्। प्राग्ग्रामम्। विभाषाधिकाराद्वाक्यञ्च। अप त्रिगर्त्तेभ्यः। परि त्रिगर्त्तेभ्यः। बहिर्ग्रामात्। प्राग् ग्रामात्।

१३। आङ् मर्य्यादाभिविध्योः

एतयोराङ् पञ्चम्या समस्यते। आसमुद्रं गतः। आकुमारं यशस्तव।

१४। लक्षणेनाभिप्रती आभिमुख्ये।

आभिमुख्यार्थेऽभिप्रती लक्षणवाचिना सुबन्तेन समस्येते। अभ्यग्नि शल-भाःपतन्ति। प्रतिदीपं शलभाःपतन्ति। लक्षणेन किम्? दिङ्मोहात् स्रुग्घ्नं प्रति गतः।

१५ । अनुर्यत् समया ।

१६ । यस्य चायामः ।

अनुशब्दो यस्य समीपवाची यस्य च दैर्घ्यवाची तेन समस्यते । अनुवनं चौराः । तत्समीपा इत्यर्थः । अनुगङ्गं वाराणसी । गङ्गावदायता ।

१७ । तिष्ठद्गुप्रभृतीनि च ।

अमूनि यथापाठं साधूनि स्युः । तिष्ठन्त्यस्मिन् काले गाव इति तिष्ठद्गु कालः । वहद्गु कालः । आयतीगवम् । खलेयवम् । प्राह्णम् । प्रदक्षिणम् । प्ररथम् । समचम् । अपसव्यम् । इच् कर्मव्यतीहारे । दण्डादण्डि ।

१८ । पारेमध्ये षष्ठ्या वा ।

एतौ षष्ठ्या वा समस्येते । निपातनादेत्वम् । पारेसमुद्रं सरित् । मध्येगङ्गम् । पक्षे षष्ठीसमासः । ग्रामपारम् । गङ्गामध्यम् ।

१९ । संख्या वंश्येन ।

वंश्यभवेन संख्या समस्यते । द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि । त्रिमुनि व्याकरणस्य ।

२० । नदीभिश्च ।

नदीभिः संख्या समस्यते । समाहारेऽभिधानम् । द्वियमुनम् । पञ्चनदम् ।

२१ । अन्यपदार्थे च संज्ञायाम् ।

नामेव ग्रुवन्तमन्यपदार्थे नदीभिः समस्यते । उन्मत्तगङ्गं नाम देशः ।

२२ । तत्पुरुषः ।

अधात ऊर्ध्वं तत्पुरुषो वाच्यः प्राग् बहुव्रीहेः ।

२३ । द्विगुश्च ।

द्विगुसमास तत्पुरुषसंज्ञः स्यात् । पञ्चराजी (१) । पञ्चगवम् । तत्पुरुषत्वे टच् ।

(१) [illegible] ...पञ्चराजी इति ... [illegible] ... प्राप्नोतीति ... [illegible]

२४। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।

एभिर्द्वितीयान्तं समस्यते। कष्टं श्रितः कष्टश्रितः। लोकातीतः। भूमिपतितः। विपद्गतः। तरङ्गात्यस्तः। सुखप्राप्तः। सुखापन्नः। द्वितीयेति योगविभागाद् "विप्रेषविदुषः प्राज्ञम्।" "विप्राय वेदविदुषे।"

(वा) गमिगाम्यादीनाञ्च। ग्रामगमी। ग्रामगामी। ओदनं बुभुक्षुरोदनबुभुक्षुः। "हिमशीर्षैनिराकरिष्णुः"।

२५। स्वयं क्तेन।

स्वयं क्तान्तेन समस्यते। स्वयंविलीनम्। स्वयंकृतम्। तस्येदम् (४।३।१२०)। स्वायंकृतम्।

२६। खट्वा क्षेपे।

द्वितीयान्ता खट्वा क्तान्तेन समस्यते निन्दा चेत्। "खट्वारूढः प्रमादवान्"।

२७। सामि।

इदं क्तान्तेन समस्यते। सामिविलोकितम्। सामिकृतम्। तस्य शेषः सामिकृतशेषः। सामीत्यर्थमव्ययमेतमभिप्रायमर्धकृतमित्येके।

२८। कालाः।

द्वितीयान्ताः कालशब्दाः क्तान्तेन समस्यन्ते। षड्रतिसृताः। रात्र्यारूढाः।

२९। अत्यन्तसंयोगे च।

अत्र च द्वितीयान्ताः कालशब्दाः सुपा सह समस्यन्ते। मुहूर्तसुखम्। चिरोषितः। वर्षभोग्यः।

पूर्वनिपातेऽपि पत्रे पात्रादित्वात् पञ्चराजमित्येव बोधितम्।"—इति। भाष्यटीका भाष्यप्रदीप इति। तथाच कैयटः—"पञ्चराजमिति। समाहारेऽकारान्तोत्तरपदत्वाभावात् ङीबभावः। यदा समाहारेऽकारान्तोत्तरपदान्ताः समाहारा इति पक्षस्तदा तु स्त्रीत्वविकल्पात् ङीबभावः"। इति। इदमयुक्तमिव। प्रतीयते। तथाच पदमञ्जरी—"क्वचित् पञ्चराजीति ङीबन्तस्य पाठः। स भाष्यविरोधादपपाठः।" इति। माधवस्तु पञ्चराजीति ङीबन्तमाह। तदपि वामनवृत्ती रामचन्द्राचार्येण—"यदा समाहारे उत्तरपदात् एव समासे भवतीत्युक्तम्। तेन पञ्चराजीत्यत्रापि अकारान्तोत्तरपदसमाहारविवक्षायां स्त्रियां ङीप् भवती"ति।

३० । तृतीया तत्कृतार्थेन गुणवचनेन ।

तृतीयान्तं तत्कृतेन गुणवचनेन समस्यते । गुणमुक्तवान् गुणवचनः । शङ्कुलया खण्डः शङ्कुलाखण्डः । अक्ष्णा काणः । अर्थशब्देन च । धान्येनार्थो धान्यार्थः । तत्कृतेन किम् ? अक्ष्णा काणः । वचनग्रहणं किम् ? घृतेन पाटवम् ।

३१ । पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ।

एभिस्तृतीयान्तं समस्यते । मासेन पूर्वो मासपूर्वः । पितृसदृशः । गुणसमः । एकोनः । वाक्कलहः । वाङ्निपुणः । गुडमिश्रः । आचारश्लक्ष्णः । कथं गुणतुल्यो दध्नविकलो मासावरः ? भाविबहुलवचनात् ।

३२ । कर्तृकरणे कृता बहुलम् ।

कर्तरि करणे च या तृतीया तदन्तं कृदन्तेन समस्यते । चौरहतः । व्याघ्रहतः । करणे । शरभिन्नः । लोष्टहतः । बहुलग्रहणं किम् ? दात्रेण लूनवान् । पूर्वमुत्तरस्य विधानं बहुलप्रपञ्चः ।

३३ । कृत्यैरधिकार्थवचने ।

कृत्यैस्तृतीयान्तं समस्यतेऽधिकार्थोक्तिश्चेत् । काकपेया नदी । वाष्पच्छेद्यानि तृणानि ।

३४ । अन्नेन व्यञ्जनम् ।

समस्यते । दध्नोपसिक्त ओदनो दध्योदनः ।

३५ । भक्ष्येण मिश्रीकरणम् ।

समस्यते । गुडेन मिश्रा धाना गुडधानाः । गुडपिष्टकाः । तिलतण्डुलाः ।

३६ । चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ।

चतुर्थ्यन्तमेभिः समस्यते तादर्थ्ये । यूपाय दारु यूपदारु । प्रकृतिविकारभावेऽभिधानादेव । रन्धनाय स्थाली । अवहननायोदूखलम् ।

यूपवलिः। गोहितम्। गोसुखम्। गोरक्षितम्। इह चाश्वघासादयस्तु चतुर्थीति योगविभागात्। षष्ठीसमासेन वा।

(क) अर्थशब्देन नित्यसमासवचनं सर्वलिङ्गता च। विप्रार्थः सूपः। विप्रार्था शाटी। विप्रार्थं पयः।

३७। पञ्चमी भयेन।

भयवाचिना पञ्चम्यन्तं समस्यते। चौराद् भयं चौरभयम्। व्याघ्रभीतिः। कथं सितेतरो ग्रामनिर्गतोऽधर्मजुगुप्सुः? पञ्चमीति योगविभागात्।

३८। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः।

एभिरल्पा पञ्चमी समस्यते। दुःखापेतः सुखापेतः। कल्पनापोढः। रोगमुक्तः। स्वर्गपतितः। चौरापत्रस्तः। अल्पशः किम्? प्रासादात् पतितः।

३९। स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन।

स्तोकाद्यर्थाः कृच्छ्रञ्च क्तेन समस्यन्ते। स्तोकान्मुक्तः। अल्पान्मुक्तः। अन्तिकादागतः। अभ्यासादागतः। दूरादागतः। कृच्छ्रादवाप्तः। पञ्चम्याः स्तोकादिभ्य (६।३।२) इत्यलुक्।

४०। सप्तमी शौण्डैः।

शौण्डादिभिः सप्तम्यन्तं समस्यते। अक्षशौण्डः। अक्षधूर्तः। परीऽधि पराधीनः। स्वाधीनः। रणपण्डितः। कार्य्यनिपुणः। आकृतिगणोऽयम्।

४१। सिद्धशुष्कपक्वबन्धैश्च।

एभिः सप्तमी समस्यते। काम्पिल्यसिद्धः। आतपशुष्कः। छायाशुष्कः। "आश्रमपक्वं फलम्।" स्थालीपक्वः। चारकबन्धः।

४२। ध्वाङ्क्षेण क्षेपे।

ध्वाङ्क्षवाचिना सप्तम्यन्तं समस्यते क्षेपश्चेत्। तीर्थध्वाङ्क्षः। तीर्थकाकः। तद्वदनवस्थित इत्यर्थः।

४३ । कृत्यैर्ऋणे ।

कृत्यैरिति सौत्रो निर्देशः । कृत्येन यता सप्तम्यन्तं समस्यते । मासदेयम् । वर्षदेयम् । ऋणस्य नियोगोपलक्षणार्थत्वात् पूर्वाह्णगेयं साम ।

४४ । संज्ञायाम् ।

सप्तम्यन्तं समस्यते । वनेकिंशुकाः । हलदन्तादित्यलुक् (६।३।९) ।

४५ । क्तेनाहोरात्रावयवाः ।

एते सप्तम्यन्ताः क्तेन समस्यन्ते । पूर्वाह्णकृतम् । अपररात्रकृतम् । अवयवग्रहणं किम्? अह्नि कृतम् ।

४६ । तत्र ।

इदं क्तेन समस्यते । तत्रभुक्तम् । तत्रकृतम् । तस्येदम् (४।३।१२०) । तात्रकृतम् ।

४७ । क्षेपे ।

क्षेपे सप्तम्यन्तं क्तेन समस्यते । प्रवाहेमूत्रितम् । भस्मनिहुतम् । तत्पुरुषे कृतीत्यलुक् (६।३।१४) ।

४८ । पात्रेसमितादयश्च ।

अमी क्षेपे निपात्यन्ते । पात्रेसमिताः । कूपमण्डूकाः । उदुम्बरकृमिः । पिण्डीशूरः । मातरिपुरुषः । मातरिशूरः । गोष्ठेप्रवीरः । गेहेनर्दी । गेहेपटुः । गेहेमेही । गेहेपण्डितः ।

४९ । पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।

पूर्वकालादयः शब्दा एकादयश्च समानाधिकरणेन सुपा सह समस्यन्ते । दग्धप्ररूढः । स्नातानुलिप्तः । एकादयः । एकपण्डितः । एकपत्नी । सर्व-

देवाः। जरद्गवः। पुराणान्नः (4)। नवोदकम्। केवलान्नम्। समानाधिकरणेन किम्? एकस्याः क्षौरम्।

५०। दिक्संख्ये संज्ञायाम्।

एते नाम्नि समस्येते। समानाधिकरणेनेति चा पादमनुवर्त्तते। पूर्वेषुकामशमी। पञ्चाम्राः (5)। सप्तर्षयः। कथमनाम्नि चतुर्वर्गो द्विपदाश्रितो विधिर्द्वीन्द्रिये इति? कार्य्योऽत्र यत्नः। (6)

५१। तद्धितार्थोत्तरपदसमाहारे च।

तद्धितार्थे विषयभूते उत्तरपदे परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन समस्येते। तद्धितार्थे। पौर्वशालः। पाञ्चनापितिः। उत्तरपदे। *पञ्चगवप्रियः। पञ्चगवधनः। समाहारे दिङ् न सम्भवति। पञ्चकुमारी।*

५२। संख्यापूर्वो द्विगुः।

अनन्तरसूत्रे संख्यापूर्वसमासो द्विगुरुच्यते। पञ्चकपालः सूपः। द्विगो-

---

(4) पुराणान्नरिति पाठान्तरम्। अत्र हरिहरः—"पिनष्टीति अन्नः पेष्टा। चौरादिक उः" इति। अन्न अन्नेरि क्रुधि चेति विग्रहः।

(5) तथाहुः—"अश्वत्थ एकः पिचुमर्दं एको द्वौ चम्पकौ त्रीणि च केशराणि। सप्ताथ तालान् नव नारिकेलान् पञ्चाम्ररोपी नरकं न याति" ॥ १ ॥ इति। पिचुमर्दो निम्ब इत्यर्थः। पिचुमन्द इति मतान्तरे रूपम्।

(6) अयमत्र यत्नः। चतुरवयवाश्चतुष्परिमिता वा वर्गाश्चतुर्वर्गाः। द्व्यवयवे द्विसंख्याके वा पदे। तदाश्रितो विधिः। द्व्यवयवे द्विसंख्याके वेन्द्रिये जीवेन्द्रिये इति। सर्वत्र शाकपार्थिवादित्वात् (२।१।६०, वा) समासः। अपि च द्विपदाश्रित इत्यादौ त्रिपदतत्पुरुषोऽपि न। तत्र परिमाणविशेष्यैव (२।१।५१, वा) विधिश्रवणात्। सुप् सुपेत्यत्र एकस्य विवक्षितत्वाद् द्वयोर्द्वयोरेव तत्पुरुषः। न बहूनां युगपत्। एवं हि त्रिलोकनाथेन सतां मखद्विष इति पुराणस्य कवेस्तस्य चतुर्मुखसमीरितेति त्रिलोकनाथः पितृसद्मगोचर इति च कालिदासस्य, नवरत्नरचितेति भट्टस्य, पञ्चपुरुषगामिनीत्यादयश्च प्रयोगाः समाधेयाः। ननु ते त्रिपद-तत्पुरुषेण साध्याः। न च पञ्चपुरुषादिषु विशेषणसमासः। दिक्संख्ये संज्ञायामिति (२।१।५०) नियमात्। नापि समाहारे द्विगुः। द्विगो (४।१।२१) रिति ङीप्प्रसङ्गात्। पात्रादित्वं (२।४।३०, वा) न कल्पनीयम्। "यदि त्रिलोकी गणनापरा स्याद्"इत्यादिप्रयोगस्यासाधुतापत्तेः। त्रिलोकनाथ इत्यत्र अवयवो लोकस्त्रिलोक ध्रुवस्य नाथ इति, त्रयाणां लोकानां नाथ इति वा, नवरत्नरचितेत्यत्र नवरत्नैरिति बहुव्रीहिं कृत्वा रचितेत्यनेन समासः इति वा, व्याख्यानम्। एवं चतुर्मुखसमीरितेत्यत्र चतुर्दिक्स्थानि चतुःसंख्याकानि चतुरवयवानि वा मुखानि चतुर्मुखानि। तैः समीरितेति विग्रहः। एवमन्यत्रापि यथोचितमूह्यम्।

लुंगनपत्य इत्यणो (४।१।८८) लुक् । पञ्चनावप्रियः । नावो द्विगोरिति (५।४।९९) टच् । पञ्चपूली । द्विगो (४।१।२१) रिति ङीप् । पञ्चकुमारि ।

५३ । कुत्सितानि कुत्सनैः ।

कुत्सितार्थानि कुत्साकरैः समस्यन्ते । वैयाकरणखसूचिः ।

५४ । पापाणके कुत्सितैः ।

एते कुत्सितैः समस्येते । पापपुरुषः । अणकभार्य्या । "किं मयाणकभार्य्यया ।"

५५ । उपमानानि सामान्यवचनैः ।

उपमानवाचीनि सामान्यधर्मवचनैः समस्यन्ते । शङ्ख इव पाण्डरः शङ्खपाण्डरः । कनकगौरः । शस्त्रीश्यामा । स्त्रियाः पुंवत्ते (६।३।२४) मृगचपला । काकवन्ध्या ।

५६ । उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।

उपमेयं व्याघ्रादिभिः समस्यते । पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः । मुखचन्द्रः । करपद्मम् । सामान्याप्रयोगे किम् ? पुरुषोऽयं व्याघ्रइव शूरः । नन्वत्र सापेक्षत्वान्न भविष्यति । तज्ज्ञापयति प्रधानस्य सापेक्षस्यापि समासोऽस्तीति । तेन राजपुरुषोऽभिरूपकः । राजपुरुषो दर्शनीय इति ।

५७ । विशेषणं विशेष्येण बहुलम् ।

विशेषणवाचि सुबन्तं विशेष्यवाचिना सुबन्तेन समस्यते । नीलोत्पलम् । कृष्णतिलाः । रक्तदुत्पलम् । इदंजी । इदम्मुखः । बहुलग्रहणादेव । बोधिसत्त्वो महासत्त्वः । रामो जामदग्न्यः । इह च नित्यम् । कृष्णसर्पः । विशेषणं किम् ? वृक्षः शिंशपा । मधुरोऽश्वकः । इह च तत्पुरुषविधानमस्यैव प्रपञ्चमाहुः । विशेषणमेव हेतत् कष्टश्रितो राजपुरुष इति ।

५८ । पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ।

एभी समानाधिकरणेन सुपा समस्यन्ते । पूर्वपण्डितः । अपरभार्य्या । प्रथमपुरुषः । चरमपर्वतः । जघन्यधर्मः । समानवयसम् । मध्यदेशः । मध्यमनरः । वीरपुरुषः ।

५९। श्रेण्यादयः कृतादिभिः।

एभिरमी समस्यन्ते। च्व्यर्थेऽभिधानम्। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। एवं पूगभूताः। श्रेणि पूग कूट पटु देव मृदु अवय पण्डिताद्याः श्रेण्यादयः। कृत भूत समाख्यात। कृतादिः।

६०। क्तेन नञ्विशिष्टेनानञ्।

नञ्विशिष्टेन क्तेनानञ् क्तान्तं समस्यते। कृतञ्च किञ्चिदकृतञ्च किञ्चित् कृताकृतं कार्य्यम्। भुक्ताभुक्तम्। अशितानशितम्।

(क) कृतापकृतादीनामुपसंख्यानम्। कृतापकृतम्। गतप्रत्यागतम्।

(ख) शाकपार्थिवादीनां मध्यपदलोपश्च। शाकप्रधानः पार्थिवः शाकपार्थिवः। अजातौल्वलिः। विन्ध्यगिरिः। चन्दनद्रुमः। श्रीहर्षनृपतिः। सुग्रीवकपिः। कारणकारकम्। तर्कविद्या। व्याकरणशास्त्रम्।

६१। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।

एते पूज्यमानैः समस्यन्ते। सत्पुरुषः। महापुरुषः। पूज्यमानैः किम्? उत्कृष्टा गौः पङ्कात्। उद्धृतेत्यर्थः।

६२। वृन्दारकनागकुञ्जरैः पूज्यमानम्।

अमीभिः पूज्यमानं समस्यते। गोवृन्दारकः। योषिद्वृन्दारिका। पुरुषनागः। मुनिकुञ्जरः। पूज्यमानं किम्? देवदत्तो नागो यतो मूर्खः।

६३। कतरकतमौ जातिपरिप्रश्ने।

इमौ जातिपरिप्रश्नवृत्ती समस्येते। कतरकठः। कतमकालापः। जातिपरिप्रश्ने किम्? कतमो भवतां पटुः। अतएवाजातावपि उत्तम-शुचेयः कतमो चैत्रमैत्राविति।

६४। किं क्षेपे।

किंशब्दः क्षेपे समस्यते। किंगौः। अदोहवाहात्। किंपुरुषः। दौः-शील्यात्। किंराजा यो न रक्षति।

६५। पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः।

एभिर्जातिः समस्यते। गोपोटा। गोयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयम्। गोगृष्टिः। गोधेनुः। गोवशा। गोवेहत्। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। विप्राध्यापकः। बकधूर्तः। जातिः किम्? यज्ञदत्तो धूर्तः।

६६। प्रशंसावचनैश्च।

एभिर्जातिः समस्यते। गोमतल्लिका। अश्वप्रकाण्डम्।

६७। युवा खलतिपलितवलिनजरतीभिः।

खलत्यादिभिर्युवा समस्यते। युवा चासौ खलतिश्चेति युवखलतिः। युवपलितः। युववलिनः। इह लिङ्गविशिष्टग्रहणात् समानाधिकरणाधिकारबलाद्वा युवतिर्जरती युवजरती।

६८। कृत्यतुल्याख्या अजात्या।

कृत्याख्यास्तुल्याख्याश्चाजात्या समस्यन्ते। एवं भोज्यं भोज्योष्णम्। पानीयोष्णम्। भोज्यलवणम्। तुल्याख्या। तुल्यश्वेतश्चन्द्रेण। सदृशमहान् गिरिर्वा। अजात्या किम्? भोज्य ओदनः। विशेषणसमासोऽपि बाध्यते।

६९। वर्णो वर्णेन।

समस्यते। कृष्णलोहितः। कृष्णशबलः। श्वेतरक्तः।

७०। कुमारः श्रमणादिभिः।

एभिः समस्यते। कुमारी श्रमणा कुमारश्रमणा। कुमारकुलटा। कुमारपण्डितः। एवं तापसी। गर्भिणी। अध्यापक। पटु। निपुणादि।

७१। चतुष्पादो गर्भिण्या।

चतुष्पाद्वाचिनो गर्भिण्या समस्यन्ते। गोगर्भिणी। अश्वगर्भिणी। जातेरभिधानादेव। कालाक्षी गर्भिणी।

७२। मयूरव्यंसकादयश्च।

एते तत्पुरुषे निपात्यन्ते। व्यंसको धूर्तः। मयूरव्यंसकः। छात्रव्यंसकः।

काम्बोजमुण्डः। यवनमुण्डः। परनिपातार्थमेषां पाठः। उच्चावचम्। परम-कृत्वा। पीत्वास्थिरकः। "राघवः प्रोष्यपापीयान्"। या इच्छा यदृच्छा।

(क) अव्ययं कृतेति वक्तव्यम्। प्रातर्दोहः। अवश्यंकारी। (7)

(1) एहीडादयोऽन्यपदार्थे। एहि ईड इति यत्रोच्यते तदेहीडम्। इह एहीति यत्रोच्यते तदेहीडं कर्म।

(2) जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाभिदधाति। जह्यन्तं कर्मणा समस्यते। समासश्च कर्त्तारमाह। जहि जोड़मित्यभीक्ष्णमाह जहिजोड़ः। जहिस्तम्बः।

(3) आख्यातमाख्यातेन क्रियासातत्ये। अश्नीत पिबतेति यत्रोच्यते सा नियोजनक्रियाऽश्नीतपिबता। पचतभृज्जता। खादतमोदता। आकृतिगणोऽयम्।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
द्वितीयाध्यायस्य प्रथमः पादः ॥२।१॥
समासश्च समर्थपादः।

---

(7) एतच्चाविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्य इति वचनात्। वार्त्तिककारस्तु कुगति-प्रादय (२।२।१८) इत्यत्रैवाव्ययं प्रवृद्धादिभिरित्युक्त्याव्ययेन क्रियारूपेणेव समासं विहितवान्। तेन पुनःप्रवृद्धम् पुनर्नवः पुनःसुखमित्यादिषु तत्पुरुषः सिद्धः। परन्तु प्रातर्दोहादीनामत्र विधानं चिन्त्यमेव। मयूरव्यंसकादयश्च (२।१।७२) चकारस्यावधारणार्थत्वादेषां समासान्तरे घटकतया प्रवेशानर्हत्वापत्तेः।

अथ

भाषावृत्तिः।

द्वितीयोऽध्यायः। द्वितीयः पादः।

१। पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे।

पूर्वादयोऽवयविना एकद्रव्ये वर्त्तमानाः समस्यन्ते। पूर्वं कायस्य पूर्वकायः। अपरकायः। उत्तरकायः। अधरकायः। कथं मध्याह्नः सायाह्नः पश्चिमरात्रः? विशेषणसमासोऽस्तु। यद्येवमनेनैव पूर्वश्चासौ कायश्चेति सिद्धम्। किं सूत्रेण? नैवम्। षष्ठीसमासापवादत्वात् सूत्रस्य। नहि भवति कायपूर्वं इति।

२। अर्द्धं नपुंसकम्।

समभागि क्लीवलिङ्गमर्द्धमेकदेशिना समस्यते। अर्द्धपिप्पली। अर्द्धनख-रञ्जनी। नपुंसकं किम्? ग्रामार्द्धः। नगरार्द्धः।

३। द्वितीयतृतीयचतुर्थतुर्य्याण्यन्यतरस्याम्।

एतान्येकद्रव्ये वर्त्तमानान्यवयविना समस्यन्ते वा। द्वितीयं भिक्षाया द्वितीयभिक्षा। तृतीयवापी। चतुर्थनदी। तुर्य्यकथा। पक्षे भिक्षाद्वितीयम्। वापीतृतीयम्। नदीचतुर्थम्। कथातुर्य्यम्।

४। प्राप्तापन्ने च द्वितीयया।

इमे द्वितीयान्तेन समस्येते। अ चेति। यदा लिङ्गविशिष्टपक्षस्ता टाबन्ताभ्यां समासस्तदाऽकारस्यान्तादेशः। सौत्रत्वाच्चास्य प्रश्लेषः (४)। प्राप्तो

---

(४) भाष्येऽकारमत्र चकारेणानुमितः। तथाहि—"नायमनुकर्षणार्थश्चकारः। किं तर्हि? अकारमनि विधीयते" इति। द्वितीयया च इति भट्टोजिमते छेदः। कैयटमते प्राप्तापन्ने इत्यत्र परमकारस्य श्लिष्टिः "सौत्रत्वाच्च निर्देशस्य प्रकृतिभावः सवर्णदीर्घत्वं न भवती"। त्याहुः। नागेशोऽप्यत्र कैयटमतानुसारी।

जीविकां प्राप्तजीविकः। आपन्नसुखः। प्राप्ता जीविकां प्राप्तजीविका। आपन्नसुखा। कथं जीविकाप्राप्तः सुखापन्न इति ? द्वितीयाश्रितेति (२।१।२४) वचनसामर्थ्यात्।

५। कालाः परिमाणिना।

कालशब्दाः परिच्छेद्येन समस्यन्ते। मासो जातस्य मासजातः। वर्षजातः। द्व्यहजातः।

६। नञ्।

नञ् समर्थेन सुपा समस्यते। अब्राह्मणः। अशुक्लः। अनेकः। असर्वः। असर्वस्मै। अकृत्वा। अकर्त्तुम्।

७। ईषदकृता।

अकृदिति गुणोपलक्षणम्। ईषद् गुणेन समस्यते। ईषद्रक्तः। ईषद्रक्तिः पुरुषः।

८। षष्ठी।

षष्ठ्यन्तं सुपा समस्यते। राजपुरुषः। राजपुरुषधनम्।

(क) कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्। इध्मप्रव्रश्चनः। उद्दालिका।

(ख) तत्स्थैश्च गुणैर्नतु तद्विशेषणैः। गुणात्मन्येव ये गुणाः सन्ति नतु सोऽयमित्यभेदोपचाराच्छुक्लादिवद् द्रव्ये तैर्गुणैः षष्ठी समस्यते। गुणेनेति (२।२।११) निषेधं वक्ष्यति। तस्यायमपकर्षः। ब्राह्मणवर्णः। चन्दनगन्धः। कपित्थरसः। पटध्वनिः। मधुस्पर्शः। नतु तद्विशेषणैः। घृतस्य तीव्रः। चन्दनस्य मृदुः।

९। याजकादिभिश्च।

अयं योगः कर्त्तरि चेति (२।२।१६) निषेधापवादत्वात् स्वरार्थो व्याख्यातव्यः।

१० । न निर्धारणे ।

निर्धारणे या षष्ठी सा न समस्यते । नराणां क्षत्रियः शूरतमः । गवां कृष्णा सम्पन्नक्षीरतमा । अध्वगानां रथिनः शीघ्रतमाः ।

(क) प्रतिपदविधाना षष्ठी न समस्यते । सर्पिषो ज्ञातम् । मातुः स्मृतम् । चौरस्य रुग्णम् ।

११ । पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ।

पूरणादिना षष्ठी न समस्यते । छात्राणां पञ्चमः । भिक्षूणामष्टादशः । गुणे । बलाकायाः शौक्ल्यम् । पटस्य लौहित्यम् । पटस्य शुक्लः । इह च वैशेषिकप्रसिद्धाः संख्यादयो गुणा गृह्यन्ते । अतसङ्ख्यान्ताच्च निष्कादिति (५।२।११९) वचनात् । नापि धर्ममात्रं गुणो गृह्यते । अधिकरणैतावत्त्वे च (२।४।१५) वर्त्तमानसामीप्ये वर्त्तमानवद्वेति (७।३।१३१) निर्देशात् । तेन गोशतं गोचत्वारिंशद् बुद्धिवैगुण्यं वचनसामर्थ्यं "पद्मासनकौशलं" मुनि-चापलं वक्षपीतिमा द्रव्यकाठिन्यं "पत्रालीपिङ्गलिम्नः" उदरगौरवमित्यादयः साधवः स्युः । सुहितार्थास्तृप्त्यर्थाः । फलानां तृप्तः । फलानां सुहितः । फलानामाशितः । शेषषष्ठीयम् । नलोकेति (२।३।६९) तद्योगायाः प्रतिषेधात् । सत् । चौरस्य द्विषन् । मित्रस्य कुर्वन् । मित्रस्य कुर्वाणः । अव्ययम् । विप्रस्य कृत्वा । तव्यः । ब्राह्मणस्य कर्त्तव्यम् । एकाधिकरणे । राज्ञः स्नोगन्नस्य । पाणिनेः सूत्रकारस्य ।

१२ । क्तेन च पूजायाम् ।

पूजायां क्तेन षष्ठी न समस्यते । राज्ञां मतम् ।

१३ । अधिकरणवाचिना च ।

इदमेषामासितम् ।

१४ । कर्मणि च ।

कर्मणि षष्ठी न समस्यते । आश्चर्यो गवां (9) दोहोऽगोपालकेन ।

---

(9) अव्ययानिति लिखन्त इत्यपर आह—"अप्रयुक्तत्वमेनासिद्धर्थः । नञ्तत्पुरुषादिति (५।४।७१) समासान्तनिषेध" इति (भाषावृत्त्यर्थविवृती) ।

१५। तृजकाभ्यां कर्त्तरि।

तृजकाभ्यां योगे कर्त्तरि षष्ठी न समस्यते। भवतः शायिका। भवतोऽग्रगामिका। तृज्ग्रहणमुत्तरार्थम्।

१६। कर्त्तरि च।

कर्त्तरि यौ तृजकौ विहितौ ताभ्यां योगे कर्मणि षष्ठी न समस्यते। अपां स्रष्टा। पुरां भेत्ता। ओदनस्य भोजकः। निषेधपक्षसूत्रीयं स्वरार्थां। शेषषष्ठीसमासस्यानिवारणात्। तेन राजसम्मतो "राममहितः" भवदासितं भवदासिका गोदोह"स्ततकर्त्ता फलभाग् यत" इति भर्तृहरिः। क्रिया विशेषको जातिवाचकस्तत्प्रयोजक इत्याद्यसंख्याः षष्ठीसमासा भवन्त्येव। तस्मात् केवलं कारकषष्ठीसमासे सति गतिकारकोपपदात् कृदि-(६।२।१३९)-त्युत्तरपदप्रकृतिस्वरेणौदनभोजकादयो मध्योदात्ता मा भूवन्। शेषषष्ठीसमासे सति समासान्तोदात्ता (६।१।२२३) यथा स्युरिति निषेध आरभ्यते। याजकादिभिश्चेति (२।२।९) पुनः कारकषष्ठीसमासप्रतिप्रसवाद् ब्राह्मणयाजकादिषूत्तरपदप्रकृतिस्वर एव।

१७। नित्यं क्रीडाजीविकयोः।

आभ्यामेतेन षष्ठी समस्यते। नित्यमिति वाक्यनिवृत्त्यर्थम्। दमनकभञ्जिका नाम क्रीड़ा। संज्ञायां ण्वुल् (३।३।१०९)। जीविकायाम्। दन्तलेखकः। नखलेखकः। ण्वुल्तृचौ (३।१।१३३)।

१८। कुगतिप्रादयः।

एते नित्यं समस्यन्ते। कुपुरुषः। कुदृष्टिः। कोष्णम्। गतिः। उरीकृत्य। प्रकृत्य। प्रादिः। दुष्कुलम्। सुमानुषी। आपिङ्गलः। प्रगत आचार्यः प्राचार्यः। अतिखट्वः। निष्कौशाम्बिः। प्रादिग्रहणे कर्मप्रवचनीयानां कृपिनिषेधः। अनभिधानात्। वृक्षं प्रति विद्योतते विद्युत्।

क्वचिन्नभवत्येव। अतिस्तुतम्। अतिरतिक्रमणे चेति (१।४।९५) कर्मप्रवचनीयत्वात् षत्वाभावः। (10)

१९। उपपदमतिङ्।

नित्यमुपपदं समस्यते। कुम्भकारः। ग्रामणीः। अग्निचित्। अतिङिति किम्? कर्त्तुं व्रजति। कारको व्रजति।

२०। अमैवाव्ययेन।

यदव्ययेनोपपदं समस्यते तदामैव। स्वादुङ्कारं भुङ्क्ते। नान्येन। कालो भोक्तुम्।

२१। तृतीयाप्रभृतीन्यन्यतरस्याम्।

उपदंशस्तृतीयायामित्यादौ (३।४।४७) तृतीयादीन्युपपदान्यमा वा समस्यन्ते। मूलकेनोपदंशं भुङ्क्ते मूलकोपदंशं वा। उच्चैःकारम्।

२२। क्त्वा च।

तानि क्त्वान्तेन वा समस्यन्ते। उच्चैःकृत्य उच्चैः कृत्वा वा कथयति। तृतीयाप्रभृतीनीत्येव। अलं कृत्वा। खलु कृत्वा। उक्तस्तत्पुरुषः।

२३। शेषो बहुव्रीहिः।

तत्पुरुषाव्ययीभावाभ्यामन्यो बहुव्रीहिर्नाम समासो वाच्यः।

२४। अनेकमन्यपदार्थे।

अनेकं सुबन्तमन्यपदार्थे वर्त्तमानं समस्यते। प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। दत्तबलिर्दानवः। च्युतफलस्तरुः। सुबद्धजटकोऽयो व्रती।

---

(10) सूत्रेऽभिप्रेतानि वार्त्तिकानि—(क) "प्रादिप्रसङ्गे कर्मप्रवचनीयप्रतिषेधः। (ख) स्वतीत-प्रतिषेधश्च। (ग) सिद्धं तु क्ताङ्गतिदुर्गतिवचनात्। (घ) प्रादयः क्तार्थे। (कुः पापार्थे। आङीषदर्थे। स्वती पूजायाम्। दुर्निन्दायामिति सौनागाः।) (ङ) प्रादयो गताद्यर्थे प्रथमया। (च) अत्यादयः क्रान्ताद्यर्थे द्वितीयया। (छ) अवादयः क्रुष्टाद्यर्थे तृतीयया। (ज) पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। (झ) निरादयः क्रान्ताद्यर्थे पञ्चम्या। (ञ) अव्ययं प्रवृद्धादिभिः। (ट) इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च। (ठ) वहावयवता लिङ्गं वतिमता चाव्ययं समस्यत इति वक्तव्यम्।

बहुमत्स्यो देशः । इह च यथाभिधानं व्यवस्था । तेन मत्वर्थे बहुव्रीहिः । चित्रगुर्देवदत्त इति । न सम्बन्धमात्रे । तथा प्रथमार्थे न भवति दृष्टे देवे गत इति । क्वचित् सामानाधिकरण्येऽपि न स्यात् पञ्च भुक्तवन्तोऽस्येति । व्यधिकरणानाञ्च स्यात् । कण्ठेकालः । उरसिलोमा । उच्चैर्मुखः । क्वचिद् दध्नोपसिक्त ओदनो दध्योदन इतिवदुत्तरपदस्य वृत्तावन्तर्भावः । उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः । सुवर्णविकारोऽलङ्कारोऽस्य सुवर्णालङ्कारः । क्वचिद् गतार्थस्यापि पदस्य प्रयोगः प्रपतितपर्णः प्रपर्णः । अविद्यमानपुत्रोऽपुत्र इति । इहास्तिक्षीरा ब्राह्मणी । अस्तिधना । लेखको नास्तिदोषक इत्यव्यया-भ्यामस्तिनास्तिशब्दाभ्यां समासः ।

२५ । संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये ।

अव्ययादयः संख्येयवाचिन्या संख्यया समस्यन्ते । दशानां समीपे उपदशाः । आसन्नविंशाः । अदूरदशाः । अधिकदशाः । संख्या । द्वौ वा त्रयो वेति द्वित्राः । त्रिचतुराः । पञ्चषाः । चतुष्पञ्चाः । लक्षकोटाः । "एकशान् दिवसांस्तिष्ठ" । सप्ताष्टैर्दिवसैर्यास्यसि ।

२६ । दिङ्नामान्यन्तराले ।

दिशां नामान्यन्तराले वाच्ये समस्यन्ते । दक्षिणपूर्वा दिक् । पूर्वोत्तरा । उत्तरपश्चिमा ।

(क) सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । (11)

२७ । तत्र तेनेदमिति सरूपे ।

इदमित्यर्थे सप्तम्यन्तं तृतीयान्तं च समानरूपे पदे समस्येते । इतिशब्दो लौकिकविवक्षार्थः । केशेषु केशेषु गृहीत्वेदं युद्धं वृत्तं केशाकेशि युद्धम् । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं वृत्तं दण्डादण्डि युद्धम् । अन्येषामपि दृश्यत इति (६।३।१३७) दीर्घः । इच् कर्मव्यतिहारे इतीच् (५।४।१२७) समासान्तः । तिष्ठद्गुप्रभृतित्वादव्ययत्वम् (२।१।१७) ।

---

(11) एतद् भाष्यकारवचनमित्येके । वार्तिकमित्यपरे । इदानीन्तनपुस्तकेष्वपि वार्तिकरूपेणैव निबद्धं दृश्यते । This is put down as a वार्तिक to 2. 2. 26.

२८। तेन सहेति तुल्ययोगे।

तृतीयान्तेन सहशब्दः समस्यते तुल्ययोगश्चेत्। सपुत्र आगतः। सच्छात्रः। तुल्ययोगस्य प्रायिकत्वात् सदर्पः सधनः सपक्षः। उक्तो बहुव्रीहिः।

२९। चार्थे द्वन्द्वः।

अनेकमित्येव। अनेकं सुबन्तं चार्थे वर्त्तमानं समस्यत इत्ययं द्वन्द्वो नाम समासः। इतरेतरयोगे। प्लक्षाशोकौ। प्लक्षाशोकवटाः। समाहारे। वाक्त्वचम्। धवखदिरपलाशम्।

३०। उपसर्जनं पूर्वम्।

समासेषूपसर्जनसंज्ञं पूर्वं प्रयोज्यम्। अधिस्त्रि। राजपुरुषः।

३१। राजदन्तादिषु परम्।

एषूपसर्जनं व्यन्तादि च परं प्रयोज्यम्। दन्तानां राजा राजदन्तः। राजजम्बुः। मातुः सपत्नी सपत्नीमाता। वनस्याग्रे अग्रेवणम्। निपातनादलुक्। पूर्वं वासितं ततो लिप्तं लिप्तवासितम्। सिक्तसंमृष्टम्। नग्नमुषितम्। द्वन्द्वे। पुत्रपशू।

(1) धर्मादिषूभयम्। धर्मार्थावर्थधर्मौ। चन्द्रार्कावर्कचन्द्रौ। अन्तादी आद्यन्तौ। सर्पिर्मधुनी मधुसर्पिषी।

(2) जायाया जम्भावो दम्भावश्च। जायापती जम्पती दम्पती।

३२। द्वन्द्वे घि।

द्वन्द्वे घ्यन्तं पूर्वं निपतति। कमण्डलुकृष्णाजिनम्। बहुष्वेकत्र नियमः। पटुमृदुशुक्लः।

३३। अजाद्यदन्तम्।

. इदं द्वन्द्वे पूर्वं निपतति। उष्ट्रशशम्। इन्द्रवायू। परत्वादिदमिष्यते। कथं "विषयेन्द्रिययोरिष्टः"? परत्वादभ्यर्हितमिति (२।२।३४, वा) भविष्यति। बहुष्वेकत्र नियमः। अश्वरथेन्द्राः।

३४। अल्पाच्तरम्।

इदं द्वन्द्वे पूर्वं प्रयोज्यम्। प्लक्षन्यग्रोधम्। धवाश्वकर्णम्। इह वागग्नी वागिन्द्राविति। द्व्यन्तादजाद्यदन्ताच्च परत्वादिदमिष्यते। बहुष्वेवाय नियमः। शङ्खदुन्दुभिवीणाः। वीणाशङ्खदुन्दुभयः।

(क) अभ्यर्हितं पूर्वमिति वक्तव्यम्। मातापितरौ (12)।

(ख) भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ।

(ग) लघ्वक्षरम्। कुशकाशम्। शरच्छशम्।

(घ) वर्णानामानुपूर्व्येण। ब्राह्मणक्षत्रियविट्शूद्राः।

(ङ) ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण। हेमन्तशिशिरवसन्ताः। भरणीकृत्तिकारोहिण्यः।

(च) संख्याया अल्पीयस्याः। एकादश। द्वादश। द्वित्राः। नवतिशतम्।

३५। सप्तमीविशेषणे बहुव्रीहौ।

सप्तम्यन्तं विशेषणञ्च बहुव्रीहौ पूर्वं निपतति। कण्ठेकालः। चित्रगुः।

(क) सर्वनामसंख्ययोरुपसंख्यानम्। सर्वश्वेतः। द्विकृष्णः। सप्तजातः बहुश्रुतः। सप्तोषतः।

(ख) वा प्रियस्य। गुडप्रियः। प्रियगुडः।

(ग) गड्वादिभ्यः सप्तम्याः परवचनम्। गडुकण्ठः। अरःशिराः।

३६। निष्ठा।

निष्ठान्तं बहुव्रीहौ पूर्वं निपतति। कृतकृत्यः। गतरतिः। जितशत्रुः।

(क) जातिकालसुखादिभ्यः परवचनम्। जातेः। मांसभक्षिती। सुरापीती। कृजग्धः। कटकृतः। कालात्। मासजातः। वर्षजातः। सुखादिभ्यः। सुखजातः। कृच्छ्रजातः।

(ख) प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ। शस्त्रोद्यतः। असुद्यतः।

---

(12) गर्भधारणपोषणाभ्यां तातान्माता गरीयसीति मातुरभ्यर्हितत्वमित्याशयः।

शूलपाणिः । दण्डपाणिः । प्रायिकश्चैतत् सर्वम् । तेन कृतकटः । उद्-गूर्णबाणः ।

३७ । वाऽऽहिताग्न्यादिषु ।

आहिताग्न्यादौ निष्ठान्तं पूर्वं वा प्रयोज्यम् । आहिताग्निः । अग्न्याहितः । एवं जातपुत्रः । जातश्मश्रुः । घृतपीतः । ऊढभार्यः । गतार्थः । आकृतिगणोऽयम् ।

३८ । कडाराः कर्मधारये ।

कडारादयो गुणशब्दाः कर्मधारये पूर्वं वा प्रयोज्याः । कडारजैमिनिः जैमिनिकडारो वा । कडार । गडुल । काण । खञ्ज । कुण्ठ । वामन । खलति । गौर । वृद्ध । पिङ्गल । खल । एकसंज्ञाधिकारः पूर्णः ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य भाषावृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः ॥ २।२ ॥ समासस्वापरपादः ।

अथ

भाषावृत्तिः ।

द्वितीयोऽध्यायः । तृतीयः पादः ।

१ । अनभिहिते ।

लकृत्तद्धितसमासैरनभिहिते कर्मादावेकत्वादिषु द्वितीयादयो वाच्याः ।

२ । कर्मणि द्वितीया ।

कर्मणि द्वितीया स्यात् । काशान् कटं करोति । ओदनं बुभुक्षुः-व्रीहीन् प्रोक्षति । अजां ग्रामं नयति । अनभिहित इत्येव । निन्येऽजा ग्रामम् । नयनीयाजा ग्रामम् । ग्रतिकोऽश्वः । ग्रामातिथिर्ग्रामः ।

(क) उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ १ ॥

उभयतो ग्रामम् । सर्वतो ग्रामम् । धिग् दुर्जनम् । उपर्युपरि ग्रामम् । अध्यधि ग्रामम् । अधोऽधो ग्रामम् । ततोऽन्यत्रापि दृश्यते । बुभुक्षितं न प्रति भाति किञ्चित् । बुभुक्षितस्येत्यर्थः । एवं चेत्रं यावच्छीतमित्यादौ ।

(ख) अभितःपरितःसमयानिकषाहायोगेष्वपि दृश्यते । अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । हा देवदत्तम् ।

३ । तृतीया च होश्छन्दसि ।

छन्दः सूत्रमिदम् ।

४ । अन्तराऽन्तरेण युक्ते ।

आभ्यां युक्ते द्वितीया स्यात् । "वैदेहीमन्तरा क्रुद्धः ।" वैदेह्या मध्य इत्यर्थः । त्वां च मां चान्तरा कमण्डलुः । तव मम मध्य इत्यर्थः । उपपद-

विभक्तेः कारकविभक्तिर्बलीयसीति कर्मत्वलोपे द्वितीया । सर्वा ह्युपपद-विभक्तयः षष्ठ्यपवादिकाः । नान्तरेण गुणान् सुखम् । गुणैर्विनेत्यर्थः ।

५ । कालाध्वनोरत्यन्तसंयोगे ।

अत्यन्तसंयोगश्चेत् कालाध्वनोर्द्वितीया स्यात् । सर्वरात्रं कल्याणी । मासं रमणीयाः । "चणमूचे" । दिवसं पठति । अध्वनः । क्रोशं कुटिला नदी । योजनं धावति । भाष्ये तु योजनक्रियया ऽत्यन्तसंयोगः । तदर्थमेतदिति स्थितम् । मासमास्ते । क्रोशं स्वपितीत्यादिषु प्राप्तमेव कर्म ।

तदाह,—

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥ १ ॥ इति । (13)

एवं चास्यते मास इति लकारेण कर्मणोऽभिधानं घटते । अत्यन्तसंयोगे किम् ? मासस्यैकरात्रं रम्या । क्रोशस्यैकदेशं कुटिला नदी ।

६ । अपवर्गे तृतीया ।

फलप्राप्तौ क्रियात्यागोऽपवर्गः । तत्र गम्ये कालाध्वनोस्तृतीया स्यात् । मासेनाधीतो ग्रन्थः । अब्देनावगतोऽर्थः । क्रोशेनाधीतः । क्रोशेनावगतोऽर्थः ।

७ । सप्तमीपञ्चम्यौ कारकमध्ये ।

कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यामिते स्याताम् । अद्य भुक्त्वा द्व्यहे द्व्यहाद् वा भोक्ता । कर्तृशक्त्योर्मध्ये कालः । इहस्थोऽयं धन्वी क्रोशे लक्ष्यं विध्यति क्रोशाद्वा ।

८ । कर्मप्रवचनीययुक्ते द्वितीया ।

कर्मप्रवचनीयैर्योगे द्वितीया स्यात् । यज्ञमनु प्रावर्षत् ।

९ । यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।

यस्मादधिकं यस्य चेश्वरवचनं तत्र ते योगे सप्तमी स्यात् । उपपरार्धे

---

(13) This is a quotation from the वाक्यपदीय by भर्तृहरि । The author had often quoted from it. The stanzas in (1.2.64), in (1.4.24) and in (1.4.86) are also from the वाक्यपदीय ।

विंशतिः । उपपञ्चाशीं झोषः । यस्य चेश्वरवचनम् । अधि पञ्चालेषु ब्रह्मदत्तः ।

१० । पञ्चम्यपाङ्परिभिः ।

एभिः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् । अप त्रिगर्त्तेभ्यो वृष्टो देवः । आ त्रिगर्त्तेभ्यः । "परि पर्य्युदधे:" । परिर्वर्जनार्थः । आ पाटलिपुत्रात् ।

११ । प्रतिनिधिप्रतिदाने च यस्मात् ।

यतः प्रतिनिधिः प्रतिदानञ्च तत्र तैर्योगे पञ्चमी स्यात् । स राजा ब्रह्मतः प्रति । तिलेभ्यः प्रति माषान् प्रयच्छति ।

१२ । गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ।

गत्यर्थानां कर्मण्येते स्याताम् । ग्रामं गच्छति ग्रामाय वा । नगरं गच्छति नगराय वा । ग्रामं याति ग्रामाय वा । वनं वनाय वा प्रस्थितः । कथं त्वं गच्छसीति ? आधारविवक्षायाम् । क्व स्थातुं गच्छसीत्यर्थः । चेष्टायां किम् ? मोक्षं गच्छति । अनध्वनि किम् ? मार्गं गच्छति ।

१३ । चतुर्थी सम्प्रदाने ।

सम्प्रदाने चतुर्थी स्यात् । विप्राय गां ददाति । "भयानि दत्त सीतायै ।" स तस्मै साधुकारमदात् । पुष्पेभ्यः स्पृहयति ।

(क) तादर्थ्ये च । यूपाय दारु ।

(ख) क्लृपि संपद्यमाने च । उच्चाराय कल्पते माषः ।

(ग) उत्पातेन ज्ञाप्यमाने । वाताय कपिला विद्युत् (14) । हष्टये लोमुखी विद्युत् ।

(घ) हितयोगे च । अरोचकिने हितं सौवीरार्द्रकम् ।

---

(14) वाताय कपिला विद्युदातपायातिलोहिनी ।

कृष्णा सर्वविनाशाय दुर्भिक्षाय सिता भवेत् ॥ १ ॥ इति भाषाही पूर्णः श्लोकः ।

१४ । क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।

स्थानी (15) क्रियार्थोपपदस्तुमुन्नन्तो यो धातुस्तस्य कर्मणि चतुर्थी स्यात् । एधेभ्यो व्रजति । फलेभ्यस्तिष्ठति । स्थानिनः किम् ? एधानाहर्तुं व्रजति ।

१५ । तुमर्थाच्च भाववचनात् ।

तुमुना समानार्थाच्चतुर्थी स्यात् । पाकाय व्रजति । भूतये धावति । भाववचनात् किम् ? ओदनं पाचको व्रजति । ओदनं भोजको व्रजति ।

१६ । नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ।

नमआदियुक्ताच्चतुर्थी स्यात् । नमो विष्णवे । स्वस्ति प्रजाभ्यः । "चलं प्रदोषः प्रियसङ्गमाय ।" स्वाहाऽग्नये । स्वधा पितृभ्यः । नमः शिवाय ।

१७ । मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ।

मन्यतेः कर्मण्यनादरे चतुर्थी वा स्यात् । न त्वा तृणं मन्ये तृणाय वा । "मन्ये तृणाय स्वाराज्यम् ।" "हरिमप्यमंसत तृणाय ।" इह तृणसमानाधिकरणात् त्वादेश्चतुर्थी न भवति । व्यवस्थितविभाषया । अप्राणिष्वित्यनावादिष्विति वक्तव्यम् । न त्वा नावं मन्ये । न त्वा काकं मन्ये ।

१८ । कर्तृकरणयोस्तृतीया ।

अनयोस्तृतीया स्यात् । विप्रेण पच्यते । अग्निना दह्यते । परशुना वृक्षं छिनत्ति वर्द्धकिः ।

(क) प्रकृत्यादिभ्य उपसंख्यानम् । प्रकृत्या सुभगः । गोत्रेण गार्ग्यः । समेन धावति । विषमेण धावति । "तत्रागारे धनपतिगृहादुत्तरेणास्मदीयम् ।"

१९ । सहयुक्तेऽप्रधाने ।

सहार्थेन युक्तादप्रधाने तृतीया स्यात् । विप्रः शिष्येण सहागतः । पुत्रेण सार्द्धं गोमान् ।(16)

---

(15) स्थानमस्यास्तीति स्थानी । अप्रयुज्यमान इत्यर्थः ।

(16) व्यवहारात्पुनः पश्येद विवाह ब्राह्मणैः सहैतत्र ब्राह्मणैरिवाप्रधाने तृतीयेति सिद्धम् । अविचारे धर्माज्ञानतः प्राधान्येन वरस्यैव पापार्हत्वात् ।

२० । येनाङ्गविकारः ।

हानिराधिक्यञ्च विकारः । येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात् । अक्ष्णा काणः । पादेन खञ्जः । "मुखेन त्रिलोचनः ।"

२१ । इत्थम्भूतलक्षणे ।

विशेषप्राप्तस्य लक्षणे तृतीया स्यात् । शिखया परिव्राजकः ।

२२ । संज्ञोऽन्यतरस्यां कर्मणि ।

सञ्जानातेः कर्मणि तृतीया वा स्यात् । मात्रा सञ्जानीते मातरं वा ।
(क) संज्ञः ज्ञद्योगे षष्ठी विप्रतिषेधेनेति वाच्यम् । मातुः संज्ञाता ।

२३ । हेतौ ।

तृतीया स्यात् । धनेन कुलम् । विद्यया यशः । हेत्वधीनः कर्त्ता कर्त्रधीनं करणमिति हेतुकरणयोर्भेदः ।

२४ । अकर्त्तर्य्यृणे पञ्चमी ।

ऋणे हेतौ पञ्चमी स्यात् । ऋणाद् बद्धः । शतादभिभूतः । अकर्त्तरि किम् ? शतेन प्रयोजककर्त्रा बन्धितः ।

२५ । विभाषा गुणेऽस्त्रियाम् ।

पराश्रितो गुणः । गुणे हेतौ पञ्चमी स्याद्वा । जाड्याद् बद्धोतो जाड्येन वा । धूमादग्निः धूमेन वा । कृतकत्वादनित्यः शब्दः कृतकत्वेन वा । अस्त्रियां किम् ? प्रज्ञया धीरः ।

२६ । षष्ठी हेतुप्रयोगे ।

हेतुशब्देन हेतौ द्योत्ये षष्ठी स्यात् । अर्थस्य हेतोर्वसति । "अल्पस्य हेतोर्बहु हातुमिच्छन्" । यत्र हेतुशब्देन समासस्तत्र समुदायादेव षष्ठी । बालबोधहेतोर्व्याचष्टे ।

२७ । सर्व्वनाम्नस्तृतीया च ।

हेतुशब्दप्रयोगे सर्व्वनाम्नस्तृतीयाषष्ठ्यौ स्याताम् । "स कस्य हेतोः सखि नाभियातस्त्वं हेतुना केन चिरादुपेता" ।

(क) हेत्वर्थप्रयोगे सर्वविभक्तीनां प्रायदर्शनम्। (17) किन्निमित्त-मागतः। केन निमित्तेन। कस्मै हेतवे। कस्मात् कारणात्। कस्य प्रयोजनस्य। कस्मिन्निमित्ते।

२८। अपादाने पञ्चमी।

स्यात्। ग्रामादागच्छति। वृकाद् बिभेति।

(क) ल्यब्लोपे कर्मणि। प्रासादात् प्रेक्षते। प्रासादमारुह्येत्यर्थः।

(ख) अधिकरणे च। आसनात् प्रेक्षते। कटकात् संवादयति।

(ग) प्रश्नाख्यानयोश्च। कुतस्त्वम्? नगरात्।

(घ) यतश्चाध्वकालनिर्माणं तत्र पञ्चमी। अध्वनः प्रथमा सप्तमी च। काले सप्तमीति वाच्यम्। अम्मातः सोमतीर्थं पञ्च योजनानि पञ्चसु योजनेषु वा। काले। फाल्गुन्याश्चैत्री मासे।

२९। अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते।

एभिर्युक्तात् पञ्चमी स्यात्। द्रव्यादन्यो गुणः। "परैस्त्वदन्यः क इवापहारयेत्"। अर्थग्रहणाद् भिन्नो भ्रातृभ्यः। आराद् ग्रामात्। शुक्लादितरः। "अंशाहृतं निखिलस्य नीललोहितरेतसः" (18)। दिक्शब्दः। पूर्वो ग्रामात्। अञ्चूत्तरपदम्। प्राग् ग्रामात्। आच्। दक्षिणा ग्रामात्। आहि च। उत्तराहि ग्रामात्। उत्तराहि समुद्रात्।

३०। षष्ठ्यतसर्थप्रत्ययेन।

अतसुजर्थप्रत्ययैर्योगे षष्ठी स्यात्। दक्षिणतो ग्रामस्य वृक्षः। एवमुत्तरतः पुरः पुरस्ताद् उपरि उपरिष्टाद् ग्रामस्येति। कथं प्राग् ग्रामात्? अञ्चूत्तर-

---

(17) निमित्तकारणहेतुषु सर्वासां प्रायोदर्शनमित्येव कात्यायनवाक्यं प्रकृतं वार्त्तिकम्। तदर्थत आह हेत्वर्थप्रयोगे सर्वविभक्तीनां प्रायदर्शनमिति। भट्टोजिदीक्षितेनाप्यत्रार्थेन एव वक्तव्यं निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनमिति। वस्तुतस्तु कात्यायनादीनां व्याख्यातृत्वेन तेषां वाक्यभङ्गे न पारायणादिभङ्गदोष इति प्राञ्चोऽपि स्वव्याख्यानेषु वाक्यं बहुधा नाचिकाः सुदृढतम्।

(18) न कर्म प्रयत्नं परमपुरुषाराधनमृत इति (पुष्पदन्तप्रयोगे) तु अन्ययोगे द्वितीया ग्रामादिकीर्त्यते। अपाणिनीयत्वात्। ततोऽन्यत्रापि इत्यस्य (२।३।२ वा) इति वार्त्तिकव्याख्यानं चिन्तनीयम्।

पदग्रहणात्। क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इत्यपायविवक्षया वा। मातुः पुरस्तात्। तत उपरिष्टात्। "कफोनिः कूर्परादधः"। (19)

३१। एनपा द्वितीया।

एनपातसुजर्थप्रत्ययेन योगे द्वितीया स्यात्। दक्षिणेन गयां महाबोधिः। षष्ठ्यपीष्यते। दक्षिणेन गयायाः। (20)

३२। पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्।

एभिर्योगे तृतीया पञ्चमी वा स्यात्। पृथक् चन्द्रेण। "दुनोति चन्द्रात् पृथगप्यनङ्गः"। विना कार्य्येण विना कार्य्याद् वा। नाना दुःखेन नाना दुःखाद् वा। द्वितीया च दृश्यते विना वातं विना वर्षमित्यादि। (21)

३३। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य।

असत्त्ववचनस्य अद्रव्यवचनस्य स्तोकादेः करणे पञ्चमी वा स्यात्। "स्तोकेन वष्टा दयिताय नारी स्तोकादुपेता पुनरेव तोषम्"। कृच्छ्रादवाप्तः कृच्छ्रेण वा। कृच्छ्रात् कृच्छ्रेण वा मुक्तः। असत्त्ववचनस्य किम्? स्तोकेन विषेण हतः।

३४। दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्।

दूरान्तिकार्थैर्योगे षष्ठीपञ्चम्यौ स्याताम्। दूरं ग्रामस्य ग्रामाद्वा। विप्रकृष्टं ग्रेलस्य ग्रेलाद्वा। अन्तिकं गृहस्य गृहाद्वा।

३५। दूरान्तिकार्थेभ्यो द्वितीया च।

एभ्यो द्वितीया स्यात् पञ्चमी तृतीया च। दूरं दूराद् दूरेण वा ग्रामस्य नदी। अन्तिकमन्तिकादन्तिकेन वा मूर्खाणां पण्डितम्। असत्त्ववचनस्येत्येव। दूरः पन्थाः। आसन्ना सुनयः।

---

(19) In some MSS. the भट्टि stanza उत्तराद्रि वसन्नामः समुद्राद्दक्षिणां पुरम्। पूर्वेणाब्बतोयस्य स्थितां दक्षिणतः शयम् is also quoted here.

(20) This is referred to in the परिशिष्टप्रबोध by गोपीनाथ—"एनपा द्वितीया। षष्ठ्यपीष्यते। दक्षिणेन गयाया इति वसुवृत्तिः" इति।

(21) विना वातं विना वर्षं विद्युत्प्रपतनं विना। विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ ॥१॥ इति काशिकादौ पूर्वः श्लोकः।

३६ । सप्तम्यधिकरणे च ।

अधिकरणे सप्तमी स्यात् । कटे आस्ते । चकाराद् दूरान्तिकार्थेभ्यश्च । दूरे ग्रामस्य । अन्तिके नद्याः ।

(क) क्तस्येन्विषयस्य कर्मणि । अधीती व्याकरणे । निपठितो तन्त्रेषु ।

(ख) निमित्तात् कर्मसंयोगे ।

"चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥१॥"

३७ । यस्य च भावेन भावलक्षणम् ।

यस्य च क्रियया ऽन्यस्य क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात् । गोषु दुह्यमानासु गतो देवदत्तो दुग्धास्वागतः । अस्मिन् सतीदं भवति । ऋद्धेष्वा-क्षीणेषु दरिद्रा भुञ्जते । नेह । शयानेन भुक्तम् । अनभिधानात् ।

३८ । षष्ठी चानादरे ।

अनादराधिक्ये भावलक्षणे षष्ठी सप्तमी च स्यात् । रुदतः प्राव्रजितवान् रुदति वा । रुदन्त मनादृत्येत्यर्थः । एवं पश्यतोहरः ।

३९ । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ।

एभिर्योगे षष्ठी सप्तमी च स्यात् । गवां स्वामी गोषु वा । प्राणानामीश्वरः प्राणेषु वा ।

४० । आयुक्तकुशलाभ्यां चासेवायाम् ।

आभ्यां योगे तात्पर्य्यगतौ ते द्वे स्याताम् । आयुक्तो विहारकरणस्य विहारकरणे वा । कुशलः सेवायाः सेवायां वा ।

४१ । यतश्च निर्धारणम् ।

यतो जात्यादिभिः पृथक् क्रियते ततस्ते द्वे स्याताम् । नृणां क्षत्रियः शूरतमो नृषु वा । गवां कृष्णा सम्पन्नक्षीरतमा गोषु वा । अध्वगानां रथिनः शीघ्रतमा अध्वगेषु वा ।

५४ । रुजार्थानां भाववचनानामज्वरेः ।

भावकर्त्तृकाणां रुजार्थधातूनां कर्मणि षष्ठी स्यात् । चौरस्य रुजति रोगः । अज्वरेः किम् ? चौरं ज्वरयति ज्वरः । ज्वरिसन्तापवर्जम् (23) । चौरं सन्तापयति सन्तापः । शेष इत्येव । "रुजन्ति चेतः प्रसभं ममाधयः" ।

५५ । आशिषि नाथः ।

आशिषि नाथतेः कर्मणि षष्ठी स्यात् । सर्पिषो नाथते प्रभुः ।

५६ । जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ।

एषां कर्मणि हिंसायां षष्ठी स्यात् । चौरस्य उज्जासयति । चौरस्य प्रहन्ति । चौरस्य निहन्ति । चौरस्य प्रणिहन्ति । चौरस्य निप्रहन्ति । क्रथि घटादिः । तस्य निपातनाद्वृद्धिः । धैर्य्यस्योत्क्राथयति शोकः । विवेकस्य पिनष्टि कामः ।

५७ । व्यवहृपणोः समर्थयोः ।

द्यूते क्रयविक्रये च समानार्थयोरनयोः कर्मणि षष्ठी स्यात् । शतस्य व्यवहरति । शतस्य पणते वणिक् । "प्राणानामपणिष्टासौ" ।

५८ । दिवस्तदर्थस्य ।

व्यवहारार्थस्य दिवः कर्मणि षष्ठी स्यात् । शतस्य दीव्यति । "अदेवीद् बन्धुभोगानाम्" ।

५९ । विभाषोपसर्गे ।

सोपसर्गस्य दिवस्तथा स्याद्वा । शतस्य प्रतिदीव्यति शतं वा । अशेष-विवक्षयेव द्वितीयासिद्धौ विभाषाग्रहणं स्पष्टार्थम् । इह

६० । द्वितीया ब्राह्मणे ।

६१ । प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने ।

६२ । चतुर्थ्यर्थे बहुलञ्छन्दसि ।

६३ । यजेश्च करणे ।

वेदार्था चतुःसूत्री ।

---

(23) अज्वरिसन्ताप्योरिति वक्तव्यमिति वार्त्तिकात् ।

६४। क्त्वोऽर्थप्रयोगे कालेऽधिकरणे।

क्त्वोऽर्थप्रयोगे कालो य आधारस्तत्र षष्ठी स्यात्। पञ्चकृत्वो दिवसस्य भुङ्क्ते। शतकृत्वो रात्रेः स्मरति प्रियाम्। द्विरह्नोऽधीते। शेष इत्येव द्विरह्न्यधीते।

६५। कर्त्तृकर्मणोः कृति।

कृत्प्रयोगे कर्त्तरि कर्मणि च षष्ठी स्यात्। शेष इत्यस्य निवृत्तेः कारकविभक्तिरियम्। द्वितीयातृतीययोर्बाधा। भवत आसिका (24)। ओदनस्य भोजकः। इह तदर्हमिति (५।१।११७) निर्देशेनास्यानित्यत्वं ज्ञापितम्। तेन धाये रामोदमुत्तममिति भट्टिः। यद्वा। आ मोदात् सम्मदपर्य्यन्तमित्यव्ययीभावे रूपमिदमिति कृति न षष्ठीति (25)। अनभिहित इत्येव कर्त्तव्यः कटः।

६६। उभयप्राप्तौ कर्मणि।

एकत्र कृत्युभयप्राप्तौ षष्ठी कर्मण्येव स्यात्। न कर्त्तरि। अद्भुतः समुद्रस्य बन्धो वानरैः। आश्चर्य्यं सुभगारोषस्य दूतीभिः परिमार्ज्जनम्।

(क) अकाकारयोस्तु स्त्रियां नियमप्रतिषेधः। भेदिका चन्द्रस्य तमसाम्। चिकीर्षा रवेरालोकानाम्।

(ख) शेषे विभाषा। अकाकारयोरन्यत्र विभाषा। विचित्रा सूत्रस्य कृतिः पाणिनेः पाणिनिना वा।

६७। क्तस्य च वर्त्तमाने।

वर्त्तमाने क्तस्य प्रयोगे षष्ठी स्यात्। न लोकेत्यस्य (२।३।६९) बाधा। राज्ञां मतम्। सतां मतः। सतामर्चितः। प्रजानां कान्तः। कथं त्वया शीलितः। मया रचितः? कार्य्योऽत्र यत्नः। इह छात्रस्य हसितम्? मयूरस्य नृत्तमिति शेषषष्ठीयम्। न लोकेति (२।३।६९) क्तद्योगायाः प्रतिषेधात्। कारकविवक्षायां तु छात्रेण हसितमित्यागमः।

---

(24) भवत शायिका इति क्वचित् पाठः।

(25) This passage is quoted by गोपीनाथ in his परिशिष्टप्रबोध under Rule 72 in the कारक chapter.

४२ । पञ्चमी विभक्ते ।

यत्र निर्धारणाश्रयो विभागोऽस्ति ततः पञ्चमी स्यात्। माथुराः स्रौघ्नेभ्य आढ्यतराः ।

४३ । साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ।

आभ्यां योगे पूजागतौ सप्तमी स्यात् । पितरि साधुः । मातरि साधुः । मातरि निपुणः । बोधे निपुणः । अप्रतेः किम् ? मातरं प्रति साधुः । प्रतिरुपलक्षणम् (22) । मातरमनु । इहाप्रतेरिति योगं विभज्य सूत्रान्तरैरपि सम्बध्नन्ति यथायथं विभक्तीनां निषेधार्थम् । तेन वृक्षं वृक्षं प्रति पुष्पाणि सन्तीति नाधारसप्तमी । त्वां प्रति स्वामीति न षष्ठीसप्तम्यौ । केशान् प्रत्युत्सुक इति न तृतीयासप्तम्यौ । देवदत्तं प्रति क्रुध्यतीति न सम्प्रदाने चतुर्थी ।

४४ । प्रसितोत्सुकाभ्यां तृतीया च ।

आभ्यां योगे तृतीयासप्तम्यौ स्याताम् । केशैः प्रसितः केशेषु वा । केशैरुत्सुकः केशेषु वा । "भवत्यामुत्सुको रामः ।"

४५ । नक्षत्रे च लुपि ।

लुबन्तान्नक्षत्रात् तृतीयासप्तम्यौ स्याताम् । पुष्येण पायसमश्नीयात् पुष्ये वा । अधिकरण इत्येव । अद्य पुष्यः ।

४६ । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।

एतावन्मात्रेऽनभिहिते । कर्मादावुक्तेऽपि प्रथमा स्यात् । यत्राथा शब्दस्य वृत्तिः स प्रतिपदिकार्थः । वृक्षो दृश्यताम् । श्वेतो धावति । पाचकः । पचनम् । स्त्री । पुमान् । नपुंसकम् । द्रोणः । खारी । आढकम् । वृक्षादेराश्रयाकृतौ वृत्तिः । तदुपचाराद् द्रव्यादौ पुंस्त्वादिकञ्च । वृक्षादेः सर्वदान्वयित्वात् स्वार्थ एव । नाधिकम् । यथाप्येतल्लिङ्गादिद्वारेणापि सिध्यति तदाऽसंख्यमलिङ्गमुदाहार्यम्। उच्चैः। त्वम्। अहमिति। मात्रग्रहणा-दधिकेऽनभिहिते न भवति । वृक्षं पश्यति । अक्षेण गम्यते । लिङ्गाधिक-

(22) तेन प्रत्यादयो न्यग्भवे । प्रत्यादयश्च प्रतिपर्यनव इति लक्षणेत्यादि (१।४।९०) सूत्रोक्ताः ।

मात्रे कुमारी । शृङ्खला । परिमाणमुपचारः । तदधिकमात्रे प्रस्थेन परिमितो व्रीहिः प्रस्थो द्रोणः खारी आढकं व्रीहिः । वचनं संख्या । तन्मात्रे । उक्तेऽपि यथा स्यात् । एको द्वौ बहवः ।

४७ । सम्बोधने च ।

सम्बोधनाधिक्ये प्रथमा स्यात् । हे विप्र । हे विप्रौ । हे विप्राः ।

४८ । साऽऽमन्त्रितम् ।

सा सम्बोधनप्रथमाऽऽमन्त्रितमुच्यते । हे विप्र तव स्वम् । हे वत्स तवाश्वः ।

४९ । एकवचनं सम्बुद्धिः ।

आमन्त्रितस्यैकवचनं सम्बुद्धिरुच्यते । हे वृक्ष । हे पते । हे नदि । हे पटो ।

५० । षष्ठी शेषे ।

कारकाणामविवक्षा शेषः सम्बन्धः । तत्र गम्ये षष्ठी स्यात् । राज्ञः पुरुषस्य धनम् । सुखस्य जानाति । माषाणामश्नीयात् । "नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः" । शेषे विधानमसादयोगात् (२।२।६५) ।

५१ । ज्ञोऽविदर्थस्य करणे ।

ज्ञः करणे षष्ठी स्यात् । मधुनो जानीते । मधुना प्रवर्त्तत इत्यर्थः । तैले घृतस्य जानीते । अविदर्थस्य किम् ? स्वरेण पुत्रं जानाति । शेषत्वात् सिद्धे प्रकरणमिदं नियमार्थं आधीगर्थादेः कारककर्म्माण्येव शेषत्वेन विवक्षणीयमिति ।

५२ । अधीगर्थदयेशां कर्मणि ।

एषां शेषत्वेन विवक्षिते कर्मणि षष्ठी स्यात् । मातुः स्मरति । कर्मणः शेषत्वेन विवक्षितत्वात् । अकर्मकादपि भावे लादयः । मातुः स्मर्यते । मातुः स्मृतम् । एवम् ममैवाध्येति नृपतिः । "रामस्य दयमानोऽसौ" । सर्पिष ईष्टे । शेष इत्येव । मातरं स्मरति । माता स्मर्यते ।

५३ । कृञः प्रतियत्ने ।

कृञो गुणान्तराधाने कर्मणि षष्ठी स्यात् । एधोदकस्योपस्कुरुते काण्डकः ।

६८। अधिकरणवाचिनश्च।

आधारार्थस्य क्तस्य प्रयोगे कर्त्तृकर्मणोः षष्ठी स्यात्। इदमेषामासितम्। इदमस्य शयितम्। भुक्तमिदमोदनस्य।

६९। न लोकाव्ययनिष्ठाखलर्थतृनाम्।

लादीनां कृतां प्रयोगे उक्ता षष्ठी न स्यात्। लः। ओदनं पचन्। ओदनं पचमानः। उपसेदिवान् पाणिनिम्। उः। कटं चिकीर्षुः। धनं गृध्नुः। "रक्षोगणं चिपृणुः" (26)। कार्य्यं कारुः। उकः। गङ्गां गामुकः।

(क) उकप्रतिषेधे कमे र्भाषायामप्रतिषेधः। दास्याः कामुकः।

अव्ययम्। कटं कृत्वा। कटं कर्त्तुम्। निष्ठा। तेन कृतम्। सोऽन्नं भुक्तवान्। खलर्थः। ईषत्करः सुकरः कटो भवता। तृन्। कर्त्ता कटान्। तृन्निति प्रत्याहारग्रहणम्। तेन शानजादेरपि प्रतिषेधः। सोमं पवमानः। नड़माघ्नानः।

(ख) द्विषः शतुर्वावचनम्। चौरस्य द्विषंश्चौरं वा।

७०। अकेनोर्भविष्यदाधमर्ण्ययोः।

अकेनोः कर्मणि षष्ठी न स्याद् भविष्यति ऋणे च। ओदनं पाचको व्रजति। वार्त्तामाख्यायकः। ग्रामं गमी। शतं दायी।

७१। कृत्यानां कर्त्तरि वा।

एषां कर्त्तरि वा षष्ठी स्यात्। त्वया कटः कर्त्तव्यस्तव वा। मया कटः कर्त्तव्यो मम वा। तव गम्यो ग्रामस्त्वया वा। "गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम्।" कर्त्तरि किम्? उपस्थानीयः शिष्यो गुरोः। उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधः। आकृष्टव्या शाखा ग्रामं वानरेण। नेया ग्राममजा गोपालकेन।

---

(26) चिपृणुरित्यत्र णत्वाभाव इति केचित्। क्षुभ्नादिषु (८।४।३९) तृप्नुशब्दग्रहणात्। अन्ये त्वाचार्यादणत्वेति (४।१।४९, वा) ज्ञितेऽपि यथाचार्य्येणाचार्य्याणामित्यादौ णत्वं तथा चिपृणुरित्यत्रापि रषाभ्यां नो णः समानपदे (८।४।१) इति णत्वं नियतमेव मन्यन्ते।

७२ । तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ।

तुल्यार्थैर्योगे तृतीया वा स्यात् । तुल्यः शक्रेण । पक्षे शेषत्वात् षष्ठी तुल्यः शक्रस्य । समः सूर्य्येण सूर्य्यस्य वा । अतुलोपमाभ्यां किम् ? "उपमा स्त्रीमुखस्येन्दुश्चन्द्रस्य स्त्रीमुखं तुला ।" तुलोपमाशब्दाविह सदृशार्थौ ।

७३ । चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ।

आयुष्याद्यर्थैर्हितेन च योगे चतुर्थी स्यात् षष्ठी वा । आयुष्यं राज्ञेऽस्तु राज्ञो वा । एवं चिरञ्जीवितं कुशलं मद्रं भद्रं सौहित्यं शिवं सुखं हितं गोभ्योऽस्तु गवां वा । हितम् प्रजाभ्यः प्रजानां वा । आशिषि किम् ? आयुष्यं ते तपः ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
द्वितीयाध्यायस्य तृतीयः पादः ॥ २।३ ॥
समाप्तश्चानभिहितपादः ।

अथ

भाषावृत्तिः ।

द्वितीयोऽध्यायः । चतुर्थः पादः ।

१ । द्विगुरेकवचनम् ।

समाहारे द्विगोरर्थं एकवद्भवति । पञ्चपूली शोभना । दशमती रम्या ।

२ । द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम् ।

प्राण्यङ्गादेर्द्वन्द्व एकवत् स्यात् । हस्तपादम् । कर्णनासिकम् । मार्दङ्गिकपाणविकम् । रथिकपादातम् । कथं शङ्खपटहौ । परत्वात् पशुद्वन्द्वविभाषया ।

३ । अनुवादे चरणानाम् ।

अनूक्तौ चरणानां द्वन्द्व एकवत् स्यात् । स्थेणोर्लुङ्यभिधानम् । उदगात् काठकालापम् । प्रत्यष्ठात् काठकौथुमम् ।

४ । अध्वर्य्युक्रतुरनपुंसकम् ।

अध्वर्य्यौ यजुर्वेदे क्रतूनां सोमयागादीनां द्वन्द्व एकवत् स्यात् । अर्काश्वमेधम् । अनपुंसकं किम् ? राजसूयवाजपेये ।

५ । अध्ययनतोऽविप्रकृष्टाख्यानाम् ।

पाठेन प्रत्यासन्नानां द्वन्द्व एकवत् स्यात् । क्रमकवार्त्तिकम् । छान्दोपाध्यायम् ।

६ । जातिरप्राणिनाम् ।

अप्राणिजातीनां द्वन्द्व एकवत् स्यात् । आराशस्त्रि । द्रुमशैलम् । जातिः किम् ? विन्ध्यहिमालयौ । इह कुण्डे वदरामलकानि सन्ति । द्वन्द्वः किम् ? आराशस्त्रिता शचीत्याराशस्त्रीयम् ।

७ । विशिष्टलिङ्गो नदी देशोऽग्रामाः ।

भिन्नलिङ्गयोर्नदीदेशयोर्द्वन्द्व एकवत् स्यात् । गङ्गाशोणम् । शोणनर्मदम् । वरेन्द्रीमगधम् । मगधस्त्रावस्ति । भिन्नलिङ्गयोः किम् ? गङ्गायमुने । अग्रामाः किम् ? जाम्बवशालूकिन्यौ ।

(क) ग्रामाणां प्रतिषेधे नगराणामप्रतिषेधः । मथुरापाटलिपुत्रम् ।

८ । क्षुद्रजन्तवः ।

क्षुद्रजन्तुवाचिनां द्वन्द्व एकवत् स्यात् । दंशमशकम् । यूकालिक्षम् ।

९ । येषाञ्च विरोधः शाश्वतिकः ।

नित्यविरोधिनां द्वन्द्व एकवत् स्यात् । अहिनकुलम् । काकोलूकम् । श्वशृगालम् । मार्जारमूषिकम् । चकारात् पशुशकुनिविकल्पोऽपि बाध्यते । इह देवासुराणां कौरवपाण्डवानाञ्च नैमित्तिको विरोधः ।

१० । शूद्राणामनिरवसितानाम् ।

शूद्राणां द्वन्द्व एकवत् स्यात् । रजकतन्तुवायम् । निरवसितानां (27) प्रतिषेधः । चाण्डालश्वपचाः ।

११ । गवाश्वप्रभृतीनि च ।

अमूनि यथापाठं साधूनि स्युः । गवाश्वम् । कुब्जवामनम् । पुत्रपौत्रम् । दासीदासम् ।

१२ । विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ।

एषां द्वन्द्व एकवद्वा स्यात् । प्लक्षवटम् । रुरुपृषतम् । कुशकाशम् । व्रीहियवम् । दधिक्षीरम् । गोमहिषम् । हंसचक्रवाकम् । अश्ववडवम् । पूर्वापरम् । अधरोत्तरम् । पक्षे प्लक्षवटा रुरुपृषता इत्यादि ।

(क) बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम् ।

---

(27) निरवसिताः पात्राद् बहिष्कृता इत्यर्थः । यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः ।

एषां बहुप्रकृतिरेव द्वन्द्व एकवत् स्यात्। न द्विप्रकृतिः। बदरामलके रथिकपादाते ग्रुच्चवटौ यूकालिक्षे इत्यादि।

१३। विप्रतिषिद्धञ्चानधिकरणवाचि।

विरुद्धानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात्। शीतोष्णं शीतोष्णे वा। हिमातपं हिमातपौ वा। नेह। सुखदुःखे। स्वर्गनरकौ।

१४। न दधिपयआदीनि।

नैतान्येकवत् स्युः। दधिपयसी। दधिसर्पिषी। सर्पिर्मधुनी। ब्रह्म-क्षत्रे। ऋक्सामे। वाङ्मनसे।

१५। अधिकरणैतावत्त्वे च।

समासार्थस्येयत्तायां द्वन्द्वो नैकवत् स्यात्। दश दन्तोष्ठाः। सप्त मार्दङ्गिकपाणविकाः।

१६। विभाषा समीपे।

अधिकरणैतावत्त्वस्य सामीप्यगतौ द्वन्द्व एकवद्वा स्यात्। उपदशं दन्तोष्ठम्। उपदशा दन्तोष्ठा वा।

१७। स नपुंसकम्।

यस्यैकत्वमुक्तं स नपुंसकं स्यात्। पञ्चगवम्। पाणिपादम्।

(क) अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते। पञ्चपूली।

(ख) आबन्तो वा। पञ्चखट्वम्। पञ्चखट्वी।

(ग) अनो नलोपश्च वा च स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चतक्षं पञ्चतक्षी।

(घ) पात्रादिभ्यः प्रतिषेधः। द्विपात्रम्। त्रिभुवनम्। चतुर्युगम्। पञ्चगवम्। दिग्ग्रामव्यावर्तुर्ह्रिंग्यम्।

१८। अव्ययीभावश्च।

अयं नपुंसकं स्यात्। अधिस्त्रि। अधिस्त्रि। उन्मत्तगङ्गम्। अकारात् पुण्यसुदिनाभ्यामह्नः। पुण्याहम्। सुदिनाहम्।

(क) पथः संख्याव्ययादेः । द्विपथम् । चतुष्पथम् । त्रिपथम् । उत्पथम् ।

(ख) क्रियाविशेषणानां कर्मत्वं नपुंसकत्वञ्च । बहु पचति ।

१९ । तत्पुरुषोऽनञ्कर्मधारयः ।

नञ्कर्मधारयाभ्यां विना तत्पुरुषो नपुंसकं स्यादित्यधिक्रियते । यथा विभाषा सेनेति (२।४।२५) । शत्रुसेनं शत्रुसेना वा । तत्पुरुषः किम् ? दृढ़सेनो राजा । अनञ्कर्मधारयः किम् ? असेना । परमसेना ।

२० । संज्ञायां कन्थोशीनरेषु ।

नाम्नि कन्थान्तस्तत्पुरुषो नपुंसकं स्यात् । सौशमिकन्थं नाम देशः । संज्ञायां किम् ? वीरणकन्था । उशीनरेष्विति किम् ? दाक्षिकन्था ।

२१ । उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ।

उपज्ञा उपक्रमश्च कर्मसाधनौ । तदन्तस्तत्पुरुषो नपुंसकं स्यात् तयोरादेराख्यातुमिच्छा चेत् । आगमोपज्ञं धर्माधर्मौ । मनूपज्ञं लोकवृत्तम् । आढ्योपक्रमं दानम् । ब्राह्मणोपक्रमं प्रतिग्रहः ।

२२ । छाया बाहुल्ये ।

छायान्तस्तत्पुरुषः क्लीवं स्यात् । इक्षुच्छायम् । शलभच्छायम् । बाहुल्ये किम् ? वृक्षच्छाया ।

२३ । सभा राजाऽमनुष्यपूर्वा ।

राजपर्यायपूर्वाऽमनुष्यपूर्वा च सभा क्लीवं स्यात् । सभा शाला । इन-सभम् । ईश्वरसभम् । "नृपतिसभामगमदवेपमान" इति तु (28) विशेष-विवक्षायां गजपतिवत् । राजशब्दस्य पर्यायमात्रोपलक्षणार्थत्वादेव राजसभा चन्द्रगुप्तसभेति । राक्षससभम् । अमनुष्यशब्दस्य रक्षःपिशाचादौ रूढत्वादेव देवसभेति ।

---

(28) A quotation from the poem कीचकवधमहाकाव्य ।

२४। अशाला च।

अशालार्था सभा क्लीबं स्यात्। स्त्रीसभम्। दासीसभम्। तत्समूह इत्यर्थः। (29)

२५। विभाषा सेनासुराच्छायाशालानिशानाम्।

सेनाद्यन्तस्तत्पुरुषः क्लीबलिङ्गः स्याद्वा। शत्रुसेनम्। यवसुरम्। हयच्छायम्। गोशालम्। श्वनिशम्। पक्षे शत्रुसेना यवसुरेत्यादि।

२६। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः।

अनयोरुत्तरपदस्येव लिङ्गं स्यात्। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तत्पुरुषे। राजस्त्री। अर्धपिप्पली। सुखचन्द्रः।

(वा) द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधः। पञ्चकपालः सूपः। प्राप्तजीविकः। आपन्नसुखः। अलङ्कुमारिः। प्रतिगतोऽश्वं प्रत्यश्वः पटः। निष्कौशाम्बिः। वाच्यलिङ्गतैव भवति।

२७। पूर्ववदश्ववडवौ।

एकवद्भावादन्यत्राश्ववडवयोः पूर्ववल्लिङ्गं स्यात्। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः।

२८। हेमन्तशिशिरावहोरात्रे च च्छन्दसि।

छन्दः सूत्रम्।

२९। रात्राह्नाहाः पुंसि।

एते पुंसि स्युः। "अहोरात्राविमौ पुण्यौ"। पूर्वाह्णः। द्व्यहः। त्र्यहः। एकाहः।

३०। अपथं नपुंसकम्।

स्यात्। अपथमिदम्। तत्पुरुषानुवृत्तेरपथोऽयं देशः।

---

(29) कथं विंशति युवति सभा तव सकलेति जयदेवे? युवतीति समीपनामाभिव्यक्तिवती वाक्षिप्तपक्षवती।

३१ । अर्द्धर्चाः पुंसि च ।

अर्द्धर्चादयः पुंसि क्लीबे च स्युः । अर्द्धर्चमर्द्धर्चः । यूथं यूथः । मधु मधुः । "अपयत्नमुमं कामं कर्म्मार्थं चिनुते शुभम् ।" एवं गोमयसरकसारवर्णपद्मशङ्खकुलिशदिवसकार्पासकर्पूरधर्म्मव्रतादि । उक्तं लिङ्गम् ।

३२ । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ।

इदमः साकच्कस्य पूर्वोक्तस्यानुकथनेऽशादिश्यते तृतीयादौ विभक्तौ परतः । इमकाभ्यां रात्रिरधीता । अथो आभ्यामहरप्यधीतम् ।

३३ । एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ।

एतद इत्यधिक्रियते । त्रतसोस्तु एतदोऽशित्यशादेशे (५।३।५) (30) सिद्धे वचनमिदमनुदात्तार्थम् । स च स्वरभागः । एतस्मिन् वसामः । अथो अत्राधीमहे । "एतस्मिन्निर्गता कीर्त्तिरथातो बिभ्यति द्विषः" ।

३४ । द्वितीयाटौस्स्वेनः ।

एष्विदमेतदोरेनादेशः स्यात् । "इममिन्द्रसमं विद्धि मैनं मंस्थास्त्वमन्यथा" । टा । अनेन रात्रिरधीता । अथो एनेनाहरप्यधीतम् । ओस् । अनयोः । अथो एनयोः । एवमेतदः । एतम् । अथो एनम् । एतेन । अथो एनेन । एतयोः । अथो एनयोः । अन्वादेश इत्येव । अयं दण्डो हरानेन । समानाधिकरण एवाभिधानान्नेह । इमं छात्रं भोजय । इमञ्च विप्रमिति ।

(क) एनदिति नपुंसकैकवचने । नपुंसकैकत्वे द्वितीयायामेनदिष्यते इत्यर्थः । इदं कुण्डलमानय । अथो एनत् परिवर्त्तय । एतत् कुण्डमानय । अथो एनत् प्रक्षालय । (31)

---

(30) The बौद्ध grammarians put the aphorism as एतदोऽश् (५।३।५). But Brahmin commentators all follow भाष्य and give it as एतदोऽन् ।

(31) (a) अयमेनादेशः क्वापि पद्येऽपि स्यात् । यथा—अथेनमद्रेस्तनया शुशोचेति रघौ, प्रवेशयामास च भर्त्तुरेनामिति कुमारे, तदेनमुल्लङ्घितशासनं विधेरिति माघे च । (b) अनुवादे तु न । अथवाऽन्वादेशस्याविवक्षया न । यथा भाष्ये—एतमातं ङितं विद्यादिति (१।१।१४) । एवञ्च—चार्वीमपीव रहनमदर्धवशानमीतिनं ते पुनरनर्थतया न मंस्यमिति नैषधे, गतं भीवरथं त्वमेव तदिमं राघे गृहं प्रापयेति जयदेवे च नेनादेशः ।

३५ । आर्धधातुके ।

अधिकारोऽयम् । ण्यक्षत्रियं (२।४।५८) यावत् ।

३६ । अदो जग्धिर्ल्यप् ति किति ।

अदो जग्धिरादिश्यते ल्यपि तादौ च किति प्रत्यये परतः । इकार उच्चारणार्थः । प्रजग्ध्य । जग्धः । जग्धवान् । कथमन्नम् ? अन्नाण्ण इति (४।४।८५) निपातनात् ।

३७ । लुङ्सनोर्घस्लृ ।

लुङि सनि चादेर्घस्लृ स्यात् । अघसत् । जिघत्सति ।

(क) अच्युपसंख्यानम् । प्रघसोऽयम् ।

३८ । घञपोश्च ।

अनयोरदो घस्लृ स्यात् । घञ् घासः । उपसर्गेऽद इत्यप् (३।३।५९) । प्रघसः ।

३९ । बहुलं छन्दसि ।

छान्दसं सूत्रम् ।

४० । लिट्यन्यतरस्याम् ।

अदो लिटि वा घस्लृ स्यात् । जघास । जक्षतुः । जक्षुः । पक्षे आद । आदतुः । आदुः ।

४१ । वेञो वयिः ।

वेञो वयि लिटि वा स्यात् । उवाय । ऊयतुः । ऊयुः । पक्षे ववौ । ववतुः । ववुः ।

(c) हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम् ।
जालान्तरेण मम वासगृहं प्रविष्टः श्रोणीतटं स्पृशति किं कुलधर्म एषः ॥ १ ॥

इत्यादौ कथं श्रोणीतटं स्पृशन्तं निवारयेति अध्याहारेण योजनीयम् । (d) नपुंसके एतत् । [illegible] वत् परिवर्तनेनादिति । (e) समाधि तु न । एतच्चिन्तनमिति । एकपदाश्रयत्वेनान्तरङ्गे [illegible] चरितार्थत्वेन बहिरङ्गे [illegible] इति तदभ्यर्णेरित्याहुः ।

४२ । हनो वध लिङि ।

हन्तेर्लिङि वधादेशः स्यात् । वध्यात् । वध्यास्ताम् । वध्यासुः । आर्ध-धातुक इत्येव । विधौ लिङि तु । हन्यात् । हन्याताम् । हन्युः ।

४३ । लुङि च ।

४४ । आत्मनेपदेष्वन्यतरस्याम् ।

लुङि हनो वधादेशः स्यात् । अवधीत् । तङि वा । आवधिष्ट । आवधि-षाताम् । पक्षे आहत । आहसाताम् ।

४५ । इणो गा लुङि ।

लुङीणो गादेशः स्यात् । अगात् । अगाताम् । अगुः । अगायि ग्रामः ।
(क) इण्वदिक इति वक्तव्यम् । अध्यगात् ।

४६ । णौ गमिरबोधने ।

इणो णौ गमिरादिश्यतेऽबोधने । गमयति । अबोधने किम् ? अर्थान् प्रत्याययति । इण्वदिक इत्येव । अधिगमयति ।

४७ । सनि च ।

सनीणो गमिः स्यात् । जिगमिषति । जिगमिषा । अबोधन इत्येव । प्रतीषिषति । इण्वदिक इत्येव । अधिजिगमिषति ।

४८ । इङश्च ।

इङः सनि गमिः स्यात् । अधिजिगांसते व्याकरणम् । अधिजिगांसमानः ।

४९ । गाङ् लिटि ।

इङो लिटि गाङादेशः स्यात् । अधिजगे । अधिजगाते । अधिजगिरे ।

५० । विभाषा लुङ्लृङोः ।

इङो गाङ् वा स्यात् । अध्यगीष्ट अध्यैष्ट वा । अध्यगीष्यत अध्यैष्यत वा ।

५१ । णौ च संश्चङोः ।

संश्चङ्परे णाविङो गाङ् वा स्यात् । अधिजिगापयिषति शिष्यमध्यापि-

अधिपति वा । अधि । अध्यजीगपत् (32) । "अध्यापिपद् गाधिसुतो यथा[illegible]।"

५२ । अस्तेर्भूः ।

स्यात् । भविता । भवितुम् । भवितव्यम् । "अनुप्रयोगे तु भुवाऽस्त्यबाधनम्" (६।४।११०,वा) । ईहामास । इत्यार्धधातुक इति सामान्येनोपादानम् । तेन पौर्वापर्याभावाद् विषयसप्तमीयं स्थिता । अतोऽस्तेरजेश्चक्षिङश्च प्रागेवादेशे कृतेऽजन्तलक्षणो यत् सिध्यति भव्यम् प्रवेयमाख्येयमिति ।

५३ । ब्रुवो वचिः ।

स्यात् । वक्ता । वक्तुम् । वक्तव्यम् । आर्धधातुक इत्येव । ब्रवीति ।

५४ । चक्षिङः ख्याञ् ।

स्यात् । आख्याता । आख्यास्यति । आख्यायते । ञित्त्वादुभयपदित्वम् । क्शादिरप्ययमादेशः । (33) व्याक्ष्ख्याता । व्याक्ष्ख्यानम् । व्याक्ष्ख्यातुम् । प्रत्येकं क्शादिरित्यपरे । व्याक्ख्याता व्याख्याता वा । व्याक्ख्यानं व्याख्यानं वा ।

(क) वर्जने प्रतिषेधः । संचक्ष्या दुर्जनाः । वर्जनीया इत्यर्थः ।

(ख) आर्धधातुकप्रकरणे बहुलं संख्यानम्योरिति वक्तव्यम् । असुन् नृचक्षाः । युच् विचक्षणः । अजेर्लुट् । अजनम् । इणः इन् । मानम् ।

५५ । वा लिटि ।

चक्षिङो लिटि ख्याञ् वा स्यात् । आचख्यौ । आचख्ये । पक्षे आचचक्षे ।

---

(32) "निर्विंशिषं महाविद्याद्येकलघनमद् भवि । यो मां विविध शैशेसे: सर्वां एवाध्यजीगपत् ॥ १ ॥"

(33) सूत्रेऽस्मिन् वार्त्तिकानां संख्या द्वयम् । तत्र चक्षिङः क्शाञ् ख्याञाविति प्रथमं वार्त्तिकम् । क्शादिर्वेति द्वितीयम् । असिद्धे शस्य यवचनमिति तृतीयम् । पुरुषोत्तमेन तु प्रथमं वार्त्तिकं परित्यज्य क्शयादेशौ वक्तव्यौ स्त्रीकृत्य ख्याञ् क्शादी तौ भवत इति द्वितीयवार्त्तिकं व्याख्यातः । ख्याञ् क्शादी भवति वा ख्यादी वा भवत इति मतान्तरेणापि पक्षेऽङ्गीकृतम् । नतु ख्याञादौ [illegible] [illegible] । एवेन भवति आक्शाता आक्ष्ख्याता आख्शाता आख्याता आक्ख्यातेति [illegible] [illegible] तु न स्यात् । भवति आक्शाता आक्ख्यातेति [illegible] । [illegible] [illegible] ।

६८ । तिककितवादिभ्यो द्वन्द्वे ।

तिकादेः कितवादेश्च द्वन्द्वे गोत्रप्रत्ययस्य लुक् स्यात् । द्वन्द्वे । तैकायनयश्च कैतवायनश्च तिककितवाः । तिकादिभ्यः फिञो (४।१।१०४) लुक् । वङ्खर-भण्डीरथाः । अत इञो (४।१।९५) लुक् ।

६९ । उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ।

एभ्यो गोत्रप्रत्ययस्य बहुषु लुग् वा स्यात् । अद्वन्द्वे द्वन्द्वे च । उपकाः । औपकायनाः । लमकाः । लामकायनाः । नडादिः । उपकलमकाः (35) । भ्राष्टकाः । विष्टकाः । भ्राष्टकयः । वैष्टकयः । भ्राष्टकविष्टका भ्राष्टकिवैष्टकयो वा ।

७० । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ।

अगस्त्यशब्दादृष्यण् (४।१।११४) । कुण्डिनीशब्दाद् गर्गादियञ् (४।१।१०५) । तयोर्बहुषु लुक् स्यात् । अगस्तिकुण्डिनजिति चादेशौ भवतः । अगस्तयः । कुण्डिनाः ।

७१ । सुपो धातुप्रातिपदिकयोः ।

धातोः प्रातिपदिकस्य चावयवस्य सुपो लुक् स्यात् । सनाद्यन्तधातोः (३।१।३२) । पुत्रीयती । मालीयति । समासप्रातिपदिकस्य । कष्टश्रितः । राजपुरुषः । अनयोः किम् ? वृक्षः ।

७२ । अदिप्रभृतिभ्यः शपः ।

अदादेः शपो लुक् स्यात् । अत्ति । द्वेष्टि । शेते ।

(1) चर्करीतञ्च (36) । बोभवीति । चर्करीतमिति यङ्लुकः प्राचां संज्ञा ।

७३ । बहुलं छन्दसि ।

छान्दसम् ।

७४ । यङोऽचि च ।

अचि यङो लुक् स्यात् । लोलुवः । पोपुवः । मरीमृजः । इह चकारेण

(35) अत्र तिककितवादित्वात् पूर्वेण सूत्रेण नित्यमेव लुक् । न तु विकल्पः ।

(36) इदमदादिगणसूत्रमेकं गणसूत्रम् । चर्करीतमदादौ बोध्यमित्यस्यार्थः ।

बहुलग्रहणमनुकृष्यते नतु च्छन्दसीति। तेन भाषायामनच्यपि यङ्लुक्। लालपीति वावदीतीति जयादित्यः। चकाराद् बहुलं छन्दसीति (२।४।७३) सर्वमनुवर्त्तते। तेन बाहुल्यादनच्यपि च्छन्दस्येव यङ्लुक्। भाष्ये तु गुणुग्रहणज्ञापक·(६।४।८७) बलाद् बोभवीतीत्येवं पदं भाषायां साधु। नान्यदिति भागवृत्तिः। दृश्यन्ते च शिष्टप्रयोगाः।

"यदि देवो वरीवर्ष्टि कोकिलो रोरवीति च।
मयूरोऽपि नरीनर्त्ति मरीमर्मि तदा प्रिये" ॥१॥ इति।

तेऽपांसि भ्रंशमापत्कुरिति भट्टिः।

"हरिणा सह सख्यं ते बोभूत्विति यदब्रवीः।
न जाघटीति युक्तो तत् सिंहद्विरदयोरिव" ॥१॥

इति पाणिनेर्जाम्बवतीविजयकाव्यम्।

७५। जुहोत्यादिभ्यः श्लुः।

जुहोत्यादेः शपः श्लुः स्यात्। जुहोति। बिभर्त्ति।

७६। बहुलं छन्दसि।

छान्दसम्।

७७। गातिस्थाघुपाभूभ्यः (37) सिचः परस्मैपदेषु।

एभ्यः सिचो लुक् स्यात्। इणो गा (२।४।४५)। अगात्। अगाताम्। अगुः। स्था। अस्थात्। घु (१।१।२०)। अदात्। अधात्। पा पाने। अपात्। अभूत्। कै गै शब्दे। पा रक्षणे। अनयोर्नेष्यते। अगासीन्नटः। अपासीन्नृपः। परस्मैपदेषु किम्? अगासातां ग्रामौ विप्रेण।

७८। विभाषा घ्राधेट्शाच्छासः।

परस्मैपदेष्वेभ्यः सिचो लुग् वा स्यात्। घ्रा। अघ्रात्। धेट्। अधात्। शो। अशात्। छो। अच्छात्। सो। असात्। पक्षे ऽघ्रासीदित्यादि।

---

(37) केचित्तु भूतेऽस्मिन् भीधातो ङसौ निर्देशः। एरनेकाच (६।४।८२) इति यण्विधुना मा भैः प्रयाह मम भीधुनि नास्ति राद्धुरिति प्रयोगः साधुरिति वदन्ति। अन्ये त्वेतन्न मन्यन्ते, तथाच भट्टिः—माश्च भैषी कथाश्चैव क्षतार्थो द्रक्ष्यते पतिरिति। वस्तुतस्तु मा भैरिति पदं प्रामादिकमेवेति बहवः। एतावता समर्थनायैव त्वामनुशासनमनित्यमिति (प, ८५) यथा कथञ्चित् समाधेयम्।

७९ । तनादिभ्यस्तथासोः ।

तनादेः सिचो लुग् वा स्यात् तथासोः परतः । अतत । अतथाः । अतनिष्ट । अतनिष्ठाः ।

८० । मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ।

छान्दसम् ।

८१ । आमः ।

आमः परस्य लेर्लुक् स्यात् । ईहाञ्चक्रे ।

८२ । अव्ययादाप्सुपः ।

अव्ययात् परस्यापः सुपश्च लुक् स्यात् । तत्र शालायाम् । सुपः । स्वः । प्रातः । कृत्वा । कर्तुम् । इहाव्ययस्यालिङ्गसंख्यत्वादाप्सुपोरभावाल्लुक्प्रयोजनं चिन्त्यम् ।

८३ । नाव्ययीभावादतोऽम् त्वपञ्चम्याः ।

अदन्तादव्ययीभावात् सुपो लुङ् नास्ति । पञ्चमीवर्जममादेशस्तु विधेयः । उपकुम्भं तिष्ठति पश्य देहि वा । अतः किम् ? उपाग्नि । अपञ्चम्याः किम् ? उपकुम्भादागतः ।

८४ । तृतीयासप्तम्योर्बहुलम् ।

अनयोरम् बहुलं स्याददन्तादव्ययीभावाद् । उपकुम्भमुपकुम्भेन वा कृतम् । उपकुम्भमुपकुम्भे वा निधेहि । सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम् । सुमद्रम् । सुभिक्षम् । नदीसमासे । उन्मत्तगङ्गम् । संख्यावयवे । एकविंशतिभारद्वाजम् । उक्तो लुक् ।

८५ । लुटः प्रथमस्य डारौरसः ।

लुटः प्रथमपुरुषस्य डारौरसः स्युः । डः कर्त्ता । कर्त्तारौ । कर्त्तारः । ङः अध्येता । अध्येतारौ । अध्येतारः ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
द्वितीयाध्यायस्य चतुर्थः पादः ॥२।४॥
समाप्तश्च दिगुपादो द्वितीयोऽध्यायश्च ।

अथ

भाषावृत्तिः ।

तृतीयोऽध्यायः । प्रथमः पादः ।

१ । प्रत्ययः ।

२ । परश्च ।

प्रत्ययो वक्तव्यः । स च परः स्यात् । तथैवोदाहार्य्यम् । याति । जतम् ।

३ । आद्युदात्तश्च ।

४ । अनुदात्तौ सुप्पितौ ।

स्वरसूत्रद्वयम् ।

५ । गुप्तिज्किद्भ्यः सन् ।

एभ्यः सन् प्रत्ययः स्यात् । लोकतोऽर्थावगमः । जुगुप्सतेऽधर्मम् । तितिक्षतेऽपराधम् । चिकित्सत्यातुरम् भिषक् । तथा विचिकित्सति मे मनः । सन्दिग्धीत्यर्थः ।

६ । मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ।

मानादिभ्यः सन् स्यात् । अभ्यासस्य दीर्घश्च । मीमांसते शास्त्रम् । बीभत्सते गजम् । दीदांसते मनुम् । शीशांसते शस्त्रम् । अनिच्छासन आर्द्धधातुकत्वं नास्ति । धातोरित्यनभिधानात् (३।१।७) ।

७ । धातोः कर्मणः समानकर्तृकादिच्छायां वा ।

इषेः कर्मणः समानकर्तृकाद्धातोरिच्छायां वा सन् स्यात् । पक्षे वाक्यञ्च । कर्त्तुमिच्छति चिकीर्षति । जुगुप्सिषते । विवर्त्तिषते । इच्छासन्नन्तान्नेष्यते ।

चिकीर्षितुमिच्छति (1)। कृशाश्वा कुकुठिषति नदीकूलं पिपतिषतीत्युपचारात्। (2)।

८। सुप आत्मनः क्यच्।

इषेः कर्मणः सुबन्तादेषितुरिच्छायां वा क्यच् स्यात्। आत्मनः पुत्रमिच्छति पुत्रीयति। पुत्रीयन्ति। पुत्रीयन्। भार्य्यीयति। दधीयति। मधूयति। गव्यति। राजीयति।

(क) क्यचि मान्ताव्ययानिषेधः। किमिच्छति। स्वरिच्छति।

९। काम्यच।

तस्मिन्विषये काम्यच् स्यात्। पुत्रकाम्यति। स्त्रीकाम्यति।

१०। उपमानादाचारे।

क्यजित्येव। उपमानात् कर्मणः सुबन्तादाचारे क्यच् स्यात्। पुत्रमिवाचरति पुत्रीयति भृत्यम्। मात्रीयति परदारम्।

(क) अधिकरणाच। आचारे क्यच् स्यात्। "प्रासादीयति यः कुट्यां कुटीयति मघवने।"

११। कर्तुः क्यङ् सलोपश्च।

कर्तुरुपमानादाचारेऽर्थे क्यङ् स्यात्। सान्तस्य च लोपः। श्येनरिवाचरति श्येनूयते हयः। "दरक्षोऽपि द्रुमायते"। काकोऽपि गरुडायते। गव्यति गवयः। माव्यते द्रोणी। "तस्य सन्तोषशीलस्य कुटिकाप्यप्सरायते"। सलोपोऽयमोजसो ऽप्सरसो नित्यम् (3) पयसस्तु विभाषयेत्येके। अप्सरस एव लोपो नान्यस्येत्यपरे।

(ख) सर्वप्रातिपदिकेभ्यः क्विप् वा। प्रातिपदिकात् क्यङ्विषये

---

(1) ऐषिकात् मधुपर्कान्वेषिको मधुपर्किकः। तपसः प्रमयी भेदः सम्पृक्ता सनिष्यते॥ १॥ इति भाष्यात्।

(2) उपमानादिति पाठान्तरम्।

(3) "ओजसाम्भसा तमसा तपसा श्रमयोरि"ति वार्तिकं।

क्विब् वा स्यात्। अश्वति (4) स्वरः। प्रभवति भृत्यः। रिपवन्ति मित्राणि। विधवति रविः। गोदोहति। गोदुहतीति कश्चित्। अवगल्भादयस्तु क्विब्विधावात्मनेपदार्थमनुदात्तेत उपदेष्टव्या इति स्मृतिः। तेनावगल्भते। विह्लोढते। क्लीवते। कास्प्रत्ययादित्याम् (३।१।३५)। अवगल्भाञ्चक्रे।

१२। भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः।

भृशादिभ्यश्च्व्यर्थगतौ भुवि भवत्यर्थे क्यङ् स्यात्। अभृशो भृशो भवति भृशायते खेदः। शीघ्रायते। उत्सुकायते। हलन्तस्य च लोपः। सुमनायते। उन्मनायते। उन्मनायमानः।

१३। लोहितादिडाज्भ्यः क्यष्।

लोहितादेर्डाजन्ताच्च भुवि भवत्यर्थे क्यष् स्यात्। अलोहितो लोहितो भवति लोहितायति लोहितायते। मन्दायति। मन्दायते। एवं वर्म हरित निद्रा तन्द्रा करुणा तृषा नैका। आकृतिगणोऽयम्। कात्यायनस्तु (क) लोहितडाज्भ्यः क्यष् वचनं भृशादिष्वितराणीत्याह। डाच्। दमदमायति दमदमायते। डाचि बहुल मिति (८।१।१२, वा) द्वे।

१४। कष्टाय क्रमणे।

कष्टाय यत् प्रातिपदिकं ततः क्रमणेऽर्थे क्यङ् स्यात्। कष्टायेति सामान्यनिर्देशात् सत्रकक्षकृच्छ्रगहनेभ्योऽपि स्यात्। तथाच श्लोकवार्त्तिकं—

तादर्थ्यं एवात्र भवेच्चतुर्थी कष्टाय यत् क्रामति कर्मणे तु।
व्याख्यानतोऽर्थग्रहणं हि लभ्य मंहश्चिकीर्षापि च नान्तरीया ॥१॥ (5)

---

(4) "क्विबन्ताद्धातोः कर्त्तरि क्विपि कृतेऽतो लोपे (६।४।४८) कृते सुप्तं न स्थानिवदिति वकारलोट्। अश्वः स्वरः।" इति भाषाव्याख्यविवृतिः।

(5) नान्तरीया अभिन्नेत्यर्थः। येन विना यन्न भवति तत् तस्य नान्तरीयम्। अविनाभावसम्बन्धः। अन्तरशब्दाद् गहादित्वाच्छः। टाप्। अन्तरीया। ततो नञर्थस्य नशब्दस्य सुप्सुपेति समासः। नान्तरीया। अथवा नञ्समासः। यथाह कैयटः—"अन्तरशब्दो गहादिषु पठ्यते। स च विनार्थे वर्त्तते। अन्तरे भवमन्तरीयम्। तत्र नञ्समासे कृते पृषोदरादित्वाद् भाष्यकारवचनप्रामाण्याद्वा नलोपाभाव" इति (३।१।१८) भाष्यप्रदीपे। गहादिभ्यश्चेति (४।२।११८) छः। नान्तरीयमभिन्नम तु क्वचित् कम् प्रयत्नः। अंहश्चिकीर्षा पापचिकीर्षा।

इति । कष्टायते । सत्रायते । कक्षायते । कष्टायते । गहनायते । पापचिकीर्षतीत्यर्थः ।

१५ । कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः ।

आभ्यां कर्मभ्यां वर्त्तिचरोरर्थयोः क्यङ् स्यात् । रोमन्थायते गौः । हनुचलनेऽभिधानाभावेन । कीटो रोमन्थं वर्त्तयति ।

(क) तपसः परस्मैपदञ्च । तपस्यति ।

१६ । बाष्पोष्मभ्यामुद्वमने ।

(क) फेनाच्च ।

एभ्य उद्वमने क्यङ् स्यात् । बाष्पायते स्थाली । ऊष्मायते भक्तम् । फेनायते नदी । धूमाच्चेति भर्तृहरिः (6) । धूमायतेऽग्निः । "धूमायन्त इवाश्लिष्टाः" । (7)

१७ । शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ।

एभ्यः क्रियायां क्यङ् स्यात् । शब्दं करोति शब्दायते । वैरायते । वैरायमाणः । एवं यावत् मेघायते ।

(क) सुदिनदुर्दिननीहाराच्च । सुदिनायते । दुर्दिनायते । नीहारायते ।

(ख) अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणं कर्त्तव्यम् । अटायते । अट्टायते । शीकायते । कोटायते । पोटायते । सोटायते । प्रुष्टायते । प्लुष्टायते ।

१८ । सुखादिभ्यः कर्तृवेदनायाम् ।

एभ्यः कर्त्तुरनुभवे क्यङ् स्यात् । आत्मनः सुखं वेदयते सुखायते । दुःखायते । सुख दुःख अलीक करुणा कृच्छ्र प्रतीप तृप्त । आकृतिगणोऽयम् ।

१९ । नमोवरिवश्चित्रङः क्यच् ।

एभ्यः क्यच् स्यात् । पूजापरिचर्य्याश्चर्य्येष्वभिधानम् । नमस्यति देवान् । वरिवस्यति गुरून् । चित्रीयते हेमसृगः । विस्मापयत इत्यर्थः ।

---

(6) भाष्यवृत्तिकारः ।

(7) धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः । उल्मुकानीव मेऽमी त्वां ज्ञातयो भरतर्षभ ॥१॥ इति भारतीयः श्लोकः ।

२० । पुच्छभाण्डचीवराण्णिङ् ।

एभ्यो णिङ् स्यात् । उदसनसमाचयनपरिधानेष्वभिधानम् । उदसनमुत्क्षेपणम् । उत्पुच्छयते व्याघ्रः । सम्भाण्डयते कुलालः । सञ्चीवरयते भिक्षुः ।

२१ । मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ।

करण इतेग्व । मुण्डादिभ्यः क्रियाविशेषे णिच् स्यात् । मुण्डयति । मिश्रयति । श्लक्ष्णयति । लवणयति । व्रतयति । वस्त्रात् संवरणे । संवस्त्रयति । हलिकल्योरत्वनिपातनं सन्वद्भावनिषेधार्थम् । हलिं गृह्णाति हलयति । कलिं गृह्णाति कलयति । अजहलत् । अचकलत् । हलिर्हृद्धलम् । कृतं गृह्णाति कृतयति । तूस्तानि विनिहन्ति वितूस्तयति पन्थानं वातः । तूस्तं धूलिः । (४)

२२ । धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ।

धातोः क्रियासमभिहारे यङ् स्यात् । कार्त्स्न्येन पुनःपुनर्वा पचति पापच्यते । कार्त्स्न्येन भृशं वा ज्वलति जाज्वल्यते । जाज्वल्यमानः । एकाचः किम् ? भृशं जागर्त्ति । हलादेः किम् ? भृशमीक्षते । ग्रभक्षो-स्त्वनभिधानम् । गृणातेश्च ।

(क) सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामुपसंख्यानम् । सप्तभ्यो यङ् स्यादेभ्यः । सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते । अटाट्यते । "अटाट्यमानोऽरण्यानीम्" । अरार्य्यते । "किमभीरुरराय्यसे" । अशाश्यते । प्रोर्णोनूयते ।

२३ । नित्यं कौटिल्ये गतौ ।

गत्यर्थात् कौटिल्यएव यङ् स्यात् । जङ्गम्यते । चङ्क्रम्यते । नित्यग्रहणं क्रियासमभिहारनिवृत्त्यर्थमिति स्मृतिः ।

२४ । लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ।

लुपादिभ्योऽष्टभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हा निन्दा । गर्हितं

---

(४) तूस्तं धूली च विख्यातं जटायाश्च नपुंसकमिति मेदिनीकारवचनादिहोभयार्थमेव । वितूस्तयति तूस्तानि विहन्तीति आचार्यस्वचिवृतौ स्फुटमेवाभाणि ।

लुम्पति लोलुप्यते। सासयते। "तस्याः सासद्यमानायाः।" चचूर्य्यते। जञ्जप्यते। जञ्जभ्यते। दन्दह्यते। दन्दश्यते। निजेगिल्यते।

२५। सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्ण-चूर्णचुरादिभ्यो णिच्।

एभ्यो णिच् स्यात्। लोकतोऽर्थावगमः। सत्यापयति। अर्थवेदसत्यानामापुगिति पूर्वस्मृतेरपलक्षणम्। अर्थापयति। वेदापयति। विपाशयति। निरूपयति। उपवीणयति। अनुतूलयति। उपश्लोकयति। अभिषेणयति। अनुलोमयति। त्वचशब्दोऽदन्तः। त्वचं गृह्णाति त्वचयति। संवर्मयति। वर्णयति। अवचूर्णयति। चुरादिभ्यः स्वार्थे णिच्। चोरयति। चिन्तयति। चुरादौ

(1) प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च।

(2) तत्करोति तदाचष्ट इति गणसूत्रम्। सूत्रं करोति सूत्रयति। मूत्रयति। सूचयति। कुमारीमाचष्टे कुमारयति। मालां मालयति। मातरं मातयति। बहुलवचनात्।

(क) आख्यानात् कृदन्तात् तदाचष्ट इति णिच्। कृल्लुगादिकं प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकं भवति। कंसस्य वधमाचष्टे घातयति कंसम्। बलिं बन्धयति नटः कथको वा। एवं राजानमागमयति। मृगान् रमयति। उद्गमयति सूर्य्यमिति। पाशादेरपि णिजस्येव प्रपञ्चः।

२६। हेतुमति च।

करच स्त्येव। हेतोः प्रयोजकस्य यो व्यापारः क्रियासु प्रेषणमानुकूल्यं वा स हेतुमान्। तत्र धातोर्णिच् स्यात्। कुर्वन्तं प्रयुङ्क्ते कारयति। पाचयति। आसयति। गाययति। भिक्षा वासयतीति कारीषोऽग्निरध्यापयतीत्युपचारात्। पञ्चभि र्हलैः कर्षतीति कृषिः प्रतिविधानार्थः। याजका यजन्तीति यजि र्हविष्प्रक्षेपणार्थः।

२७। कण्ड्वादिभ्यो यक्।

एभ्यो यक् स्यात्। कण्डूञ्। कण्डूयति कण्डूयते। "वल्गूयन्तौ

विलोक्य त्वां स्त्री न मन्तूयतीह वा।" महीङ्। "महीयमाना भवतातिमात्रम्"। ऋणीङ्। "ऋणीयती वीरवती न भूमिः।" मृग। "मृग्यन्तः पदवीम्"।"क्लिश्यन्नपि हि मेधावी"। सुख। "सुखयेयुः प्रकृतयो नृपम्।"

२८। गुपूधूपविच्छिपणिपनिभ्य आयः।

एभ्य आयः स्यात्। गोपायति। धूपायति। विच्छायति। पणायति। पनायति।

२९। ऋतेरीयङ्।

ऋतेः सौत्राद्धातोरीयङ् स्यात्। ऋतीयते।

३०। कमेर्णिङ्।

स्यात्। कामयते।

३१। आयादय आर्द्धधातुके वा।

आर्धधातुके विषये आयादयो वा स्युः। गोप्ता गोपायिता वा। गुप्तिः गोपाया वा। अर्त्तिता ऋतीयिता वा। कामयिता कमिता वा।

३२। सनाद्यन्ता धातवः।

सनाद्यन्ता (9) धातुसंज्ञकाः स्युः। तथैवोदाहृतम्। अथ धातोर्विकरणाः।

३३। स्यतासी लृलुटोः।

लृटि लृङि च स्यः स्यात्। करिष्यति। अकरिष्यत्। लुटि तासिः स्यात्। कर्त्तासि। कर्त्तासे।

३४। सिब् बहुलं लेटि।

लेट् छान्दसः।

३५। कास्प्रत्ययादाममन्त्रे लिटि।

कासेः प्रत्ययान्ताच्च धातोर्लिट्याम् स्यात्। "कासाञ्चक्रे पुरी शौर्धः।" चिकीर्षाम्बभूव। पातयामास। संत्रासयाञ्चकार। "भूयस्त्वं वेभिदाञ्चक्रे।"

---

(9) "सन् क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विप् णिच् यङौ तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः" ॥ १ ॥ इति।

प्रत्ययग्रहणमनेकाजुपलक्षणमिति स्मृतिः। तेन दरिद्राञ्चकार। चुलुम्पाञ्चकार।

३६। इजादेश्च गुरुमतोऽनृच्छः।

इजादिर्यो धातुर्गुरुमांस्ततो लिट्याम् स्यात्। ईहाञ्चक्रे। ईक्षाञ्चक्रे। ऊहाञ्चक्रे। अनृच्छः किम्? आनर्च्छ।

(क) ऊर्णोतेर्नुवद्भावो वक्तव्यः। प्रोर्णुनाव।

३७। दयायासश्च।

एभ्यो लिट्याम् स्यात्। "दयाञ्चक्रे न राघवः"। पलायाञ्चक्रे। आसाञ्चक्रे। आसाम्बभूव। आसामास।

३८। उषविदजागृभ्योऽन्यतरस्याम्।

एभ्यो लिट्याम् वा स्यात्। "ओषाञ्चकार कामाग्निः"। उवोष। विदेरगुणत्वञ्च। विदाञ्चकार विदाम्बभूव। विदामास विवेद। जागरामास जागराञ्चकार जागराम्बभूव जजागार।

३९। भीह्रीभृहुवां श्लुवच्च।

एषां लिट्याम् वा स्यात्। श्लाविव द्वित्वमित्त्वञ्च। बिभयाञ्चकार। जिह्रयाम्बभूव। बिभरामास। जुहवाञ्चकार। पक्षे बिभाय। जिह्राय बभार। जुहाव।

४०। कृञ्चानुप्रयुज्यते लिटि।

आमन्तस्य लिटि परतः कृञनुप्रयुज्यते। कृञिति कृभ्वस्तयः। तथैवोदाहृतम्।

४१। विदाङ्कुर्वन्त्वित्यन्यतरस्याम्।

इदं लोटि वा निपात्यते। विदांकुर्वन्तु विदन्तु वा। विदांकुरु विद्धि वा (10)।

---

(10) "यज्ञं संवह माऽग्नीन चपली। पदेऽवस्थाय वा तत्त्वं वीक्ष्य विदांकरोतु भगवानग्निर्मणी-वल्लभः" – इति द्रुतिधरचक्रवर्तिधृतम्। अत्र पुरुषवचने न विवक्षिते। इतिशब्दस्य सर्वेषां पुरुषाणां वचनानामुपलक्षणार्थत्वात्।

४२। अभ्युत्सादयांप्रजनयांचिकयांरमयामकःपावयांक्रियाद्विदामक्रन्निति छन्दसि।

छान्दसम्।

४३। च्लि लुङि।

४४। च्लेः सिच्।

लुङि च्लिः स्यात्। तस्य सिजादिष्यते। अकार्षीत्। अहार्षीत्। अपाक्षीत्।

(क) स्पृशमृशकृषतृपदृपां सिज् वा वाच्यः। एभ्यः सिज् वा स्यात्। अस्प्राक्षीत्। अस्पार्क्षीत्। अम्राक्षीत्। अमार्क्षीत्। अक्राक्षीत्। अकार्क्षीत्। अत्राप्सीत्। अतार्प्सीत्। अद्राप्सीत्। अदार्प्सीत्। पक्षे क्सः। अस्पृक्षत्। अमृक्षत्। अकृक्षत्। पुषादित्वादङ्। अतृपत्। अदृपत्। (11)

४५। शल इगुपधादनिटः क्सः।

शषसहान्तादिगुपधात् च्लेः क्सः स्यात्। स्पृश अस्पृक्षत्। गुह अघुक्षत्। "मा मुचः पन्थुरात्मानम्"। अनिटः किम्? अमोषीत्।

४६। श्लिष आलिङ्गने।

श्लिषः प्राप्तालिङ्गन एव क्सः स्यात्। अश्लिक्षत् कन्याम्। अश्लिक्षद् भार्य्याम्। अन्यत्र समाश्लिषज्जतु काष्ठम्।

४७। न दृशः।

दृशः क्सो न स्यात्। अद्राक्षीत्। अदर्शत्। इरितो वेति वा ऽङ् (३।१।५७)।

४८। णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्।

एभ्य श्चेश्चङ् स्यात्। अचीकरत्। अलीलवत्। अनीनमत्। "मा तपः साधु नीनमः"। अशिश्रियत्। अशिश्रियत्। अदुद्रुवत्। वनो असमसुस्रुवत्। कर्त्तरीति वर्त्तते प्राक् चिण्भावकर्मणोरिति (३।१।६६)।

---

(11) रधादिभ्यादिभी वेट्‌त्वादमर्षमनुदात्ततीति वेट्‌त्वात् पक्षे अतर्पीत्। अदर्पीत्।

(क) कमेरुपसंख्यानम् । "अचकमत सपत्नवां धरित्रीम्" । णिङ्पक्षे पूर्वेणाचीकमत । (12)

४९ । विभाषा धेट्श्व्योः ।

धेट्श्विभ्यां च्लेश्चङ् स्याद्वा । अदधद् अधासीद् वा । विभाषा घ्राधेट्शाच्छासः इति (२।४।७८) पक्षे लुगुक्तः । अधात् । अशिश्वियद् अश्वयीद् वा । अङ् । अश्वत् । कर्त्तरीत्येव । अधिषातां गावौ वत्सेन ।

५० । गुपेश्छन्दसि ।

५१ । नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ।

छान्दसं सूत्रद्वयम् । (13)

५२ । अस्यतिवक्तिख्यातिभ्योऽङ् ।

एभ्यश्च्लेरङ् स्यात् । आस्थत् । अवोचत् । आख्यत् । तङ्पक्षे पर्यास्थत । अवोचत । व्याख्यत ।

५३ । लिपिसिचिह्वश्च ।

५४ । आत्मनेपदेष्वन्यतरस्याम् ।

लिपादिभ्यश्च्लेरङ् स्यात् ।

"इष्ट सा व्यलिपद् गन्धैः स्नान्तीश्चाभ्यषिचज्जलैः ।
दृष्टाहं द्रष्टुमाह्वं तां स्मरन्नेवं मुमोह सः" ॥ १ ॥

तङि वा । "तस्याऽलिपत शोकाग्निः" । "अलिप्तेवानिलः शीतः" । "आत्मनभ्यषिचताथोऽसौ" । "तथाभ्यषिक्त वारीभिः" । "आह्वास्त स मुहुः सुरान् मुहुराह्वत राक्षसान्" ।

५५ । पुषादिद्युताद्ऌदितः परस्मैपदेषु ।

पुषादेर्द्युतादेर्ऌदितश्च च्लेरङ् स्यात् । अपुषत् । अशुषत् । अद्युतत् । अश्वितत् । शकॢ अशकत् । गम्ॢ अगमत् । परस्मैपदेषु किम् ? व्यद्योतिष्ट ।

---

(12) अत्र "नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः । अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः ॥१॥ इति भाष्ये शिष्टप्रयोगप्रशंसापरः श्लोकः ।

(13) वेदे एवायमङ्निषेधः । भाषायां लोके चङेव । तथा चार्दयते "वैनार्दिदद्दैत्यपुरं पिनाकी" ति भट्टिः । वेदे त्वार्दयीत् । "नैनमार्दयीदि"ति ।

५६। सर्त्तिशास्त्यर्त्तिभ्यश्च।

एभ्यश्च्लेरङ् स्यात्। असरत्। अशिषत्। आरत्। आरताम्। कथं "समारन्त ममाभीष्टाः"? तत्रापीच्छन्त्याचार्य्याः।

५७। इरितो वा।

इरितो धातोर्वा च्लेरङ् स्यात्। अश्चोतीत्। अश्चुतद्वा। अभिदत् अभैत्सीद्वा। अरुधत् अरौत्सीद्वा। परस्मैपदेष्वित्येव। अभित्त।

५८। जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च।

एभ्यश्च्लेरङ् स्याद्वा। अजरत्। अस्तभत्। अम्रुचत्। अम्लुचत्। अग्लुचत्। ग्लुञ्चेरग्लुचदित्येके (14)। अश्वत्। पक्षे सिच्। अजारीत्। अश्वयीत्।

५९। कृमृदृरुहिभ्यश्छन्दसि।

छान्दसम्।

६०। चिण् ते पदः।

तकारे परतः पद्यतेः कर्त्तरि च्लेश्चिण् स्यात्। समपादि शस्यम्। तकारे किम्? उदपत्साताम्।

६१। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्।

कर्त्तरि दीपादिभ्यस्तकारे च्लेश्चिण् स्यात्। "कुशोऽदीपि रघुव्याघ्रः।" अदीपिष्ट वा। अजनि अजनिष्ट वा। अबोधि अबुद्ध वा। अपूरि अपूरिष्ट वा। अतायि अतायिष्ट वा। अप्यायि अप्यायिष्ट वा।

६२। अचः कर्मकर्त्तरि।

अजन्तात् कर्मकर्त्तरि तकारे चिण् वा स्यात्। उपाचायि वर्णं स्वयमेव उपाचायिष्ट वा। अकारि कटः स्वयमेवाकृत वा।

---

(14) वस्तुतस्तु ग्लुञ्चेरपि अग्लुचदग्लुञ्चदित्येव रूपम्। अनिदितां (६।४।२४) इत्य उपधायाः ङ्किन्नीलुपधालोपस्यानित्यार्थत्वात्। ग्लोचते ङ्कि अग्लुचत्। अग्लोचीत्। ग्लुचतेस्तु अग्लुचदग्लुचीदिति। ग्लुचु ग्लुञ्चु स्तेयकरणे। ग्लुचु गत्यादिभ्योऽर्थभेदात् सूत्रे उभयोः पाठः। अग्लुचदिति तु भाष्यविरुद्धम्।

६३ । दुहश्च ।

दुहे स्तत्र चिण्वा स्यात् । अदोहि अदुग्ध वा गौः स्वयमेव

६४ । न रुधः ।

रुध स्तत्र न चिण् स्यात् । अरुद्ध गौः स्वयमेव ।

६५ । तपोऽनुतापे च ।

तपस्तत्र न चिण् स्यात् । अतप्त तपस्तापसः । अनुतापे च भाव-कर्मणोरपि न चिण् । अन्ववातप्त पापेन कर्मणा ।

६६ । चिण् भावकर्मणोः ।

अनयोस्तकारे परतश्चिण् स्यात् । अशायि त्वया । अकारि कटः ।

६७ । सार्वधातुके यक् ।

भावकर्मवाचिनि सार्वधातुके यक् स्यात् । भावे । आस्यते त्वया । शश्च (१।१।१००) क्रिया । परिचर्य्या । कर्मणि । क्रियते कटः । क्रियेते कटौ ।

६८ । कर्त्तरि शप् ।

कर्त्तृवाचिनि सार्वधातुके शप् स्यात् । भवति । एधते । धावति धावते । चोरयति । चिकीर्षति । माल्यधारयः ।

६९ । दिवादिभ्यः श्यन् ।

एभ्यः श्यन् स्यात् । दीव्यति । सीव्यति । शूरभ्यः ।

७० । वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ।

एभ्यो वा श्यन् स्यात् । भ्राश्यते भ्राशते वा । भ्लाश्यते भ्लाशते वा । भ्रम्यति भ्रमति वा । दिवादौ तु नित्यम् । भ्राम्यति । अभिलष्यति अभिलषति वा । त्रस्यति त्रसति वा । त्रुट्यति त्रुटति वा ।

७१ । यसोऽनुपसर्गात् ।

वा श्यन् स्यात् । यस्यति यसति वा । प्रादौ नित्यम् । प्रयस्यति ।

७२ । संयसश्च ।

श्यन् वा स्यात् । संयस्यति संयसति वा ।

७३। **स्वादिभ्यः श्नुः।**

एभ्यः श्नुः स्यात्। सुनोति। चिनोति।

७४। **श्रुवः शृ च।**

श्रुवः श्नुः स्याच्छृभावश्च। शृणोति। शृणुतः।

७५। **अक्षोऽन्यतरस्याम्।**

अक्षो वा श्नुः स्यात्। अक्ष्णोति अक्षति वा।

७६। **तनूकरणे तक्षः।**

तक्षस्तनूकृतौ श्नुर्वा स्यात्। तक्ष्णोति तक्षति वा काष्ठम्। (15)

७७। **तुदादिभ्यः शः।**

एभ्यः शः स्यात्। तुदति। उपदिशति।

७८। **रुधादिभ्यः श्नम्।**

एभ्यः श्नम् स्यात्। रुणद्धि। भिनत्ति। पिनष्टि। छिनत्ति। रुन्धानः।

७९। **तनादिकृञ्भ्यः उः।**

एभ्य उः स्यात्। तनोति। करोति।

८०। **धिन्विकृण्व्योर च।**

धिन्विकृण्विभ्यामुः स्यादकारश्चान्तादेशः। तस्य चातो लोपः (६।४।४८)। "धिनोति हव्येन हिरण्यरेतसम्"। कृणोति।

८१। **क्र्यादिभ्यः श्ना।**

एभ्यः श्ना स्यात्। क्रीणाति। क्रीणीते। प्रीणाति। गृह्णाति। गृह्णन्। गृह्णीते। गृह्णानः।

८२। **स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च।**

एभ्यः श्ना स्यात्। श्नुश्च। उत्तभ्नाति उत्तभ्नोति वा। स्तुभ्नाति स्तुभ्नोति वा। स्कभ्नाति स्कभ्नोति वा।

---

(15) तनूकरणे किम्? सन्तक्षति वाग्भिः शिष्यम्।

८३ । हलः श्नः शानज्झौ ।

हलः परस्य श्नाप्रत्ययस्य शानच् स्याद्धौ परतः । पुषाण । बधान । गृहाण ।

८४ । छन्दसि शायजपि ।

छान्दसम् । उक्ता विकरणाः ।

८५ । व्यत्ययो बहुलम् ।

बहुलमित्याधातुप्रत्ययविधानमधिक्रियते । शेषश्छान्दसः ।

८६ । लिङ्याशिष्यङ् ।

छान्दसम् ।

८७ । कर्मवत् कर्मणा तुल्यक्रियः ।

कर्त्तरीत्येव । कर्मणा तुल्यक्रियः कर्त्ता कर्मवत् स्यात् । कर्मस्थक्रियेष्वतिदेशः । प्रयोजनं यगात्मनेपदचिण्चिण्वद्भावाः । पच्यते ओदनःस्वयमेव । पक्किाः पक्तिरात्मेव पच्यन्ते । अभेदि काष्ठं स्वयमेव । कारिष्यते कटःस्वयमेव । कथमन्योन्य माश्लिष्यतः ? अन्योन्यं गृह्णीतः ? साधनभेदेन भिन्नक्रियत्वात् । इह दुहिपच्योः सकर्मकयोः कर्मवद् बहुलमिति भाष्यम् । दुग्धे गौः क्षीरं स्वयमेव । अदुग्ध गौः क्षीरं स्वयमेव । उदुम्बरो लोहितं फलं पच्यते । तथा करणेन तुल्यक्रियः कर्त्ता बहुलं कर्मवत् स्यात् । परिवारयति कण्टकैर्वृक्षम् । परिवार्य्यन्ते कण्टकाः स्वयमेव वृक्षम् ।

८८ । तपस्तपःकर्मकस्यैव ।

तपेः कर्त्ता कर्मवत् स्यात् । तप्यते तपस्तापसः । अर्जयतीत्यर्थः । तपःकर्मकस्यैव किम् ? उत्तपति सुवर्णं सुवर्णकारः ।

८९ । न दुहस्नुनमां यक्चिणौ ।

एषां कर्मकर्त्तरि यक्चिणौ न स्याताम् । दुग्धे गौः क्षीरं स्वयमेव । अदुग्ध गौः क्षीरं स्वयमेव । प्रस्नुते गौः । प्रास्नोष्ट गौः स्वयमेव । नमते दण्डः । अनंस्त दण्डः स्वयमेव ।

(क) सिचन्थिग्रन्थिब्रूञामात्मनेपदाकर्मकाणाचेति भारद्वाजीयाः । एषां

कर्मकर्त्तरि यक्चिणौ न स्तः। णिः। भूषयते कन्या। कारयते कटः। अचीकरत कटः। ग्रन्थते मेखला। अग्रन्थिष्ट माला। श्रन्थते। अश्रन्थिष्ट मेखला। ब्रूते कथा। विकुरुते पयः स्वयमेव।

(ख) किरादेः सनश्च। किरादेः सन्नन्तस्य च कर्मकर्त्तरि यक्चिणौ न स्तः। विकिरते हस्ती। चिकीर्षते कटः। अचिकीर्षिष्ट कटः स्वयमेव।

९०। कुषिरजोः प्राचां श्यन् परस्मैपदञ्च।

अनयोः कर्मकर्त्तरि प्राचां मतेन श्यन्परस्मैपदे स्याताम्। कुष्यति पादम्। कुष्यति पादः। श्यन्प्श्नोर्नित्य (७।१।८१) मिति नुम्। कुष्यन्ती जङ्घा। रज्यति वस्त्रम्। "स्वयमम्बरज्यदतुषारकरः।"

९१। धातोः।

अधिकारोऽयमा तृतीयाध्यायपरिसमाप्तेः। धातोः कृत्तिङौ विधेयाः।

९२। तत्रोपपदं सप्तमीस्थम्।

अत्र धात्वधिकारे (३।१।९१) सप्तमीनिर्दिष्टमुपपदसंज्ञं स्यात्। वक्ष्यति कर्मण्यण् (३।२।१)। सुपि स्थः (३।२।४)।

९३। कृदतिङ्।

तत्र धात्वधिकारे (३।१।९१) तिङोऽन्ये कृत्संज्ञकाः स्युः। तव्यण्वुल्-अजादयः।

९४। वाऽसरूपोऽस्त्रियाम्।

कृत्सु भिन्नरूपोऽपवादो वा बाधकः स्यात्। कर्त्तव्यं कार्य्यं वा। विबोधो विबुधो वा। हसितं हसनं वा। अस्त्रियां किम्? चिकीर्षा। न क्तिन्। असरूपः किम्? गोदः। ग्रर्मदः।

९५। कृत्याः प्राङ् ण्वुलः।

ण्वुलः प्राक् सप्त प्रत्ययाः कृत्यसंज्ञकाः स्युः।

तव्यश्च तव्यतश्चानीयरं केलिमरं तथा ।
यतं ण्यतं क्यपश्चैव सप्त कृत्यान् प्रचक्षते ॥ १ ॥ (16)

९६ । तव्यत्तव्यानीयरः ।

धातोरिमे स्युः । भातव्यम् । भानीयम् । भवितव्यम् । भवनीयम् । वक्तव्यम् । वचनीयम् । इह वास्तव्यस्तद्धितान्तः । तदुक्तं भाष्ये तद्धितो वा पुनरेषः । वास्तुनि भवो वास्तव्य इति ।

(क) केलिमर उपसंख्यानं कर्त्तव्यम् । कर्मकर्त्तर्य्यभिधानम् । पचेलिमा माषाः । छिदेलिमा रज्जुः । कालसामान्ये चामी तव्यदादयः । तथाच भूतेऽपि । कर्म प्रोक्तवन्तः कर्मप्रवचनीयाः । वर्त्तमाने । भवतीति भव्यः ।

९७ । अचो यत् ।

अजन्ताद् यत् स्यात् । लव्यम् । भव्यम् । पव्यम् । पेयम् । गेयम् । देयम् । दित्स्यम् । पुत्रीय्यम् । देदीप्यम् । पुत्रकाम्यम् । गर्भ्यम् । कथं भाव्यमनेनेति ? आवश्यकेऽस्तु (३।१।१२५) ।

(क) तकिशसिचतियतिजनीनाञ्च । तक्यम् । प्रशस्यम् । चत्यम् । यत्यम् । जन्यम् ।

(ख) हनो वा वध च । यत् स्याद् वा वधादेशश्च । वध्यः । पक्षे स्यति घात्यः ।

९८ । पोरदुपधात् ।

पवर्गान्तादुपधाद् यत् स्यात् । ण्यतो बाधा । शप्यम् । जप्यम् । लभ्यम् । आप्यन्तु बाहुल्यात् । अदुपधात् किम् ? गोप्यम् । तपरः किम् ? आप्यम् ।

९९ । शकिसहोश्च ।

अनयोर्यत् स्यात् । शक्यम् । सह्यम् ।

---

(16) यतं ण्यतं क्यपश्चैव केलिमरमनीयरम् ।
तव्यञ्च तव्यतश्चाहुः कृत्यान् सप्त विधान् बुधाः ॥ १ ॥

Occurs in the text of some MSS. while in others, it is given only in the भाषावृत्त्यर्थविवृति, as a stanza composed by the commentator.

१०० । गदमदचरयमश्चानुपसर्गे ।

एभ्योऽप्रादौ यत् स्यात् । गद्यम् । मांद्यन्ते तेन मद्यम् । चर्य्यम् । यम्यम् । कथं नियम्यम् । यत्नोपचर्य्यमिति ? दुष्प्राप्यवत् पश्चात् समासेन ।

(क) चरेराङि चागुरौ । यत् स्यात् । आचर्य्यो धर्म्मः । अगुरौ किम् ? आचार्य्यः । ण्यत् ।

१०१ । अवद्यपण्यवर्य्या गर्ह्यपणितव्यानिरोधेषु ।

एष्वेते निपात्यन्ते । अवद्यं निन्द्यम् । पण्यं विक्रेयम् । वर्य्योऽनिरोध-प्रवृत्तिः । वृतेन वर्य्यः । "सुग्रीवो नाम वर्य्योऽसौ पण्यभ्रातृवधः कपिः ।" वर्य्या पतिंवरेत्येके । (17)

१०२ । वह्यं करणम् ।

वहेः करणे स्यात् । वहन्ति तेन वह्यं शकटम् ।

१०३ । अर्य्यः स्वामिवैश्ययोः ।

अनयोरर्त्तेर्यत् स्यात् । अर्य्यः । अन्यत्र आर्य्यो गन्तव्यो देशः ।

१०४ । उपसर्य्या काल्या प्रजने ।

प्रजने प्रथमगर्भग्रहणे प्राप्तकाला गौरुपसर्य्योच्यते ।

१०५ । अजर्य्यं सङ्गतम् ।

इदमत्र निपात्यते । "तेन सङ्गतमार्य्येण रामाजर्य्यं कुरु द्रुतम्" ।

१०६ । वदः सुपि क्यप् च ।

वदः क्यप् स्यात् सुप्युपपदे । यच्च । "अनृतोद्यं न तत्रास्ति सत्यवद्यं ब्रवीमि ते ।" मत्वर्थीयेऽचि (५।२।१२७) "सत्यवद्यो रघूत्तमः ।" सुपि किम् ? वाद्यम् । अनुपसर्ग इत्येव । प्रवाद्यम् । सुवाद्यम् । कथमनूद्यम् ? अनुपसर्गेणानुना ।

---

(17) अत्र भट्टोजिः ।—"वर्य्येति स्त्रियामेव निपात्यते । अस्त्रियाम् अदेव । वार्य्या ऋत्विज इति वृत्तिकारमतम् । भट्टिस्तु वर्य्याश्वता निर्देशं मन्वानः पुंलिङ्गेऽपि यतं प्रायुङ्क्त । सुग्रीवोनामादयोऽप्येवम् ।"— इति शब्दकौस्तुभः । (p. 897)

१०७ । भुवो भावे ।

भावे भुवः सुपि क्यप् स्यात् । ब्रह्मभूयं ब्रह्मत्वम् ।

१०८ । हनस्त च ।

सुपि हन्तेर्भावे क्यप् स्यात् । तश्चान्तादेशः । ब्रह्महत्या । "मित्रभु गतस्तस्य रिपुहत्यां करिष्यसि ।"

१०९ । एतिस्तुशास्वृदृजुषः क्यप् ।

एभ्यः क्यप् स्यात् । इत्यः । स्तुत्यः । शिष्यः । वृत्यः । आदृत्यः जुष्यः । कथमुपेयम् ? ईङ् गतावित्यस्मात् ।

(क) शंसिदुहिगुहिभ्यो वा क्यप् । शस्यं शंस्यम् । दुह्यं दोह्यम् गुह्यं गोह्यम् ।

(ख) आङ्पूर्वादञ्जेः संज्ञायाम् । क्यप् स्यात् । आज्यं घृतम् ।

११० । ऋदुपधाच्चाक्लृपिचृतेः ।

ऋदुपधात् क्यप् स्यात् । वृत्यम् । नृत्यम् । गृध्यम् । न क्लृपिचृतेः । कल्प्यम् । चर्त्यम् ।

१११ । ई च खनः ।

खनः क्यप् स्यादीकारश्चान्तादेशः । आद्गुणः (६।१।८७) । खेयम् ।

११२ । भृञोऽसंज्ञायाम् ।

क्यप् स्यात् । भृत्यः । संज्ञायां तु भार्य्या ।

(क) समश्च बहुलम् । संभृत्याः । संभार्य्याः ।

११३ । मृजेर्विभाषा ।

मृजेर्वा क्यप् स्यात् । मृज्यो मार्ग्यो वा ।

११४ । राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ।

क्यबन्ता इमे निपात्यन्ते । राजसूयः क्रतुः । सुवति दीप्यते सूर्यः । मृषोद्यतेऽसौ मृषोद्यः । रोचतेऽसौ रुच्यः । गुपेरादिकत्वञ्च । कुप्यं वसु । गोप्यमन्यत् । कृष्टपच्याः शालयः । अव्यथ्या दुर्जनाः ।

११५। भिद्योद्ध्यौ नदे।

एतौ नदविशेषे निपात्येते। भिनत्ति कूलानि भिद्यः। उज्झत्युदकमुद्ध्यः।

११६। पुष्यसिध्यौ नक्षत्रे।

एतौ नक्षत्रभेदे स्याताम्।

११७। विपूयविनीयजित्या मुञ्जकल्कहलिषु।

एष्वेते निपात्यन्ते। विपूयो मुञ्जः। विनीयः कल्कः। जित्यो हलहलं स्यात्।

११८। प्रत्यपिभ्यां ग्रहेश्छन्दसि।

छान्दसम्।

११९। पदास्वैरिबाह्यापक्ष्येषु च।

एष्वर्थेषु ग्रहेः क्यप् स्यात्। प्रगृह्यं पदम्। गृह्यका पक्षेरिवः। ग्रामगृह्या सेना। ग्रामबाह्येत्यर्थः। "गुणगृह्या वचने विपश्चितः"। गुण-पक्ष्या इत्यर्थः।

१२०। विभाषा कृवृषोः।

अनयो र्वा क्यप् स्यात्। कृत्यं कार्य्यं वा। वृष्यं वर्ष्यं वा। पक्षे ण्यत्।

१२१। युग्यञ्च पत्रे।

युग्यं वाहने स्यात्। योग्यमन्यत्।

१२२। अमावस्यदन्यतरस्याम्।

अमापूर्वाद्वसेर्ण्यति वृद्धिर्वा निपात्यते। अमावास्या अमावस्या वा।

१२३। छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्य्यस्तर्य्याध्वर्य्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि।

छान्दसम्।

१२४ । ऋहलोर्ण्यत् ।

ऋवर्णान्ताद्धलन्ताच्च ण्यत् स्यात् । कार्य्यम् । हार्य्यम् । धार्य्यम् । पाक्यम् । वाच्यम् । पाच्यम् । वाक्यम् । वाच्यम् । पाक्यम् । कत्व काव्यम् । वाक्यम् । कथं समस्यमभ्यस्यम् ? तर्हि संज्ञापूर्वकत्वाद् वृद्ध्यभावः । संज्ञापूर्वको विधिरनित्य इति (प, ८४) ।

(क) पाणौ सृजेः । ण्यत् स्यात् । पाणिसर्ग्या रज्जुः ।

(ख) समवपूर्वाच्च । समवसर्ग्यः ।

(ग) दभेश्च । पोरदुपधादित्यस्या-(३।१।९८) पवादो ण्यत् स्यात् । अवदाभ्यम् । दभिः सौत्रो धातुः ।

१२५ । ओरावश्यके ।

उवर्णान्तादावश्यके द्योत्ये ण्यत् स्यात् । लाव्यम् । पाव्यम् । मयूरव्यंसकादित्वात् (२।१।७२) समासः । अवश्यलाव्यम् ।

१२६ । आसुयुवपिरपिलपित्रपिचमश्च ।

एभ्यो ण्यत् स्यात् । आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । अपत्राप्यम् । आचाम्यम् ।

१२७ । आनाय्योऽनित्ये ।

"आनाय्यो दक्षिणाग्नौ स्यात्" ।

१२८ । प्रणाय्योऽसम्मतौ ।

असम्मतिरनिष्टचौरादिस्तत्र प्रणाय्यः स्यात् ।

१२९ । पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ।

पाय्यादयो माङ्नीञ्चिञ्धाञां मानादौ निपात्यन्ते । पाय्यं मानम् । सान्नाय्यं हविः । निकाय्यो निवासः । धाय्या सामिधेनी ।

१३० । क्रतौ कुण्डपाय्यसञ्चाय्यौ ।

एतौ क्रतौ निपात्येते ।

१३१ । अग्नौ परिचाय्योपचाय्यसमूह्याः ।

एतेऽग्नौ निपात्यन्ते । वहेः संप्रसारणदीर्घौ च । समूह्यः ।

१३२ । चित्याग्निचित्ये च ।

एते निपात्येते । चित्योऽग्निः । भावेऽग्निचित्या स्यात् । उक्ताः कृत्य-प्रत्ययाः ।

१३३ । ण्वुल्तृचौ ।

धातोः कर्त्तरि ण्वुल्तृचौ स्याताम् । दायको दाता । अधिष्ठायकोऽधिष्ठाता । वाचको वक्ता । पाचकः पक्ता । कारकः कर्त्ता ।

१३४ । नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।

नन्द्यादेर्ल्युः स्यात् । नन्दनः । मदनः । दमनः । शोभनः । तपनः । दर्पणः । पवनः । रमणः । जनार्दनः । विभीषणः । लवणः । निपातनाण्णत्वम् । ग्रहादेर्णिनिः । ग्राही । परिपन्थी । स्थायी । पचादेरच् । पचः । श्वपचः । वदः । काहदः । मेघः । देवः । श्वेतः । योधः । क्रोधः । सर्पः । स्पर्शः । नर्त्तः । हलधरः । गदाधरः । पयोधरः । यशोधरः । शशिधरः । गङ्गाधरः । जातिस्मरः । लोलुवः । पोपुवः । चचुरः । पचादिराकृतिगणः ।

१३५ । इगुपधज्ञाप्रीकिरः कः ।

एभ्यः कः स्यात् । बुधः । कृशः । हृषः । विपुलः । क्षिपः । मृडः । ज्ञः । प्रियः । उत्किरः ।

१३६ । आतश्चोपसर्गे ।

आदन्तात् प्रादौ कः स्यात् । प्रस्थः । सुस्थः । प्रज्ञः । सुग्लः । सुम्लः ।

१३७ । पाघ्राध्माधेट्दृशः शः ।

एभ्यः शः स्यात् । उत्पिबः । उज्जिघ्रः । "आजिघ्रैः पुष्पगन्धानाम् ।" उद्धमः । उद्धयः । उत्पश्यः । अपादेश्चेति केचित् । पश्यः । जिघ्रः ।

(क) न संज्ञायाम् । व्याघ्रः । अथवा निपातनात् ।

१३८। अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसाति-साहिभ्यश्च ।

एभ्योऽप्रादौ शः स्यात् । लिम्पः । विन्दः । मात्यधारयः । सातिः सौत्रः । सातयः । साहयः ।

(क) गवादिषु विन्देः संज्ञायाम् । गोविन्दः । अरविन्दम् ।

(ख) नौ लिम्पेः । निलिम्पा देवाः ।

१३९। ददातिदधात्योर्विभाषा ।

अप्रादौ दाधाभ्यां णो वा स्यात् । ददः । दायः । दधः । धायः ।

१४०। ज्वलितिकसन्तेभ्यो णः ।

धातोर्ज्वलादेः कसान्ताद्वा णः स्यात् । ज्वालः । ज्वलः । चालः । चलः । रामः । रमः । अनुपसर्गादित्येव । प्रज्वलः । नित्यं पचाद्यच् ।

(क) तनोतेश्च । अवतानः । अवतनः ।

१४१। श्याद्व्यधास्रुसंस्रुतीणवसावहृलिहश्लिषश्वसश्च ।

एभ्यो णः स्यात् । श्यैङ् । अवश्यायः । प्रतिश्यायः । आत् । दायः । धायः । व्यधादेः । व्याधः । आस्रावः । संस्रावः । अत्यायः । अवसायोऽन्तकृत् । अवहारः । लेहः । "दध्नोऽहं मधुनो लेहः" । श्लेषः । श्वसितीति श्वासः । श्याद्ग्रहणं सोपसर्गात् कबाधनार्थम् ।

१४२। दुन्योरनुपसर्गे ।

दुनीञो णः स्यात् । दावः । नायः । उत्तरविभाषयाऽस्यापि शेषत्वादपि दवो नय इत्याहुः । अप्रादौ किम् ? प्रणयः ।

१४३। विभाषा ग्रहः ।

ग्रहो वा णः स्यात् । ग्राहो ग्रहो वा ।

(क) भवतेश्चेति वक्तव्यम् । भवतीति भावो भवो वा ।

१४४। गेहे कः ।

गेहे कर्तरि ग्रहेः कः स्यात् । गृहम् । गृहाः ।

१४५। शिल्पिनि ष्वुन्।

(क) नृतिखनिरञ्जिभ्य एव। शिल्पिनि कर्त्तरि ष्वुन् स्यात्। नर्त्तकी। खनकी। रजकी।

१४६। गस्थकन्।

गायते स्थकन् स्यात्। गाथकः।

१४७। ण्युट् च।

गायतेर्ण्युट् स्यात्। गायनः। चकारात् कारणम्।

१४८। हश्च व्रीहिकालयोः।

हाधातोर्ण्युट् स्यात्। हायनो व्रीहिः। हायनो वत्सरः।

१४९। प्रसृल्वः समभिहारे वुन्।

प्रुसृलूभ्यः समभिहारे वुन् स्यात्। प्रवकः। सरकः। लवकः।

१५०। आशिषि च।

आशीर्गतौ धातो र्वुन् स्यात्। नन्दतात् नन्दकः। जीवताज्जीवकः। भूयाद् भवकः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य भाषावृत्तौ

तृतीयाध्यायस्य प्रथमः पादः ॥३।१॥

समाप्तश्च प्रत्ययपादः।

अथ

भाषावृत्तिः।

तृतीयोऽध्यायः। द्वितीयः पादः।

१। कर्मण्यण्।

कर्ममात्रोपपदाद् धातोरण् स्यात्। कुम्भकारः। नगरकारः। ग्रतु-लावः। वेदाध्यायः। कर्माभिप्रायः। सूत्रधारः। द्वारपालः। विप्रघातः। अश्ववारः। कमण्डलुग्राहः। रिपुघातः।

(क) शीलिकामिभक्ष्याचरिभ्यो णः। एभ्यो णः स्यात्। मांसशीलः। स्त्रियां टाप्। मांसशीला। मांसकामः। मांसकामा। धर्मकामः। धर्मकामा। मांसभक्षः। मांसभक्षा। साध्वाचारः। कल्याणाचारा कन्या।

(ख) ईक्षिक्षमिभ्यां च। आभ्यां णः स्यात्। सुखप्रतीक्षा। बहुक्षमा।

२। ह्वावामश्च।

ह्वेञ्वेञ्माङ्भ्यः कापवादोऽण् स्यात्। स्वर्गह्वायः। तन्तुवायः। "व्योममायमिवोत्थितम्।"

३। आतोऽनुपसर्गे कः।

आदन्तादप्रादौ कः स्यात्। गोदः। धर्मदः। कम्बलदः। सुखदः। धर्मदः। सर्वज्ञः। क्षुपः। अङ्गुलित्रः। पार्ष्णित्रः। अनुपसर्गे किम्? गोसन्दायः। वडवासन्दायः।

४। सुपि स्थः।

सुपीति योगविभागादादन्तात् सुप्युपपदे कः स्यात्। द्विपः। पादपः। कच्छपः। सुस्थः। दुःस्थः। अस्थः। विषमस्थः। मध्यस्थः। ततः स्थः। तिष्ठतेः सुपि कः स्यात्। भावेऽभिधानम्। आखूत्थं वर्त्तते। अतःपरं कर्मणि सुपीति यथासम्भवमनुवर्त्तते।

५ । तुन्दशोकयोः परिमृजापनुदोः ।

अनयोराभ्यां कः स्यात् । तुन्दपरिमृजोऽलस एव । शोकापनुदः प्रिय एवोच्यते ।

(क) कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् । कः स्यात् । मूलविभुजो रथः । नखमुचं धनुः । प्रियाख्यो ब्राह्मणः । कपो बिभर्त्ति कक्ष्रम् । महीध्रः । शतघ्नो नरः । मखुघ्नः । प्रलम्बघ्नः । कुमुदम् । सरोरुहम् । त्रयो दीव्यन्त्यस्मिं-स्त्रिदिवः स्वर्गः । आकृतिगणोऽयम् ।

६ । प्रे दाज्ञः ।

७ । समि ख्यः ।

प्रदाप्रज्ञासंख्याभ्योऽणपवादः कः स्यात् । विद्याप्रदः । पथिप्रज्ञः । गोसंख्यः ।

८ । गापो ष्टक् ।

गापाभ्यां कापवादष्टक् स्यात् । सामगः । सामगी । अनुपसर्गे एव । सामप्रगायः ।

(क) सुराशीध्वोः पिबतेरिति वक्तव्यम् । सुरापः । शीधुपः । सुरापी । शीधुपी ।

९ । हरतेरनुद्यमनेऽच् ।

हृञोऽनुत्क्षेपणेऽच् स्यात् । अंशहरः । मनोहरः । पित्तहरं क्षीरम् । वाक्यहरा दूती । उत्क्षेपणे तु भारहारः ।

१० । वयसि च ।

वयसि गम्यमाने हृञोऽच् स्यात् । अस्थिहरः श्वा । कवचहरः कुमारः ।

११ । आङि ताच्छील्ये ।

आङि हृञोऽच् स्यात् । पुष्पाहरः । फलाहरः । सुखाहरः । तच्छील इत्यर्थः ।

१२। अर्हः।

अर्हतेरणपवादोऽच् स्यात्। पूजार्हः पण्डितः। पूजार्हा ब्राह्मणी। कार्य्यार्हा ब्राह्मणी।

(क) शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेः। एषु ग्रहेरच् स्यात्। शक्तिग्रहः। लाङ्गलग्रहः। धनुर्ग्रहः।

(ख) सूत्रे चावधार्य्यर्थे। (18) ग्रहेरच् स्यात्। सूत्रमर्थतोऽवधारयति सूत्रग्रहः प्राज्ञः। सूत्रग्राहोऽन्यत्र।

१३। स्तम्बकर्णयो रमिजपोः।

रमिजपिभ्यां स्तम्बकर्णोपपदाभ्यामच् स्यात्। हस्तिसूचकयोरभिधानम्। स्तम्बेरमो हस्ती। कर्णेजपः खलः।

१४। शमि धातोः संज्ञायाम्।

शम्युपपदे धातुमात्रादच् स्यात्। शङ्करः शिवः। शंवरो दैत्यः। शंवदः कोऽपि।

१५। अधिकरणे शेतेः।

आधारोपपदाच्छीङोऽच् स्यात्। खेशयः। गुहाशयः।

(क) पार्श्वादिषूपसंख्यानम्। एषु शीङोऽच् स्यात्। पार्श्वाभ्यां शेते पार्श्वशयः। उरःशयः।

(ख) उत्तानादिषु कर्त्तृषु। उत्तानः शेते उत्तानशयः। अवमूर्द्धशयः।

(ग) दिग्धसहपूर्वाच्च। दिग्धसहशयः। गिरिशशब्दस्तु लोमादिश-प्रत्ययान्तो भाषायां साधुः (19)।

---

(18) The real वार्त्तिक as taken up in the महाभाष्य is सूत्रे च धार्य्यर्थे and it is attached to 3. 2. 9. So चावधार्य्यर्थे is another instance of differently reading the महाभाष्य।

(19) एवञ्च प्रत्याहृताक्षो गिरिशप्रभावादिति। आरोपितं यद् गिरिशेन पश्चादिति। गिरिशमुपचचार प्रत्यहं सा सुकेशीत्यादिप्रयोगः समाधेयः।

१६। चरेष्टः।

आधारोपपदाच्चरेष्टः स्यात्। कुरुचरः। वनेचरः। रात्रिचरः रात्रिञ्चरः। खेचरः। खेचरी। नक्तञ्चरी। कथं सहचरीति? (20) चिन्त्यम्।

१७। भिक्षासेनादायेषु च।

एषु चरेष्टः स्यात्। भिक्षाचरः। सेनाचरः। आदायचरः (21)। ल्यबन्तं ग्राह्यमित्यर्थः।

१८। पुरोऽग्रतोऽग्रेषु सर्त्तेः।

एषु सर्त्तेष्टः स्यात्। पुरःसरः। अग्रतःसरः। अग्रे सरतीति अग्रेसरः। अग्रेसरी। कथं पुरःसरा वाचः? व्युत्पत्त्यन्तरेण। पचाद्यच्। (22)

१९। पूर्व्वे कर्त्तरि।

सर्त्तेष्टः स्यात्। पूर्वःसरतीति पूर्वसरः।

२०। कृञो हेतुताच्छील्यानुलोम्येषु।

हेत्वादौ गम्ये कृञोऽण्विषये टः स्यात्। "दारिद्र्यं पुरुषस्य विक्लवकरम्"। पुष्टिकरं मांसम्। ताच्छील्ये। व्यसनकरः। दयाकरः। आशाकरः। तापकरः। आनुलोम्ये। प्रीतिकरः। "पितुर्वाक्यकरं रामम्"। हेत्वादौ किम्? भाष्यकारः।

२१। दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबह्वान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु।

दिवादौ षड्विंशतौ यथायोगं सुपि कर्मणि चोपपदे कृञोऽहेत्वादौ टः स्यात्। दिवाकरः। विभाकरः। प्रभाकरः। भास्करः। "देवापदामादिकरो

(20) प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहमिति रघुकाव्ये। पचादिषु पठितस्य चरडित्यस्य सुप्सुपेति समासे सहचरीति।

(21) स्थितम् वनेचराश्चापाल्यमादायचरो वन इति भट्टिः।

(22) पूर्वं तदवसरनर्वितः पश्चात्सारमिति कालिदासप्रयोगस्तु पाक्षिकादित्याहुः।

य एषः"। किंकरः। कारकरः। संख्याकरः। संख्येत्यर्थग्रहणमित्येके। एककरः। द्विकरः। चतुष्करः। अहस्करः। अरुष्करः।

(क) किंयत्तद्बहुष्वज्विधानं टाबर्थमिति कात्यायनः। किंकरा। यत्करा। तत्करा। बहुकरा। सूत्रकारस्य मते त्वजादिपाठाद् टाप्। (23)

२२। कर्मणि भृतौ।

कर्मशब्दोपपदात् कृञो भृतौ टः स्यात्। कर्मकरो भृत्यः। कर्मकरी। भृतौ किम्? कर्मकारः।

२३। न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु।

नवस्वेषु कृञो हेत्वादौ टो न स्यात्। "शब्दकारः पपात खम्"। श्लोककारः। एवं यावत् पदकारः।

२४। स्तम्बशकृतोरिन्।

अनयोः कृञ इन् स्यात्। स्तम्बकरिः। शकृत्करिः। व्रीहिवत्सयोरेवाभिधानम्।

२५। हरतेर्दृतिनाथयोः पशौ।

पशौ कर्त्तरि दृतौ नाथे चोपपदे हृञ इन् स्यात्। दृतिहरिः श्वा। नाथहरिः सिंहः। (24)

२६। फलेग्रहिरात्मम्भरिश्च।

इवन्तौ निपात्येते। चकारात् कुक्षिम्भरिः।

२७। छन्दसि वनसनरक्षिमथाम्।

छान्दसम्।

२८। एजेः खश्।

खन्तादेजेरण्विषये खश् स्यात्। अङ्गमेजयः। जनमेजयः। मनुमेजयः। श्वासमेजयः।

---

(23) अतःपरं क्वचित् पुस्तके हेत्वादौ तु किंकरीत्यधिकः पाठः।

(24) दृतिश्चर्मपुटे मत्स्य इति मेदिनी। नाथं वृषपतिं भूषणं नाथं प्रभुं हरतीति केचित्। नाथो नासारज्जुरिति महोक्तिः। नाथं चर्मनवद्ध्यपिशीय हत्पाथावबर्धके।

(ख) वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यश्च । वातादिष्वजादिभ्यः खश् स्यात् । वातमजो मृगः । शुनिन्धयः पापः । तिलन्तुदः काकः । शर्धञ्जहा मृगाः ।

२९ । नासिकास्तनयोर्ध्माधेटोः ।

३० । नाडीमुष्ट्योश्च ।

(वा) घटीखारीवातेषु च । एषूपपदेषु ध्माधेटोः खश् स्यात् । नासिकन्धमः । नासिकन्धयः । खित्यनव्ययस्येति (६।३।६६) ह्रस्वः । स्तने धेट एवेति स्मृतिः । स्तनन्धयो बालः । "नाडिन्धमाग् मार्गान्" । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयो बालः । घटिन्धमः । घटिन्धयः । खारिन्धमः । खारिन्धयः । वातन्धमः । वातन्धयः ।

३१ । उदि कूले रुजिवहोः ।

अनयोः खश् स्यात् । कूलमुद्रुजो गजः । कूलमुद्वहा नदी ।

३२ । वहाभ्रे लिहः ।

वहेऽभ्रे च लिहः खश् स्यात् । वहंलिहो गौः । अभ्रंलिह स्तरुः ।

३३ । परिमाणे पचः ।

खश् स्यात् । प्रस्थम्पचा स्थाली । "पान्तावस्थम्पचान् मुनीन् !" "तापोऽसः प्रस्तम्पचः" ।

३४ । मितनखे च ।

अनयोः पचेः खश् स्यात् । मितम्पचः ब्राह्मणः । नखम्पचा यवागूः ।

३५ । विध्वरुषो स्तुदः ।

अनयोस्तुदः खश् स्यात् । विधुन्तुदो राहुः । अरुन्तुदः पीडाकृत् ।

३६ । असूर्यललाटयो र्दृशितपोः ।

असूर्ये दृशो ललाटे तपः खश् स्यात् । असूर्यम्पश्या राजदाराः । ललाटन्तपः सूर्यः ।

३७ । उग्रम्पश्येरम्मदपाणिन्धमाश्च ।

अमी निपात्यन्ते । "उग्रम्पश्येन सुग्रीवस्तेन भ्राता निराकृतः ।" मेघज्योतिरिरम्मदः । पाणिन्धमाः पाचकाः ।

३८ । प्रियवशे वदः खच् ।

अनयोर्वदः खच् स्यात् । प्रियंवदः । वशंवदोऽनुकूलः ।

३९ । द्विषत्परयोस्तापेः ।

अनयोस्तापेः खच् स्यात् । द्विषन्तपः । परन्तपः । खचि ह्रस्वः (६।४।९४) । लिङ्गविशिष्टे नेष्टम् । द्विषतीतापः ।

४० । वाचि यमो व्रते ।

व्रतविषये वाचि यमः खच् स्यात् । वाचंयमो मुनिः । व्रते किम् ? वाग्यामः ।

४१ । पूःसर्वयो र्दारिसहोः ।

पुरि दारेः सर्वे सहेः खच् स्यात् । पुरन्दरः । सर्वंसहः । सर्वंसहा भूमिः । भगे च दारेः । भगन्दरो रोगः ।

४२ । सर्वकूलाभ्रकरीषेषु कषः ।

कषेरेषु खच् स्यात् । सर्वङ्कषः खलः । कूलङ्कषा नदी । अभ्रङ्कषो गिरिः । करीषङ्कषा वात्या ।

४३ । मेघर्त्तिभयेषु कृञः ।

एषु कृञः खच् स्यात् । मेघङ्करो वातः । ऋतिंकरः । भयङ्करः ।

४४ । क्षेमप्रियमद्रेऽण् च ।

एषु कृञः खच् स्यात् । अण् च । क्षेमङ्करः क्षेमकारो वा । प्रियङ्करः प्रियकारो वा । मद्रंकरो मद्रकारो वा । कथं क्षेमङ्करीति ? चिन्त्यम् । (25)

४५ । आशिते भुवः करणभावयोः ।

आङ्पूर्वादश्नातेः कर्त्तरि निष्ठान्ते आशितशब्द उपपदे भवतेः खच् स्यात् ।

(25) अत्र नागेशः—"क्षेमंकरीत्यत्र भी रादित्वात् (४।१।४१) ङीष्" इति (शब्देन्दुशेखरे)।

चाग्नितेन त्वमेन भूयतेऽनेनेत्याग्नितश्चव मोदनः। भावे। "फलैर्येऽग्ना-ग्नितश्चवम्।"

४६। संज्ञायां भृतृवृजिधारिसहितपिदमः।

एभ्योऽष्टभ्यः कर्मणि सुपि च नाम्नि खच् स्यात्। विश्वम्भरो विष्णुः। रथन्तरं साम। पतिंवरा कन्या। शत्रुञ्जयो राजा। धनञ्जयोऽर्जुनः। वसुन्धरा पृथ्वी। सर्वंसहा भूः। उष्णन्तपः सूर्यः। बलिन्दमः कृष्णः।

४७। गमश्च।

गमेः सुपि खच् स्यात् संज्ञायामसंज्ञायाञ्च। हृदयङ्गममेतत् त्वां ब्रवीमीति भट्टिः। मातापितृपूर्वङ्गमः। प्लवङ्गमः। सुतङ्गमः। भुजङ्गमः।

(क) विहायसो विह च। विहङ्गमः खगः। विहगविहङ्गादयस्तु संज्ञाशब्दात्त्रिकाण्डपाठात् साधवः सुरः।

४८। अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः।

एषु गमे र्डः स्यात्। अन्तगः। अत्यन्तगः। अध्वगः।

(क) अन्येष्वपि दृश्यते। अन्यत्र सुप्युपपदे गमे र्डः स्यात्। सर्व्वत्रगः। स्वागारगः। खे गच्छतीति खगः। प्लवेन गच्छतीति प्लवगः।

(ख) उरसो लोपश्च। उरसा गच्छतीति उरगः।

(ग) सुदुरोरधिकरणे। सुगः। दुर्गः।

(घ) निरो देशे। निर्गो देशः। पद्भ्यां न गच्छतीति पन्नगः सर्पः। पृषोदरादिः (६।३।१०९)।

४९। चाशिषि हनः।

चाशिषि हन्ते र्डः स्यात्। शत्रुं वध्यात्त्वतुहः। दस्युहः। चाशिषि किम्? शत्रुघातः। इह दार्वाघाटश्चार्वाघाटो वर्णसंघात इति कर्मण्यषि (३।२।१) पृषोदरादिप्रपञ्च (६।३।१०९) एव।

५०। अपे क्लेशतमसोः।

क्लेशे तमसि चापपूर्वात्तेर्डः स्यात्। क्लेशापहः पुत्रः। तमोपहः सूर्यः।

५१ । कुमारशीर्षयोर्णिनिः ।

अनयोर्हन्तेर्णिनिः स्यात् । कुमारघाती । शीर्षघाती । निपातनाच्छिरसः शीर्षभावः ।

५२ । लक्षणे जायापत्योष्टक् ।

जायापत्योः हन्तेष्टक् स्याल्लक्षणवति कर्त्तरि । जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । "पतिघ्नीलक्षणोपेतां मन्येऽहं वालिनः स्त्रियम् ।"

५३ । अमनुष्यकर्त्तृके च ।

अमनुष्यकर्त्तृकाद्धन्तेष्टक् स्यात् । श्लेष्मघ्नं मधु । पित्तघ्नं घीरम् ।

५४ । शक्तौ हस्तिकपाटयोः ।

अनयोः हन्तेष्टक् स्यात् । "युधि हस्तिघ्नः" । कपाटघ्नश्चौरः । शक्तौ किम् ? हस्तिघातो विषप्रदः ।

५५ । पाणिघताड़घौ शिल्पिनि ।

एतौ शिल्पिनि निपात्येते ।

(क) उपसंख्यानाच्च राजघ स्तौश्यः ।

५६ । आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ।

आढ्यादिषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् स्यात् । अनाढ्यमाढ्यमनेन कुर्वन्त्याढ्यङ्करणो मन्त्रः । सुभगङ्करणं दानम् । स्थूलंकरणं घृतम् । पलितंकरणी जरा । नग्नङ्करणं द्यूतम् । अन्धंकरणो मूत्रनिरोधः । अच्वावित्युत्तरार्थम् । इह तु ख्युना मुक्ते ल्युटा भाव्यम् । आढ्यीकरणो रसविधिः । स्थूलीकरणमौषधम् । तदुक्तं भाष्ये ख्युनि चिप्रतिषेधानर्थक्यम् । ल्युट्ख्युनोरविशेषादिति ।

५७ । कर्त्तरि भुवः खिष्णुच्खुकञौ ।

आढ्यादिषु भवतेः खिष्णुच्खुकञौ स्यातां कर्त्तरि । अनाढ्य आढ्यो भवति "आढ्यम्भविष्णुर्यशसा कुमारः ।" आढ्यम्भावुकः । प्रियम्भविष्णुः

प्रियवशावुकः। अवावित्येव। आढ्यीभविता। अतः परं सकर्मकेभ्योऽपि सुपि विधिः। न कर्मण्येव।

५८। स्पृशोऽनुदके क्विन्।

स्पृशेः सुपि क्विन् स्यात्। व्योमस्पृक्। मर्मस्पृक्। मन्त्रेण स्पृशति मन्त्र-स्पृक्। घृतस्पृक्। छत्रस्पृक्। अग्निस्पृक्। जलादिस्पृक्। क्विन्प्रत्ययस्य कुः (८।२।६२)। अनुदके किम्? उदकस्पर्शो विप्रः।

५६। ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च।

क्विन्प्रत्ययान्ता ऋत्विगादयो निपात्यन्ते। ऋतौ यजतीति ऋत्विक्। धृषेर्द्वित्वञ्च। दधृक् धृष्टः। सृजिदृशोः कर्मणि क्विन्। सृजन्ति तामिति स्रक्। दिशन्ति तामिति दिक्। उत् स्निहेस्तलोपश्च षत्वञ्च। उष्णिक्। अञ्चेः सुपि क्विन्। प्राङ् प्राञ्चौ। न्यङ् न्यञ्चौ। अध्यङ्। सध्र्यङ्। देवद्र्यङ्। प्राक्प्रत्यगादयस्त्वस्तातिप्रत्ययान्ताः। युजेः केवलात्। युङ्। युञ्जौ। क्रुञ्चेश्च। क्रुङ्। क्रुञ्चौ। औपधत्वान्नलोपाभावः।

६०। त्यदादिषु दृशोऽनालोचने कञ् च।

त्यदादावुपपदे दृशेः कञ् स्यात्। चकारात् क्विंश्च। त्यच्छब्दश्छान्दसः। स इव दृश्यते तादृशः। तादृक्। तादृशी। यादृशः। यादृक्। यादृशी। कीदृक्। कीदृशः। त्वादृक्। त्वादृशः। भवादृक्। भावादृशः। अनालोचने किम्? तं पश्यतीति तद्दर्शः।

(वा) समानान्ययोश्चेति वक्तव्यम्। समानमात्मानं पश्यतीति सदृशः। सदृशी। सदृक्। अन्यादृशः। अन्यादृक्। अन्यादृशी। सदृक्षस्तु छान्दसः।

६१। सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुप-सर्गेऽपि क्विप्।

सदादेरप्रादौ प्रादौ च सुपि क्विप् स्यात्। गिरौ सीदति गिरिसत्। प्रसत्। प्रसूः। "अप्रदत्तं पुनर्हन्तुम्।" प्रद्विट्। मित्रद्विट्। मित्रध्रुक्। गोधुक्। अश्वयुक्। मन्त्रवित्। प्रवित्। काष्ठभित्। रज्जुच्छित्। शत्रुजित्।

प्रणीः। सेनानीः। सम्मार्गनीः। "सायन्तनीं तिथिप्रण्यः।" राजृ सम्राट्। स्वाराट्। कुवराट्। "पतिते पतङ्गमृगराजि।"

६२। भजो ण्विः।

सुपि प्रादौ च भजो ण्विः स्यात्। अर्द्धभाक्। प्रभाक्।

इह छन्दःपञ्चसूत्री। (26) विट्।

६८। अदोऽनन्ने।

अदो विट् स्यात्। सस्यमत्ति सस्यात्। मत्स्यात्। "वाणं प्राणादमक्षिपत्।" अनन्ने किम्? अन्नादः। कथं कणादः? वासरूपविधिना (३।१।९४)।

६९। क्रव्ये च।

क्रव्यशब्दे चोपपदेऽदो विट् स्यात्। क्रव्यमत्ति क्रव्यात्। अदोऽनन्न इत्येव (३।२।६८) सिद्धे क्रव्यग्रहणं वासरूपे-(३।१।९४) नाण्निवृत्त्यर्थमिति भाष्यम्।

७०। दुहः कब् घश्च।

दुहेः कप् स्याद् घश्चान्तादेशः। कामदुघः कल्पतरुः। अत्र छन्दश्चतुःसूत्री। (27)

७४। आतो मनिन्क्वनिब्वनिपश्च।

आकारान्तेभ्यो धातुभ्यो विच्मनिन्क्वनिब्वनिपश्च प्रत्ययाः स्युः। शुभंयाः। कीलालपाः। मनिन्। सुत्रामा (28)। अश्वत्थामा। पृषोदरादित्वात् (६।३।१०९)। सुदामा।

---

(26) The author omits here the following five aphorisms :—

६३। छन्दसि सहः। ६४। वहश्च। ६५। कव्यपुरीषपुरीष्येषु ञ्युट्। ६६। हव्येऽनन्तःपादम्। ६७। जनसनखनक्रमगमो विट्।

(27) Of these four vedic Sutras, the last one is applicable, according to many, also to the secular Sanskrit. So it is given in the text as well.

७१। मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्। ७२। अवे यजः। ७३। विजुपे छन्दसि। ७४। आतो मनिन्क्वनिब्वनिपश्च।

(28) सुत्रामेति दीर्घपाठे अन्येषामपि दृश्यत इति (६।३।१३७) दीर्घः।

७५। अन्येभ्योऽपि दृश्यन्ते।

सुशर्म्मा। देवशर्म्मा। क्वनिप्। धीवा। पीवेति आप्यायमपीत्येके। तथाच क्विब्विच्मनिन्क्वनिब्वनिप इति चान्द्रसूत्रम्। नेत्यन्ये। यदा वनिप् तदा धावा। पावा। अवावा। (29)

७६। क्विप् च।

धातोर्य्यथाविधानं क्विप् स्यात्। उखास्रत्। पर्णध्वत्। प्रयुक्। धृजी-भ्रज्जादृक्।

७७। स्थः क च।

तिष्ठतेः सुपि कः स्यात् क्विप् च। शंस्थः। शंस्थाः (30)। शमिधातो (३।२।१४) रित्यजबाधनार्थं वचनम्।

७८। सुप्यजातौ णिनिस्ताच्छील्ये।

सुपि धातोर्णिनिः स्यात्। उष्णभोजी। शीतभोजी। मधुभाषी। दृढसेवी। नित्यजागरी। आत्मानं न श्रावयतीत्यश्रावी क्विबादिप्रत्ययः। अजातौ किम्? वृषाणां नेता।

(क) साधुकारिणि च। साधुकारिणि कर्त्तरि धातो र्णिनिः स्यात्। अताच्छील्येऽपि। साधुकारी। साधुदायी। तुरङ्गगामी। तुरङ्गयायी।

(ख) ब्रह्मणि वदः। णिनिः स्यात्। ब्रह्मवादी। ब्रह्मवाद इति तु न भवति। अनभिधानात्।

७९। कर्त्तर्युपमाने।

अत्र धातोर्णिनिः स्यात्। हंस इव गच्छति हंसगामी। सिंहनर्दी।

८०। व्रते।

णिनिः स्यात्। स्थण्डिलशायी। वनवर्त्ती।

---

(29) धेट् पानार्थे। अवावा अपनीता चौर इति यावत्।

(30) कथमत्र क्विपि घुमास्थागापाजहातिसां हलीति (६।४।६६) नेत्वम्? "स्थानिवदादेशोऽनल्‌-विधाविति (१।१।५६) निषेधात्। प्रत्ययलोप इति (१।१।६२) सूत्रन्तु नियमार्थमिति सिद्धान्तादिति भट्टोजिः। ईत्वमकारादाविति वचनाद् भाष्यकारवचनप्रामाण्याद्वा प्रत्ययलक्षणप्रवृत्त्यभाव इति वीवटः।

८१। बहुलमाभीक्ष्ण्ये।

आभीक्ष्ण्यगतौ णिनिः स्यात्। पुनः पुनर्मधु पिबन्ति मधुपायिनो भ्रमराः। कषायपायिणः।

८२। मनः।

मन्यते णिनिः स्यात्। दर्शनीयमानी भार्य्यायाः। रिपुमानी (31) भ्रातुः।

८३। आत्ममाने खश्च।

आत्ममानगतौ मन्यतेः खश् स्यात्। णिनिश्च। शूरमात्मानं मन्यते शूरम्मन्यः शूरमानी (31)। साधुम्मन्यः साधुमानी।

८४। भूते।

अधिकारोऽयं प्राग् वर्त्तमानात् (३।२।१२३)।

८५। करणे यजः।

करणोपपदाद् यजते णिनिः स्यात्। हविर्याजी। अग्निष्टोमयाजी। राजसूययाजी।

८६। कर्म्मणि हनः।

कर्म्मोपपदाद्धन्ते णिनिः स्यात्। पितृव्यघाती। अन्यासक्तघाती। निन्दायामभिधानम्। अन्यत्र चौरं हतवान्।

८७। ब्रह्मभ्रूणवृत्रेषु क्विप्।

एषु हनः क्विप् स्यात्। ब्रह्महा। "ब्रह्मघ्नां पापसम्मतः।" भ्रूणहा। वृत्रहा। अन्येभ्योऽपीति (३।२।१७८) क्विपि सिद्धे हन्तेः क्विब्वचनं ब्रह्मादिष्वेवेति नियमार्थमिति भाष्यम्। भूते च नियमात्। कालसामान्यविवक्षायां हिमहा। वीरहा। तमोहा। तमोपहा।

---

(31) रिपुमानी शूरमन्यः शूरमानीत्यत्र हरिनाम वारिनाम इत्यादिवत् णत्वम्। रषाभ्यामित्यत्र (८।४।१ समानपद इत्यखण्डपद इत्यर्थात्। समासे तु पदद्वयाश्रितत्वान्न समानपदत्वम्। अतएवाह्नाभ्यां नर्द्दं संज्ञायामिति वार्त्तिकारम्भः। तेनाक्षणी वांनधी वांनधाय इत्यादिसिद्धिः। अन्यथा समानपदत्वे णत्वा रषाभ्यामित्येव (८।४।१) णत्वं सिध्यति। किं वार्त्तिकेन ?

८८। बहुलञ्छन्दसि।

छन्दः सूत्रमेवम्।

८९। सुकर्मपापमन्त्रपुण्येषु कृञः।

एषु कृञः क्विप् स्यात्। सुकृत्। कर्मकृत्। पापकृत्। पुण्यकृत्। मन्त्रकृत्।

९०। सोमे सुञः।

क्विप् स्यात्। सोमसुत्।

९१। अग्नौ चेः।

क्विप् स्यात्। अग्निचित्।

९२। कर्मण्यग्न्याख्यायाम्।

कर्मोपपदाच्चिञः क्विप् स्यादग्न्याख्या चेत्। श्येन इव चीयते चितश्चेष्यते वा श्येनचित्। रथचक्रचित्। आख्याग्रहणं रूढ़िप्रसिद्ध्यर्थम्।

९३। कर्मणीनि विक्रियः।

कर्मणि विक्रीणातेरिनिः स्यात्। पुनः कर्मग्रहणं कुत्सार्थम्। तैलविक्रयी। मांसविक्रयी विप्रः।

९४। दृशेः क्वनिप्।

कर्मणि दृशेः क्वनिप् स्यात्। मेरुं दृष्टवान् मेरुदृश्वा। परलोकदृश्वा। बहुदृश्वा। पारदृश्वा।

९५। राजनि युधिकृञः।

९६। सहे च।

राजनि सहे च युधिकृञ्भ्यां क्वनिप् स्यात्। राजानं योधितवान् राजयुध्वा। "राजकृत्वा पिता न ते।" "सहयुध्वानमन्येन"। सहकृत्वा।

९७। सप्तम्यां जने र्डः।

सप्तम्यन्तोपपदाज्जने र्डः स्यात्। उपसरजः। "ये प्रोक्ता अतनैर्द्विजैः।" मन्दुरजः।

९८ । पञ्चम्यामजातौ ।

पञ्चम्यां जनेर्डः स्यात् । बुद्धेर्जातो बुद्धिजः । कौशल्याजो रामः । अजातौ किम् ? अश्वाज् जातः ।

९९ । उपसर्गे च संज्ञायाम् ।

संज्ञा चेत् प्रादौ जनेर्डः स्यात् । प्रजा सर्व्वलोकः ।

१०० । अनौ कर्मणि ।

कर्मोपपदादनुजनेर्डः स्यात् । पुमनुजः । रामानुजः । आत्मानुजः ।

१०१ । अन्येष्वपि दृश्यते ।

अन्येषूपपदेषु जनेर्डः स्यात् । अजः । द्विजः । केन जातः किञ्जः । सहजः । जातौ च । ब्राह्मणजो धर्मः । प्रादावसंज्ञायाञ्च । अभिजाः केशाः । अधिजः । प्रथमे जातः प्रथमजः । अनावकर्मणि च । अनुजः । अपि-शब्दादन्येभ्योऽपि धातुभ्यो डः । आखा । परिखा । वरानाहन्ति वराहः । अवरापहः । कटाहः । दूरापहः । प्रज्ञः । कञ्जः । गिरिशः । एवञ्च गमे र्डविधावन्येष्वपीति (३।२।४७) यदुक्तं तदस्यैव प्रपञ्चः ।

१०२ । निष्ठा ।

धातोर्भूते क्तक्तवतू स्याताम् । ज्ञातः ज्ञातवान् ।

(क) आदिकर्मणि निष्ठा वक्तव्या । प्रकृतः कटं चैत्रः ।

१०३ । सुयजोर्ङ्वनिप् ।

सुञो यजेश्च ङ्वनिप् स्यात् । सुत्वा सुत्वानौ । यज्वा यज्वानौ । "यज्वभिः सम्भृतं हव्यम् ।"

१०४ । जीर्य्यतेरतृन् ।

स्यात् । जरन् । जरन्तौ । जरन्तः ।

१०५ । छन्दसि लिट् ।

१०६ । लिटः कानज् वा ।

१०७। क्वसुश्च।

लिटः क्वसुर्वेति वयमधिक्रियते। शेषश्छान्दसः। न्यासकारस्तु कानच्क्वसोः कित्करणाद् भाषायामपि प्रयोगमिच्छति (32)। चिञ् चिक्यानः। पॄ निपपुराणः। स्था तस्थिवान्। "पदमातस्थुषा त्वया।" पा पपिवान्। तॄ तितीर्वान्।

१०८। भाषायां सदवसश्रुवः।

सदादेर्भाषायां लिटः क्वसुर्वा स्यात्। उपसेदिवान्। उपसेदुषा। ऊषिवान्। "ऊषुषां परदारेषु।" शुश्रुवान्। पक्षे लुङ्लङ्लिटो विज्ञेयाः।

१०९। उपेयिवाननाश्वाननूचानश्च।

एते लिटि निपात्यन्ते। इणः क्वसुरिट् च। उपेयिवान्। अश्नातेर्नञि। अनाश्वान्। "धृतजयधृतिरनाश्वः"। अनुवचेः कर्त्तरि कानच्। "अनूचानः (33) प्रवचने"। सूत्रे लिङ्गवचनमतन्त्रमिति। "उपेयुषामपि दिवम्।" (34) वेत्यनुवृत्त्या पक्षे लुङ्लङ्लिटो विज्ञेयाः।

११०। लुङ्।

भूतार्थाद्धातोर्लुङ् स्यात्। अकार्षीत्। अनैषीत्।

१११। अनद्यतने लङ्।

अद्यतनवर्जिते भूते काले धातो लंङ् स्यात्। अकरोत्। अपचत्।

(क) परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः।

अरुणद् यवनः साकेतमित्यादिकस्तु प्रपञ्चः। नापूर्वलक्षणम्। परोक्षेऽप्यनद्यतनमात्रविवक्षायां सिद्धेः। दर्शनाविषयेऽपि। तर्ह्यहन् कंसं किल विष्णुरिति स्यादिति चेत्? बाढम्। भवतु। का ते हानिः? तथाहि

---

(32) कित्करणस्य प्रयोजनाभावात्तदिदं भाष्यविरुद्धं भाषायां सदवसेति (३।२।१०८) सूत्रविरुद्धं चेत्याहुः।

(33) इदमूचुरनूचानाः प्रीतिकण्टकितत्वच इति कुमारसम्भवं। उपेयिवाननूचानैर्निन्दितस्य चलाम्नीति भट्टिकाव्यं च। अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः इत्यमरः।

(34) उपेत्यर्थोऽयम्। अविवक्षित मध्यममिति यावत्। तेन ईयिवान्। समीयिवान्। प्रपेदे पूजित इह कश्चित् दण्डकारण्यमीयिवानिति भट्टिः।

वास्तवेऽपि भूतानद्यतनपरोक्षे विवक्षाभेदेन भट्टिप्रयोगाः—अभून्नृपः। व्यभिपद्याक्रन्दम्। सुग्रीवं प्रोचे सन्नावमागत इत्यादयः (35)।

११२। अभिज्ञावचने लृट्।

११३। न यदि।

स्मृतिवाचिन्युपपदेऽनद्यतने भूते लृट् स्यात्। स्मरसि पुण्ड्र्यां वत्स्यामः। "सम्भविष्याव एकस्यामभिजानासि मातरि"। यच्छब्दयोगे तु नायं लृट्। लङेव। अभिजानासि यन्नागविन्ध्येऽतिष्ठाम। "अवसाम नगेन्द्रेषु यत्"।

११४। विभाषा साकाङ्क्षे।

साकाङ्क्षे प्रयोक्तरि लृडयं वा स्यात्। तत् स्मरसि यत्रानकसत्रं गमिष्यामस्तत्र घृतेनौदनं भोक्ष्यामहे। पक्षे अगच्छामाभुञ्ज्महि वा।

११५। परोक्षे लिट्।

भूतानद्यतनपरोक्षे लिट् स्यात्। जगाम। चकार। पपाच।

(क) अत्यन्तापह्नवे च। भूतमात्रे लिट्। कपित्थ्यां नगर्यां दृष्टोऽसि मया। नाहं कपित्थीञ्जगाम।

११६। हशश्वतोर्लङ् च।

अनयोर्योगे लङ्लिटौ वा स्याताम्। इतिहाकरोत्। शश्वदकरोत्। पक्षे इतिह चकार।

११७। प्रश्ने चासन्नकाले।

अत्र लिडर्थे लङ्लिटौ स्याताम्। पृच्छामि त्वामगच्छज्जगाम वा चैत्रः। आसन्नकाले किम्? "जहार सीतां पौलस्त्यः"। पञ्चवर्षाभ्यन्तरमासन्नकालः।

---

(35) परोक्षे लिट् (३।२।११५) अनद्यतने लङ् (३।२।१११) भूते (३।२।११०) लुङिति कालविशिष्टे लिडादीनां व्यवस्था तु विशेषविवक्षयेत्याहुः। अन्यथा कथमुपाददे तस्य सहस्ररश्मिस्त्वष्टा नवं निर्मितमातपत्रमिति मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषातामिति तमभ्यगच्छत् प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च पश्चादिति कालिदासादिप्रयोगेष्वेककालिककर्मणोऽभिधाने तेषां युगपत् प्रयोगः? अतएवाह कैयटः—"विशेषविवक्षाभावात् सामान्येनैव युक्ता विवक्षा। सत्स्वपि विशेषेषु सामान्यमाश्रित्य लुङादिप्रयोग उपपद्यत एव। विशेषविवक्षायान्तु लङादिप्रयोग इति न कश्चिद्दोष" इति।

११८ । लट् स्मे ।

११९ । अपरोक्षे च ।

स्मयुक्ताद्धातोर्भूतानद्यतनेऽपरोक्षे परोक्षे च लट् स्यात् । अधीते स्म । विहरति स्म ।

१२० । ननौ पृष्टप्रतिवचने ।

१२१ । नन्वोर्विभाषा ।

धातोर्ननुयुक्ताद् भूतमात्रे लट् स्यात् प्रश्नादुत्तरश्चेत् । अकार्षीः कटं देवदत्त ? ननु करोमि भोः । नन्वोस्तु योगे वा । न करोमि नाकार्षं वा । नु करोमि न्वकार्षं वा ।

१२२ । पुरि लुङ् चास्मे ।

भूतानद्यतने पुरायुक्ताद् धातोर्लुङ् लट् च वा स्यात् । अवात्सुरिह पुरा छात्राः । वसन्तीह पुरा मृगाः । "पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः" । विभाषेत्येव । अवसन् पुरा । ऊषुः पुरा । अस्मे किम् ? पुरा वसन्ति स्म । उक्तं भूते ।

१२३ । वर्त्तमाने लट् ।

प्रारब्धापरिसमाप्तिर्वर्त्तमानकालः । तत्र धातो र्लट् स्यात् । भवति । अत्ति । अस्ति । जुहोति । तनुते । रुणद्धि । चोरयति । चिकीर्षति । इहापि प्रारब्धापरिसमाप्तिरस्त्येवेति । तिष्ठन्ति गिरयः । स्रवन्ति नद्यः । जयत्युपेन्द्रः । वर्त्तमानाधिकारः प्राग् भविष्यतः (३।३।३) ।

१२४ । लटः शतृशानचावप्रथमासमानाधिकरणे ।

एतौ लटः स्थाने स्याताम् । विभाषेति वर्त्तते मण्डूकप्लुत्या । सा च व्यवस्थितविभाषेति भाष्यस्थितिः । पचन् विप्रः पचति विप्रः । सन् अस्ति । अधीयानः अधीते । व्यवस्थितविभाषात्वात् क्वचिन्नित्यम् । कुर्वतः । पाचतः । स्थास्येऽहम् । कुर्वद्भक्तिः । पचमानभक्तिः । भक्ष्यमाणत्वाद् भक्तिः । पचमानतरः । भवद्रूपः । कुर्वद्रूपः । पचत्कल्पः । लसद्विलच्छेदः । घूर्णमानप्रदीपः ।

ज्ञविव । पचतितराम् । जल्पतिकल्पम् । अप्रथमासमानाधिकरणे किम् ? अत्र नित्यं तौ स्याताम् । पचन्तं पचमानं पश्य । पचता पचमानेन कृतम् ।

१२५ । सम्बोधने च ।

अत्र नित्यं तौ स्याताम् । हे कुर्वन् । हे कुर्वाण ।

१२६ । लक्षणहेत्वोः क्रियायाः ।

क्रियायाश्चिह्नजनकाद्धातो स्तौ स्याताम् । तिष्ठन् मूत्रयति गौः । शयानो भुङ्क्ते । हेतौ । अर्जयन्वसते । सेव्यमानो विलसति । याच्यमानः प्रसीदति । क्रियायाः किम् ? यः कम्पते सोऽश्वत्थः ।

(क) माड्याक्रोशे । माङि धातोस्तौ स्याताम् । मा जीवन् । मा पचमानः । "मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति" ।

१२७ । तौ सत् ।

तौ शतृशानचौ सदित्युच्येते । लृटः सद्वेत्यादौ कार्य्यम् (३।३।१४) ।

१२८ । पूङ्यजोः शानन् ।

लट इति निवृत्तम् । आभ्यां शानन् स्यात् । सोमं पवमानः । यजमानः ।

१२९ । ताच्छील्यवयोवचनशक्तिषु चानश् ।

एषु गम्येषु धातोश्चानश् स्यात् । वनं पर्य्यटमानः । आत्मानं वर्णयमानः । भूषयमाणः । जीवमानः । लसमानः । स्फुरमाणः । "दीव्यमानं शितान् बाणान् ।" व्यसमानः । वधूं मण्डयमानः । वयसि । स्त्रियं गच्छमानः । शिखण्डं वहमानः । शक्तौ । हस्तिनं निघ्नानः ।

१३० । इङ्धार्य्योः शत्रकृच्छ्रिणि ।

अकृच्छ्रिणि कर्त्तरि इङ्धारिभ्यां शतृ स्यात् । अधीयन् सकलं शास्त्रम् । "धारयन् मस्करिव्रतम् ।" कृच्छ्रिणि तु कर्त्तरि कष्टेनाधीते ।

१३१ । द्विषोऽमित्रे ।

द्विषः शत्रौ वाच्ये शतृ स्यात् । द्विषन् । द्विषती ।

१३२ । सुञो यज्ञसंयोगे ।

सुञोऽत्र शतृ स्यात् । सुन्वन्तो यजमाना एव ।

१३३ । अर्हः प्रशंसायाम् ।

अर्हतेः स्तुतौ शतृ स्यात् । अर्हन् पूजां मुनिः । नेह । वधमर्हति ।

१३४ । आ क्वे स्तच्छीलतद्धर्मतत्साधुकारिषु ।

क्विपं यावत् (३।२।१७७) तच्छीलादौ प्रत्ययो वाच्यः कर्त्तरि ।

१३५ । तृन् ।

धातो स्तृन् स्यात् । शीले । विवदं वदिता । आचारे । स्वार्थं कर्त्ता । आसनं दाता । वधूं मुण्डयितारः (36) । साधौ । हर्त्ता मनः । गन्ता खेटम् । होतृपोत्रादय स्तृजादौ ।

१३६ । अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतो(त्पदो)न्मद-रुच्यपत्रपवृतुवृधुसहचर इष्णुच् ।

एभ्यो द्वादशभ्यो धातुभ्य इष्णुच् स्यात् । कन्यामलंकरिष्णुः । निरा-करिष्णुः शत्रून् । एवं यावच्चरिष्णुः । भुवश्चेति (३।२।१३८) चकाराद् भ्राजिष्णुरित्येके ।

१३७ । णेश्छन्दसि ।

छान्दसम् ।

१३८ । भुवश्च ।

इष्णुच् स्यात् । भविष्णुः ।

१३९ । ग्लाजिस्थश्च क्स्नुः ।

एभ्यः क्स्नुः स्यात् । ग्लास्नुः । जिष्णुः । चकाराद् भूष्णुः । तिष्ठतेरीत्वं (१।४।६६) नेष्यते । स्थास्नुः ।

---

(36) मर्च्छयितार इति क्वचित् पाठान्तरम् ।

१४० । त्रसिगृधिधृषिक्षिपेः क्नुः ।

एभ्यः क्नुः स्यात् । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः । (37)

१४१ । शमित्यष्टाभ्यो घिनुण् ।

शमादिभ्यो (38) घिनुण् स्यात् । शमी ।

"भ्रमी कदम्बसम्भिन्नः पवनः शमिनामपि ।"
क्लमित्वं कुरुतेऽत्यर्थं मेघशीकरशीतलः ॥"

तमी । दमी । श्रमी । क्षमी । मादी । अकर्मकेभ्योऽभिधानादेव । वनं भ्रमिता ।

१४२ । संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ।

एभ्यः सप्तविंशतेर्घिनुण् स्यात् । सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । "संसर्गी सरितां नृपः ।" परिदेवी । संज्वारी । "परिक्षेप्यम्बुसान्ततुः ।" परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । निपातनादनुनासिकलोपः । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती । चकारादश्वायी ।

१४३ । वौ कषलसकत्थस्रम्भः ।

विपूर्वात् कषादेर्घिनुण् स्यात् । कष हिंसायाम् । विकाषी । विलासी । विकत्थी । विस्रम्भी ।

१४४ । अपे च लषः ।

अपे वौ च लषे र्घिनुण् स्यात् । अपलाषी । विलाषी । लष कान्तौ ।

---

(37) क्षिप्नुशब्दस्यापि णत्वे नतर्धेषमग्नामिनीति शब्दे यथा। क्षुभ्नादिषु (८।४।३९) इत्योविधानसामर्थ्यात् णकारपरत्वं न चलमित्येके। अन्ये तु रम्पादिवदरष रषाभ्यां समानपदे (८।४।१) इत्यनभावाच्छिन्नाङः। एतच पूर्वं न चोमेति (२।१।६९) सूत्रोदाहरणप्रसङ्गेन उक्तम्।

(38) शमिदमितमिदमितिरेव नजित्येतिः शमिः क्षमिः। इत्येते अष्टिया आर्चनटी शमादयः कृताः॥ १॥

१४५। प्रे लपसृद्रुमथवदवसः।

प्रपूर्वाल्लपादिषट्काद् घिनुण् स्यात्। प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी।

१४६। निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्।

निन्दादिदशकाद् वुञ् स्यात्। निन्दकः। हिंसकः। क्लेशकः। खादकः। विनाशकः। परिक्षेपकः। परिराटकः। परिवादकः। व्याभाषकः। असूयकः।

१४७। देविक्रुशोश्चोपसर्गे।

आभ्यां वुञ् स्यात्। आदेवकः। परिक्रोशकः। प्रादौ किम्? देवयिता। क्रोष्टा।

१४८। चलनशब्दार्थादकर्मकाद् युच्।

अकर्मकेभ्यश्चलनशब्दार्थेभ्यो युच् स्यात्। चलनः। चेष्टनः। वेपनः। कम्पनः। शब्दनः। रवणः। अकर्मकात् किम्? पठिता स्तोत्रम्।

१४९। अनुदात्तेतश्च हलादेः।

युच् स्यात्। वर्त्तनः। वर्द्धनः। द्योतनः। जुगुप्सनः। मीमांसनः। अनुदात्तेतः किम्? हन्। भविता। हलादेः किम्। एधिता। अकर्मकादित्येव। वसिता वस्त्रम्। कथ "मुक्ताफलावर्द्धनैः शुभ्र"मिति (39)? नायं षष्ठीसमासः। किं तर्हि? तृतीयासमासः।

१५०। जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः।

ज्वादिदशकाद् युच् स्यात्। जवनः। चङ्क्रमणः। दन्द्रमणः। सरणः। गर्धनः। ज्वलनः। शोचनः। लषणः। पतनः। पदनः।

१५१। क्रुधमण्डार्थेभ्यश्च।

कोपभूषार्थेभ्यो युच् स्यात्। क्रोधनः। कोपनः। रोषणः। मण्डनः। भूषणः। प्रसाधनम्।

---

(39) अथोपमर्देऽन्यतम् मीनानां चेष्टैः क्षुब्धैः। मुक्ताफलावर्द्धनैः शुभ्रं रत्नैरम्बरं तत मिति भट्टिप्रयोगिदम्।

१५२ । न यः ।

यकारान्तात् युज् न स्यात् । आप्यायिता । स्फायिता । क्ष्मायिता । क्नूयिता ।

१५३ । सूददीपदीक्षश्च ।

एभ्यो नास्ति युच् । सूदिता । दीपिता । दीक्षिता । मधुसूदनादयो नन्द्यादित्वात् (३।१।१३४) ।

१५४ । लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ।

लषादिभ्यस्तच्छीलादिषु कर्तृषु उकञ् स्यात् । अभिलाषुकः । पातुकः । उपपादुकः । स्थायुकः । भावुकः । वर्षुकः । घातुकः । कामुकः । गामुकः । शारुकः ।

१५५ । जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।

एभ्यः षाकन् स्यात् । जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । षित्वात् ङीष् । जल्पाकी । वराकी ।

१५६ । प्रजोरिनिः ।

सौत्रात् प्रजोरिनिः स्यात् । प्रजवी ।

१५७ । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ।

एभ्य इनिः स्यात् । जयी । आदरी । क्षयी । विश्रयी । अत्ययी । वमी । "पापमव्यथिनं कपिम् ।" अभ्यमी । भुवनपरिभवी । प्रसवी ।

१५८ । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।

स्पृहादिभ्य आलुच् स्यात् । स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तत्पूर्वस्य द्राते स्तन्द्रा निपात्यते । तन्द्रालुः । "श्रद्धालुर्मधुपानस्य" ।

(क) आलुचि शीङ्ग्रहणं कर्त्तव्यम् । शयालुः । कथं शीतालुः ? शीतोष्णतृप्रेभ्यस्तन्न सहत इति (५।२।१२२, वा) तद्धितो भविष्यति ।

१५९ । दाधेट्सिशदसदो रुः ।

दादिभ्यो रुः स्यात् । दारुर्दानशीलः । धारुः । सेरुः । शद्रुः । सद्रुः ।

१६० । सृघस्यदः क्मरच् ।

एभ्यः क्मरच् स्यात् । सृमरः । घस्मरः । अद्मरः ।

१६१ । भञ्जभासमिदो घुरच् ।

एभ्यो घुरच् स्यात् । भञ्जेः कर्मकर्त्र्यभिधानम् । स्वयं भङ्गुरं काष्ठम् । कथमनङ्गं मानभङ्गुर मिति भामहः (40) ? तर्हि चिन्त्यम् । भासुरम् । मेदुरः पशुः ।

१६२ । विदिभिदिच्छिदेः कुरच् ।

एभ्यः कुरच् स्यात् । विदुरो ज्ञाता । भिदिच्छिद्योः कर्मकर्त्र्यभिधान-मित्याहुः । (41) स्वयं भिदुरं काष्ठम् । छिदुरा रज्जुः । कथं गुरुमत्सरच्छिदु-रयेति माघः ? करीन्द्रदर्पच्छिदुरं मृगेन्द्रमिति जाम्बवतीविजयकाव्ये पाणिनिः (42) ? संसारबन्धच्छिदुरान् द्विजातीनिति व्योषः ? तदेतच् चिन्त्यम् ।

१६३ । इण्नश्जिसर्त्तिभ्यः क्वरप् ।

एभ्यः क्वरप् स्यात् । इत्वरी । नश्वरी । जित्वरी । विसृत्वरी । अकर्म-काद्विधिः ।

---

(40) "मदो जनयति प्रीतिं सानङ्गं मानभङ्गुरम् । स प्रियासङ्गमोत्कण्ठां सासह्यां मनसः शुच"-मिति भामहपद्यम् ॥ १ ॥

(41) भञ्जेर्घुरच् भिदिच्छिदिभ्यां कुरच कर्मकर्तरीति जयादित्यः । एतच्च भाष्यानुक्तम् । एवं च माघे प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयादुरयाचितमङ्गना इति पद्ये कर्तरि प्रयोगः । अपि च करीन्द्रदर्पच्छिदुरं मृगेन्द्रमिति रसनाथा इत्वं विदुरमभिधानमध्वरमित्यादिः कर्तरि प्रयोगः । वस्तुतस्तु कर्तरि कृदिति (३।४।६७) कर्तृकृताः प्रत्ययः यथासम्भवं कर्मकर्तर्यपि भवति । तत्रापि कर्तृत्वात् । एवञ्च स सुन्ध-कान्तासमसङ्गभङ्गुरैरिति माघप्रयोगः । संसरन्ति न च्छिदुरोऽपि हार इति रघुकाव्ये ।

(42) In quoting from the जाम्बवतीविजयकाव्य, पुरुषोत्तम appears to have set much value on the tradition that it had पाणिनि as its author. This is evident from this and the quotation given in 2. 4. 74 by him. The writer of the जाम्बवती-विजयकाव्य was indeed too clever and lucky. He had easily succeeded in palming his book off under the name of the sage. Hence some undue regard was paid to it by a few writers of the classical period.

१६४ । गत्वरश्च ।

निपात्यते ।

१६५ । जागरूकः ।

जागर्तेरूकः स्यात् । जागरूकः ।

१६६ । यजजपदशां यङः ।

एभ्यो यङन्तेभ्य ऊकः स्यात् । यायजूकः । जञ्जपूकः । दन्दशूकः । वावदूकस्तूणादौ ।

१६७ । नमिकम्पिस्म्यजसकमहिंसदीपो रः ।

एभ्यः सप्तभ्यो रः स्यात् । नम्रः । कम्प्रः । स्मेरः । जसु प्रयत्ने । न जसतीत्यजस्रा प्रवृत्तिः । यस्त्वजस्रं भुङ्क्ते इति क्रियाविशेषणं सोऽव्ययमन्य एव नित्यपर्यायः । कर्तृवाचिनोऽस्य क्रियाविशेषणत्वानुपपत्तेः (43)। कम्रः । हिंस्रः । दीप्रः ।

१६८ । सनाशंसभिक्ष उः ।

सनन्तादुः स्यात् । आशंसेर्भिक्षेश्च । चिकीर्षुः । पिपठिषुः । "आत्मनः क्षेममाशंसुः" । भिक्षुः ।

१६९ । विन्दुरिच्छुः ।

इयं निपात्यते । विन्दुर्ज्ञाता । इच्छुः प्रसादम् । कथमल्पार्थे विन्दुः ? विदि अवयवे । औणादिकउः ।

१७० । क्याच्छन्दसि ।

१७१ । आदृगमहनजनः किकिनौ लिट् च ।

(क) भाषायां धाञ्कृसृजनिगमिनमिभ्यः । एभ्यो भाषायां किकिनौ स्याताम् । लिट्वच्चैव । दधिः । चक्रिः । सस्रिः । जज्ञिः । जग्मिः । नेमिः ।

(ख) सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वाच्यौ । सासहि-

(43) [illegible] नञ्पूर्वो [illegible] क्रियासातत्ये वर्तते [illegible] । [illegible] ।

यङन्तात् किकिनौ स्याताम्। वैलोप्यभावं सासहिः। वावहिः। चाचलिः। पापतिः। नीम् (७।४।८४) नेष्टः।

१७२। स्वपितृषोर्नजिङ्।

(क) धृषेश्च।

एभ्यो नजिङ् स्यात्। स्वप्नक्। स्वप्नजौ। तृष्णक्। तृष्णजौ। धृष्णक्। धृष्णजौ।

१७३। शॄवन्द्योरारुः।

आभ्यामारुः स्यात्। शरारुः। वन्दारुः।

१७४। भियः क्रुक्लुकनौ।

(क) क्रुकन्नपि।

भियः क्रुक्लुकन्क्रुकनः स्युः। भीरुः। भीलुकः। भीरुकः।

१७५। स्थेशभासपिसकसो वरच्।

एभ्यः पञ्चभ्यो वरच् स्यात्। स्थावरः। ईश्वरः। भास्वरः। पिसृ गतौ। पेस्वरः। कस गतौ। विकस्वरः। कथमीश्वरी ? औणादिको वरट्। (44)

१७६। यश्च यङः।

यङन्ताद् याते र्वरच् स्यात्। यायावरोऽनिश्चयः।

१७७। भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।

भ्राजाद्यष्टकात् तच्छीलादौ क्विप् स्यात्। विभ्राजत इति विभ्राट्। विभ्राजौ। भाः भासौ। धूः धुरौ। विद्युत् विद्युतौ। ऊर्क् ऊर्जौ। पूः पुरौ। जवतेर्दीर्घश्च। जूः जुवौ। ग्रावस्तुत्। ग्रावस्तुतौ। पचेः पक्।

१७८। अन्येभ्योऽपि दृश्यते।

क्विप् स्यात्। लोकवित्। भित्। लोकच्छित्। दृशिग्रहणाद् दीर्घा-

---

(44) कथमीश्वरि विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्येति देवीमाहात्म्ये। ईश्वरीति औणादिको वरडित्युक्तेः। वरटित्त्वात् ङीप्। पुंयोगादाख्यायाम् (४।१।४८) इति ङीष् प्राप्ते। अन्येभ्योऽपि दृश्यन्त इति (३।३।७५) क्वनिप्। वनो र चेति (४।१।७) ङीब्रौ प्राप्ते। वरचि तु टाप्। तथापि विश्वजनहृद-यद्योतिनीत्वा इति भारतम्।

दिवश्च । वाक् । शब्दप्राट् । परौ व्रजेः षश्च पदान्ते (उण्, २।२१७) । परिव्राट् । आयतं स्तौति आयतस्तूः । कटप्रूः । श्रिञ् श्रीः । श्रियौ । ध्यायतेर्दधाते र्वा धीरिति भाष्यम् । गतं ताच्छीलिकैः ।

१७९ । भुवः संज्ञान्तरयोः ।

संज्ञायां भुवः क्विप् स्यात् । पुनर्भूः । स्वयम्भूः ब्रह्मा । आत्मभूः । अङ्गभूः । अन्तरे च । प्रतिभूरन्तरस्थः ।

१८० । विप्रसंभ्यो ड्वसंज्ञायाम् ।

भुवो विप्रसम्पूर्वाड् डुः स्यादसंज्ञायाम् । विभुः । प्रभुः । सम्भुः । संज्ञायां तु विभूर्नाम कश्चित् सम्भविता ।

(वा) मितद्र्वादिभ्य उपसंख्यानम् । मितद्रुः । शतद्रुः । शपां स्नातीति शपास्नुः । सञ्ज्ञास्नुः । शं प्राप्नोतीति शम्भुः शिवः ।

१८१ । धः कर्मणि ष्ट्रन् ।

धेटो धाञो वा ष्ट्रन् स्यात् । धयति दधाति वा तामिति धात्री । आमलक्याः स्तनदायिन्या वा संज्ञा (45) ।

१८२ । दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ।

एभ्यस्त्रयोदशभ्यः करणे ष्ट्रन् स्यात् । दान्ति तेन दात्रम् । नेत्रम् । "सुमन्त्रनेत्रेव रथेन शोचन्" । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नध्री । सूत्रे दशेति निरनुनासिकनिपातनान्नुमटि दशनम् (46) । ष्ट्रनि तु दंष्ट्रेति । षजादि-पाठात् टाबित्युक्तम् ।

१८३ । हलसूकरयोः पुवः ।

पुवः करणे ष्ट्रन् स्यात् । पोत्रम् । हलस्य सूकरस्य वा मुखम् ।

---

(45) धात्री जनन्यामलकीवसुमत्युपमातृष्विति विश्वः । (46) करण इत्येव । भावे ल्युटि तु दंशनम् ।

१८४। अर्त्तिलूधूसूखनसहचर इत्रः।

एभ्य इत्रः स्यात् करणे। अरित्रं नौकावाहनम्। रिपुलवित्रो बाणः। धवित्रं व्यजनम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्।

१८५। पुवः संज्ञायाम्।

पुव इत्रः स्यात् संज्ञा चेत्। पवित्रं कुशम्। (47)

१८६। कर्त्तरि चर्षिदेवतयोः।

कर्त्तरि करणे च पुव इत्रः स्यात्। ऋषिः पवित्रम् (48)। अग्निः पवित्रम्।

१८७। ञीतः क्तः।

ञीतो धातोर्वर्त्तमाने क्तः स्यात्। मिन्नः। क्ष्विण्णः।

१८८। मतिबुद्धिपूजार्थेभ्यश्च।

इच्छाज्ञानपूजार्थेभ्यो वर्त्तमाने क्तः स्यात्। राज्ञां मतः। राजभिर्मन्यत इत्यर्थः। वासरूपेण (३।१।९४) लडपि भवति। क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीत्यत्र (प, ६८) ल्युट्साहचर्य्यात् नपुंसकक्ते वासरूपविध्यभावः। एवं राज्ञामिष्टः। राज्ञां बुद्धः। राज्ञां ज्ञातः। "न ज्ञातं तात यत्नस्य पौर्वापर्य्यममुष्य ते।" एवं सतां विदितोऽवगतः। इह वर्त्तमानक्तेन भूतक्तस्य बाधनमिष्यते। तेन त्वया ज्ञातो मयार्चित इत्याद्यचिकित्स्यमिति भागवृत्तिः। (49)

---

(47) अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणमित्यमरः। कात्यायनश्च—"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"॥ इति।

(48) ऋषिर्वेदमन्त्रः पावमान्यादिः। तथाचोक्तम्पिदंर्शनादिति।

(49) तेनेत्यधिकारे (४।३।११२) उपज्ञाते इति (४।३।११५) सूचितत्वात्, ज्ञापकात्, ज्ञानार्थेभ्यो भूतेऽपि क्तः। नतु इच्छापूजार्थेभ्यः। अतः पूजितो यः सुरासुरैरित्यादयोऽपभ्रंशा इति भर्तृहरिहरदत्तादयः। ज्ञापकं सामान्यापेक्षमिति त्वनुन्यासकारमैत्रेयादयः। एषां मते तु संवत्सरं कथं तात वसामोऽविदिताः परैरिति भारते विराटपर्वणि, जनैरविदितविभवो भवानीपतिरिति भारवेः, जनाविदितैर्भवबन्धमोक्षैरिति माघस्य, अथ स रामसहितः श्रुतवानिति भट्टेः, राज्ञा हिमवतः सारो विज्ञातोऽस्य हिमाद्रिणेति कालिदासस्य, अनुमानपिता वीरैरवदिष्टं यमनीरवादिति दण्डिनश्च प्रयोगे न काप्यनुपपत्तिः।

पूजार्थात् सतामर्चितः । सुराणां पूजितः । सताम् पूजितः । चकारस्यानुक्तसमुच्चयार्थत्वाच्छीलितरक्षितक्षान्तव्याहृतदयितस्निग्धतुष्टश्रान्तहृष्टादिसिद्धिः ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

तृतीयाध्यायस्य द्वितीयः पादः ॥३।२॥

समाप्तश्च कर्मविपादः ॥

अथ

भाषावृत्तिः ।

तृतीयोऽध्यायः । तृतीयः पादः ।

१ । उणादयो बहुलम् ।

वर्त्तमाने संज्ञायामुणादयः प्रत्यया बहुलं साधवः स्युः । उण् । कारुः । वायुः । एनुः । करेणुः । पालज् । पातालम् । चलच् । मङ्गलम् ।

२ । भूतेऽपि दृश्यन्ते ।

भूतार्थेऽप्युणादयः साधवः स्युः । वृत्तं वर्त्म । भसितं भस्म । उक्तो वर्त्तमानः ।

३ । भविष्यति गम्यादयः ।

गम्यादयः षड् भविष्यदर्थे साधवः स्युः । ग्रामं गमी । आगामी । ग्रामगामी । प्रतियोगी । प्रस्थायी । प्रतिबोधी । भावी । भविष्यदधिकारः प्राग् घञः (३।३।१६) ।

४ । यावत्पुरानिपातयो र्लट् ।

यावत्पुरानिपातयो र्योगे भविष्यति लट् स्यात् । यावद् भुङ्क्ते । "न गच्छामि पुरा लङ्काम्" । निपातयोः किम् ? यावद् भोक्ष्यते तावद् दास्यति ।

५ । विभाषा कदाकर्ह्योः ।

भविष्यदर्थे कदाकर्हियोगे लट् वा स्यात् । "कदा भवति मे प्रीतिः" ? कर्हि भवति मे धनम् ? पक्षे लुट्लृटौ ।

६ । किंवृत्ते लिप्सायाम् ।

किंवृत्तयोगे लिप्सायां लट् वा स्यात् । कस्मै भिक्षां ददाति ? कस्मै

भोजयति ? हस्तग्रहणं डतरडतमार्थम् । कतरो भिक्षां ददाति ? कतमो भोजयति । पक्षे लुङ्लृटौ ।

७ । लिप्स्यमानसिद्धौ च ।

अभीष्टादर्थस्य सिद्धौ गम्यमानायां लङ् वा स्यात् । यो दध्योदनं ददाति स स्वर्गं गच्छति । पक्षे लुङ्लृटौ ।

८ । लोडर्थलक्षणे च ।

प्रैषादिलक्षणार्थाद् धातो लँड् वा स्यात् । उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा अथ त्वं छन्दोऽधीष्व ।

९ । लिङ् चोर्ध्वमौहूर्त्तिके ।

ऊर्ध्वमौहूर्त्तिके भविष्यति लोडर्थलक्षणार्थाद् धातोर्लिङ् लट् च स्याद्वा । मुहूर्त्तस्योपरि गुरुश्चेदागच्छति आगच्छेदागमिष्यति आगन्ता वा अथ त्वं छन्दोऽधीष्व ।

१० । तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् ।

धातो स्तुमुण्ण्वुलौ स्यातां क्रियार्था चेत् क्रियोपपदं स्यात् । ओदनं भोक्तुं व्रजति । ओदनं भोजको व्रजति । भोजनार्था व्रजतिक्रियात्रोपपदम् (50) ।

---

(50) अत्र भाषावृत्त्यर्थविवृतौ सृष्टिधरः—"समानकर्त्तृकेषु तुमुन्निष्यते । अयं तु भिन्नकर्त्तृकेऽपि स्यादिति मस्करिणो वस्तुं कुटीं घटयति । गच्छो सुतेन भोक्तुं मांसं क्रीणातीति ।"—whether a verb formed with तुमुन् must have the same subject as agrees with the principal verb of the sentence, is a disputed point. There are altogether five Rules in the अष्टाध्यायी for the provision of तुमुन्, viz :—(1) तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् (3.3.10) (2) समानकर्त्तृकेषु तुमुन् (3.3.158) (3) कालसमयवेलासु तुमुन् (3.3.167) (4) शकधृषज्ञाग्लाघटर—भलभक्रमसहार्हास्त्यर्थेषु तुमुन् (3.4.65) (5) पर्याप्तिवचनेष्वलमर्थेषु (3.4.66). Of these the last three do not obviously require the condition of समानकर्त्तृकता । The second rule is under the restriction of इच्छार्थेषु and it means इच्छार्थेषु धातुषु समानकर्त्तृकेषूपपदेषु धातो स्तुमुन् स्यात् । यथा इच्छति वाञ्छति काङ्क्षति वष्टि कामयते अभिलषति वा भोक्तुम् । समानकर्त्तृकेषु किम् ? देवदत्तं भुक्तामिच्छति यज्ञदत्तः । So some assert that in the case where the main root does not imply इच्छा, तुमुन् is admissible with its subject being other than that of the main verb. Hence अश्वकर्मं कर्तुं भवन्तमहं ब्रूवे is the statement

११। भाववचनाश्च।

भावार्थाश्च घञादयस्तुमुन्विषये स्युः। लाभाय स्थितः। भूतये धावति।

१२। अण् कर्मणि च।

तुमुनर्थे कर्मोपपदादण् स्यात्। यवलावो व्रजति। गोदायो व्रजति।

१३। लृट् शेषे च।

तुमुनर्थे लृट् स्यात्। नटं द्रक्ष्यामीति व्रजति। शेषे भविष्यन्मात्रे च। करिष्यति। पठिष्यति।

१४। लृटः सद्वा।

लृटः स्थाने शतृशानचौ वा स्याताम्। करिष्यति करिष्यते। करिष्यन् करिष्यमाणः।

१५। अनद्यतने लुट्।

भविष्यदनद्यतने लुट् स्यात्। श्वः कर्त्ता। परश्वो भोक्ता। इह त्वियं

---

given for अभिलाप in a वरण ceremony by अनिरुद्धभट्ट। कालिदास has रेवां यदि प्रेक्षितु मस्ति कामः and यद्यर्थिता निर्हृतवाच्यशल्यान् प्राणान् मया धारयितुं चिरं वः। भट्टि gives मुक्ता विस्फूर्जथुप्रख्यं निनादं परिदेविनी। मत्वा कष्टश्रितं रामं सौमित्रिं गन्तुमैच्छत्। In the मुद्राराक्षस is न कोऽपि निर्गन्तुं प्रवेष्टुं वानुमोद्यते (act v). सुषेणकविराज in his commentary on the कातन्त्र grammar says :—कर्त्तुं वा कश्चिदन्नार्थयति वसुमतीं दक्षिणं समतनुमित्यादि प्रयोगात् कर्तृभेदेऽपि तुमो वाच्यत्वमिति निर्णीयते। On the other hand रघुनन्दन (the स्मार्तभट्टाचार्य of Bengal) considered the समानकर्तृकत्व condition of तुमुन् as absolutely binding and changed the form of the statement as quoted above, sanctioned by अनिरुद्धभट्ट, to अमुकामंकरणाय भवन्तमहं वृणे। भट्टोजि, his grandson हरिदीक्षित and नागेश the pupil of हरिदीक्षित, all decide also for the समानकर्तृकत्व system of तुमुन्. Says भट्टोजि "तुमुन्ण्वुलाविति (3. 3. 10) विधिरपि भिन्नकर्तृकेषु नेष्यते। पुत्रं भोजयितुमागच्छतीति वक्तव्ये पुत्रेण भोक्तुमित्यप्रयोगात्। सेयं व्यवस्था शब्दशक्तिस्वाभाव्याद् वहुलग्रहणाद्वा सिद्धा" (प्रौढमनोरमा). If so, why then समानकर्तृकेषु is applied only in 3. 3. 158 or given there at all ? हरि and नागेश explain it thus "समानकर्तृकेष्विति स्पष्टार्थमेवेति भावः।" So those who accept the समानकर्तृकत्व state of तुमुन् as binding, supply some suitable words to account for such applications as अमुकामं कर्त्तुं भवन्तमहं वृणे, e. g. अमुकामं कर्त्तुं क्षमं भवन्तमिति।

नु यदा गत्वा येवं पादौ निदधातीत्यद्यतनेऽपि कालविप्रकर्षादुपमानेनानद्यतन-
मलमारोप्य लुङिति भाषवृत्तिः। उक्तं भविष्यति।

१६। पदरुजविशस्पृशो घञ्।

एभ्यो घञ् स्यात्। पद्यते गच्छतीति पादः। रोगः। वेशः। स्पृशेरुप-
तापेऽभिधानम्। स्पर्शः। अन्यत्र तु पचाद्यचि कम्बलस्पर्शः। स्परे भेदः।

१७। सृ स्थिरे।

सर्त्तेः स्थिरे कर्त्तरि घञ् स्यात्। सारो मज्जा। चन्दनसारः।
कार्य्यसारः।

(क) व्याधिमत्स्यबलेष्विति वक्तव्यम्। अतीसारो व्याधिभेदः। विसारो
मत्स्यः। सारो बलम्।

१८। भावे।

भावे घञ् स्यात्। पाकः। रोगः।

१९। अकर्त्तरि च कारके संज्ञायाम्।

कर्मादावकर्त्तरि कारके घञ् स्यात् संज्ञायाम्। प्रास्यत इति प्रासः।
प्रसेवः। आहरन्त्यस्मादित्याहारः। संज्ञाग्रहणं प्रायिकम्। तेनेहापि स्यात्।
दायो दत्तः। लाभो लब्धः। अकर्त्तरि किम्? मिषतीति मेषः। पचा-
द्यच्। स्परे भेदः। इह दारजारौ कर्त्तरीति न वक्तव्यम्। दीर्य्यन्ते ते
दाराः। जीर्य्यते तेन जार इति करणे सिद्धिरिति स्मृतिः। अतःपरं
भावेऽकर्त्तरि च कारके विधानम्। तत्र तावदेरच् (३।३।५६) ऋदोरप्
(३।३।५७) बाधकं वक्ष्यमाह। तद्यथा।

२०। परिमाणाख्यायां सर्वेभ्यः।

धातुमात्राद् घञ् स्यात् परिमाणाख्या चेत्। एकस्तण्डुलनिचायः।
द्वौ शूर्पनिष्पावौ। कथं तिङोऽष्टादश प्रत्यया? पञ्चोपप्लवाः? "नैकोऽपि
तव निश्चयः" इति? पदसंस्कारपक्षे भविष्यति।

२१। ग्रहश्च।

ग्रहो घञ् स्यात्। अध्यायः। उपाध्यायः।

(क) स्त्रियां वा ङीष्वचनम्। उपाध्यायी उपाध्याया वा।

(ख) भूघाते वायुवर्णनिवृतेषु घञ् वक्तव्यः। प्रावो वातः। प्रारः प्रवलः। नीग्रारः प्रावरणम्।

२२। उपसर्गे रुवः।

प्रादौ रौतेर्घञ् स्यात्। उपरावः। संरावः। विरावः।

२३। समि युद्रुदुवः।

एभ्यः समि घञ् स्यात्। संयाव.। संद्रावः। संदावः। समोऽन्यत्र यवः। प्रयवः। उपयवः। निद्रवः।

२४। श्रिणीभुवोऽनुपसर्गे।

एभ्योऽप्रादौ घञ् स्यात्। श्रायः। नयमं नायः। भावः। कथं प्रभावः? पश्चात् समासेन।

२५। वौ क्षुश्रुवः।

क्षुश्रुभ्यां वौ घञ् स्यात्। विक्षावः। विश्रावः।

२६। अवोदोर्नियः।

अवे उदि च नियो घञ् स्यात्। अवनायः। उन्नायः। कथमवनयोन्नयौ? बाहुल्यात्। रावप्रभावगर्भस्रावदवत्।

२७। प्रे द्रुस्तुस्रुवः।

एभ्यः प्रे घञ् स्यात्। प्रद्रावः। प्रस्तावः। प्रस्रावः।

२८। निरभ्योः पूल्वोः।

निष्पूभिलूभ्यां घञ् स्यात्। निष्पावः। अभिलावः।

२९। उन्न्योर्ग्रः।

उन्न्योर्गॄघाते घञ् स्यात्। उद्गारः। निगारः।

३० । कॄ धान्ये ।

धान्यविषये उन्न्योः किरते घञ् स्यात्। उत्कारो धान्यानाम्। निकारः। धान्ये किम्? पुष्पनिकरः।

३१ । यज्ञे समि स्तुवः ।

यज्ञविषये संस्तौते घञ् स्यात्। संस्तावश्छन्दोगानाम्। यज्ञविषये किम्? "गुणाः प्रियत्वेऽधिकृता न संस्तवः"।

३२ । प्रे स्त्रोऽयज्ञे ।

यज्ञादन्यत्र प्रस्तृणाते घञ् स्यात्। पुष्पप्रस्तारः। अयज्ञे किम्? बर्हिष्प्रस्तरः। व्रीहिप्रस्तरः।

३३ । प्रथने वावशब्दे ।

वौ स्तृणातेः प्रथने घञ् स्यात्। प्रथनं विस्तीर्णता। वारिविस्तारः। अशब्दे किम्? वाग्विस्तरः।

३४ । छन्दोनाम्नि च ।

वृत्तनाम्नि विस्तृणाते घञ् स्यात्। विष्टारपङ्क्तिर्नामच्छन्दः। छन्दोनाम्नि चेति (८।३।९४) षत्वम्।

३५ । उदि ग्रहः ।

उदि ग्रहे घञ् स्यात्। उद्ग्राहः।

३६ । समि मुष्टौ ।

मुष्टौ संग्रहे घञ् स्यात्। अहो मल्लस्य संग्राहः। मुष्टेर्दार्ढ्यमित्यर्थः। अन्यत्र संग्रहः।

३७ । परिन्योर्नीणो र्द्यूताभ्रेषयोः ।

द्यूते परिनीञोऽभ्रेषे (51) नीञो घञ् स्यात्। "परिणायस्तु शाराणां न्यायः स्थित्यनतिक्रमः।"

---

(51) भ्रेष चलने। भ्रेषणं चलनम्। अभ्रेषोऽचलनम्। पदार्थानामनपचारो यथाप्राप्तकरणमिति यावत्।

३८। परावनुपात्यय इणः । (52)

परिपूर्वादिणः परिपाट्यां घञ् स्यात् । तव पर्य्यायः । मम पर्य्यायः । अनुपात्यये किम् ? कालविपर्य्ययः ।

३९। व्युपयोः शेतेः पर्य्याये ।

व्युपयोः शेतेर्घञ् स्यात् । तवात्र विशायः । ममोपशायः । पर्य्याय-शयनमित्यर्थः ।

४०। हस्तादाने चेरस्तेये ।

सामीप्यगतौ चिञो घञ् स्यात् । पुष्पप्रचायः । फलोच्चायः । फलो-पचायः । हस्तादाने किम् ? लगुडेन पुष्पप्रचयः । अस्तेये किम् ? हस्तेन चौर्य्येण पुष्पोच्चयः । पुष्पप्रचयः ।

४१। निवासचितिशरीरोपसमाधानेष्वादेश्च कः ।

एष्वर्थेषु चिञो घञ् स्यात् । आदेश्च कः । निकायो गृहम् । निकायो-ऽग्निः । निचित इत्यर्थः । कायो देहः । उपसमाधानं राशीकरणम् । गोमय-निकायः । काष्ठनिकायः । (53)

४२। संघे चानौत्तराधर्य्ये ।

प्राणिनां समुदायः सङ्घः । सङ्घे चिञो घञ् स्यात् । आदेश्च कः । भिक्षुनिकायः । "रम्याः शकुनिकायानाम् ।" अनौत्तराधर्य्ये किम् ? शूकरनिचयः ।

४३। कर्मव्यतिहारे णच् स्त्रियाम् ।

परस्परकरणे धातोः स्त्रियां भावे णच् स्यात् । "व्याक्रोशीं विदधते ।" "व्यावहासीमनाश्रितैः ।" णचः स्त्रियामञ् (५।४।१४) । बाहुल्यात् क्वचिद् बाधकविषयेऽपि । व्यावचोरी । "व्यात्युक्षीमभिसरणग्रहामदीव्यन् ।"

---

(52) क्रमप्राप्तस्य वारस्यानुपात्ययः ।

(53) चः क इति वक्तव्ये आदेरिति वचनं सकृद्ग्रहणार्थम् । सकृद्ग्रहणेऽप्यादेरेव यथा स्यात् । अनन्त्यस्य चोपचीनां भूदिति यथा गोमयनिकायः । गोमयानां पुनः पुनराशीकरणमित्यर्थः ।

४४ । अभिविधौ भाव इनुण् ।

भावे ऽभिव्याप्तौ धातोरिनुण् स्यात् । सांराविणम् । सांकूटिनम् । अणिनुण (५।४।१५) इति स्वार्थेऽण् ।

४५ । आक्रोशेऽवन्योर्ग्रहः ।

अवे नौ च ग्रहेर्घञ् स्यादाक्रोशश्चेत् । अवग्राहः । निग्राहस्ते वृषल भूयात् ।

४६ । प्रे लिप्सायाम् ।

लिप्सायां प्रग्रहेर्घञ् स्यात् । पात्रप्रग्राहेण चरति भिक्षुः पिण्डार्थी । (54)

४७ । परौ यज्ञे ।

यज्ञे परिग्रहेर्घञ् स्यात् । उत्तरपरिग्राहः । यज्ञविशेषः ।

४८ । नौ वृ धान्ये ।

नौ वृधातोर्घञ् स्यात् । नीवारा व्रीहयः ।

४९ । उदि श्रयतियौतिपूद्रुवः ।

एभ्य उदि घञ् स्यात् । उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः ।

५० । विभाषाऽऽङि रुप्लुवोः ।

रुप्लुभ्यामाङि घञ् स्याद्वा । आराव आरवो वा । "दूराप्लावं हनूमन्तं रामः प्रोचे गजाप्लवः ।"

५१ । अवे ग्रहो वर्षप्रतिबन्धे ।

वृष्टिनिरोधे ऽवग्रहो घञ् स्याद्वा । अवग्राहोऽवग्रहो वा मेघस्य ।

५२ । प्रे वणिजाम् ।

वणिजां तुलासूत्रे वाच्ये प्रग्रहेर्घञ् स्याद्वा । प्रग्राहः प्रग्रहो वा ।

५३ । रश्मौ च ।

रश्मिरश्वादिविधारणरज्जुः । तत्र प्रग्रहे र्घञ् स्याद्वा । प्रग्राहः प्रग्रहो वा ।

---

(54) भिक्षार्थीति पाठान्तरम् ।

५४ । ह्वोतेराच्छादने ।

आच्छादनेऽर्थाद् घञ् स्यात् । प्रावारो वस्त्रम् । "विन्ध्यस्य प्रवरो वन: ।"

५५ । परौ भुवोऽवज्ञाने ।

परिभुवस्तिरस्कारे घञ् स्यात् । परिभाव: । पक्षे ऽप् । परिभव: । उक्तो घञ् ।

५६ । एरच् ।

इवर्णान्ताद् घञपवादोऽच् स्यात् । चय: । शिलोच्चय: । जय: । क्षय: । प्रचय: । प्रश्रय: ।

(क) अज्विधौ भयादीनामुपसंख्यानम् । क्लीबे । क्तादिबाधनार्थम् । भयम् । वर्षम् । वासरूपेण (३।१।९४) क्तादयोऽपि भवन्ति । भीतं भिया वा दृष्टं देवेन वर्षणं मेघस्येति भागवृत्ति: ।

५७ । ऋदोरप् ।

ऋकारान्तोवर्णाभ्यामप् स्यात् । कॄ कर: । तॄ तर: । भॄ भर: । गॄ गर: । ग्रॄ ग्रर: । प्रतर: । प्रदर: । सङ्गर: । षुञ् सव: । स्तव: । भव: । सम्भव: । लव: । पव: । ऋदिति दकारोऽयमुच्चारणार्थ: । नैष तकार इति भाष्यम् ।

५८ । ग्रहवृदृनिश्चिगमश्च ।

(क) वशिरण्योश्च । एभ्योऽप् स्यात् । ग्रह: । वर: । दर: । निश्चिग्रहणं स्वरविशेषार्थम् । निश्चय: । गम: । वश: । रण: । बहुलाधिकारात् स्वयंग्राह: (55) ।

(ख) घञर्थे कविधानम् । स्थास्नापाव्यधिहनियुधिभ्यो घञर्थे क: । प्रस्थ: । प्रस्न: । प्रपिबन्त्यस्यां प्रपा । आविध: । विघ्न: । आयुधम् ।

५९ । उपसर्गेऽद: ।

अत्ते: प्रादावप् स्यात् । विघस: । प्रघस: । संघस: । उपसर्गे किम् ? घास: ।

(55) वर्धे सर्वबाद्धमित्यदवाकमिति कुमारे ।

६० । नौ ण च ।

गोवृत्तेरप् स्यात् । णश्च । निघसः । न्यादः ।

६१ । व्यधजपोरनुपसर्गे ।

आभ्यामप्रादावप् स्यात् । व्यधः । जपः । प्रादौ तु आव्याधः । उपजापः ।

६२ । स्वनहसो र्वा ।

आभ्यामप्रादावव् वा स्यात् । स्वनः स्वानः । हसो हासः (56) ।

६३ । यमः समुपनिविषु च ।

अप्रादावेषु च यमोऽव् वा स्यात् । यमो यामः । संयमः संयामः । उपयमः उपयामः । नियमः नियामः । वियमः वियामः ।

६४ । नौ गदनदपठस्वनः ।

एभ्यो नौ वा स्यादप् । निगदो निगादः । निनदः निनादः । निपठः निपाठः । निस्वनः निस्वानः ।

६५ । क्वणो वीणायाञ्च ।

क्वणोऽप्रादावव् वा स्यात् । क्वणः क्वाणः । नौ च । निक्वणः निक्वाणः । वीणाविषये च । प्रक्वाणः प्रक्वणो वा वीणायाः ।

६६ । नित्यं पणः परिमाणे ।

अत्र पणो नित्यमप् स्यात् । शाकपणः । परिमितो मुष्टिः । "मराः कीचपणा इव ।"

६७ । मदोऽनुपसर्गे ।

अप्रादौ मदोऽप् स्यात् । विद्यामदः । धनमदः । बाहुल्यान्मादः ।

६८ । प्रमदसम्मदौ हर्षे ।

एतावत्र निपात्येते । प्रमदः । सम्मदः ।

---

(56) दण्डूलदायोर्थस्तथा मया पुनर्विमौ हसे ह्रतपथः स्थितीकृत इति मैत्रेयीये ।

६९। समुदोरजः पशुषु।

समुत्पूर्वादजोऽप् स्यात्। हस्तिनां समजः संघः। पशूनामुदज उद्गमनम्। पशुषु किम्? विप्रसमाजः।

७०। अक्षेषु ग्लहः।

अक्षेषु ग्लहो निपात्यते। अन्यत्र ग्रहः।

७१। प्रजने सर्त्तेः।

प्रजने प्रथमगर्भाधाने सर्त्तेरप् स्यात्। उपसरः।

७२। ह्वः संप्रसारणञ्च न्यभ्युपविषु।

एषु ह्वयतेरप् स्यात् संप्रसारणञ्च। निहवः। अभिहवः। उपहवः। विहवः।

७३। आङि युद्धे।

आङि ह्वयतेरप् स्यात् सम्प्रसारणञ्च। आहवो युद्धम्।

७४। निपानमाहावः।

आहावो निपात्यते निपानञ्चेत्।

७५। भावेऽनुपसर्गस्य।

अप्रादौ भावे ह्वयतेरप् स्यात्। "कुर्वन्तो हवमाम्नानाम्।"

७६। हनश्च वधः।

भावे हनोऽप् स्याद् वधादेशश्च। वधः। चकाराद् घञपीष्यते। घातः।

७७। मूर्त्तौ घनः।

हन्तेः काठिन्येऽप् स्यात्। घनादेशश्च। लोहघनः। अभ्रघनः। कथं घनं दधीति? अभेदोपचारात्।

७८। अन्तर्घनो देशे।

अयमभ्यन्तरदेशे स्यात्। बलश्चेष्यते। तस्मिन्नन्तर्घणे पश्यविनिति भट्टिः।

७९। अगारैकदेशे प्रघणः प्रघाणश्च।

एतौ गृहैकदेशे स्याताम्।

८० । उद्घनोऽत्याधानम् ।

निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।

८१ । अपघनोऽङ्गम् ।

अयमङ्गे स्यात् । "ग्रथिभिरपघनैर्घर्घराव्यक्तघोषान् ।"

८२ । करणेऽयोविद्रुषु ।

एषु हनः करणेऽप् स्यात् । घनादेशश्च । अयोघनः । विघनः । द्रुघनः कुठारः । घत्वे द्रुघण इति केचित् ।

(क) स्त्रियां ल्युडनो विप्रतिषेधेन । अयोहननी । द्रुहननी । विहननी ।

८३ । स्तम्बे क च ।

स्तम्बे हनः कः स्यात् । "सा स्तम्बघ्नपदन्यासान् ।" चकारादप् च । स्तम्बघनः ।

८४ । परौ घः ।

करणे परौ हन्तेरप् स्यात् । घादेशश्च । परिघः ।

८५ । उपघ्न आश्रये ।

अयमत्र निपात्यते ।

८६ । संघोद्घौ गणप्रशंसयोः ।

गणे संघः प्रशंसायामुद्घः स्यात् ।

८७ । निघो निमितम् ।

परिमितं निघः स्यात् । निघा वृक्षाः । अन्तोऽप् ।

८८ । ड्वितः क्त्रिः ।

धातोर्डुकारानुबन्धात् क्त्रिः स्यात् । क्त्रेर्मम् नित्यम् (४।४।२०) । डपचिमम् । क्रीत्रिमम् । कृत्रिमम् । उप्त्रिमम् । पक्त्रिमम् ।

८९ । ट्वितोऽथुच् ।

टुकारानुबन्धादथुच् स्यात् । नन्दथुः । वमथुः । भ्राजथुः । वेपथुः ।

९० । यजयाचयतविच्छप्रच्छरक्षो नङ् ।

एभ्यो भावेऽकर्त्तरि च कारके नङ् स्यात् । यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । प्रश्ने चासन्नकाले (४।२।११७) इति ज्ञापकात् संप्रसारणाभावः । रक्ष्णः ।

९१ । स्वपो नन् ।

अस्मान्नन् स्यात् । स्वप्नः ।

९२ । उपसर्गे घोः किः ।

प्रादौ दाधाभ्यां किः स्यात् । आदिः । आधिः । निधिः । प्रधिः । अन्तर्द्धिः । प्रणिधिः । बाहुलकात् कर्त्तरि विधिः ।

९३ । कर्मण्यधिकरणे च ।

आधारे कर्मोपपदाद् घोः किः स्यात् । जलधिः । वारिधिः । ओषधिः । वालधिः ।

९४ । स्त्रियां क्तिन् ।

स्त्रियां भावेऽकर्त्तरि च कारके धातोः क्तिन् स्यात् । स्थितिः । चितिः । सिक्तिः । नीतिः । श्रूयतेऽनया श्रुतिः । भूतिः । स्तुतिः । ज्ञातिः । भक्तिः । सृष्टिः ।

(क) ॠकारल्वादिभ्यः क्तिन् निष्ठावत् । कीर्णिः । गीर्णिः । लूनिः । धूनिः ।

(ख) क्तिन्नाबादिभ्यः । आबादेर्गुरोश्च हलः (३।३।१०२) इत्यपवादः क्तिन् स्यात् । आप्तिः । दीप्तिः । राद्धिः । साद्धिः । प्रशस्तिः । बाहुलकाच्चात्र इत्वं नास्ति । शास्तिः ।

(ग) ग्लाम्लाज्याहाभ्यो निः । एभ्यो निः स्यात् । ग्लानिः । म्लानिः । ज्यानिः । हानिः ।

(घ) सम्पदादिभ्यः क्विप् । सम्पत् । प्रतिपत् । विपत् । संवित् । वेत्येव । क्तिन्नपीष्यते । सम्पत्तिः । प्रतिपत्तिः । विपत्तिः ।

९५ । स्थागापापचो भावे ।

एभ्योऽङपवादः क्तिन् स्यात् । प्रस्थितिः । सङ्गीतिः । प्रगीतिः । आपीतिः । पक्तिः । कथमास्था व्यवस्थेति ? अभिधानप्रामाण्यात् । (57)

---

(57) अन्यच्च पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (१।१।३४) इति ज्ञापकात् ।

९६ । मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ।

छान्दसम् ।

९७ । ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ।

वेआदेः षष्ठमी निपात्यन्ते ।

९८ । व्रजयजोर्भावे क्यप् ।

पाभ्यां भावे क्यप् स्यात् । व्रज्या । प्रव्रज्या । इज्या । बाहुल्यादिष्टिः ।

९९ । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ।

एभ्यो नवभ्यः संज्ञायां क्यप् स्यात् । भावाधारकरणेष्वभिधानम् । समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । शय्या । भृत्या । इत्या । बाहुल्यात् समस्तेत्येके । कथं भृतिर्मतिराप्तिरिति ? निपातनादिति न्यासकृत् ।

१०० । कृञः श च ।

कृञः शः स्यात् क्यप् च । क्रिया । कृत्या । योगविभागात् कृतिः ।

१०१ । इच्छा ।

भावे निपात्यते । कर्मणि क्तिनि इष्टिः ।

(क) परिचर्य्यापरिसर्य्यामृगयाटाट्याजागर्य्याजागराणाम् । शप्रत्यये एषां षण्णां निपातनं कर्त्तव्यम् ।

१०२ । अ प्रत्ययात् ।

प्रत्ययान्ताद् धातोरः स्यात् । ततष्टाप् । चिकीर्षा । तितिक्षा । पुत्रीया । पुत्रकाम्या । लोलूया । चङ्क्रमा । बेभिदा । कण्डूया ।

१०३ । गुरोश्च हलः ।

गुरुमतो हलन्तादः स्यात् । भिक्षा । भिदा । ईहा । प्रतीक्षा । व्यतीक्षा । ऊहा । बाहुल्यादूढिः । चकाराच्छोभा ।

१०४ । षिद्भिदादिभ्योऽङ् ।

षितो भिदादेश्चाङ् स्यात् । पचा । त्रपा । षिद्भिदोरङि गुणः (७।४।१६)

जरा । घटा । व्यथा । जटा । बाहुल्यादुपलब्धिः । भिदादेस्त्वभिधानं स्मरन्ति । भिदा विदारणे । भित्तिरन्या । ऋतेरङि कृते गुणे (७।४।१६) निपातनाद्दीर्घः । आरा शस्त्रग्राम् । ऋतिरन्या । एवं कारा बन्धनालये । तारा नक्षत्रे । धारा प्रपतने । धृतिरन्या । बाहुल्यादसिधारा । लिखेर्गुणे परे रत्वञ्च । लेखा रेखा । कृपेः संप्रसारणञ्च । कृपा । गुहा । पृच्छा । मृजा । रुजा । विदा । भिदादिराकृतिगणः ।

१०५ । चिन्तिपूजिकथिकुम्बिचर्चश्च ।

ण्यन्तेभ्य एभ्योऽङ् स्यात् । युचोऽपवादः । चिन्ता । पूजा । कथा । कुम्बा । चर्चा ।

१०६ । आतश्चोपसर्गे ।

आदन्तात् प्रादावङ् स्यात् । प्रमा । प्रतिमा । प्रधा । उपधा । प्रभा । प्रतिभा । श्रदन्तरोरुपसर्गवद्वृत्तिः । श्रद्धा । अन्तर्धा । बाहुलकात् क्तिन् । प्रमितिः ।

१०७ । ण्यासश्रन्थो युच् ।

ण्यन्तादासेः श्रन्थेश्च युच् स्यात् । भावना । दापना । दीपना । कारणा । भूषणा । कामना । चोदना । उपासना । श्रन्थना । बाहुल्यात् पाचयतेः पाक्तिः ।

(क) घट्टिवन्दिविदिभ्यश्च । एभ्यो युच् स्यात् । घट्टना । वन्दना । वेदना ।

(ख) इषेरनिच्छार्थस्य । अन्वेषणा ।

(ग) परेर्वा । पर्येषणा । परीष्टिः ।

१०८ । रोगाख्यायां ण्वुल् बहुलम् ।

रोगे गम्ये बहुलं ण्वुल् स्यात् । प्रच्छर्दिका । प्रवाहिका । विचर्चिका । प्रस्कन्दिका । न च भवति । शिरोऽर्त्तिः । ऋतेः क्तिन् ।

(क) धात्वर्थनिर्देशे ण्वुल् वक्तव्यः । आसिका । शायिका । भाविका ।

(ख) इक्श्तिपौ धातुनिर्देशे । पचिः । यजिः । यातिः । करोतिः । यजेर्दर्शेपेरित्युच्चारणार्थ इकारः ।

(ग) वर्णात् कारः । अकारः । आकारः । औकारः । ककारः । ओङ्कारः । हुङ्कारः । एवकारः । फट्कारः । शीत्कार । फुत्कारः । थुत्कारः । एवकारादौ घञन्तेन समास इत्यन्ये ।

(घ) रादिफः । रेफः ।

(ङ) मत्वर्थाच्छः । मत्वर्थीयः । बाहुल्यादभस्यापि यस्येति चेति (६।४।१४८) लोपः ।

(च) इञजादिभ्यः । आजिः । आतिः । आटिः ।

(छ) इक् कृष्यादिभ्यः । कृषिः । गिरिः । सर्वोऽयं बहुलप्रपञ्चः ।

१०९ । संज्ञायाम् ।

नाम्नि धातोर्ण्वुल् स्यात् । पुष्पभञ्जिका शालभञ्जिका नाम क्रीडा ।

११० । विभाषाख्यानपरिप्रश्नयोरिञ् च ।

प्रश्नाख्यानयोरिञ् ण्वुलौ वा स्याताम् । कां त्वं कारिमकार्षीः कारिकां क्रियां कृत्यां कृतिं वा । सर्वां कारिमकार्षम् । कारिकां क्रियां कृत्यां कृतिं वा । एवं स्यायिं स्थितिं स्थायिकां वा ।

१११ । पर्य्यायार्हर्णोत्पत्तिषु ण्वुच् ।

धातोरेष्वर्थेषु ण्वुच् स्यात् । भवतः शायिका । "अहं पर्य्यायसंप्राप्तां कुर्वे प्रायोपवेशिकाम्" । अर्हसि त्वमिक्षुभक्षिकाम् । धारयसि मे तिल-मोदकखादिकाम् । उत्पन्ना मे पयःपायिका ।

११२ । आक्रोशे नञ्यनिः ।

शापे नञुपपदादनिः स्यात् । "तस्याजननिरेवास्तु जननीक्लेशकारिणः" । "अभवनिरस्तु तदा मनोभवस्य" । भावेऽकर्त्तरि च कारके क्रियाचेति निवृत्तम् ।

११३ । कृत्यल्युटो बहुलम् ।

धातोर्ल्युट् कृत्याश्च बहुलं कर्त्रादौ स्युः । कर्त्तरि । लोचनलोभनीया मधुपपङ्क्तिः । करणे । स्नानीयं चूर्णम् । सम्प्रदाने । दानीयो भिक्षुः ।

आधारे। शयनीयं कटितम्। रमणीया वापी। रम्यमुद्यानम्। तिष्ठत्य-स्मिन् स्थेयः। ल्युट् कर्त्तरि। गुणमुक्तवान् गुणवचनः। कर्मणि। अवसेचनो वृक्षः। राजभोज्याः शालयः। अपादाने। प्रपतनमित्यादि।

११४। नपुंसके भावे क्तः।

क्लीवे भावे क्तः स्यात्। हसितं भिक्षोः। गतं विप्रस्य।

११५। ल्युट् च।

क्लीवे भावे ल्युट् स्यात्। करणम्। गमनम्। हरणम्।

११६। कर्मणि च येन संस्पर्शात् कर्त्तुः शरीरसुखम्।

इष्टक्कर्म्मोपपदाल्ल्युट् स्यान्नपुंसके भावे। पयःपानं भुजङ्गानां सुखम्। गुड़भोजनं भिक्षोः सुखम्। नित्यमुपपदसमासः। विशेषणं किम्? कण्टकानां मर्द्दनं कण्टकमर्द्दनं दुःखम्।

११७। करणाधिकरणयोश्च।

अनयोर् ल्युट् स्यात्। देहव्रश्चनः खड्गः। उपमानं मुखस्येन्दुः। आधारे। राजधानी। वार्धानी। गोदोहनी स्थाली। ओदनपचनः कटाहः। व्रीहि-भरणः कुसूलः। करणाधिकरणयो विधान मा खलः। (३।३।१२६)।

११८। पुंसि संज्ञायां घः प्रायेण।

पुंसि नाम्नि प्रायेण घः स्यात्। करणे। दन्तच्छदः। कुर्वन्त्यनेन करः। शरः। आधारे। आकरः। आलयः। परिसरावसरावत्रैव।

११९। गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च।

सम्प्रेते घान्ता निपात्यन्ते। चकारादाक्रयतेऽनेनाक्रयः।

१२०। अवे तृस्त्रोर्घञ्।

अवे आभ्यां घञ् स्यात्। अवतारः। अवस्तारः।

१२१। हलश्च।

हलन्ताद् घविषये घञ् स्यात्। लेखः। वेदः। बन्धः। अपामार्गः। मृज्यतेऽनेन मार्गः। प्रायेणेत्येव। निकषः।

१२२। अध्यायन्यायोद्यावसंहाराधारावायाश्च।

षडिमे घविषये घञन्ता निपात्यन्ते। अधीयतेऽत्राध्यायः। निपूर्वादिणो नीयतेऽनेन न्यायः।

१२३। उदङ्कोऽनुदके।

अयमत्र निपात्यते। घृतोदङ्कः। नेह। जलोदञ्चनः।

१२४। जालमानायः।

आनायः स्याज्जालश्चेत्।

१२५। खनो घ च।

खनो घञ् स्याद् घश्च। आखन्यतेऽनेनाखानः। आखनः। इहाखाखनि-कादयस्त्वौणादिकाः। करणाधिकरणयोरिति (३।३।११७) निवृत्तम्।

१२६। ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्।

एषु धातोः खल् स्यात्। कृच्छ्रेण क्रियतेऽसौ दुष्करः। दुर्लभः। अकृच्छ्रेण क्रियतेऽसौ सुकरः। ईषत्करः। सुभोजः। सुबोधः। सुभेदः। सुलभः।

१२७। कर्तृकर्मणोश्च भूकृञोः।

कर्त्तरि भुवः कर्मणि कृञ स्तथा खल् स्यात्। च्व्यर्थेऽभिधानम्। दुराढ्यम्भवं तेन। स्वाढ्यम्भवममुना। ईषदाढ्यङ्करस्त्वया पुत्रः। सुपण्डितङ्करः शिष्यः। गतित्वेऽपि सुदुरोरत्र धातोः प्राक् प्रयोगो (१।४।८०) न भवति। खलः खित्करणात्।

१२८। आतो युच्।

आदन्तात् खल्विषये युच् स्यात्। सुपानं पयः। दुरुपस्थानो गुरुः। दुर्दाना गौः। दुर्ज्ञाना गौः।

१२९। छन्दसि गत्यर्थेभ्यः।

१३०। अन्येभ्योऽपि दृश्यते।

छान्दसे सूत्रे।

(क) भाषायां शासियुधिदृशिधृषिमृषिभ्यश्च। एभ्यो युच् स्यात्। दुःशासनः। दुर्योधनः। दुर्दर्शनः (58)। दुर्धर्षणः। दुर्मर्षणः। सुयोधनः सुदर्शनः। सुमर्षणः।

१३१। वर्तमानसामीप्ये वर्तमानवद्वा।

वर्तमानसमीपे भूते भविष्यति च वर्तमानवत् प्रत्ययो वा स्यात्। कदा त्वमागतः। अयमहमागच्छामि। कदा यास्यसि? एषोऽहं गच्छामि। यान्तं मां विद्धीत्यर्थः। पक्षे यथाप्राप्तञ्च।

१३२। आशंसायां भूतवच्च।

आकाङ्क्षायां भविष्यति वर्तमानवद् भूतवच्च प्रत्ययो वा स्यात्। उपाध्याय-श्चेदागच्छति आगत आगमिष्यति आगन्ता आगच्छेद् आगमद् वा एते छन्दोऽधीमहे अध्यगीष्महि। पक्षे लृङ्लुटौ। एवं "सौमित्रे मामुपायंस्थाः।" "मामुपायंस्त रामेति"। अथास्यापवादद्वयमाह।

१३३। क्षिप्रवचने लृट्।

क्षिप्रार्थयोगे लृट् स्यात्। स चेत् क्षिप्रमायास्यति त्वरितमध्येष्ये।

१३४। आशंसावचने लिङ्।

वाञ्छार्थयोगे लिङ् स्यात्। स चेदागच्छेत् कामये युक्तोऽधीयीय। "आशंसा न हि न प्रेते जीवेम दशमूर्धनि"।

१३५। नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः।

भूतभविष्यदनद्यतने लङ्लुटावुक्तौ। तौ तु निषिध्येते क्रियासातत्ये सामीप्ये च। यावज्जीवं भृशमन्नमदाद् दास्यति च। सामीप्ये। अनन्तरायां पौर्णमास्यां गुरुर्धर्ममबोधत्। आगामिन्यां वक्ष्यति।

१३६। भविष्यति मर्य्यादावचनेऽवरस्मिन्।

मर्य्यादोक्तावपरभागे भविष्यति नानद्यतनवत् स्यात्। योऽयमा पर्वताद् गन्तव्यः पञ्चास्तस्य यदवरं नद्यास्तत्र तिलौदनं भोक्ष्यामहे।

---

(58) कथं कालो करालवक्त्रो दुर्दर्शवदनोऽभवदिति ईषदादावाम्रो? "न शक्यमनुवर्तितुं [illegible] शिव।" दर्शनशब्देन प्राप्तिवाची वा।

१३७ । कालविभागे चानहोरात्राणाम् ।

कालविभागे च पूर्ववदनद्यतनवत् स्यात् । आगामिवत्सरस्य यदवरं वैशाख्यास्तत्र गर्था यास्यामः । अहोरात्रसम्बन्धिनि तु कालविभागे । आगामिनि मासे पञ्चदशरात्रादवरस्मिन् महाबोधिं गन्तास्मः ।

१३८ । परस्मिन् विभाषा ।

परस्मिन् कालविभागे भविष्यति नानद्यतनवद्वा स्यात् । आगामिवत्सरस्याग्रहायण्याः परस्मिन् धर्मं श्रोष्यामि श्रोतास्मि वा ।

१३९ । लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।

हेतुहेतुमदादौ लिङ्विषये क्रियातिपाते भविष्यति लृङ् स्यात् । यदि वर्षसहस्रमजीविष्यं तदा पुत्रशतमजनयिष्यम् ।

१४० । भूते च ।

भूते च पूर्ववल्लृङ् स्यात् । यदि शिलाः कोमला अभविष्यंस्तदा क्रोष्टुभिरेवाभक्षयिष्यन्त ।

१४१ । वोतापयोः ।

उतापिशब्दात् (३।३।१५२) प्राग् भूते लृङ् वा स्यादित्यधिक्रियते ।

१४२ । गर्हायां लडपिजात्वोः ।

कालसामान्ये जात्वपियुक्ताद् धातो र्लट् स्यान्निन्दा चेत् । अपि सभवाञ् शूद्रं याजयति ? "मन्ये जातु वदन्त्यशास्त्वं तानप्यनुमन्यसे" ।

१४३ । विभाषा कथमि लिङ् च ।

कथंयुक्ताद् गर्हायां लिङ् लट् च वा स्यात् । स कथं शूद्रं याजयेत् याजयति वा ? पक्षे याजयिता याजयिष्यति अयीयजत् याजयाञ्चकार वा । क्रियातिपत्तौ भूते वा लृङ् । अयाजयिष्यत् । "काकुत्स्थ दयितां साध्वीं त्वमाधक्ष्यिष्यथाः कथम्" । भविष्यति तु लिङ्निमित्ते क्रियातिपत्तौ सर्वत्रास्मि प्रकरणे नित्यो लृङ् बोद्धव्यः ।

१४४। किंवृत्ते लिङ्लृटौ।

किंवृत्तयोगे गर्हायां लिङ्लृटौ स्याताम्। सर्वलकाराणां बाधा। को नाम कतरो नाम शूद्रं याजयेद् याजयिष्यति वा ?

१४५। अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि।

अश्रद्धाक्षमयोर्योगेऽकिंवृत्तेऽपि लिङ्लृटौ स्याताम्। नावकल्पयामि सभवान् हस्तिरथं प्रतिगृह्णीयात् प्रतिग्रहीष्यति वा। न श्रद्दधे न क्षमे दुर्जनः प्रतिष्ठां लभेत लप्स्यते वा।

१४६। किंकिलास्त्यर्थेषु लृट्।

किंकिलास्त्यर्थयोगे लृट् स्यात्। किंकिल सभवान् सुरां पास्यति ! "किं क्रमिष्यति किलैष वामनः"। अस्ति नाम शूद्रो वेदं व्याख्यास्यति। न श्रद्दधे न क्षमे।

१४७। जातुयदोर्लिङ्।

१४८। यच्चयत्रयोः।

(क) यदायद्योश्च। जातुयद्यदायदियच्चयत्रोपपदे लिङेव स्यात्। "न पृथग्जनवज्जातु प्रमुह्येत् पण्डितो जनः"। "नावकल्पयामिदं ध्यायेद् यत् कष्टेषु भवानपि"। यदा भवद्विधः शूद्रं याजयेदित्यादि।

१४९। गर्हायाञ्च।

यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात्। "यच्च यत्र भवान् सौदेष्वहवि-स्तद् विगर्हितम्।"

१५०। चित्रीकरणे च।

आश्चर्य्ये च पूर्ववल्लिङेव स्यात्। "आश्चर्य्यं यच्च यत्र त्वां प्रब्रूयाम वयं हितम्।"

१५१। शेषे लृड्यदौ।

यच्चयत्राभ्यामन्यः शेषः। तस्मादुपपदादाश्चर्य्ये लृड़ेव स्यात्। अन्धुतमन्धो

नाम गिरिमारोक्ष्यति । बधिरो नाम व्याकरणमध्येष्यते । अयदौ किम् ? चित्रं नाम यदि स भुञ्जीत ।

१५२ । उताप्योः समर्थयोर्लिङ् ।

बाढार्थयोरुताप्योर्योगे लिङेव स्यात् । उत कुर्य्यात् । अपि कुर्य्यात् ।

१५३ । कामप्रवेदनेऽकच्चिति ।

इच्छाप्रकाशने सर्वलकारापवादो लिङेव स्यात् । कामो मे भुञ्जयाद् भवान् । अकच्चिति किम् ? कच्चिज्जीवति ते पिता ? अयं विधिर्नोप-पदाश्रयः । कामप्रवेदनस्य गम्यमानतयाभ्युपगमात् । इच्छार्थेषु लिङ्-लोटाविलेव (३।३।१५७) तूपपदाश्रय इत्यनयोर्भिन्नविषयता । यत् पुनरत्र सूत्रे कामो मदति प्रयोगः स गम्यमानार्थस्यैव स्पष्टार्थो बोद्धव्यः ।

१५४ । सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे ।

अलमिति चेत् सम्भाव्यतेऽलञ्च न प्रयुज्यते तदा धातोर्लिङेव स्यात् । अपि शिरसा गिरिं भिन्द्यात् । अलमिति किम् ? विदेशस्थः प्रायेणायास्यति । अलंयोगे तु । अलं हस्तिनं हनिष्यति ।

१५५ । विभाषा धातौ सम्भावनवचनेऽयदि ।

अनन्तरोक्तो लिङ् सम्भावनवाचिधातूपपदे वा स्यात् । सम्भावयामि स भुञ्जीत । स भोक्ष्यते वा । अयदि किम् ? सम्भावये यत् स भुञ्जीत ।

१५६ । हेतुहेतुमतोर्लिङ् ।

हेतुहेतुफलार्थाद् धातोर्लिङ् वा स्यात् । दक्षिणश्चेद् यायान्न शकटं पर्य्याभवेत् (59) । पक्षे लृट् ।

१५७ । इच्छार्थेषु लिङ्लोटौ ।

इच्छार्थयोगे सर्वलकारापवादौ लिङ्लोटौ स्याताम् । कामये त्वं भुञ्जीथाः । इच्छामि स गच्छतु ।

---

(59) पर्य्याभवनं भङ्गः पतनं ।

१५८। समानकर्तृकेषु तुमुन्।

१५९। लिङ् च।

एककर्तृके इच्छार्थयोगे तुमुन् स्याल्लिङ् च। इच्छति भोक्तुम्। गच्छेय-मिति वाञ्छति।

१६०। इच्छार्थेभ्यो विभाषा वर्त्तमाने।

इच्छार्थाद् वर्त्तमाने लिङ् वा स्यात्। इच्छति इच्छेत्। "इच्छेः कामयितुं त्वं माम्।" वष्टि उशाशा।

१६१। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्।

एष्वर्थेषु सर्वलकारापवादो लिङ् स्यात्। विधौ। दानं दद्यात्। नियोगतः करणे। इह भुञ्जीथाः। कामचारे। यथारुचि भुञ्जीत। अध्येषणे। अध्यापयेत्। संप्रश्ने। किंनु तर्कमधीयीय? याच्ञायाम्। लभेय भिक्षाम्।

१६२। लोट च।

विध्यादौ लोट् च स्यात्। करोतु। विनोतु। अधीताम्।

१६३। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च।

इष्टाज्ञातज्ञापनं प्रैषणम्। विधिरुक्तः। प्रैषस्तु प्रैषणमात्रम्। अतिसर्गः कामचाराभ्यनुज्ञा। प्राप्तकालता क्रियानिमित्तं कालप्राप्तिः। प्रैषादौ गम्ये कृत्याः स्युर्लोट् च। त्वया कटः कर्त्तव्यः। त्वं कटं कुरु। कृत्य-ग्रहणमेतल्लोटा समावेशार्थं वासरूपविधेः (३।१।९४) अनधिकारात् परेषु प्रायिकत्वं ज्ञापयति।

१६४। लिङ् चोर्ध्वमौहूर्त्तिके।

ऊर्ध्वमौहूर्त्तिकार्थाद्धातोः प्रैषादौ गम्ये लिङ्लोटौ कृत्याश्च स्युः। मुहूर्त्तस्यो-परि कटं कुर्य्याः। कटं कुरु। कटस्त्वया कर्त्तव्यः।

१६५। स्मे लोट्।

अनन्तरविषये स्मयोगे लोडेव स्यात्। मुहूर्त्तस्योपरि कटं कुरु स्म।

१६६। अधीष्टे च।

अत्र स्मयोगे लोडेव स्यात्। भवान् मां पाठयतु स्म।

१६७। कालसमयवेलासु तुमुन्।

१६८। लिङ् यदि।

कालादियोगे तुमुन् स्यात् प्रैषादौ गम्ये। कालो भोक्तुम्। समयो भोक्तुम्। वेला भोक्तुम्। यच्छब्दे तु लिङ्। कालोऽयं यद् भुञ्जीथाः।

१६९। अर्हे कृत्यतृचश्च।

अर्हे कर्त्तरि कृत्यतृज्लिङः स्युः। यूना कन्या वोढ़व्या। युवा कन्याया वोढ़ा। युवा कन्यां वहेत्।

१७०। आवश्यकाधमर्ण्ययोर्णिनिः।

१७१। कृत्याश्च।

एतयोर्णिनिः स्यात्। अवश्यंकारी कटस्य। शतं दायी ऋणस्य। कृत्याश्च। त्वयावश्यं कटः कार्य्यः। दातव्यं शतम्। कृत्यग्रहणं वासरूपविधिना (३।१।९४) णिनिसमावेशार्थम्।

१७२। शकि लिङ् च।

शक्तौ लिङ् स्यात्। कृत्याश्च। स भारं वहेत्। तेन वाह्यो भारः। वहनीयः।

१७३। आशिषि लिङ्लोटौ।

आशिषि विषये लिङ्लोटौ स्याताम्। "कल्याणं वः क्रियासुः।" बौद्धो जिनः पातु वः (60)। शिवः पातु।

१७४। क्तिच्क्तौ च संज्ञायाम्।

आशिषि धातोः क्तिच् स्यात् क्तश्च संज्ञा चेत्। तनुतात् तन्तिः। भवताद् भूतिः। वीरो भूयाद् वीरभूतिः। अग्निरस्य भूयादग्निभूतिः। मन्त्रभूतिः। रुचिः। बुधिः। देवैरसौ दासीष्ट देवदत्तः। ब्रह्मदत्तः। बुद्धः।

(60) विपदि जिनः पातु व इति क्वचित् पाठान्तरम्।

१७५। माङि लुङ्।

धातोर्माङ्योगे सर्वलकारापवादो लुङ् स्यात्। मा त्वं कार्षीः पापम्। "मोज्झिगमः स्वपौरुषम्"।

१७६। स्मोत्तरे लङ् च।

मास्मयोगे लङ् स्यात्। मास्म करोत्। लुङ् च। "मास्म द्राक्षीर्मृषा दोषम्।"

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य भाषावृत्तौ

तृतीयाध्यायस्य तृतीयः पादः ॥३।३॥

समाप्तश्च बहुलपादः।

अथ

भाषावृत्तिः ।

तृतीयोऽध्यायः । चतुर्थः पादः ।

१ । धातुसम्बन्धे प्रत्ययाः ।

धात्वर्थद्वयसम्बन्धे भिन्नकाला अपि प्रत्ययाः साधवः स्युः । पितृव्यघाती पुत्रो जनिता । "गतो वनं श्वो भवितेति रामः" । दौवारिकः संपत्स्यते । गोमानयमासीत् । "वसन् ददर्श" । भुक्तवानस्मि । योत्स्यमानो जगाम । धातुसम्बन्धे विधान मा कर्त्तरि क्तः (३।४।६७) ।

२ । क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ।

क्रियासमभिहारे (61) गम्ये धातोः कालत्रयेऽपि लोट् स्यात् । तस्य च हिस्वौ कर्त्तव्यौ । तध्वंविषये हिस्वौ वा स्याताम् । लुनीहि लुनीहीत्येवायमलावीत् । लविष्यति । लुनाति वा । लुनीहि लुनीहीत्येवेमावलाविष्टाम् । लविष्यतः । लुनीतो वा । लुनीहि लुनीहीत्येवेमेऽलाविषुः । लविष्यन्ति । लुनन्ति वा । अधीष्वाधीष्वेत्येवायमध्यगीष्ट । अध्येष्यते । अधीते वा । तध्वंविषये हिस्वौ वा । लुनीत लुनीत्येवं लुनीहि लुनीहीत्येवं वा यूयं लुनीथ । लविष्यथ । अलाविष्ट वा । अधीध्वमधीध्वमित्येवमधीष्वाधीष्वेत्येवं वा यूयमधीध्वे । अध्येष्यध्वे । अध्यगीढ्वं वा । सर्वत्र चेह प्रकरणे प्रत्ययान्तानुप्रयोगधात्वर्थयोः सामान्यविशेषभावेन सम्बन्धः ।

३ । समुच्चयेऽन्यतरस्याम् ।

क्रियासमुच्चये लोडादिकं वा स्यात् । खमट ग्रामट ग्रामटेत्येवायमटति । इमावटतः । इमेऽटन्ति वा । ओदनं भुङ्क्ष्व सक्तून् पिब धानाः खादेत्येवायमभ्यवहरति । एवं सर्वेषु कालेषु सर्वेषु वचनेषु बोध्येयम् ।

---

(61) क्रियासमभिहारः पौनःपुन्यम् भृशार्थो वा ।

४। यथाविध्यनुप्रयोगः पूर्वस्मिन्।

प्रथमे लोड्विधौ यस्माद् धातोर् लोड् विहितः स एवानुप्रयोज्यः। लुनीहि लुनीहीत्येवायं लुनाति। नतु छिनत्ति।

५। समुच्चये सामान्यवचनस्य।

समुच्चये लोड्विधौ सामान्यवचनस्यानुप्रयोगः कार्य्यः। यथा भुङ्क्ष्व पिब खादेत्येवायमभ्यवहरति (62)। अत्र छन्दःसूत्राणि द्वादश (63)।

१८। अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा।

तुमर्थ इत्यनुवर्त्तते यावदव्ययकृतां विधानम् (३।४।१६)। तुमर्थश्च भाव इत्युक्तम्। प्रतिषेधवाच्यलंखलूपपदाद् धातोः क्त्वा स्यात्। अलं कृत्वा। खलु कृत्वा। न कर्त्तव्यमित्यर्थः। बाह्यकर्मसम्बन्धे तु। "अलमालम्ब्य व्यवसायबन्ध्यताम्"। "खलूक्त्वा खलु वाचिकम्"। न लोकेति (२।३।६९) कर्म्मणि षष्ठीनिषेधादत्र द्वितीया। भावेऽपि हि प्रत्यये सकर्मकाद् धातोः पश्चात् कर्मसम्बन्धो भवत्येवं पाक ओदनस्य कटं कृत्वा ग्रेते गम्यते मया ग्राममिति भागवृत्तावुक्तम्। प्राचांग्रहणं पूजार्थम्।

१९। उदीचां माङो व्यतीहारे।

माङिति मेङः कृतात्वस्य ग्रहणम्। तस्यैव व्यतिहारवृत्तित्वात्। तस्मादुदीचां मतेन पूर्वकालापवादः क्त्वा स्यात्। पूर्वं याचते ततोऽपमयते-ऽपमित्य याचते। अपमातुं याचत इत्यर्थः।

---

(62) तथा च—"पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः। विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥"—इति माघः।

(63) तानि चेमानि—

६। छन्दसि लुङ्लङ्लिटः। ७। लिङर्थे लेट्। ८। उपसंवादाशङ्कयोश्च।

९। तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः।

१०। प्रयै रोहिष्यै अव्यथिष्यै। ११। दृशे विख्ये च। १२। शकि णमुल्कमुलौ।

१३। ईश्वरे तोसुन्कसुनौ। १४। कृत्यार्थे तवैकेन्केन्यत्वनः। १५। अवचक्षे च।

१६। भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। १७। सृपितृदोः कसुन्।

२० । परावरयोगे च ।

अनयोर्योगे गम्ये क्त्वा स्यात् । बाल्यमतिक्रम्य यौवनम् । ततः परमित्यर्थः । अप्राप्य नदीं गिरिः । नद्या अवर इत्यर्थः ।

२१ । समानकर्त्तृकयोः पूर्वकाले ।

पूर्वकालार्थाद् धातोः क्त्वा स्यात् समानश्चेत् कर्त्ता भवति । पीत्वा हसति । स्नात्वा भुक्त्वा पीत्वा व्रजति । स्नात्वा भुक्त्वा श्रुत्वा व्रजति । पूर्वकाले किम् ? भुङ्क्ते जल्पति च । समानकर्त्तृकयोः किम् ? ब्राह्मणे भुक्तवति सेवको व्रजति । इह

(क) अनृतं कृत्य पतति अक्षिणी सम्मील्य हसतीत्यादिकमुपसंख्येयम् । इह तु स्नात्वा सुखं भवति पापं कृत्वानुतापः स्यादित्यादौ स्थितस्येति पदमध्याहार्य्यम् (64) ।

२२ । आभीक्ष्ण्ये णमुल् च ।

पौनःपुन्ये धातोर्णमुल् स्यात् क्त्वा च । भोजं भोजं भुक्त्वा भुक्त्वा वा व्रजति । "स्थायं स्थायं क्वचिद् यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित् ।"

२३ । न यद्यनाकाङ्क्षे ।

धातोर्यद्युपपदात् क्त्वाणमुलौ न स्याताम् । यदयं भुङ्क्ते ततः पठति । यदयमधीते ततः शेते । वाक्ये साकाङ्क्षे तु यदयं भुक्त्वा व्रजति नूनमयं पठिष्यति ।

२४ । विभाषाग्रेप्रथमपूर्वेषु ।

आभीक्ष्ण्यं निवृत्तम् । एषूपपदेषु धातोस्तौ वा स्याताम् । अग्रे भोजमग्रे भुक्त्वा वा व्रजति । एवं प्रथमं पूर्वम् ।

२५ । कर्मण्याक्रोशे कृञः खमुञ् ।

कर्मणि कृञः खमुञ् स्यादाक्रोशश्चेत् । चौरङ्कारमाक्षिपति । "तं भीतङ्कारमाक्रुश्य राघवः प्रत्यभाषत ।"

---

(64) एवं—दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् । पूर्वं मधुजितो राज्ञो हृदयेऽपि विरोधित इति सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे इति कालिदासस्य, निरीक्ष्य संरम्भनिरस्तधैर्यं भावेन मन्त्रीरपि पक्षपात इति भारवेः, रघौ च वामनं हृत्वा पुनर्जन्म न विद्यत इत्यादिष प्रयोगः समर्थितः ।

२६ । स्वादुमि णमुल् ।

स्वाद्वर्थोपपदात् कृञो णमुल् स्यात् । स्वादुङ्कारं भुङ्क्ते । निपातनादनुस्वारः । मिष्टंकारं भुङ्क्ते ।

२७ । अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ।

एषु कृञो णमुल् स्यात् सिद्धश्चेदप्रयोगः करोतेः । व्यर्थत्वात् । अन्यथा भुङ्क्ते अन्यथाकारं भुङ्क्ते । एवंकारं वक्ति । कथङ्कारमागच्छति । इत्थंकारं शेते । सिद्धाप्रयोगे किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते ।

२८ । यथातथयोरसूयाप्रतिवचने ।

यथातथयोर्योगेऽसूयोक्तौ कृञः स स्यात् । यथाकारं तथाकारं भुङ्क्ते किं तवानेन ? यथातथयोरिति सौत्रो निर्देशः ।

२९ । कर्मणि दृशिविदोः साकल्ये ।

साकल्यवति कर्मणि दृशिविदोः स स्यात् । ब्राह्मणदर्शं प्रणमति । भिक्षुवेदं भोजयति । सर्वान् भिक्षूनित्यर्थः । कर्मणि विधिः प्राक् करणे हनः (३।४।३७) ।

३० । यावति विन्दजीवोः ।

एतयोः स स्यात् । यावज्जीवमधीते । यावद्वेदं भुङ्क्ते ।

३१ । चर्मोदरयोः पूरेः ।

अनयोः पूरेः स स्यात् । चर्मपूरं तिलान् ददाति । उदरपूरं भुङ्क्ते ।

३२ । वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ।

वृष्टिप्रमाणगतौ पूरेः स स्यादूकारलोपश्च वा । गोष्पदप्रं गोष्पदपूरं वा वृष्टो देवः ।

३३ । चेले क्नोपेः ।

चेलार्थोपपदे क्नोपेः स स्याद्वर्षप्रमाणे । वस्त्रक्नोपं वृष्टो देवः ।

३४ । निमूलसमूलयोः कषः ।

अनयोः कषेः स स्यात् । निमूलकाषं कषति । "समूलकाषं चखषु वदन्तः ।"

३५। शुष्कचूर्णरूक्षेषु पिषः।

एषु पिषेः स स्यात्। शुष्कपेषं पिनष्टि। चूर्णपेषम्। रूक्षपेषम्।

३६। समूलाकृतजीवेषु हन्कृञ्ग्रहः।

समूलादिषु हनादेः स स्यात्। "समूलघातं न्यवधीदरीन्" । समूलं न्यवधीदित्यर्थः। कषादयो हि गतार्था एव। सर्वत्रानुप्रयुज्यन्त इति। अकृतकारं करोति। जीवग्राहं गृह्णाति। उक्तं कर्मणि।

३७। करणे हनः।

करणोपपदाद्धन्तेः स स्यात्। पाणिघातं हन्ति। पाणिना हन्तीत्यर्थः। शरघातमरीन् हन्ति।

३८। स्नेहने पिषः।

स्नेहने करणे पिषेः स स्यात्। घृतपेषं पिनष्टि घृतेन पिनष्टीत्यर्थः। तैलपेषम् पिनष्टि।

३९। हस्ते वर्त्तिग्रहोः।

हस्ते करणे वर्त्तिग्रहोः स स्यात्। हस्तवर्त्तं वर्त्तयति। करवर्त्तं वर्त्तयति। हस्तग्राहं गृह्णाति। पाणिग्राहं गृह्णाति।

४०। स्वे पुषः।

आत्मात्मीयधनज्ञातिवाचिन्युपपदे करणे पुषेः स स्यात्। स्वेनापुषत् स्वपोषमपुषत्। आत्मीयपोषं रैपोषम् आत्मपोषं गोपोषं धनपोषम् पितृपोषम् बन्धुपोषं वा पुष्णाति।

४१। अधिकरणे बन्धः।

४२। संज्ञायाम्।

आधारोपपदाद् बध्नातेः स स्यात्। गुप्तौ बध्नाति गुप्तिबन्धं बध्नाति। चक्रे बध्नाति चक्रबन्धं बध्नाति। इहतु मयूरिकाबन्धं बद्धाऽट्टालिकाबन्धं बद्धोऽट्टालिकाबन्धं बद्ध इत्युपमाने कर्मणि चेति (३।४।४५) णमुलिति भाष्यम्।

४३ । कर्त्रोर्जीवपुरुषयोर्नशिवहोः ।

जीवे पुरुषे च कर्त्रर्य्युपपदे नशिवहिभ्यां स स्यात् । जीवनेव नष्टो जीवनाशं नष्टः । पुरुषः सन् वहति पुरुषवाहं वहति ।

४४ । ऊर्द्ध्वे शुषिपूरोः ।

ऊर्द्ध्वे कर्त्तरि शुषिपूरोः स स्यात् । ऊर्द्ध्वः शुष्यति ऊर्द्ध्वशोषं शुष्यति । ऊर्द्ध्वपूरं पूर्य्यते ।

४५ । उपमाने कर्मणि च ।

उपमाने कर्मणि कर्त्तरि च धातोः स स्यात् । कर्मणि । रत्ननिधायं निहितः । घृतविलायं विलीनः । कर्त्तरि । मृगनाशं नष्टः । अजकनाशं नष्टः ।

४६ । कषादिषु यथाविध्यनुप्रयोगः ।

निमूलसमूलयोः कष (३।४।३४) इत्यादिषु यथाप्रकृतेरेवानुप्रयोगः कार्य्यः । तथैवोदाहृतम् । स च क्रियासमभिहारानुप्रयोगवद् व्यवधानेऽपि भवति यथा घृतनिधायमुदकं निदधातीति भागवृत्तिः ।

४७ । उपदंशस्तृतीयायाम् ।

तृतीयान्तोपपदादुपदंशः स स्यात् । मूलकेनोपदंशं मूलकोपदंशं वा भुङ्क्ते । इतः प्रभृति विकल्पेनोपपदसमासः । मूलकेनोपदंशं भुङ्क्ते इति वा ।

४८ । हिंसार्थानाञ्च समानकर्मकाणाम् ।

तृतीयान्तोपपदे हिंसार्थात् स स्यात् । दण्डोपघातं गाः कालयति (65) । दण्डेनोपघातं वा । समानकर्मकाणां किम् ? दण्डेनाहत्य व्याघ्रं गाः कालयति ।

४९ । सप्तम्याञ्चोपपीडरुधकर्षः ।

सप्तम्यन्ते तृतीयान्ते चोपपदे उपपूर्वात् पीडे (66) रुधिकर्षिभ्याञ्च स

(65) द्रावयतीत्यर्थः ।

(66) उपशब्देन केवलं पीडेरेव योग इति भागवृत्तौ भर्तृहरिः । प्रत्येकं योग इति जयादित्यजिनेन्द्रहरदत्तमाधवप्रभृतयः । तथाच धातुवृत्तौ माधवः—'अत्र वस्तुविधौ उपसर्गवत्त्वं पीडेरेव विशेषणमिति भागवृत्ती । भट्टिकारस्तत्तत्र मन्यते तथाच मधुरैरिभरक्षस्तां तुष्टिपीडं दधान इति । एवं

स्यात्। पार्श्वोपपीडं शेते। पार्श्वयोरुपपीडं वा। स्तनोपपीडमाश्लिष्यति। स्तनाभ्यामुपपीड्य वा। एवं हस्तरोधं दधद्गुरिति भट्टिः। पाणिकर्षं वट-कानत्ति। पाणिना कर्षं वा। विशेषानुपादानात् पाण्युपकर्षम्। (67)

५०। समासत्तौ।

सन्निधानगतौ तृतीयासप्तम्यन्तोपपदाद्धातोः स स्यात्। केशग्राहं युध्यन्ते। केशैर्ग्राहं केशेषु ग्राहं वा।

५१। प्रमाणे च।

आयामगतौ पूर्वोक्तोपपदात् स स्यात्। द्व्यङ्गुलोत्कर्षं खण्डिकां (68) छिनत्ति। "द्व्यङ्गुलोत्कर्षमङ्गानि च्छिन्दानो द्विषतां युधि।"

५२। अपादाने परीप्सायाम्।

अपादानोपपदाद्धातोस्त्वरायां स स्यात्। शय्योत्थायं भुङ्क्ते।

५३। द्वितीयायाञ्च।

कर्मोपपदाद्धातोस्त्वरायां स स्यात्। लोष्टग्राहं युध्यन्ते। इह त्वराया-मिति नानुवर्त्तत इत्याहुः। तेनैकवर्जमिति (३।१।१५८) णमुल् सिध्यति।

५४। स्वाङ्गेऽध्रुवे।

स्वाङ्गे कर्मणि धातोः स स्यात्। अक्षिनिकोचं हसति। भ्रूविक्षेपं वक्ति। अध्रुवे किम्? उत्क्षिप्य शिरः कथयति। यत्र च्छिन्ने प्राणी म्रियते तद् ध्रुवम्।

तावत् साहसमात्रं यदाचार्य्यैरप्रयुक्तत्वात्तत्स्वीकरणम्। यदपि पीडिनैव सम्बन्धकथनं तदपि न व्याय्यम्। बहुव्रीहौ पूर्वनिपातायोगात्। अतएव वृत्तिन्यासपदमञ्जर्य्यादिषु सम्बन्धोऽङ्गीकृतः।" इति। अतएवाह हरिदीक्षितः—"अशुररभिरसञ्ज्ञं क्षुटिपीडं दधान इति भट्टिप्रयोगे तु न बहुव्रीहिः। किन्तु णमुलन्तम्। क्रियाविशेषणत्वाच्च द्वितीयेति बोध्यम्।" इति (शब्दरत्ने)। किञ्च गाढ़पपीडमालिङ्ग्य अमरैर्या निशाचर इति भट्टी बहुव्रीहिः। दण्डिनि च—"तृणमिव संहितोरुमूलपपीडं मुखोपपीडपोपगृह्य तस्योऽभिरमयन्त्याभिव तां निद्रामलम्भेयम्।" इति (दशकुमारचरिते।) यो रवे द्रुपदस्यानो हस्तरोधं दधद्गुरिति च भट्टिप्रयोगो भाषावृत्तिमतसंवादी। पुरुषोत्तमेन च भर्तृहरिमतमेवानुसृतम्।

(67) "पाणिभ्यामुपकर्ष्य हन्त स कथं कण्ठे तथा नार्पित इति क्वापि काव्येऽपि भाषावृत्त्यभिमतो हरिदत्तप्रयोगः।

(68) खण्डी खण्डो खण्डी। खण्डेव खण्डिकेति हरिदत्तः। क्वचित्तु खण्डिकामिति पाठः।

५५ । परिक्लिश्यमाने च ।

क्लेशिनि स्वाङ्गे कर्मणि स स्यात् । उरःप्रतिपेषं युध्यन्ते । कृत्स्नार्थोऽयं योगः ।

५६ । विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ।

कर्मण्युपपदे विश्यादेः स स्याद् द्रव्यस्य व्याप्तिः क्रियायाश्च नित्यता चेत् । गेहप्रवेशमास्ते । "लतानुपातं कुसुमान्यगृह्णात् ।" मण्डपानुप्रपादमास्ते । नद्यवस्कन्दमाचामति । असमासे तु नित्यवीप्सयो (८।१।४) रिति द्विरुक्तिः । गेहं गेहं प्रवेशमिति गेहं प्रवेशं प्रवेशमिति वेत्यादि ।

५७ । अस्यतितृषोः क्रियान्तरे कालेषु ।

काले कर्मणि क्रियाव्यवधायकेऽस्यतितृषिभ्यां स स्यात् । द्व्यहात्यासं गाः पाययति । द्व्यहतर्षम् । द्व्यहमतिक्रम्येत्यर्थः ।

५८ । नाम्न्यादिशिग्रहोः ।

नाम्नि कर्मण्यादिशिग्रहिभ्यां स स्यात् । नामादेशमाचष्टे । नामग्राहं स्तौति ।

५९ । अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ।

अव्ययोपपदात् कृञः क्त्वाणमुलौ स्यातामनिष्टाख्यानश्चेत् । ब्राह्मण पुत्रस्ते जातः । किं तर्हि वृषलो नीचैःकृत्वाचष्टे ? नीचैःकारं वा । उच्चैर्हि प्रियाख्यानं युक्तम् । "आवेदयन्तः क्षितिपालमुच्चैःकारं मृतं रामवियोगशोकात् ।" उच्चैःकृत्य वा । नीचैरिहाप्रियाख्यानं युक्तम् ।

६० । तिर्य्यच्यपवर्गे ।

तिर्य्यगुपपदात् कृञस्तौ स्यातां समाप्तौ । तिर्य्यक्कृत्य गतः । तिर्य्यक्कारं वा । समाप्येत्यर्थः ।

६१ । स्वाङ्गे तस्प्रत्यये कृभ्वोः ।

तस्प्रत्ययान्ते स्वाङ्गे उपपदे कृभूभ्यां तौ स्याताम् । मुखतःकृत्य गतः । मुखतःकारं वा । पृष्ठतोभूय पृष्ठतोभावं वा ।

६२ । नाधार्थप्रत्यये च्व्यर्थे ।

नार्थे धार्थे च च्व्यर्थे उपपदे कृभूभ्यां तौ स्याताम् । नानाकृत्य गतः । नानाकारं वा । नानाभूय नानाभावं वा । धार्थे । द्विधाकृत्य द्विधाकारं वा । द्वैधंभावं द्वैधम्भूय वा । प्रत्ययग्रहणं किम् ? पृथक् कृत्वा ।

६३ । तूष्णीमि भुवः ।

तूष्णींशब्द उपपदे भुवस्तौ स्याताम् । तूष्णीम्भूयास्ते । तूष्णीम्भावं वा ।

६४ । अन्वच्यानुलोम्ये ।

अन्वगुपपदाद् भुवस्तौ स्यातामानुकूल्यञ्चेत् । अन्वग्भूयास्ते । अन्वग्भावं वा । उक्तानि तृतीयाप्रभृतीनि यान्यमा क्त्वाप्रत्ययेन च वा समस्यन्ते ।

६५ । शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ।

शकाद्यर्थोपपदाद् धातोस्तुमुन् स्यात् । शक्नोति भोक्तुं बालकः । अर्हति दातुम् । अस्ति भोक्तुम् । विद्यते भोक्तुम् । अक्रियार्थोपपदार्थोऽयं विधिः ।

६६ । पर्य्याप्तिवचनेष्वलमर्थेषु ।

पर्य्याप्तिः परिपूर्णता । तद्वचनेष्वलमर्थविशिष्टेषु धातोस्तुमुन् स्यात् । अलं भोक्तुम् । पारयति दातुम् । पर्य्याप्तिवचनेषु किम् ? अलं भुक्त्वा । अलं कृत्वा । गतं धातुसम्बन्धतुमर्थाभ्याम् ।

६७ । कर्त्तरि कृत् ।

अनुक्तार्थाः कृतः कर्त्तरि स्युः । ओदनस्य पाचकः । पक्तवान् । नन्दनः । ग्राही । पचः ।

(क) अव्ययकृतो भावे भवन्तीत्युक्तम् ।

६८ । भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ।

एतेते कर्त्तरि वा स्युः । भव्योऽयम् । भव्यमनेन । गेयोऽयं साम्नाम् । गेयान्यनेन सामानि ।

६९। क्तः कर्मणि च भावे चाकर्मकेभ्यः।

क्तकाराः कर्त्तरि स्युः कर्मणि च। पचं पचति। पच्यतेऽन्नम्। अकर्मकेभ्यो भावे कर्त्तरि च। ग्लेते विप्रः। ग्लायते विप्रेण।

७०। तयोरेव कृत्यक्तखलर्थाः।

एते भावकर्मणोरेव स्युः। कर्त्तव्यः कटोऽनेन। कार्य्यः। कृतः। खलर्थे। ईषत्करः। अकर्मकाद् भावे। भवितव्यमनेन। भूतम्। दुराढ्यम्भवम्। ईषदाढ्यम्भवम्।

७१। आदिकर्मणि क्तः कर्त्तरि च।

क्रियारम्भे क्तः कर्त्तरि स्यात्। भावकर्मणोश्च। प्रभुक्त ओदनं विप्रः। प्रभुक्त ओदनो विप्रेण।

७२। गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च।

एभ्यः क्तः कर्त्तरि स्यात्। ग्रामं गतः पान्थः। प्रस्थितः। यातः। अकर्मकात्। आसितः। स्थितः। आङ्पूर्वश्लिषादेः। आश्लिष्टः कान्ताम्। अतिशयितो गुरुम्। उपास्थितस्तम्। उपासितस्तम्। अनूषितस्तम्। अनुजातस्तम्। आरूढस्तरुम्। अनुजीर्णस्तम्। चकाराद् यथाप्राप्तञ्च। गतो ग्रामोऽनेन। गतमनेन। चकारोऽत्रानुवर्त्तते। ततोऽधिकविधानाद् व्यवसितप्रतिपन्नादिसिद्धिः। (69)

७३। दाश्वगोघ्नौ संप्रदाने।

एतावत्र निपात्येते। गुणवान् ब्राह्मणो दाशः (70)। गोघ्नोऽतिथिः।

७४। भीमादयोऽपादाने।

एतेऽत्र साधवः स्युः। भीमः। भीष्मः। भयानकः। रुक्षः। चयतिः। रुच्यः। प्रपतनः। समुद्रः।

७५। ताभ्यामन्यत्रोणादयः।

सम्प्रदानापादानाभ्यामन्यत्रोणादयो ज्ञेयाः। कृत्तं वर्त्म। भषितं भस्म।

---

(69) व्यवसितप्रतिपन्नादिसिद्धिरिति पाठान्तरम्।

(70) दाश दाने इत्यस्य दीयतेऽस्मायिति दाशस्य: सम्प्रदाने

७६ । क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ।

एभ्योऽधिकरणे क्तः स्यात् । चकाराद् यथाप्राप्तञ्च । ध्रौव्यार्था अकर्मकाः । इदमेषामासितम् । इहानेनासितम् । अयमनासितः । इदमहेः सृप्तम् । इदमहिना सृप्तम् । अयमहिना सृप्तो देशः । इहाहिः सृप्तः । भक्ष्यार्थात् । इदमस्य भुक्तं स्थानम् । इहानेन भुक्तम् । भुक्तोऽनेनौदनः । इह च विभक्ता भ्रातरो भुक्ता ब्राह्मणाः पीता गाव इति भावक्तान्तान् मत्वर्थीयोऽकारः । (71) उक्ताः क्ताः ।

७७ । लस्य ।

अधिकारोऽयम् ।

७८ । तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ।

लस्य स्थानेऽमी तिबादयः स्युः । भवति भवतो भवन्ति । पचते पचेते पचन्ते । भूयते भावे । पच्यते कर्मणि । एवं लिङादावूह्यम् ।

७९ । टित आत्मनेपदानां टेरे ।

टित्लकारात्मनेपदे टिभागस्यैकारादेशः स्यात् । पचते । पचन्ते । पेचाते । पक्तासाथे । पक्ष्यते । कथं पचमानः ? प्रकृतस्य तङो ग्रहणात् ।

८० । थासः से ।

टित्लकारस्य थासः सेः स्यात् । पचसे । क्रियसे ।

८१ । लिटस्तझयोरेशिरेच् ।

लिटो यौ तझौ तयोरेशिरेचौ स्याताम् । पेचे । पेचिरे ।

८२ । परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ।

लिटः परस्मैपदानां णलादयः स्युः । यथान्तरतम्येन स्थान्यादेशव्यवस्था ।

---

(71) एतच्च न सर्वैर्विज्ञो विदितः समासप्राप्तिरिति प्रातु न शक्तं व्यवस्यति अतः कुशाग्रधीषु पीतादि प्रवीणाः समासेषा इत्याहुः ।

शब्दसाम्याभावात्। चकार चक्रतुश्चक्रुः। चकर्थ चक्रथुः। चस्यान्तादेशे प्रयोजनाभावात् सर्वादेशोऽकारः। चक्र। चकार चकर चकृव चकृम।

८३। विदो लटो वा।

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः। वेद विदतुर्विदुः। वेत्थ विदथुर्वेद। वेद विद्व विद्म। पक्षे वेत्ति वित्तः विदन्तीत्यादि।

८४। ब्रुवःपञ्चानामादित आहो ब्रुवः।

ब्रूञो लटः परस्मैपदादिपञ्चकस्य पक्षेव णलादयो वा स्युः। ब्रुवश्चाहादेशः। आह। आहतुः। आहुः। आत्थ। आहथुः। पक्षे ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रवीषि। ब्रूथः।

८५। लोटो लङ्वत्।

लोटो लङ्वत् कार्यं स्यात्। तांतंतसलोपश्च। पचताम्। पचतम्। पचत। पचाव। पचाम।

८६। एरुः।

लोटिकारस्य उः स्यात्। पचतु। पचन्तु।

(क) छिन्योरुत्वप्रतिषेधो वक्तव्यः। सुनीहि। कारयाणि। पचानि।

८७। सेर्ह्यपिच्च।

लोटः सिपो हिः स्यात्। स चापित्। लुनीहि। राध्नुहि।

८८। वा छन्दसि।

छान्दसम्।

८९। मेर्निः।

लोटो मिपो निः स्यात्। भवानि। पचानि।

९०। आमेतः।

लोट एकारस्याम् स्यात्। ब्रुवताम्। कुर्वाताम्।

९१। सवाभ्यां वामौ।

लोटः सवाभ्यामेकारस्य वामौ स्याताम्। आर्ये ब्रुवस्व। कुरुध्वम्।

९२ । आडुत्तमस्य पिच्च ।

लोडुत्तमपुरुषस्याडागमः स्यात् । स च पित् । करवाणि । तनवानि । करवाव । तनवाव ।

९३ । एत ऐ ।

लोडुत्तमपुरुषस्य एत ऐकारादेशः स्यात् । आमपवादः । तनवै । तनवावहै । अत्र लेटः पञ्चसूत्री छन्दोभागः (72) ।

लोपः परस्मैपदेषु (३।४।९७)। स उत्तमस्ये-(३।४।९८)त्येतद्द्वयमधिक्रियते ।

९९ । नित्यं ङितः ।

ङितो लकारस्योत्तमपुरुषसकारस्य लोपः स्यात् । नित्यग्रहणमेक-श्रुतौ (73) सार्थकम् । अपचाव । अपचाम । पचेव । पचेम । अपाक्ष्व । अपाक्ष्म । अपक्ष्याव । अपक्ष्याम ।

१०० । इतश्च ।

ङिल्लकारस्येकारस्य लोपः स्यात् । अपचत् । पचेत् । अपचः । परस्मै-पदेष्वित्येव । अपचावहि ।

१०१ । तस्थस्थमिपां तान्तन्तामः ।

ङिल्लकारस्य तसादेस्तामादयः स्युः । अपचताम् । अपचतम् । अपचत । अपचम् ।

१०२ । लिङः सीयुट् ।

लिङः सीयुडागमः स्यात् । कुर्वीत । कुर्वीयाताम् । पक्षीष्ट । पक्षीयास्ताम् ।

---

(72)। इयञ्च सा पञ्चसूत्री—

९४ । लेटोऽडाटौ । ९५ । आत ऐ । ९६ । वैतोऽन्यत्र । ९७ । इतश्च लोपः परस्मैपदेषु । ९८ । स उत्तमस्य ।

(73) एकश्रुती पृथक्श्रुती यथाक्रमं यत्र छान्दसलौकिकभावौ त्रिविधेति इति यावत्। छन्दसि लोपस्य पाक्षिकत्वाद् भाषायान्तु नित्यत्वात्। लौकिकलौकिकश्रुतौ तु नित्यग्रहणं निरर्थकमिति भावः। Vide the note on 1. 1. 16.

१०३। यासुट् परस्मैपदेषूदात्तो ङिच्च।

लिङः परस्मैपदेषु यासुडागमः स्यात्। स च ङित्कार्य्यं करोति। कुर्य्यात्। कुर्य्याताम्। कुर्य्युः। क्रियात्। क्रियास्ताम्। क्रियासुः।

१०४। किदाशिषि।

आशिषि लिङो यासुट् कित् स्यात्। इज्यात्। जागर्य्यात्। आशिषि किम्? विध्यादौ। यजेत्। जागृयात्।

१०५। झस्य रन्।

लिङो झस्य रन् स्यात्। पचेरन्। कुर्वीरन्। कृषीरन्।

१०६। इटोऽत्।

लिङ इटोऽत् स्यात्। कुर्वीय। कृषीय।

१०७। सुट् तिथोः।

लिङस्तथयोः सुडागमः स्यात्। कृषीष्ट। कृषीष्ठाः।

१०८। झेर्जुस्।

लिङो झि जुस् स्यात्। पचेयुः। पच्यासुः।

१०९। सिजभ्यस्तविदिभ्यश्च।

एभ्यः परस्य ङित्सकारस्य झेर्जुस् स्यात्। सिच्। अकार्षुः। अभ्यस्तात्। अजागरुः। विदेः। अविदुः।

११०। आतः।

आदन्तादेव सिज्लुगन्ताज् झेर्जुस् स्यात्। अदुः। अधुः। नेह। अभूवन्।

१११। लङः शाकटायनस्यैव।

११२। द्विषश्च।

आदन्ताद् धातो र्द्विषेश्च परस्य लङः शाकटायनस्य मतेन झेर्जुस् स्यात्। अदुः। अयुः। अद्विषुः। अन्येषाम्। अयान्। अवान्। अद्विषन्। उक्तास्तिङः।

११३ । तिङ् शित् सार्वधातुकम् ।

तिङ् शिच्च प्रत्ययः सार्वधातुकनामा स्यात् । नयति । रोदिति । पच्यते । ऋतुपिबः । मूरूमन्यः । कुर्वाणः । कुर्वन् ।

११४ । आर्द्धधातुकं शेषः ।

धातोरित्येवं (३।१।७) विहितस्तिङ्शिद्भ्यामन्यः शेष आर्द्धधातुकनामा स्यात् । भविता । भविष्यति । भवितव्यम् । भवितुम् ।

११५ । लिट् च ।

एवकारोऽनुवर्त्तते । लिडादेश आर्द्धधातुकसंज्ञ एव स्यात् । पेचिथ । शेकिथ । जग्ले ।

११६ । लिङाशिषि ।

आशीर्लिङार्द्धधातुकसंज्ञ एव स्यात् । पविषीष्ट । आशिषि किम् ? पुनीयात् ।

११७ । छन्दस्युभयथा ।

छान्दसम् । उक्तं धातोः (३।१।७) ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ तृतीयाध्यायस्य चतुर्थः पादः ॥ ३।४ ॥ समाप्तश्च तृतीयोऽध्यायः ।

धातुसम्बन्धपादश्च समाप्तः ।

अथ

भाषावृत्तिः ।

चतुर्थोऽध्यायः । प्रथमः पादः ।

१ । ङ्याप्प्रातिपदिकात् ।

स्वादिटाबादितद्धितानां प्रकृतिरधिक्रियते ।

२ । स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ।

एते सुपो ङ्यन्ताबन्तप्रातिपदिकेभ्यः परे स्युः । नदी नद्यौ नद्यः । रामा रामे रामाः । वृक्षः वृक्षौ वृक्षाः ।

३ । स्त्रियाम् ।

अधिकारोऽयम् । समर्थानां प्रथमाद्वेति (४।१।८२) यावत् ।

४ । अजाद्यतष्टाप् ।

अजादेर्गणादकारान्ताच्च स्त्रियां टाप् स्यात् । अजा । अश्वा । कोकिला जातिः । पूर्वेणायना टित् । ज्येष्ठा कनिष्ठा मध्यमा पुंयोगे । दंष्ट्रा ।

(1) सम्भस्त्राजिनशणपिण्डेभ्यः फलात् । सम्फलेत्यादि ।

(2) सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात् । सत्पुष्पा । एकपुष्पा ।

(3) शूद्रा चामहत्पूर्वा जातिः । महत्पूर्वस्य तु महाशूद्री ।

(4) मूलान्नञः । अमूला । अजादिपाठोऽयं जात्यादिलक्षणङीषादेर्बाधकः ।

अदन्तात् । खट्वा । देवदत्ता । तपरः किम् ? यंखाः कौ ।

५ । ऋन्नेभ्यो ङीप् ।

ऋकारनकारान्तेभ्यः स्त्रियां ङीप् स्यात् । कर्त्री । दण्डिनी ।

६। उगितश्च।

उगितो ङीप् स्यात्। गोमती। श्रेयसी। पचन्ती। अतिभवती।

(क) धातोरुगितः प्रतिषेधः। उखास्रत्। पर्णध्वत्।

(ख) अञ्चतेश्चोपसंख्यानम्। प्राची। प्रतीची।

७। वनो र च।

वन्नन्ताद् ङीप् स्याद्रश्चान्तादेशः। धीवरी। पीवरी। परलोकदृश्वरी। स्वर्लोकदृश्वरी। सहकृत्वरी। सुत्वरी। कथमतिशुनी निःशुनी? अर्थवद्ग्रहणात्।

(क) वनो न हश इति वक्तव्यम्। हशः परो यो वंस्तदन्तान् ङीब्रौ न स्तः। राजयुध्वा स्त्री। शर्वरीशब्दस्त्वौणादिको वरट्प्रत्ययान्तः।

८। पादोऽन्यतरस्याम्।

पादन्तान् ङीप् स्याद्वा। द्विपदी द्विपाद्वा।

९। टाबृचि।

ऋच्यर्थे पादन्तात् टाप् स्यात्। द्विपदा त्रिपदा ऋक्।

१०। न षट्स्वस्रादिभ्यः।

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च (1) स्त्रीप्रत्ययौ न स्यात्। पञ्च स्त्रियः। एवं सप्त। नव। कति। तदन्तेऽपि निषेधः। प्रियपञ्चानो वेश्याः। स्वस्रादेः। स्वसा। तिस्रः। चतस्रः। ननान्दा। दुहिता। याता। माता। नप्तेति भागुरिः। (2)

११। मनः।

मन्नन्तान् ङीब्न स्यात्। पामा। पामानौ। सीमा। सीमानौ। तदन्तेऽपि। अतिपटिमा। अतिपटिमानौ।

---

(1) "स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा। याता मातेति सप्तैते स्वस्रादय उदाहृताः॥" इति।

(2) अन्ये तु नप्त्रीति। यथाऽमरः—नप्त्री पौत्री सुतात्मजेति।

१२। अनो बहुव्रीहेः।

अन्नन्ताद् बहुव्रीहेर्ङीन्न स्यात्। सुपर्वा। सुपर्वाणौ। बहुव्रीहेः किम्? सुराज्ञी। (3)

१३। डाबुभाभ्यामन्यतरस्याम्।

मन्नन्तादनन्ताच्च बहुव्रीहेर्डाब् वा स्यात्। सीमाः सीमानः। सुपर्वाः सुपर्वाणः। अनिनस्मन्ग्रहणेष्वर्थवद्ग्रहणाभावात्। सुपटिमाः सुपटिमानः स्त्रियः। निर्गरिमाः निर्गरिमाणः। अन्यतरस्यांग्रहणाड् डाप्प्रतिषेधाभ्यां मुक्ते ङीब्नाविति भाष्यम्। बहुसुत्वरी नगरी।

१४। अनुपसर्जनात्।

वक्ष्यमाणस्त्रीप्रत्यय उपसर्जनान्न स्यात्। बहुकुरुचरा नगरी। बहुकुरुकुटा अटवी।

१५। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपख्युनाम्। (4)

एतदन्तेभ्यः स्त्रियां ङीप् स्यात्। टित्। कुरुचरी। गायनी। सायन्तनी। टित्त्वसामर्थ्याद् नदट् नदी। घेट् स्तनन्धयी। ढः। वैनतेयी। अण्। कुम्भकारी। भङ्कारी सेना। औपगवी। अञ्। औत्सी। बैदी। द्वयसच्। जानुद्वयसी। दघ्नच्। जानुदघ्नी। मात्रच्। जानुमात्री। तयप्। द्वितयी। द्वयी। उभयी। पञ्चतयी। ठक्। आक्षिकी। ठञ्। लावणिकी। कञ्। यादृशी। तादृशी। क्वरप्। नश्वरी। जित्वरी। गत्वरी। ख्युन्। सुभगङ्करणी।

(क) नञ्स्नञीकक्ः। स्त्रैणी। पौंस्नी। शाक्तीकी। तार्त्तीयीकी। द्वैतीयीकी। तीयादीकक् (४।२।७, वा)।

१६। यञश्च।

अपत्ययञन्तान् ङीप् स्यात्। गार्गी। वात्सी।

---

(3) एवमतिपर्वणी नि:श्रमंणीत्यादयोऽपि तत्पुरुष एवेति।

(4) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप इत्येतावत् सूत्रम्। ख्युनामिति तु शेषः प्रक्षिप्तम्।

१७। प्राचां ष्फ स्तद्धितः।

यञन्तात् तद्धितसंज्ञकः ष्फः स्यात्। षित्त्वान् ङीष्। गार्ग्यायणी। वात्स्यायनी। प्राचां किम्? गार्गी। वात्सी।

१८। सर्वत्र लोहितादिकतन्तेभ्यः।

गर्गाद्यन्तर्गणाल्लोहितादेः कतशब्दान्ताद् यञन्तान् नित्यं ष्फः स्यात्। लौहित्यायनी। सांशित्यायनी। कात्यायनी। सर्वत्रग्रहणाच्छाब्दविषयेऽपि। आवट्यायनीति स्मृतिः।

१९। कौरव्यमाण्डूकाभ्यां च।

ण्यान्तात् कुरुशब्दादपत्याणन्ताच्च मण्डूकात् ष्फः स्यात्। कौरव्यायणी। माण्डूकायनी। तस्येद (४।३।१२०) मित्यणन्तात्तु कौरवी सेना। माण्डूकी भार्य्या।

(क) इञन्तादासुरेरुपसंख्यानम्। आसुरायणी कन्या। ष्फस्य तद्धितत्वे यस्येति चेति (६।४।१४८) लोपः।

२०। वयसि प्रथमे।

प्रथमवयोवचनान् ङीप् स्यात्। प्रथमग्रहणमचरमोपलक्षणार्थम् (5)। कुमारी। वर्करी। तरुणी। वधूटी। चिरण्टी। कथं कन्या? निपातनात्।

२१। द्विगोः।

द्विगो ङींप् स्यात्। पञ्चपूली। त्रिलोकी। षड्नगरी। त्रिफलेति तु वैयाकरणैः।

२२। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि।

एतदन्ताद् द्विगोस्तद्धितलुकि ङीम् न स्यात्। अपरिमाणान्तात्। पञ्चभिरश्वैः क्रीता पञ्चाश्वा। त्रिशता। द्विवर्षा। कालः संख्या च न परिमाणम्। विस्ताद्यन्तात्। द्विविस्ता। दशाचिता। त्रिकम्बल्या। तद्धित-लुकि किम्? समाहारे दशशती।

---

(5) "बाल्यं स्यात् पञ्चमाब्दान्तं पौगण्डं दशमावधि। कैशोर मा पञ्चदशाद यौवनं स्याद ततः परम्॥"

२३। काण्डान्तात् क्षेत्रे।

काण्डान्ताद् द्विगोस्तद्धितलुकि ङीप् न स्यात्। द्वे काण्डे प्रमाणमस्याः। द्विकाण्डा क्षेत्रभक्तिः। प्रमाणे लो द्विगो (५।२।३७, वा) रिति मात्रचो लुक्। क्षेत्रे किम्? द्विकाण्डी रज्जुः।

२४। पुरुषात् प्रमाणेऽन्यतरस्याम्।

पुरुषात् प्रमाणार्थाद् द्विगोस्तद्धितलुकि ङीप् वा स्यात्। द्विपुरुषी द्विपुरुषा वा परिखा।

२५। बहुव्रीहेरूधसो ङीष्।

ऊधसन्ताद्बहुव्रीहेर्ङीष् स्यात्। डाप्-प्रतिषेध-ङीपां बाधा। कुण्डोध्नी। घटोध्नी।

२६। संख्याव्ययादेर्ङीप्।

एतदादेर्बहुव्रीहेरूधसन्तान् ङीप् स्यात्। चतुरूध्नी। निरूध्नी। स्वरे भेदः।

२७। दामहायनान्ताच्च।

संख्यादेरित्येव। दामहायनान्ताद् बहुव्रीहेर्ङीप् स्यात्। द्विदाम्नी। त्रिदाम्नी। हायनान्ताद्वयस्यभिधानम्। त्रिचतुर्भ्यां णत्वञ्च। द्विहायनी। त्रिहायणी। चतुर्हायणी।

२८। अन उपधालोपिनोऽन्यतरस्याम्।

उपधालोपयोग्यादन्नन्ताद्बहुव्रीहेर्वा ङीप् स्यात्। सुराज्ञी। बहुतक्ष्णी। सुदाम्नी। भूरिधाम्नी विद्या। ङीपा मुक्ते डाप्-प्रतिषेधौ। सुराजे सुराजाना-विति। उपधालोपिनः किम्? सुपर्वाणौ सुपर्वे।

२९। नित्यं संज्ञाच्छन्दसोः।

ङीप् स्यात्। सुराज्ञी नाम नगरी। छन्दसि नोदाह्रियते।

३०। केवलमामकभागधेयपापापरसमानार्य्यकृतसुमङ्गल-भेषजाच्च।

एभ्यो नवभ्यः संज्ञायां ङीप् स्यात्। केवली नाम ज्योतिः। मामकी

देवता । पापी । अपरी । समानी छन्दः । सुमङ्गली । संज्ञायामित्येव । मामिका बुद्धिः । सुमङ्गला नारी ।

३१ । रात्रेश्चाजसौ ।

रात्रिशब्दात् संज्ञायां ङीप् स्यात् । रात्री । अजसौ किम् ? रात्रयः ।

(क) अजसादिष्विति वक्तव्यम् । रात्रिम् । रात्रिभिरित्यादि । कथं तिमिरपटलैरवगुण्ठिताश्च रात्र्य इति ? कृदिकारादिति (४।१।४५, ग, सू) ङीष् ।

३२ । अन्तर्वत्पतिवतोर्नुक् ।

अनयो ङीप् स्यान्नुगागमश्च । मतोर्वत्वञ्च निपातनात् । अन्तर्वत्नी गर्भिणी । पतिवत्नी सभर्तृका ।

३३ । पत्युर्नो यज्ञसंयोगे ।

पत्युर्ङीप् स्यान्नकारान्तादेशो यज्ञसंयोगश्चेत् । पत्नी ब्राह्मणस्य । कथं पत्नी शूद्रस्येति ? उपमानात् । (6)

३४ । विभाषा सपूर्वस्य ।

सपूर्वपदस्य पत्युर्ङीन्नकारौ वा स्याताम् । दृढपत्नी दृढपतिः । "दृष्टा मया रामपतिः प्रमन्युः ।"

३५ । नित्यं सपत्न्यादिषु ।

एषु नित्यं ङीम्नकारौ स्याताम् । सपत्नी । "कामिकपत्नीव्रतदुःखशीलाम् ।" वीरपत्नी । भ्रातृपत्नी । पुत्रपत्नी ।

३६ । पूतक्रतोरै च ।

अतो ङीप् स्यादैकारश्चान्तादेशः । पूतक्रतोर्भार्य्या पूतक्रतायी ।

३७ । वृषाकप्यग्निकुसितकुसीदानामुदात्तः ।

एषां ङीप् स्यादैकारश्चान्तादेशः । वृषाकपायी वृषाकपेर्भार्य्या । अग्नायी ।

---

(6) उपमानादिति पाठान्तरम् ।

३८। मनो रौ वा।

मनोर्ङीप् स्यादैकारौकारादेशौ च। मनोः स्त्री मनायी मनावी। मनुरपीत्येके। नेत्यन्ये।

३९। वर्णादनुदात्तात् तोपधात्तो नः।

तोपधाद्वर्णवाचिनो ङीप् स्याद्वा। तकारस्य च नकारः। एनी। श्येनी। हरिणी। रोहिणी। पक्ष एता। श्येता। हरिता। रोहिता। अनुदात्तात् किम्? श्वेता। अत इत्येव। शितिः स्त्री।

(क) असितपलितयोः प्रतिषेधः। असिता। पलिता।

(ख) क्नमित्येके। "गतो गणस्तूर्णमसिक्निकानाम्।" पलिक्नी।

(ग) पिशङ्गादुपसंख्यानम्। "मध्येसमुद्रं ककुभः पिशङ्गीः।"

४०। अन्यतो ङीष्।

तोपधादन्यतो वर्णादनुदात्तात् ङीष् स्यात्। सारङ्गी। कल्माषी। शबली। अनुदात्तात् किम्? कृष्णा। कपिला।

४१। षिद्गौरादिभ्यश्च।

षितो गौरादेश्च ङीष् स्यात्। नर्त्तकी। रजकी। खनकी। दंष्ट्रेत्यादि-पाठात्। गौरी। मत्सी। मनुषी। द्रोणी। आमलकी। बदरी। धातकी। बिम्बी। रेवती। पिप्पली। पृथिवी। शमी।

४२। जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु।

जानपदादेकादशभ्यः यथाक्रमं वृत्त्यादावर्थे ङीष् स्यात्। जानपदी वृत्तिः। कुण्डी अमत्रम्। गोणी आवपनम्। स्थली अकृत्रिमा भूः। भाजी श्राणा। नागी स्थौल्यवती। काली कृष्णवर्णा।

(क) नीलात् प्राण्योषध्योः। नीली वडवा। नीली ओषधिः।

(ख) संज्ञायां वेत्येके। नीली नीला। कुशी लोहविकारः। कामुकी मैथुनेच्छावती। कबरी केशवेशः।

४३ । शोणात् प्राचाम् ।

शोणी । प्राचां किम् ? शोणा ।

४४ । वोतो गुणवचनात् (7) ।

गुणवचनादुदन्ताद्वा ङीष् स्यात् । पट्वी पटुः । तन्वी तनुः । गुर्वी गुरुः ।

(क) खरुसंयोगोपधयोः प्रतिषेधः । खरुः । कट्टुः । पाण्डुः स्त्री ।

४५ । बह्वादिभ्यश्च ।

बह्वादेर्वा ङीष् स्यात् । बह्वी । बहुः । रात्रिः । रात्री । अयमेव कालरात्रीवेति भट्टिः । एवं मुकुटि । घाटि । शक्ति । शारि । यष्टि । पद्धति । युवति (8) । कल्याण । उदार । चण्ड । विकट । विशङ्कट ।

(1) कृतः प्राक्सूत्रात् । कटी । धमनी । श्रोणी ।

(2) कृदिकारादक्तिनः । धरणी ।

(3) सर्वतोऽक्तिन्नर्थादित्येके । रजनी । राजी । सुरभी । भूमी । अक्तिन्नर्थात् किम् ? अकरणिः । इतश्छन्दःसूत्रे द्वे ।

४६ । नित्यञ्छन्दसि ।

४७ । भुवश्च ।

४८ । पुंयोगादाख्यायाम् ।

यत् पुमाख्यं पुंयोगात् स्त्रियां वर्त्तते ततो ङीष् स्यात् । गणकी । प्रष्ठी ।

(क) गोपालिकादीनां प्रतिषेधः । गोपालिका स्त्री ।

(ख) सूर्याद् देवतायां चाप् वक्तव्यः । सूर्यस्य देवता स्त्री सूर्या । अन्या तु सूरी ।

---

(7) यत् तु सत्त्वे निविशतेऽपैति पृथक् जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥१॥ इति, उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि । वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः ॥२॥ इति वा गुणवचनं 'तदिदमर्थविज्ञानम् । अनुविधेयानां वैयर्थ्यात् । आचक्षताऽव्याख्यानाय ।" इति मामहः । वस्तुतस्तत्र गुणवचनत्वेन द्रव्य-संज्ञा-समास-सर्वनाम-जाति-संख्या संज्ञाशब्दातिरिक्तशब्दो गृह्यते । वाक्यकारसूत्र-(२।३।१) आश्रित एवैव बाधात् । अतएव दयालुश्रयालुप्रभृतीनां व्यावृत्तिः ।

(8) युवतिशब्दस्यैव पाठः । तेन पक्षे ङीप् । युवती । ननु युवतिस्तत्र । तेन यूनीति रूपमप्राप्ति-मीरणम् । Vide note on 4. 1. 77.

४९ । इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक् ।

एभ्यो ङीष् स्यादानुगागमश्च । इन्द्रादेः स्त्री इन्द्राणी । वरुणानी । मृडानी ।

(क) हिमारण्ययोर्महत्त्वे । हिमानी । अरण्यानी ।

(ख) यवाद्दोषे । यवानी ।

(ग) यवनाल्लिप्याम् । यवनानी लिपिः (9) ।

(घ) उपाध्यायमातुलाभ्यामानुग्वा । उपाध्यायानी । मातुलानी । पक्षे उपाध्यायी । मातुली ।

(ङ) आचार्य्यादणत्वञ्च । आचार्य्यानी ।

(च) अर्य्यक्षत्रियाभ्यां वा ङीषानुकौ । अर्य्या अर्य्याणी । क्षत्रिया क्षत्रियाणी । पुंयोगे त्वर्य्यी क्षत्रियी ।

५० । क्रीतात् करणपूर्वात् ।

ङीष् स्यात् । धनक्रीती । मनसाक्रीती । सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसीति टाबन्तेन समासः ।

५१ । क्तादल्पाख्यायाम् ।

करणपूर्वात् क्तादल्पाख्यायां ङीष् स्यात् । अभ्रविलिप्ती द्यौः । सूपविलिप्ती पात्री । अक्षरविलिप्ती जिह्वा ।

५२ । बहुव्रीहेश्चान्तोदात्तात् ।

अन्तोदात्तात् क्तान्तबहुव्रीहेः ङीष् स्यात् । उरुभिन्नी । केशविलूनी । इह पाणिगृहीती भार्य्याविशेषे । दन्तजाताऽजातामासजाताश्वजाता-सुखजातासुजातादयस्त्वादिपाठात् ।

---

(9) Some say यवनानी लिपिः refers to the Greek alphabet or the letters used by the Bactrians. Others assert that the Egyptian Hieroglyphics were meant by it.

५३। अस्वाङ्गपूर्वपदाद्वा।

अस्वाङ्गपूर्वपदादन्तरो ङीष् वा स्यात्। शारङ्गजग्धी शारङ्गजग्धा वा। सुरापीती सुरापीता वा।

५४। स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। (10)

उपसर्जनस्वाङ्गात् प्रातिपदिकाद्वा ङीष् स्यात्। चन्द्रमुखी चन्द्रमुखा वा। निष्क्रान्ता केशान् निष्केशी निष्केशा वा यूका। असंयोगोपधात् किम्? सुगुल्फा। सुपार्श्वा। उपसर्जनात् किम्? दीर्घशिखा।

(क) अङ्गगात्रकण्ठेभ्योऽपि वेत्येके। मृद्वङ्गी मृद्वङ्गा वेत्यादि। (11)

५५। नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च।

नासिकाद्यन्ताद्वा ङीष् स्यात्। तुङ्गनासिकी तुङ्गनासिका वा। तनूदरी तनूदरा वा। बिम्बोष्ठी बिम्बोष्ठा वा।

(क) पुच्छाच्च। कल्याणपुच्छी कल्याणपुच्छा वा।

(ख) कबरमणिविषशरेभ्यो नित्यम्। कबरपुच्छी। शरपुच्छी।

(ग) उपमानात् पक्षात् पुच्छाच्च। उलूकपक्षी शाला। काकपुच्छी सेना।

५६। न क्रोडादिबह्वचः।

क्रोडाद्यन्ताद् बह्वजन्ताच्च स्वाङ्गादिति (४।१।५४) ङीष् न स्यात्। सुक्रोडा। कल्याणखुरा। सुगुदा। दुर्भगा। सुभगा। आकृतिगणोऽयम्। बह्वचः। पृथुजघना।

५७। सहनञ्विद्यमानपूर्वाच्च।

सहादिपूर्वादुक्तो ङीष् न स्यात्। सकेशा। अकेशा। विद्यमानकेशा। अनासिका।

---

(10) अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टं च तेन चेत् तत् तथा युतमिति स्वाङ्गलक्षणम्।

(11) एतच्च भाष्यानुक्तम्। वार्त्तिकपाठेऽपि नास्ति। परासरसमुच्चयार्थकेन तर्हि चकारेण संग्राह्यमित्येके। नाकाचत्त्रिमन्ये। कवयस्तु प्रयुञ्जते। तथा च किमिदं किन्नरकण्ठि सुप्यत इति, यस्यावि मे वल्गुरवाणि चक्षुरिति, ततः खला खलत्वानि खलत्वमिति च माघकाव्यः।

५८। नखमुखात् संज्ञायाम्।

आभ्यां नाम्नि नास्ति ङीष्। शूर्पणखा। कालमुखा। दीर्घनखा।

५९। दीर्घजिह्वी च छन्दसि।

छन्दः सूत्रम्।

६०। दिक्पूर्वपदान् ङीप्।

स्वाङ्गादिति (४।१।५४) ङीषि सिद्धे दिक्पूर्वपदान् ङीपिति स्वरार्थम्। प्राङ्मुखी प्राङ्मुखा।

६१। वाहः।

वाह इत्यपि छान्दसम्। वहेश्छन्दसीति (३।२।६४) ण्विविधानात्।

६२। सख्यशिश्वीति भाषायाम्।

सखी। अशिश्वी। भाषायां स्यात्। न वेदे।

६३। जातेरस्त्रीविषयादयोपधात्। (12)

जातिवाचिनः स्त्रियां ङीष् स्यात्। कुक्कुटी। मयूरी। यक्षी। सर्पी। विहङ्गी। भूती। प्रेती। भ्रमरी। पुरी। तटी। दूती। असुरी। कुलाली। नटी। माटी। नाड़ायनी। कठी। अस्त्रीविषयात् किम्? सर्वदा स्त्रीलिङ्गाख्या भूत्। मक्षिका। पिपीलिका। माला। बलाका। अयोपधात् किम्? क्षत्रिया।

(क) योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणां ङीष्। हयी। गवयी। मुकयी। मत्सी। मनुषी।

६४। पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च।

पाकाद्युत्तरपदान् ङीष् स्यात्। स्त्रीविषयार्थं वचनम्। ओदनपाकी। पिष्टकपाकी। शिष्टपर्णी। शङ्खपुष्पी।

---

(12) आकृतिग्रहणा जाति लिङ्गानाञ्च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥ १ ॥
प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः। असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ॥ २ ॥
इति जातिलक्षणे।

६५। इतो मनुष्यजातेः।

इदन्तात् मनुष्यजातिवाचिनो ङीष् स्यात्। दाक्षी। अवन्ती। कुन्ती। पुनर्जातिग्रहणाद् योपधादपि भवति। औदमेयी। इतः किम्? दरत्। जातिः किम्? तित्तिरिः। अगोत्रेजन्ताच्च ङीष् स्यात्। सौतङ्गमी पुरी।

६६। ऊङुतः।

उदन्तात् मनुष्यजातेरूङ् स्यात्। कुरूः। धीवध्वूः। ब्रह्मबन्धूः (13)। भीरूः। (14)

(क) अप्राणिजातेश्चारज्ज्वादीनाम्। अलाबूः। कर्कन्धूः। अप्राणि-जातेः किम्? आखुः। कृकवाकुः। रज्ज्वादेस्तु। रज्जुः। हनुः।

६७। बाह्वन्तात् संज्ञायाम्।

बाहुशब्दान्तादूङ् स्यात्। भद्रबाहूः काचित्। संज्ञायां किम्? वृत्तबाहुः स्त्री।

६८। पङ्गोश्च।

स्यादूङ्। पङ्गूः।

(क) श्वशुरस्योकाराकारयोर्लोपश्च। श्वश्रूः।

६९। ऊरूत्तरपदादौपम्ये।

ऊर्वन्तादौपम्ये स्यादूङ्। रम्भोरूः। करभोरूः।

७०। संहितशफलक्षणवामादेश्च।

संहिताद्यादेरूरोः स्यादूङ्। संहितोरूः। "वामोरूरतिशयमाप विभ्रमस्य"।

(क) सहितसहाभ्याञ्च। सहितोरूः। सहोरूः।

७१। कद्रुकमण्डल्वोश्छन्दसि।

छन्दः सूत्रम्।

---

(13) "कदाचिद् ब्राह्मणजाती मद्यपायिनी"—इति सृष्टिधरः।

(14) श्रीपति refers to this—"स्त्रीभेदवाचिनो भीरोरप्यूङ् भवितव्यमिति मतम्। स्त्रीपुंसकपुरुषो-भयार्थयोरपि मतमेतत्।"—परिशिष्ट (स्त्रीत्व, Rule 92). अत्र स्त्रीभेदवाचित्वे भीरु पित्र्यादयस्त्वनार्षः।

७२ । संज्ञायाम् ।

आभ्यां नाम्नि स्यादूङ् । कद्रूः । कमण्डलूः ।

७३ । शार्ङ्गरवाद्यञो ङीन् ।

जातेरित्येव । शार्ङ्गरवादेरञन्ताच्च ङीन् स्यात् । शार्ङ्गरवी । गौतमी । पुत्री (15) । (1) नृनरयोर्वृद्धिश्च । नारी । अञः खल्वपि । बैदी । औत्सी ।

७४ । यङश्चाप् ।

यङन्ताच्चाप् स्यात् । ञ्यङ् । आम्बष्ठ्या । कौशल्या । ष्यङ् । कारीषगन्ध्या । वाराह्या ।

७५ । आवट्याच्च ।

गर्गादियञन्ता-(४।१।१०५) दावट्यशब्दाच्चाप् स्यात् । आवट्या ।

७६ । तद्धिताः ।

इतस्तद्धितसंज्ञकाः प्रत्यया वाच्याः कपं यावत् (५।४।१५१) तद् यथा ।

७७ । यूनस्तिः । (16)

युवशब्दात् तिः स्यात् । युवतिः ।

७८ । अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ।

गोत्रे यावणिञौ तयोः स्त्रियां ष्यङादिश्यते । अण् कारीषगन्ध्या ।

---

(15) अथांशेन पर्वतराजपुत्रीति कुमारे । कुर्वे तदुर्वीपतिपुत्रि सत्यमिति नैषधे । मा भैषीः पुत्रि सीते व्रजति मम पुरो नैव दूरं दुरात्मेति महानाटके । पुत्रीव हर्षं हृदये तनोतीति च । तथाच पुत्रशब्दस्य कन्यायां वृत्तिः—आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी । आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे इत्यमरात् । न शासवोरित्यत्र (७।३।४५) वा सूतकापुत्रिकावृन्दारकाणामिति वार्त्तिकाच्च । यत्तु शार्ङ्गरवादिगणे पुत्रशब्दस्य पाठोऽसाम्प्रदायिको ऽनार्षो वेति केषाञ्चिन् मतं तत्तु न सर्वैरादृतम् ।

(16) त्रिचितं युवतिनैपुणं तथेति कुमारसम्भवम् । तिरिति ङीपोऽपवाद इति वृत्तिकारः । कथं तर्हि यूनी कामवती यूनीति च मनो वैधव्यभावाद् वधूरिति, यूनी वैश्यविवाहिनी पतिमवाप बाला वधूत्यागिनीति च ? युवति र्युवती यूनीति त्रिकाण्डशेषेऽपि ? यथाप्रयोगम् । कथं युवतीजननिर्मथितं दर्पमिति भोजचम्पू ? किंचित्कम्रा मधुरा हि युवत्य इति च ? यौतेः शतृप्रत्ययान् ङीपि युवतीति सहोक्तिः । सर्वतोऽक्तिन्नर्थादित्येक इति (४।१।४५ ग) ङीपि युवतीति पुरुषोत्तम-माधवादयः ।

इञ् वाराह्या। अनार्षयोः किम्? वासिष्ठी। गुरूपोत्तमयोः किम्? औपगवी। त्रिप्रभृतीनामचामन्त्यमुत्तमम्। तत्समीपमुपोत्तमम्।

७९। गोत्रावयवात्।

गोत्रावयवाः पुणिकादयः। तेभ्योऽणिञोः ष्यङ् आदिश्यते। पौणिक्या। भौणिक्या। मौखर्य्या।

८०। क्रौड्यादिभ्यश्च।

एभ्यः स्त्रियां ष्यङ् स्यात्। क्रौड्या। लाड्या। दैवदत्त्या। भोजात् क्षत्रियजातौ। भौज्या।

८१। दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्।

एभ्य इञः ष्यङ् वा स्यात्। दैवयज्ञ्या। शौचिवृक्ष्या। पक्षे इतो मनुष्यजाते (४।१।६५) रिति ङीष्। दैवयज्ञी। काण्ठेविद्धी। पूर्वः स्त्र्यधिकारः।

८२। समर्थानां प्रथमाद्वा।

स्वार्थिकात् (५।४।१) प्रागयमधिकारः। समर्थानां पदानां मध्ये सूत्रे प्रथमनिर्दिष्टाद्वा तद्धिताः स्युः। वाग्रहणाद् वाक्यञ्च। वक्ष्यति तस्यापत्यमिति (४।१।९२)। उपगोरपत्यमौपगवः। समर्थानां किम्? कम्बलमुपगोरपत्यं देवदत्तस्येति।

८३। प्राग्दीव्यतोऽण्।

तेन दीव्यतीत्यतः (४।४।२) प्रागर्थेष्वणधिक्रियते। तथैवोदाहर्त्तव्यम्।

८४। अश्वपत्यादिभ्यश्च।

एभ्योऽण् स्यात्। आश्वपतम्। गाणपतम्। पाशुपतम्। ण्ये प्राप्ते वचनम्।

८५। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।

एभ्योऽणपवादो ण्यः स्यात्। दितेः स्त्र्यन्ताद् दैत्यः (17)। अदितेरपत्य-

(17) कथं दैतेय इति? स्त्र्यन्तात् दितिशब्दात् कृदिकारादक्तिन इति (४।१।४५) ङीपि कृते स्त्रीभ्यो ढक् (४।१।१२०)। अदितिशब्दादपि स्त्र्यन्तात् पूर्ववत् ङीपि कृते ढक्। आदितेयः। एवमादितेया दितिपद इति सिद्ध जित्वाङः।

आदित्यः । आदित्यशब्दात् तस्यापत्यमादित्यम् । पत्यन्तात् । सैनापत्यम् । गार्हपत्यम् । प्राजापत्यम् ।

(क) यमाच्च । याम्यम् । (18)

(ख) पृथिव्या ञाञौ । पार्थिवा पार्थिवी ।

(ग) देवस्य यञञौ । दैव्यं दैव्या । दैवं दैवी ।

(घ) बहिषष्टिलोपश्च । बहिर्भवो बाह्यः ।

(ङ) ईकक् च । बाहीकः ।

(च) स्थाम्नोऽकारः । अश्वत्थामः । महास्थामः ।

(छ) लोम्नोऽपत्येषु बहुषु । अकार इत्येव । उडुलोमाः । बहुषु किम् ? औडुलोमिः । औडुलोमी । बाह्वादिः ।

(ज) सर्वत्र गोरजादिप्रसङ्गे यत् । गव्यम् ।

८६ । उत्सादिभ्योऽञ् ।

एभ्योऽञ् स्यात् । औत्सः । औदपानः ।

८७ । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ।

भवनात् (५।२।१) प्रागर्थेषु भवसमूहहितादिषु स्त्रिया नञ् पुंसः स्नञ् स्यात् । पुंसः संयोगान्तलोपः (८।२।२३) । "सङ्कल्प्य पौंस्नि स्त्रैणं माम् ।" कथं स्त्रीवत् पुंवत् ? स्त्रीत्वं पुंस्त्वमिति च ? स्त्री पुंवच्चेति (१।२।६६) निर्देशेनास्यानित्यत्वज्ञापनात् ।

८८ । द्विगोर्लुगनपत्ये ।

द्विगोः सम्बन्धिनः प्राग्दीव्यतीयतद्धितस्याजादेर्लुक् स्यात् । तत्र संस्कृतम् (४।४।३) । पञ्चकपालः । तदधीते तद्वेद (४।२।५९) । द्विवेदः । अनपत्ये किम् ? पाञ्चनापितिः । अजादेः किम् ? पञ्चगर्गरूप्यम् ।

८९ । गोत्रेऽलुगचि ।

यस्कादिभ्यो गोत्र (२।४।६३) इत्यादिभिर्येषां लुगुक्तस्तेषामजादौ प्राग्दी-

(18) वार्त्तिकमिदं जयादित्यकृत नवार्थमित्येके। प्रयोगस्तु दृश्यते यथा याम्येन चाययन् सैन्या याम्यो दिशं वैजयन्तीति देवीभागवते। याति चेतसि नाप्नुयाम यतमां याम्याः पुनर्वासना इति कुमारसम्भवस्यार्थ उदयनश्च।

व्यतीये कर्त्तव्ये स निषिध्यते । गर्गाणां छात्रा गार्गीयाः । आत्रेयीयाः । अपि किम् ? गर्गेभ्य आगतं गर्गरूप्यम् ।

९० । यूनि लुक् ।

अजादौ प्राग्दीव्यतीये कर्त्तव्ये यूनि विहितस्य लुक् स्यात् । अत इञ् (४।१।९५) । फाण्टाहृतिः । तस्यापत्यं युवा फाण्टाहृतः । फाण्टाहृति-मिमताभ्यां णफिञौ (४।१।१५०) । तस्य छात्राः । अस्य लुक् । तत इञश्चे-त्यण् (४।२।११२) । फाण्टाहृताश्छात्राः ।

९१ । फक्फिञोरन्यतरस्याम् ।

यूनि विहितयोः फक्फिञोर्लुग् वा स्यात् । यञिञोश्चेति (४।१।१०१) फक् । गार्ग्यायणः । तस्य छात्रा गार्गीया गार्ग्यायणीया वा । अणो द्व्यच इति फिञ् (४।१।१५६) । यास्कायनिः । तस्य छात्रा यास्कीया यास्कायनीया वा ।

९२ । तस्यापत्यम् ।

अत्रार्थे यथाविहितं प्रत्ययः स्यात् । औपगवः । दैत्यः । स्त्रैणः । भानोर-पत्यं भानवः । आपादान्तमपत्याधिकारः ।

९३ । एको गोत्रे ।

आद्यप्रकृतेर्गोत्रे एक एव प्रत्ययः स्यात् । उक्तञ्च भाष्ये एको गोत्र इति । गोत्रे एकः प्रथमशब्द एव प्रत्ययमुत्पादयतीति । गर्गस्य गोत्रापत्यं गार्ग्यः । तत्पुत्रोऽपि गार्ग्यः ।

९४ । गोत्राद् यून्यस्त्रियाम् ।

यून्यपत्ये गोत्रादेव प्रत्ययः स्यात् । नाद्यप्रकृतेः । वात्स्यस्यापत्यं युवा वात्स्यायनः । अस्त्रियां किम् ? वात्सी । युवसंज्ञैव निषिध्यत इति वृत्तिः ।

९५ । अत इञ् ।

अदन्तादिञ् स्यात् । दाक्षिः । दाशरथिः । कथं प्रदीयतां दाशरथाय मैथिलीति ? तस्येद (४।३।१२०) मिति विवक्षायामण् ।

९६। बाह्वादिभ्यश्च।

बाह्वादेराकृतिगणादिञ् स्यात्। बाहविः। औडुः। सौमित्रिः। औडु-लोमिः। कार्ष्णिः। अत्यणो (४।१।११४)ऽत्र बाधकः।

९७। सुधातुरकङ् च।

सुधातुरिञ् स्यादकङ् चान्तादेशः। सौधातकिः।

(क) व्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम्। वैयासकिः। वारुडकिः। नैषादकिः। चाण्डालकिः। बैम्बकिः।

९८। गोत्रे कुञ्जादिभ्यश्च्फञ्।

कुञ्जादेर्गोत्रापत्ये च्फञ् स्यात्। ततः स्वार्थे ञ्यः (५।३।११३)। कौञ्जा-यन्यः। ब्राध्नायन्यः। गोत्रे किम्? कुञ्जस्यानन्तरापत्यं कौञ्जिः। गोत्रापत्ये विधिः शिवाद्यणं यावत् (४।१।११२)। यस्तु गोत्रादेव विधीयते स तु यूनि बोद्धव्यः।

९९। नडादिभ्यः फक्।

नडादेर्गोत्रापत्ये फक् स्यात्। नाडायनः। चारायणः। नड। चर। बक। मुञ्ज। शकट। कितव। चमुख। ब्राह्मण। उदुम्बर। नर। इतिक।

(1) शलङ्कु शलङ्कश्च। शालङ्कायनः।

१००। हरितादिभ्योऽञः।

विदाद्यन्तर्गणहरितादेर्यूनि फक् स्यात्। हारितायनः। कौत्सायनः।

१०१। यञिञोश्च।

गोत्रे यौ यञिञौ तदन्तयोर्यूनि फक् स्यात्। वात्स्यायनः। दाक्षायणः।

१०२। शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु।

एभ्यो यथाक्रमं गोत्रे फक् स्यात्। शारद्वतायनो भार्गवः। शौनकायनो वात्स्यः। दार्भायणोऽग्रायणः।

१०३ । द्रोणपर्वतजीवन्तादन्यतरस्याम् ।

द्रोणादेर्गोत्रापत्ये फक् वा स्यात् । द्रौणायनो द्रौणिर्वा । पार्वतायनः पार्वतिर्वा । जैवन्तायनो जैवन्तिर्वा ।

१०४ । अनृष्यानन्तर्ये बिदादिभ्योऽञ् ।

बिदादेर्गोत्रेऽञ् स्यात् । बैदः । और्वः । हारीतः । कश्यप । कुशिक । शुनक । भृगु । ये त्वनृषिशब्दाः पठ्यन्ते तेभ्योऽनन्तरापत्येऽञ् । पौत्रः । दौहित्रः । नानान्द्रः ।

(1) परस्त्री परशुश्च । पारशवः ।

१०५ । गर्गादिभ्यो यञ् ।

एभ्यो गोत्रापत्ये यञ् स्यात् । गार्ग्यः । गर्ग । वत्स । लोहित । व्याघ्रपात् । वात । चक्र । शकल । कुण्डिनी । जमदग्नि । तृकुटि । शण्डिल ।

१०६ । मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ।

आभ्यामनयोर्यञ् स्यात् । माधव्यो ब्राह्मणः । बाभ्रव्यः कौशिकः ।

१०७ । कपिबोधादाङ्गिरसे ।

आभ्यामाङ्गिरसे यञ् स्यात् । काप्यः । बौध्यः । कपेर्गर्गादिपाठः ष्फस्य सिद्ध्यर्थः । काप्यायनी ।

१०८ । वतण्डाच्च ।

अस्मादाङ्गिरसे यञ् स्यात् । वातण्ड्यः ।

१०९ । लुक् स्त्रियाम् ।

वतण्डात् स्त्रियां यञो लुक् स्यात् । वतण्डी । शार्ङ्गरवादिः (४।१।७३) ।

११० । अश्वादिभ्यः फञ् ।

अश्वादिभ्यो गोत्रे फञ् स्यात् । आश्वायनः । आविष्ठायनः । आनडुह्यो गर्गादिः । तस्यापत्यमानडुह्यायनः ।

१११ । भर्गात् त्रैगर्त्ते ।

भर्गात् फञ् स्यात् । भार्गायणः । त्रैगर्त्ते किम् ? भार्गिः । उक्तं गोत्रे ।

११२। शिवादिभ्योऽण्।

शिवादिभ्योऽपत्यमात्रेऽण् स्यात्। इञादेर्बाधा। शैवः। भौमः। गाङ्गः। सापत्नः। विश्रवसोऽपत्यमिति वाक्ये विश्रवणरवणाभ्यां वृत्तिः। वैश्रवणो रावणः।

११३। ऋष्यण्वाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः।

नदीमानुषीनामभ्योऽण् स्यात्। ढको बाधा। यामुनः। ऐरावतः। मानुषीभ्यः। चैन्तितः। शैक्षितः। गौतमः। ऋष्वाभ्यः किम्? चान्द्रभागेयः। वासवदत्तेयः।

११४। ऋष्यन्धकवृष्णिकुरुभ्यश्च।

एभ्योऽण् स्यात्। इञो बाधा। वासिष्ठः। वैश्वामित्रः। अन्धकात्। आन्धकः। श्वाफल्कः। वृष्णेः। वासुदेवः। आनिरुद्धः। कुरोः। नाकुलः। साहदेवः। अन्धकादिवंशाः केऽप्यनादयः।

११५। मातुरुत्संख्यासम्भद्रपूर्वायाः।

संख्यादिपूर्वाया मातुरण् स्यात्। उत्त्वान्तादेशः। द्वैमातुरः। त्रैमातुरः। षाण्मातुरः। साम्मातुरः। भाद्रमातुरः।

११६। कन्यायाः कनीन च।

कन्यायाः स्यादण् कनीनादेशश्च। कानीनो व्यासः।

११७। विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु।

एभ्य एष्वण् स्यात्। वैकर्णो वात्स्यः। शौङ्गो भारद्वाजः। छागलोऽप्यात्रेयः। वत्सादिभि स्तदपत्यं लक्ष्यते।

११८। पीलाया वा।

पीलाशब्दादण् स्याद्वा। पैलः पैलेयो वा।

११९। ढक् च मण्डूकात्।

मण्डूकादण्ढको स्याताम्। मण्डूको माण्डूकेयः। वेत्येव। माण्डूकिः।

१२०। स्त्रीभ्यो ढक्।

स्त्रीप्रत्ययान्ताढ् ढक् स्यात्। सौपर्णेयः। सौभद्रेयः। ब्रौष्मचारेयः।

(क) वड़वाया वृषे वाच्यः । ढक् स्यात् । वाड़वेयो वृषः ।

(ख) अण् क्रुञ्चाकोकिलात् स्मृतः । क्रौञ्चः । कौकिलः ।

१२१ । द्व्यचः ।

द्व्यच स्त्रीयामिञाया अणोऽपवादो ढक् स्यात् । दात्तेयः । गौप्तेयः । पार्थस्तु शिवादिपाठात् ।

१२२ । इतश्चानिञः ।

इदन्ताद् द्व्यचो ढक् स्यात् । पात्रेयः । वैधेयः । अनिञः किम् ? दाक्षायणः । द्व्यच इत्येव । अण् । मारीचः ।

१२३ । शुभ्रादिभ्यश्च ।

एभ्यो ढक् स्यात् । शौभ्रेयः । तैखाभ्रेयः । काद्रवेयः । पाण्डवेयः । गाङ्गेयः । तिकादिरप्ययङ्गङ्गाशब्दः । ततो गाङ्गायनिरित्येके ।

१२४ । विकर्णकुषीतकात् काश्यपे ।

आभ्यामपत्ये ढक् स्यात् । वैकर्णेयः । कौषीतकेयः ।

१२५ । भ्रुवो वुक् च ।

भ्रुवो ढकि वुक् स्यात् । भ्रौवेयः ।

१२६ । कल्याण्यादीनामिनङ् ।

एभ्यो ढक् स्यादिनङ् चान्तादेशः । काल्याणिनेयः । सुभगा । दुर्भगा । ज्येष्ठा । मध्यमा । कनिष्ठा । रजश्री । बन्धकी । परस्त्री । बलीवर्दीति च ।

१२७ । कुलटाया वा ।

अस्या ढक् स्यादिनङ् वा । कौलटिनेयः कौलटेयो वा । कौलटेरस्तु भीक्षुकीनाया अपत्यविवक्षायाम् ।

१२८ । चटकाया ऐरक् ।

स्यात् । चाटकैरः ।

(क) स्त्र्यपत्ये लुग् वक्तव्यः । चटका ।

१२९। गोधाया ढ्रक्।

१३०। आरगुदीचाम्।

गोधाया अपत्यं गौधेरः। गौधारः। गौधेयस्तु शुभ्रादिपाठात्।

१३१। क्षुद्राभ्यो वा।

अङ्गहीनशीलाः क्षुद्राः। ताभ्यो ढ्रक् स्याद्वा। काणेरः काणेयो वा। दासेरः दासेयो वा।

१३२। पितृष्वसुश्छण्।

स्यात्। पैतृष्वस्रीयः।

१३३। ढकि लोपः।

ढकि चान्त्यलोपः स्यात्। पैतृष्वसेयः।

१३४। मातृष्वसुश्च।

अस्याश्च तथा स्यात्। मातृष्वस्रीयः। मातृष्वसेयः।

१३५। चतुष्पाद्भ्यो ढञ्।

स्यात्। अणादेर्बाधा। कामण्डलेयः। जाम्बेयः।

१३६। गृष्ट्यादिभ्यश्च।

एभ्यो ढञ् स्यात्। गार्ष्टेयः। मैत्रेयः।

१३७। राजश्वशुराद्यत्।

आभ्यां यत् स्यात्। राजन्यः क्षत्रियः। श्वशुर्यौ देवरश्यालौ।

१३८। क्षत्राद्घः।

स्यात्। क्षत्रियः। जातावभिधानम्।

१३९। कुलात् खः।

कुलीनः। आढ्यकुलीनः।

१४०। अपूर्वपदादन्यतरस्यां यड्ढकञौ।

अविद्यमानपूर्वपदात् कुलाद् यड्ढकञौ वा स्याताम्। कुल्यः कौलेयकः कुलीनो वा।

१४१ । महाकुलादञ्खञौ ।

स्याताम् । माहाकुलः । माहाकुलीनः । वेत्येव । महाकुलीनः ।

१४२ । दुष्कुलाड्ढक् ।

स्यात् । दौष्कुलेयः । वेत्येव । दुष्कुलीनः ।

१४३ । स्वसुश्छः ।

स्यात् । स्वस्रीयः ।

१४४ । भ्रातुर्व्यच्च ।

भ्रातुर्व्यत् स्यात् । छश्च । भ्रातृव्यः । भ्रात्रीयो वा ।

१४५ । व्यन् सपत्ने । (19)

भ्रातुरपत्ये शत्रौ व्यन् स्यात् । भ्रातृव्यो दायादः । भ्रातृव्यः कण्टक इतुरपमानात् ।

१४६ । रेवत्यादिभ्यष्ठक् ।

रेवत्यादेर्गणात् ठक् स्यात् । ढगादेर्बाधा । रैवतिकः । दौवारपालिकः ।

१४७ । गोत्रस्त्रियाः कुत्सने ण च ।

गोत्रस्त्रीवचनाण्णः स्यात् । ठक् च । गार्ग्या अपत्यं गार्गो जाल्मो गार्गिको वा । कुत्सने किम् ? गार्गेयः । गोत्र इति किम् ? कारिकाया अपत्यं कारिकेयः । गोत्रापत्ये विधयो यूनि विज्ञेयाः ।

१४८ । वृद्धाट् ठक् सौवीरेषु बहुलम् ।

वृद्धात् सौवीरगोत्रात् कुत्सने ठक् स्यात् । भागवित्तिकः । पक्षे फक् । भागवित्तायनः ।

१४९ । फेश्छ च ।

फिञन्तात् सौवीरगोत्रात् कुत्सने छः स्यात् । ठक् च । तिकादिभ्यः फिञ् (४।१।१५४) । यामुन्दायनिः । तस्यापत्यं यामुन्दायनीयः । यामुन्दायनिको वा ।

(19) षाष्ठी भावविधायिकाः ।

१५०। फाण्टाहृतिमिमताभ्यां णफिञौ।

आभ्यां सौवीरेषु णफिञौ स्याताम्। फाण्टाहृतः फाण्टाहृतायनिः। मैमतो मैमतायनिः।

१५१। कुर्वादिभ्यो ण्यः।

एभ्योऽपत्ये ण्यः स्यात्। कौरव्यः कौरव्यौ कौरव्याः। "कौरव्याः पशवः।" कुरुशब्दोऽत्र मुनिवचन इत्याहुः। कुरु। गर्दभ। शकुनि। कवि। कपिञ्जल।

१५२। सेनान्तलक्षणकारिभ्यश्च।

एभ्यो ण्यः स्यात्। सेनान्तात्। हारिषेण्यः। माहासेन्यः। लाक्षण्यः। कारिशब्दः शिल्पिवचनः। तान्तुवाय्यः। कौम्भकार्य्यः।

१५३। उदीचामिञ्।

तेभ्य उदीचामिञ् स्यात्। माहासेनिः। लाक्षणिः। तान्तुवायिः।

१५४। तिकादिभ्यः फिञ्।

एभ्योऽपत्ये फिञ् स्यात्। तैकायनिः। कौरव्यायणिः। कैतवायनिः।

१५५। कौशल्यकार्मार्य्याभ्यश्च।

(क) दगुकोशलकर्मारच्छागवृषाणां (20) युट् चादिष्टश्चेति सूत्रान्तरम्।

एभ्योऽपत्ये फिञ् स्यात्। युट् चागमः। दागव्यायनिः। कौशल्यायनिः। कार्मार्य्यायणिः। छाग्यायनिः। वार्ष्यायणिः।

१५६। अणो द्व्यचः।

अणन्ताद् द्व्यचः फिञ् स्यात्। कार्त्त्रायणिः। यास्कायनिः।

१५७। उदीचां वृद्धादगोत्रात्।

वृद्धादुदीचां मते फिञ् स्यात्। आम्रगुप्तायनिः। ग्रामगुप्तायनिः। कारिवचनादपि। परत्वात्। नापितायनिः। अन्येषां मते आम्रगुप्तिः। वृद्धात् किम्। याज्ञदत्तिः। अगोत्रात् किम्? औपगविः।

---

(२०) छगलेति पाठान्तरम्। तत्र च्छागल्यायनिरित्युदाहरणम्।

१५८ । वाकिनादीनां कुक् च ।

वाकिनादेरुदीचां मते फिञ् स्यात् । कुगागमश्च । वाकिनकायनिः । कार्कव्यकायनिः । अन्येषां वाकिनिः । कार्कव्यिः ।

१५९ । पुत्रान्तादन्यतरस्याम् ।

पुत्रान्ताद् वृद्धात् फिञ् वा स्यात् । कुक् च वा । वात्सीपुत्रकायणिः । वात्सीपुत्रायणिः । वात्सीपुत्रिर्वा ।

१६० । प्राचामवृद्धात् फिन् बहुलम् ।

अवृद्धात् फिन् स्यात् । ग्लुचुकायनिः । प्राचां किम् ? ग्लौचुकिः । बाहुल्यान्नेह । दाक्षिः ।

१६१ । मनोर्जातावञ्यतौ षुक् च ।

मनोरञ्यतौ स्यातां षुक् च जातिश्चेत् । मानुषः । मनुष्यः । माणवस्योपसंख्यानात् (21) ।

१६२ । अपत्यं पौत्रप्रभृति गोत्रम् ।

पौत्राद्यपत्यं गोत्रमुच्यते । गर्गस्यापत्यं पौत्रादारभ्य गार्ग्यः । पौत्रप्रभृति किम् ? अनन्तरापत्ये गार्गिः ।

१६३ । जीवति तु वंश्ये युवा ।

पितृपितामहादौ वंश्ये जीवति पौत्रप्रभृतेरपत्यं युवा स्यात् । न गोत्रम् । गर्गे गार्गौ गार्ग्ये वा जीवति गार्ग्यस्यापत्यं युवा गार्ग्यायणः । मृते तु गार्ग्य एव । पौत्रप्रभृतीति षष्ठ्यात्र विपरिणम्यते ।

१६४ । भ्रातरि च ज्यायसि ।

ज्येष्ठे भ्रातरि जीवति पौत्रादेरपत्यं युवा स्यात् । ज्येष्ठे भ्रातरि जीवति कनीयान् भ्राता गार्ग्यायणः ।

---

(21) तथाच श्लोकवार्त्तिकम्—"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्य स्तेन सिध्यति माणवः" ॥ १ ॥ इति । कनि माणवक इति । अनधीतवेदत्वात् मूढत्वम् । विहिताकरणात् प्रतिषिद्धसेवनाच्च कुत्सितत्वम् । जातौ किम् ? अपत्यार्थे लवेव । मानवः । मानवी प्रजा ।

१६५ । वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ।

सप्तमपुरुषावधिज्ञातयः सपिण्डाः (22) । तत्र भ्रातुरन्यस्मिन्नपि सपिण्डे वृद्धतरे जीवति पौत्रादेरपत्यं जीवदेव युवसंज्ञकं वा स्यात् । पितृव्ये पितामहे वा जीवति गार्ग्यायणो गार्ग्यो वा । स्थविरतराभावे गार्ग्य एव ।

१६६ । वृद्धस्य च पूजायाम् ।

गोत्रमेव पूर्वाचार्य्यैर्वृद्धमुच्यते । तस्य पूजायां युवसंज्ञा वा स्यात् । तत्रभवान् गार्ग्यायणो गार्ग्यो वा ।

१६७ । यूनश्च कुत्सायाम् ।

युवसंज्ञा वा स्यात् । गार्ग्यायणो जाल्मो गार्ग्यो वा । यः पितरि जीवति स्वतन्त्रः स जाल्मः । उक्ता युवसंज्ञा ।

१६८ । जनपदशब्दात् क्षत्रियादञ् ।

जनपदशब्दात् क्षत्रियवचनादपत्येऽञ् स्यात् । पाञ्चालः । ऐक्ष्वाकः । वैदेहः । जनपदात् किम् ? पौरवः ।

१६९ । साल्वेयगान्धारिभ्याञ्च ।

आभ्यामञ् स्यात् । साल्वेयः । गान्धारः ।

१७० । द्व्यञ्मगधकलिङ्गसूरमसादण् ।

द्व्यचो मगधादेश्चाण् स्यात् । अङ्गो बाधा । आङ्गः । वाङ्गः । सौह्मः । मागधः । कालिङ्गः । सौरमसः ।

१७१ । वृद्धेत्कोशलाजादाञ् ञ्यङ् ।

वृद्धादिदन्तात् कोशलाजादाभ्याञ्च ञ्यङ् स्यात् । आम्बष्ठ्यः । आवन्त्यः । कौन्त्यः । कौशल्यः । आजाद्यः ।

(क) जनपदात् पाण्डोर्ड्यण् वक्तव्यः । पाण्ड्यः । जनपदात् किम् ? महाभारतपाण्डोः पाण्डव एव । नहि तस्य पाण्डुर्देशः ।

---

(22) लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥ १ ॥ इति मात्स्ये । सपिण्डता तु पुरुषे सप्तमे विनिवर्तते इति मानवे च ।

१७२ । कुर्वादिभ्यो ण्यः ।

कुरोः क्षत्रियाज्जनपदाख्यादेव ण्यः स्यात् । कौरव्यः कौरव्यौ कुरवः । "चिराय तस्मिन् कुरवश्चकासति ।" नैषध्यः । नैषध्यः । कथं माघे "परितेमिरे कुकुरकौरवस्त्रिय" इति । तथा वेणीसंहारे "रक्षन्तां कौरवा" इति ? अजनपदविवक्षयेत्येके । विषयो देशे (४।२।५२) इत्यपि तादृश्यादित्यन्ये । तस्येदमिति (४।३।१२०) विवक्षयेत्यपरे ।

१७३ । साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ।

साल्वावयवा उदुम्बरादयः षट् (23) । तेभ्यः प्रत्यग्रथादेश्चेञ् स्यात् । औदुम्बरिः । यौगन्धरिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः ।

१७४ । ते तद्राजाः ।

तेऽञादयस्तद्राजसंज्ञकाः स्युः । पञ्चालानां राजा पाञ्चालः । कौरव्यः । औदुम्बरिः ।

(वा) क्षत्रियसमानशब्दाज्जनपदात् तस्य राजन्यपत्यवत् । उक्ताः प्रत्ययास्तस्यापत्यमितिवद् राजनि च भवन्ति । पञ्चालानामपत्यानि राजानो वा पञ्चालाः । वङ्गाः । पवनयः । कुरवः । तद्राजस्येति (२।४।६२) बहुषु लुक् ।

१७५ । कम्बोजाल्लुक् ।

कम्बोजादिभ्यस्तद्राजस्य लुग्वचनमिति स्मृतिः । कम्बोजानामपत्यं राजा वा कम्बोजः । चोलः । शकः । केरलः ।

१७६ । स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ।

एभ्यः स्त्रियां तद्राजस्य लुक् स्यात् । इयमवन्ती । कुन्ती । कुरूः ।

१७७ । अतश्च ।

अकारस्य तद्राजस्य स्त्रियां लुक् स्यात् । शूरसेनी । मद्री । दरत् । उशविद् । अतः किम् ? पाञ्चाड्या । यङश्चाप् (४।१।७४) ।

---

(23) "उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः" ॥ १ ॥ इति कारिका ।

१७८। न प्राच्यभर्गादियौधेयादिभ्यः।

एभ्योऽतश्चेति (४।१।१७७) लुङ् नास्ति। प्राच्यात्। पाञ्चाली। वैदेही। मागधी। आङ्गी। वाङ्गी। भर्गादेः। भार्गी। कैकेयी। "कैकेयी लघयिष्यते प्रियसुताम्।" कथं "प्राक् केकयीतो भरतस्ततोऽभूदिति"? आद्यप्रकृतेरेव कुलदारेषु वीऽयमिति स्त्रीवृत्तेः। शार्ङ्गरवाद्यञो ङीनिति (४।१।७३) भागवृत्तिः (24)। यौधेयादिभ्यः पञ्चमेऽध्याये तद्राजमञं वक्ष्यति। तस्याप्यतश्चेति (४।१।१७७) लुक् प्राप्तो निषिध्यते। यौधेयी। शौभ्रेयी। इत्यपत्याधिकारः सम्पूर्णः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य भाषावृत्तौ चतुर्थाध्यायस्य प्रथमः पादः॥४।१॥

समाप्तश्चाप्पादः।

---

(24) So भर्तृहरि the author of the भागवृत्ति and the वाक्यपदीय had flourished after भट्टि। It-sing, the Chinese traveller, Who had travelled over India, about nineteen years, from 671 A. D. to 691 A. D. gave 651. A. D. as the year of Bhatrihari's death and 661 A. D. as that of Joyaditya's.

अथ

भाषावृत्तिः।

चतुर्थोऽध्यायः। द्वितीयःपादः॥

१। तेन रक्तं रागात्।

रागवाचिन स्तेन रक्तमित्यर्थेऽण् स्यात्। कषायेण रक्तं काषायं वस्त्रम्। कौसुम्भम्। माञ्जिष्ठी पताका। तेनेति वर्त्तते यावद् द्वैपवैयाघ्रादञ् (४।२।१२)।

२। लाक्षारोचनाशकलकर्दमाट् ठक्।

लाक्षादेः पूर्वार्थे ठक् स्यात्। लाक्षिकं वस्त्रम्। रौचनिकी शाटी। शाकलिकः पटः। कार्दमिकम्। शकलकर्दमाभ्यामणपीत्येके। शाकलम्। कार्दमम्। (25)

(क) नील्या अन्। नीलं वस्त्रम्।

(ख) पीतात् कन्। पीतकम्।

(ग) हरिद्रामहारजनाभ्यामञ् च। हारिद्रम्। माहारजनम्।

३। नक्षत्रेण युक्तः कालः।

अत्रार्थेऽण् स्यात्। पुष्येण युक्ता पौषी रात्रिः। माघी। पौषमहः। माघम्। कालः किम्? पुष्येण युक्तः शशी।

४। लुबविशेषे।

नक्षत्राणो लुप् स्यात्। अद्य पुष्यः। अद्य कृत्तिकाः। अविशेषे किम्? पौषी रात्रिः। पौषमहः।

---

(25) "रक्तार्थे वद द्रव्यमुचितं तत्र प्रयोग। कर्दमो रक्तद्रव्यम्" इति रक्षितः।

५ । संख्यायां श्रवणाश्वत्थाभ्याम् ।

आभ्यां नक्षत्राणो विशेषेऽपि लुप् स्यात् । श्रवणा रात्रिः । अश्वत्थो मुहूर्त्तः (26) । संख्यायां किम् ? श्रावणी रात्रिः ।

६ । द्वन्द्वाच्छः ।

नक्षत्रद्वन्द्वाच्छः स्यात् । राधानुराधीया रात्रिः । लुप् चानेन बाध्यते । परत्वात् । तिष्यपुनर्वसवीयमद्य ।

७ । दृष्टं साम ।

अस्यार्थेऽण् स्यात् । वसिष्ठेन दृष्टं साम वासिष्ठम् । वैश्वामित्रम् ।

८ । कलेर्ढक् ।

स्यात् । कलिना दृष्टं साम कालेयम् ।

(क) सर्वत्राग्निकलिभ्याम् । आभ्यां प्राग्दीव्यतीये सर्वत्रार्थे ढग् वक्तव्यः । तेन दृष्टं तत्र भवं तत आगतं सास्य देवतेति । आग्नेयम् । कालेयम् ।

(ख) दृष्टे सामनि जाते च द्विरण् डिद्वा विधीयते । औशनसम् औशनं वा साम । शातभिषः शातभिषजो वा बालः ।

(ग) तीयादीकग् न विद्यायाः ।

स्वार्थे तीयादीकक् स्यात् । द्वैतीयीकम् । द्वैतीयीकी । नेह । द्वितीया विद्या ।

(घ) गोत्रादङ्कवदिष्यते । औपगवकं साम । गोत्रचरणाद् वुञ् (४।२।१२६) ।

९ । वामदेवाड्ड्यड्ड्यौ ।

अस्यादिमौ स्याताम् । तेन दृष्टं सामेति । वामदेव्यम् । स्वरार्थोऽनुबन्धः ।

१० । परिवृतो रथः ।

रथश्चेद् भवति अस्यार्थेऽण् स्यात् । वस्त्रेण परिवृतो रथो वास्त्रः । चार्मणो रथः ।

---

(26) शिवरामेन्द्रसरस्वत्यनुक्त नक्षत्रनाम एव ।

११ । पाण्डुकम्बलादिनिः ।

अस्मादिनिः स्यात् पूर्वार्थे । पाण्डुकम्बली रथः ।

१२ । द्वैपवैयाघ्रादञ् ।

आभ्यामञ् स्यात् पूर्वार्थे । द्वैपेन चर्मणा परिवृतो द्वैपो रथः । वैयाघ्रः । तेनेति निवृत्तम् ।

१३ । कौमारापूर्ववचने ।

अयमन्तः कौमारो निपात्यतेऽपूर्व्वस्याऽनूढ़ाया विवाहस्य वचने । प्रथमोढ़ा कुमारी कौमारी । तस्याः पतिश्च कौमारः । "उपलक्ष्यामपश्यन्तः कौमारीं पततां वर ।"

१४ । तत्रोद्धृतममत्रेभ्यः ।

अत्रार्थे पात्रेभ्योऽण् स्यात् । शरावेषूद्धृतं शारावं दधि । कार्पर ओदनः । अत्र भुक्तोत्सृष्टमुद्धृतम् । तत्रेति वर्त्तते यावत् क्षीराड् ढञ् (४।२।२०) ।

१५ । स्थण्डिलाच्छयितरि व्रते ।

अत्र स्थण्डिलादण् स्यात् । स्थण्डिले शेते स्थाण्डिलः ।

१६ । संस्कृतं भक्षाः ।

अथ संस्कृतमित्यर्थेऽण् स्याद् भक्षाश्चेत् । भ्राष्ट्रा अपूपाः । पैठराः ।

१७ । शूलोखाद्द्यत् ।

आभ्यां तथार्थे यत् स्यात् । शूले संस्कृतं शूल्यम् मांसम् । उख्यम् ।

१८ । दध्नष्ठक् ।

स्यात् । दध्नि संस्कृतं दाधिकम् ।

१९ । उदश्वितोऽन्यतरस्याम् ।

अतष्ठक् स्याद्वा । उदश्विति संस्कृतमौदश्वित्कम् । औदश्वितम् । (27)

२० । क्षीराड् ढञ् ।

स्यात् । क्षीरे संस्कृता क्षैरेयी यवागूः । तत्रेति निवृत्तम् ।

---

(27) तक्रं ह्युदश्विन् मथितं पादाम्ब्वर्धाम्बु निर्जलम् । A sort of whey.

२१। साऽस्मिन् पौर्णमासीति संज्ञायाम्।

अस्मिन्नर्थेऽण् स्यात् संज्ञा चेत्। पौषी पौर्णमास्यस्मिन् पौषो मासोऽर्धमासः संवत्सरो वा। माघः। चैत्रः। वैशाखः।

२२। आग्रहायण्यश्वत्थाट् ठक्।

आभ्यां पूर्वार्थे ठक् स्यात्। आग्रहायणी पौर्णमास्यस्मिन् आग्रहायणिको मासः पक्षो वत्सरो वा। आश्वत्थिकः (28)।

२३। विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।

आभ्यः पूर्वार्थे ठक् स्याद्वा। फाल्गुनिकः फाल्गुनो वा मासो ऽर्धमासो वत्सरो वा। श्रावणिकः श्रावणो वा। कार्त्तिकिकः कार्त्तिको वा। चैत्रिकश्चैत्रो वा।

२४। साऽस्य देवता।

अत्र यथाविहितं प्रत्ययः स्यात्। इन्द्रो देवताऽस्य ऐन्द्रं हविः। बार्हस्पत्यो मन्त्रः। यागे पुरोडाशादिसंप्रदाने मन्त्रस्तुत्ये च देवतेत्याहुः। साऽस्य देवतेत्यधिकारः प्राक् पितृव्यात् (४।२।३६)।

२५। कस्येत्।

कशब्दादण् स्यादिकारश्चान्तादेशः। को (29) देवताऽस्य कायं हविः।

२६। शुक्राद् घन्।

स्यात्। शुक्रियोऽध्यायः।

२७। अपोनप्त्रपांनप्तृभ्यां घः।

आभ्यां पूर्वार्थे घः स्यात्। अपोनप्त्रियम्। अपांनप्त्रियम्। (30)

२८। छ च।

आभ्यां छः स्यात्। अपोनप्त्रीयम्। अपांनप्त्रीयं हविः।

(वा) पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम्। पैङ्गाक्षीपुत्रीयम्। (31) तार्णबिन्दवीयम्।

---

(28) अश्वत्थ इत्यृक्षं। (29) कः प्रजापतिः। (30) इदं देवतावचनमिति पौराणिकाः।

(31) पिशाचः कुबेरः। तन्माता पैङ्गाक्षीति च पौराणिकाः।

(ख) शतरुद्राद् घश्च। शतरुद्राद् घच्छौ स्याताम्। शतरुद्रीयम्। शतरुद्रियम्।

२९। महेन्द्राद् घाणौ च।

अस्माद् घाणौ स्यातां छश्च। माहेन्द्रम्। महेन्द्रीयम्।

३०। सोमाट् ट्यण्।

पूर्वार्थे ट्यण् स्यात्। सौम्यं हविः। सौमी ऋक्।

३१। वाय्वृतुपित्रुषसो यत्।

पूर्वार्थे एभ्यो यत् स्यात्। वायव्यो मन्त्रः। ऋतव्यम्। उषस्यम्। पित्र्यम्।

३२। द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च।

एभ्यः षड्भ्यश्छः स्याद् यच्च पूर्वार्थे। द्यावापृथिवीयम्। द्यावापृथिव्यम्। शुनासीरीयम्। (32) शुनासीर्यम्। मरुत्वतीयम्। मरुत्वत्यम्। अग्नीषोमीयम्। अग्नीषोम्यम्। वास्तोष्पतीयम्। वास्तोष्पत्यम्। गृहमेधीयम्। गृहमेध्यम्।

३३। अग्नेर्ढक्।

स्यात्। आग्नेयश्चरुः।

३४। कालेभ्यो भववत्।

कालवाचिभ्यः सास्य देवतेत्यर्थे भवार्थवत् प्रत्ययाः स्युः। मासिकम्। प्रावृषेण्यम्। हैमनम्। वासन्तम्।

३५। महाराजप्रोष्ठपदाट् ठञ्। (33)

आभ्यां पूर्वार्थे ठञ् स्यात्। माहाराजिकम्। प्रौष्ठपदिकम्।

(ग) तदस्मिन् वर्तत इति नवयज्ञादिभ्यः। ठञ् स्यात्। नवयज्ञोऽस्मिन् वर्तते नावयज्ञिकः कालः। स्वाध्यायिकः। पौत्पातिकः।

---

(32) शुनासीर इन्द्रः। (33) महाराज इन्द्रः।

(वा) पूर्णमासादण्। पूर्णमासोऽस्यां वर्त्तते पौर्णमासी तिथिः। सास्य-देवतेत्यधिकारः पूर्णः।

३६। पितृव्यमातुलमातामहपितामहाः।

एते निपात्यन्ते। गौरादिङीषि पितामही। मातामही।

(वा) अवेर्दुग्धे सोढदूसमरीसचः। अविशब्दादेते स्युर्दुग्धेऽर्थे। अवि-सोढम्। अविदूसम्। अविमरीसम्।

(वा) तिलान्निष्फलात् पिञ्जपेजौ। स्याताम्। तिलपिञ्जः। तिलपेजः।

३७। तस्य समूहः।

षष्ठ्यर्थेऽण् स्यात्। काकानां समूहः काकम्। बाकम्। शौकम्। समूहाधिकारः कव्यपं यावत् (४।२।५१)।

३८। भिक्षादिभ्योऽण्।

एभ्यो बाधकं बाधित्वाण् स्यात्। भिक्षाणां समूहो भैक्षम्। गार्भिणम्। चार्मिणम्। धार्मिणम्। (34) साहस्रम्। पादातम्। युवतिशब्दाद् यौवतमिति जयादित्यः। भस्याढे तद्धिते (६।३।३५, वा) इति पुंवद्भावे यौवनमिति भागवृत्तिः। (35)

३९। गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ्।

गोत्रप्रत्ययान्तादुक्षादिभ्यश्च समूहे वुञ् स्यात्। दाक्षकम्। गार्गकम्।

(34) According to some चर्मन् and वर्मन् occur in the भिक्षादि and not चर्मिन् and वर्मिन्; so चार्मणम्। वार्मणम्।

(35) एतच्च तावके युवतिशोभि यौवनं नवमञ्जु पीवरैकाकांक्षमिव नगरी। माघेऽपि "उपयाचनायान्य जघनाधनमयौवनम्। यत्र पुत्रात: प्रेक्ष्य सपदं तत्र जीवित"मिति। नैषधे च "मदः स्मितं त्वत्कुचयोर-यौवनकुटस्थमाकम्बु मृणालहारिणी"ति। वस्तुतस्तु युवतिशब्दे चौत्सर्गिकोऽण्। ततो भस्याढे तद्धित (6. 3. 35. वा) इति पुंवद्भावे यौवनमेव स्यात्। ननु भिक्षादिमध्यपठितेषु:। भिक्षादिषु युवतिशब्दपाठस्य भाष्यवार्त्तिकयोः प्रत्याख्यानात्। तथाहि वार्त्तिकम्—भिक्षादिषु युवतिग्रहणानर्थक्यम् पुंवद्भावस्य सिद्धत्वात् अण्वर्णिपाविति (4.2.38, वा)। कथं तर्हि यौवतमिति? यौतिः स्त्रीणाम् स्त्रीपुंसाभ्याम् नञ्स्नञाविति (4.2.43) बहुलार्थेन सिद्धम्। एतच्च भिक्षादिषु गार्भिणं चार्मिणं यौवतं च इत्यादि क्वचित् पाठः।

औक्षकम् । औष्ट्रकम् । औरभ्रकम् । राजकम् । राजन्यकम् । राजपुत्रकम् । वात्सकम् । मानुष्यकम् । आजकम् ।

(क) वृद्धाच्च । वार्द्धकम् ।

४० । केदाराद् यञ् च ।

केदाराद् यञ् वुञ् च स्यात् । कैदार्य्यम् । कैदारकम् । अचित्तठको बाधा ।

(क) गणिकायाश्च । गाणिक्यम् ।

४१ । ठञ् कवचिनश्च ।

कवचिनः केदाराच्च ठञ् स्यात् । कावचिकम् । कैदारिकम् ।

४२ । ब्राह्मणमाणववाडवाद् यन् ।

स्यात् । ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

(क) पृष्ठाच्च । पृष्ठ्यम् ।

(ख) अह्नः खः क्रतौ । क्रतुविषयेऽह्नः समूहे खः स्यात् । अहीनः ।

(ग) पर्श्वा णस् । समूहे । पार्श्वम् । पर्शूनां समूह इत्यर्थः ।

४३ । ग्रामजनबन्धुसहायेभ्यस्तल् ।

एभ्यः समूहे तल् स्यात् । ग्रामता । बन्धुता । जनता । सहायता । (36)

(क) गजाच्च । गजता ।

४४ । अनुदात्तादेरञ् ।

४५ । खण्डिकादिभ्यश्च ।

एभ्योऽञ् स्यात् । कापोतम् । मायूरम् । खाण्डिकम् । वडवानां वृन्दं वाडवम् ।

४६ । चरणेभ्यो धर्म्मवत् ।

समूहे चरणार्थेभ्यो धर्म्मवत् प्रत्ययाः स्युः । काठकम् । छान्दोग्यम् । आथर्व्वणम् ।

---

(36) कथं [illegible] ? यथा: [illegible] [illegible] [illegible] ? [illegible] प्रयोगः । "[illegible]" [illegible] तु [illegible] [illegible] [illegible] ।

४७। अचित्तहस्तिधेनोष्ठक्।

अचित्तार्थेभ्यो हस्तिधेनुभ्याञ्च समूहे ठक् स्यात्। आपूपिकम्। शाष्कुलिकम्। हास्तिकम्। धैनुकम्। धेनोरञपि। धैनवम्।

४८। केशाश्वाभ्यां यञ्छावन्यतरस्याम्।

यथासंख्यमेतौ स्याताम्। केशाद् यञ् वा स्यात्। कैश्यम्। पूर्वेण ठक्। कैशिकम्। अश्वाच्छो वा। अश्वीयम्। आश्वम्। पक्षे ऽण्।

४९। पाशादिभ्यो यः।

पाशादेर्वृन्दे यः स्यात्। पाश्या। तृण्या। वन्या। वात्या। धूम्या।

५०। खलगोरथात्।

एभ्यो यः स्यात्। खल्या। गव्या। रथ्या।

५१। इनित्रकट्यचश्च।

खलादिभ्यः क्रमेणैते स्युः। खलिनी। गोत्रा। "सख्यम्मे मत्खगोत्रया।" रथकट्या।

(वा) खलादिभ्य इनि र्वक्तव्यः। खलिनी। उलूकिनी। पद्मिनी। उलां समूहे। तस्येति वर्त्तत एव।

५२। विषयो देशे।

षष्ठ्यन्तात् तस्य विषयेऽण् स्याद् देशश्चेत्। शिवीनां विषयो देशः शैवः। आङ्गः। पौरवः।

५३। राजन्यादिभ्यो वुञ्।

एभ्यः पूर्वार्थे वुञ् स्यात्। राजन्यको देशः। मालवकः।

५४। भौरिक्याद्यैषुकार्य्यादिभ्यो विधल्भक्तलौ।

यथासंख्यमाभ्यां पूर्वार्थे विधल्भक्तलौ स्याताम्। भौरिकिविधः। ऐषुकारिभक्तः।

५५ । सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ।

प्रगाथेषु च्छन्दसोऽण् स्यात् मन्त्रविशेषः प्रगाथश्चेत् । (37) पङ्क्तिरादिरस्य प्रगाथस्य पाङ्क्तः । आनुष्टुभः । जागतः ।

(क) छन्दसः स्त्रीवे स्वार्थे उपसंख्यानम् । त्रिष्टुबेव त्रैष्टुभम् । जागतम् । आनुष्टुभम् ।

५६ । संग्रामे प्रयोजनयोद्धृभ्यः ।

तदस्यार्थे प्रयोजनयोद्धृभ्यो यथाविहितं स्यात् संग्रामश्चेत् । सुभद्रा प्रयोजनमस्य सौभद्रो रणः । द्रौपदः । सैतः । स्त्रैणः । पौंस्नः । भरता योद्धारोऽस्य भारतः संग्रामः । पादातः । आश्वः ।

५७ । तदस्यां प्रहरणमिति क्रीड़ायां णः ।

अत्रार्थे णः स्यात् क्रीड़ा चेत् । दण्डः प्रहरणमस्यां दाण्डा क्रीड़ा । मौष्टा । पाद्मवा ।

५८ । घञः सास्यां क्रियेति ञः ।

घञन्तादत्रार्थे ञः स्यात् । श्येनपातः क्रियास्यां श्यैनम्पाता मृगया । तैलम्पाता भूमिः ।

५९ । तदधीते तद्वेद ।

अनयोरर्थयोरण् स्यात् । व्याकरणमधीते वेद वा वैयाकरणः । छान्दसः । ज्यौतिषः । निमित्तान्यधीते वेद वा नैमित्तः ।

६० । क्रतूक्थादिसूत्रान्ताट्ठक् ।

एभ्यः पूर्वार्थे ठक् स्यात् । क्रतुः । आग्निष्टोमिकः । उक्थादिः । औक्थिकः । याज्ञिकः । उक्थ । यज्ञ । लोकायत । न्याय । न्यास । तर्क ।

(1) विद्यालक्षणकल्पसूत्रान्ताट्ठकल्पादेरिति वक्तव्यम् । वायसविद्यिकः । चातुर्विद्यिकः । चातुर्वैद्य इति तु तस्य क्रयत्वार्थे ज्ञातकषक्रीतक्रयस्या (४।१।१८) इत्यपि । लक्षणायन्तात् । गौलक्षणिकः । प्राथमकल्पिकः । वार्त्तिकसूत्रिकः । नैव कल्पसूत्रः।

---

(37) यत्र द्वे ऋचौ प्रगथनेन तिस्रः क्रियन्ते स प्रगथनात् प्रकर्षगानाद्वा प्रगाथ इत्युच्यते ।

(2) विद्या चानङ्गक्षत्रधर्मत्रिपूर्वा। अङ्गादिपूर्वाया विद्याया न ठक् स्यात्। आङ्गविद्यः। त्रैविद्यः।

(क) आख्यानाख्यायिकेतिहासपुराणेभ्यश्च। ठक् स्यात्। आख्यानाख्यायिकयोरर्थग्रहणम्। इतिहासपुराणयोस्तु स्वरूपग्रहणम्। यावक्रीतिकः। वासवदत्तिकः। ऐतिहासिकः। पौराणिकः।

(ख) सर्वसादेर्द्विगोश्च लः। एभ्यो लुक् स्यात्। सर्वादेः। सर्ववेदः। सादेः। सवार्त्तिकः। द्विगोः। पञ्चकल्पः। द्विवेदः। द्वितन्त्रः।

(ग) इकन् पदोत्तरपदात्। पदोत्तरपदिकः।

(घ) शतषष्टेः षिकन् पथः। शतपथिकः। षष्टिपथिकी।

६१। क्रमादिभ्यो वुन्।

स्यात्। क्रममधीते वेद वा क्रमकः। पदकः। शिक्षा। मीमांसा। उपनिषत्।

६२। अनुब्राह्मणादिनिः।

पूर्वार्थे इनिः स्यात्। ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम्। तदधीते वेद वानुब्राह्मणी।

६३। वसन्तादिभ्यष्ठक्।

पूर्वार्थे ठक् स्यात्। वासन्तिकः। वार्षिकः। वसन्तादिसहचरितो ग्रन्थस्तथा।

६४। प्रोक्ताल्लुक्।

प्रोक्तप्रत्ययान्तादध्येतृवेदितृप्रत्ययस्य प्रत्ययस्य लुक् स्यात्। पाणिनिना प्रोक्तो ग्रन्थो छाच्छः (४।२।११४) पाणिनीयः। तमधीते वेद वा पाणिनीयः स्मात्रः। आपिशलिना प्रोक्तमितीअणेत्यण् (४।२।११२)। आपिशलम्। आपिशलमधीते वेद वाऽऽपिशला ब्राह्मणी।

६५। सूत्राच्च कोपधात्।

सूत्रवाचिनः कोपधादध्येतृवेदितृप्रत्ययस्य प्रत्ययस्य लुक् स्यात्। पाष्ठं

पाणिनिसूत्रमधीयते विदन्ति वाऽष्टकाः पाणिनीयाः। दशका वैयाघ्रपदीयाः। द्वादशका मीमांसकाः।

(क) संख्याप्रकृतेरेवाभिधानम्। नेह। महावार्त्तिकसूत्रमधीते माहावार्त्तिकः। कोपधात् किम्? चतुष्टयमधीते चातुष्टयः।

६६। छन्दोब्राह्मणानि च तद्विषयाणि।

मण्डूकप्लुत्या प्रोक्तादित्येव। प्रोक्तप्रत्ययान्तानि छन्दांसि ब्राह्मणानि च चकारात् केचन पुराणप्रोक्ताः कल्पाः सूत्राणि च तद्विषयाणि अध्येतृवेदितृविषयाणि स्युः। न प्रोक्तप्रत्ययान्तानि। काठेन प्रोक्तच्छन्दोऽधीयते काठाः। मौदाः। ताण्ड्येन प्रोक्तं ब्राह्मण मधीयते ताण्डिनः। कल्पे काश्यपिनः। सूत्रे पाराशरिणः।

६७। तदस्मिन्नस्तीति देशे तन्नाम्नि।

अत्रार्थेऽण् स्याद् देशस्तन्नामा चेत्। उदुम्बरा अस्मिन् देशे सन्ति औदुम्बरः। पार्वतः।

६८। तेन निर्वृत्तम्।

अत्रार्थेऽण् स्यात्। कुशाम्बेन निर्वृत्ता कौशाम्बी पुरी। साहस्री परिखा।

६९। तस्य निवासः।

अत्रार्थेऽच् स्यात्। शिवीनां निवासः शैवः।

७०। अदूरभवश्च।

अत्रार्थेऽच् स्यात्। विदिशाया अदूरभवं वैदिशं नगरम्। पाम्पानि वनानि। एते चत्वारोऽर्था अनुवर्त्तन्ते शेषाधिकारं (४।२।९२) यावत्।

७१। ओरञ्।

उवर्णान्ताच्चातुरर्थिकोऽञ् स्यात् कार्कटवम्। अञधिकारः प्राक् सुवास्तादिभ्योऽणः (४।२।७७)।

७२। मतोश्च बह्वजङ्गात्।

बह्वजङ्गं यस्य मतुपस्तदन्तादञ् स्यात्। ऐकटावतो नाम देशः।

७३। बह्वचः कूपेषु।

बह्वचोऽञ् स्यात् कूपश्चेत्। दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः कूपः। वृक्षमूलस्यादूरभवो वार्क्षमूलः।

७४। उदक् च विपाशः।

विपाशाया उत्तरकूलकूपेष्वञ् स्यात्। दत्तेन निर्वृत्तो दात्तः कूपः। गौप्तः। (38)

७५। सङ्कलादिभ्यश्च।

एभ्यश्चातुरर्थिकोऽञ् स्यात्। साङ्कलः। पौष्कलो देशभेदः।

७६। स्त्रीषु सौवीरसाल्वप्राक्षु।

स्त्रीलिङ्गे सौवीरादिदेशेऽञ् स्यात्। दत्तामित्रेण निर्वृत्ता पुरी दात्तामित्री। साल्वे वैधूमाग्नी। प्राचि माकन्दी नगरी।

७७। सुवास्त्वादिभ्योऽण्।

एभ्योऽण् स्यात्। सौवास्तवं नगरम्। सौवास्तवी नगरी। सौवास्तवी नदी। वार्णवम्। वार्णवी।

७८। रोणी।

रोण्यन्तादण् स्यात्। भाजकरोणः। कैवलाण। रोण्या निर्वृत्तो रौणः कूपः।

७९। कोपधाच्च।

अण् स्यात्। कार्णच्छिद्रकः। कार्णच्छिद्रकः। त्रैशङ्कवम्।

---

(38) अत्रेदं सूत्रकारं प्रति सविकल्पप्रशंसापरं वामनजयादित्ययोर्वाक्यम्—"उदगिति किम्? दक्षिणतो विपाशः कूपेष्वेव। दात्तः। गौप्तः। अरे विशेषः। महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य।"—इति

८० । वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः ।

एभ्यः सप्तदशभ्यो गणेभ्यो यथासङ्ख्यं चातुरर्थिकेषु वुञादयः स्युः। अरीहणादेर्वुञ्। आरीहणकम्। कृशाश्वादेश्छण्। कार्शाश्वीयः। ऋश्यादेः कः। ऋश्यकः। कुमुदादेष्ठच्। कुमुदिकम्। काशादेरिलः। काशिलम्। तृणादेः सः। तृणसा। नडसा। वीरणसा। प्रेक्षादेरिनिः। प्रेक्षी। फलकी। अश्मादिभ्यो रः। अश्मरः। सख्यादेर्ढञ्। साखेयम्। सङ्काशादेर्ण्यः। साङ्काश्यम्। काम्पिल्यम्। बलादिभ्यो यः। बल्यम्। पक्षादेः फक्। पाक्षायणः। कर्णादेः फिञ्। कार्णायनिः। सुतङ्गमादेरिञ्। सौतङ्गमिः। प्रगदिन्नादेर्ञ्यः। प्रागद्यम्। वराहादेः कक्। वाराहकम्। पालाशकम्। शार्करकम्। कुमुदादेष्ठक्। कौमुदिकम्। गौमथिकम्।

८१ । जनपदे लुप् ।

जनपदे तन्नाम्नि देशे चातुरर्थिकस्य लुप् स्यात्। पञ्चालानां निवासो जनपदः पञ्चालाः। कुरवः। वङ्गाः। जनपदो देशभेदः।

८२ । वरणादिभ्यश्च ।

एभ्यश्चातुरर्थिकस्य लुप् स्यात्। वरणा ग्रामः। गोदौ ग्रामः। खलतिकं वनानि। एवं शिरीषाः। शृङ्गी। गया। उज्जयिनी।

८३ । शर्कराया वा ।

अस्या लुप् स्याद्वा। शर्कराभिर्निर्वृत्तं शर्कराः शार्करं वा।

८४ । ठक्छौ च ।

अस्याठक्छौ स्याताम्। शार्करिकम्। शर्करीयम्।

८५ । नद्यां मतुप् ।

नद्यां चातुरर्थिकेषु मतुप् स्यात्। उदुम्बरावती नदी। इक्षुमती।

८६। मध्वादिभ्यश्च ।

एभ्यश्चतुर्थ्यर्थेषु मतुप् स्यात् । मधुमान् । विसवान् देशः ।

८७। कुमुदनड़वेतसेभ्यो ड्मतुप् ।

(क) महिषाच्च ।

एभ्यो ड्मतुप् स्यात् । डिति टिलोपः । कुमुद्वान् । नड्वान् । वेतस्वान् । वेतस्वती सरित् । महिष्मान् नाम देशः ।

८८। नडशादाड्ड्वलच् ।

आभ्यां ड्वलच् स्यात् । नड्वलः । शाद्वलः । "शय्या शाद्वलमासनं शुचिशिला'।"

८९। शिखाया वलच् ।

स्यात् । शिखावलं नगरम् ।

९०। उत्करादिभ्यश्छः ।

उत्करीयम् ।

९१। नडादीनां कुक् च ।

एषां छः स्यात् कुक् च । नड़कीयम् । नड़ । वेणु । प्लक्ष । बिल्व ।

(1) कृशाया क्षत्वश्च । कृशकीयम् ।

(2) तक्षन्नलोपश्च । तक्षकीयम् । उत्करादयश्चातुरर्थिकाः ।

९२। शेषे ।

शेषे तत्र जातादावर्थे प्रत्यया वाच्याः । राष्ट्रे जातो राष्ट्रादागतो राष्ट्रे भवो वा राष्ट्रियः । शालीयः । इह चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । अश्वैरुह्यते आश्वो रथः । चातुरं शकटम् । दृषदि पिष्टा दार्षदा माषाः । औदूखलाः सक्तवः । चतुर्दश्यां दृश्यते चातुर्दशं रक्ष इति सामान्येन तस्येदमिति (४।३।१२०) विवक्षायामिति भामवृत्तिः । शेष इत्यधिकारो लक्षणश्चेति जयादित्यः ।

९३ । राष्ट्रावारपाराद् घखौ ।

आभ्यां घखौ स्याताम् । राष्ट्रियः । अवारपारीणः ।

(क) विग्रहीताच्च । अवारीणः । पारीणः ।

(ख) विपरीताच्च । पारावारीणः इति प्रेक्षते ।

९४ । ग्रामाद् यखञौ ।

स्याताम् । ग्राम्यो ग्रामीणः ।

९५ । कत्र्यादिभ्यो ढकञ् ।

कत्रीत्येवमादिभ्यो ढकञ् स्यात् । कत्रि कात्रेयकः । उम्भि औम्भेयकः । ग्रामेयकः । नागरेयकः ।

(1) कु (ख्या) आया यलोपश्च । कौ(ले)ड़ेयकः ।

९६ । कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ।

कुलादेः श्वादौ वाच्ये ढकञ् स्यात् । कौलेयकः श्वा । कौक्षेयकोऽसिः । ग्रैवेयकः कण्ठालङ्कारः (39) ।

९७ । नद्यादिभ्यो ढक् ।

स्यात् । नादेयं जलम् । वाराणसेयो जनः । श्रावस्तेयः ।

९८ । दक्षिणापश्चात्पुरसस्त्यक् ।

एभ्यः शैषे त्यक् स्यात् । आप्प्रत्ययान्तो दक्षिणाशब्दः । न स्त्रीलिङ्ग इति सर्वनाम्नो वृत्तिमात्रे न पुंवद्भावः (२।१।२६, वा) । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ।

९९ । कापिश्याः ष्फक् ।

षष्ठ्याः ष्फक् स्यात् । कापिशायनं मधु । कापिशायनी द्राक्षा ।

(क) बाह्लुर्दिपर्दिभ्यश्च । ष्फक् स्यात् । बाह्लायनी । और्दायनी । पार्दायनी ।

---

(39) पहुरी पिनकी तवर ग्रैवेयकमनुपमजिति हैमीमाहाम्न्येः ।

१०० । रङ्कोरमनुष्येऽण् च ।

रङ्कोरमनुष्येऽण् स्यात् । ष्फक् च । राङ्कवः । राङ्कवायणः ।

१०१ । द्युप्रागपा(वा)गुदक्प्रतीचो यत् ।

एभ्यो यत् स्यात् । दिव्यम् । प्राच्यम् । अपा (वा) च्यम् । उदीच्यम् । प्रतीच्यम् । अव्ययात्तु ट्युट्युलौ तुट् च (४।३।२३) । प्राक्तनम् ।

१०२ । कन्थायाष्ठक् ।

कान्थिकम् ।

१०३ । वर्णौ वुक् ।

वर्णौ देशे कन्थाया वुक् स्यात् । कान्थकम् ।

१०४ । अव्ययात् त्यप् ।

अमेहक्वतसित्रेभ्योऽभिधानम् । अमात्यः । "क्वत्येयं दुर्मतिस्तव ।" ततस्त्यः । यतस्त्यः । कुतस्त्यः । यत्रत्यः । अत्रत्यः । तत्रत्यः ।

(क) त्यब् ने ध्रुवे । नित्यम् ।

(ख) निसो गते त्यप् । निर्गतो देशान्निष्ट्यश्चाण्डालादिः ।

(ग) अरण्याणः । आरण्याः सुमनसः ।

(घ) दूरादेत्यः । दूरेत्यः पथिकः ।

(ङ) उत्तरादाहञ् । औत्तराहः ।

१०५ । ऐषमोह्यःश्वसोऽन्यतरस्याम् ।

एभ्यस्त्यप् स्याद्वा । ऐषमस्त्यम् । ह्यस्त्यम् । श्वस्त्यम् । पक्षे ऐषमस्तनम् । ह्यस्तनम् । श्वस्तनम् ।

१०६ । तीररूप्योत्तरपदादञ्ञौ ।

तीरोत्तरपदादञ्, रूप्योत्तरपदाञ्ञः स्यात् । वार्कतीरम् । वार्करूप्यम् ।

१०७ । दिक्पूर्वपदादसंज्ञायां ञः ।

दिक्पूर्वपदादनाम्नि ञः स्यात् । पौर्वशालः । औत्तरशालः ।

१०८ । मद्रेभ्योऽञ् ।

दिक्पूर्वपदान्मद्रेभ्योऽञ् स्यात् । पौर्वमद्रः ।

१०९ । उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ।

उदीच्यग्रामवाचिनोऽञ् स्यात् । शैवपुरम् । माण्डनगरम् । बह्वचः किम् ? घ्याजम् ।

११० । प्रस्थोत्तरपदपलद्यादिकोपधादण् ।

एभ्योऽण् स्यात् । प्रस्थान्तात् । माद्रीप्रस्थो ग्रामः । पलद्यादेः । पालदः । पारिषदः । कोपधात् । वैघातकः । उदीच्यग्रामादञोऽपवादः ।

१११ । कण्वादिभ्यो गोत्रे ।

गोत्रप्रत्ययान्तात् कण्वादेरण् स्यात् । छस्य बाधा । कण्वादेर्गर्गादित्वाद् यञ् (४।१।१०५) । काण्व्यः । तस्यच्छात्राः काण्वाः । गौकक्षाः ।

११२ । इञश्च ।

गोत्रे इञन्तादण् स्यात् । छापवादः । दाक्षेरमी दाक्षाः । प्लाक्षाः ।

११३ । न द्व्यचः प्राच्यभरतेषु ।

प्राच्यभरतयोर्गोत्रे द्व्यच इञन्तादण् न स्यात् । वैह्नीयाः । काशीयाः ।

११४ । वृद्धाच्छः ।

वृद्धसंज्ञकाच्छः स्याच्छैषिकः । शालीयः । आचार्यीयः । औपगवीयं मतम् । त्वदीयः । मदीयः ।

११५ । भवतष्ठक्छसौ ।

अस्मादिमौ स्याताम् । छस्य बाधा । भावत्कः । भवदीयः ।

११६ । काश्यादिभ्यष्ठञ्ञिठौ ।

एभ्य इमौ स्याताम् । काशिकी काशिका । वैदिकी वैदिका । चैदिकी चैदिका ।

११७ । वाहीकग्रामेभ्यश्च ।

एभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्याताम् । शाकलिकी शाकलिका ।

११८। विभाषोशीनरेषु।

एषु वाहीकग्रामेभ्यस्तौ स्यातां वा। आह्वजालिकी आह्वजालिका आह्वजालीया वा।

११९। ओर्देशे ठञ्।

उवर्णान्ताद्देशे ठञ् स्याच्छेषे। शावरजम्बुकः।

१२०। वृद्धात् प्राचाम्।

प्राग्देशे वृद्धादिवोवर्णान्तात् ठञ् स्यात्। आढकजम्बुकः। वृद्धात् किम्? मल्लवास्तु माल्लवास्तवः।

१२१। धन्वयोपधाद् वुञ्।

धन्वान्ताद् देशवाचिनो वृद्धाद् योपधाच्च वुञ् स्यात्। धन्वा मरुदेशः। पारेधन्वकः। साङ्काश्यकः।

१२२। प्रस्थपुरवहान्ताच्च।

एतदन्ताद् वृद्धाद् देशाद्वुञ् स्यात्। मालाप्रस्थकः। नान्दीपुरकः। पैलुवहकः।

१२३। रोपधेतोः प्राचाम्।

रेफोपधादीदन्ताच्च वृद्धात् प्राग्देशाद् वुञ् स्यात्। पाटलिपुत्रकः। ऐकचक्रकः। ईतः। माकन्दकः।

१२४। जनपदतदवध्योश्च।

वृद्धाज्जनपदाद् वुञ् स्यात्। आभिसारकः। अवधिभूताज्जनपदात्। त्रैगर्तकः। गर्तोत्तरपदाच्छस्य (४।२।१३७) बाधा।

१२५। अवृद्धादपि बहुवचनविषयात्।

बहुवचनविषयाज्जनपदाद् वृद्धादवृद्धाच्च वुञ् स्यात्। छाणोरपवादः। आङ्गकः। आजमीढकः। वृद्धात्। जाम्बकः। कालञ्जरकः।

१२६। कच्छाग्निवक्त्रगर्त्तोत्तरपदात्।

कच्छाद्यन्ताद् देशाद् वुञ् स्यात्। दारुकच्छकः। काण्डाग्नकः। सैन्धुवक्त्रकः। बाहुगर्त्तकः।

१२७। धूमादिभ्यश्च।

एभ्यो देशे वुञ् स्यात् छादेर्बाधकः। धौमकः। वैदेहकम्। एवं साकेत। राजगृह। उज्जयिनी। दक्षिणापथ। "दक्षिणापथी वृत्ति"रिति तु चिन्त्यम्।

(1) समुद्रान्नौमनुष्ययोः। वुञ् स्यात्। सामुद्रिका नौः। सामुद्रको मनुष्यः। नेह। सामुद्रं जलम्। सामुद्रं लवणम्।

१२८। नगरात् कुत्सनप्रावीण्ययोः।

वुञ् स्यात्। खलो नागरकः। कुशला नागरकाः। कुत्सनप्रावीण्ययोः किम्? नागरा विप्राः।

१२९। अरण्यान् मनुष्ये।

वुञ् स्यात्। आरण्यको मनुष्यः।

(क) पथ्यध्यायन्यायविहारहस्तिषु। आरण्यकः पन्था इत्यादि।

(ख) वा गोमयेषु। आरण्यकमारण्यं वा गोमयम्।

१३०। विभाषा कुरुयुगन्धराभ्याम्।

आभ्यां वुञ् स्याद्वा। कौरवकः कौरवो वा। यौगन्धरको यौगन्धरो वा।

१३१। मद्रवृज्योः कन्।

आभ्यां कन् स्यात्। मद्रकः। वृजिकः।

१३२। कोपधादण्।

कोपधाज्जनपदादण् स्यात्। वुञो बाधा। ऋषिकेषु जात आर्षिकः। माहिषिकः। आर्ष्यकः। अण्महच्चादुवर्णादपि देशे। ऐक्ष्वाक इत्येके।

१३३। कच्छादिभ्यश्च।

देशेऽण् स्यात्। काच्छः। सैन्धवः। तद्दन्तावेदम्। सौरसैन्धवम्। कच्छ। सिन्धु। कम्बोज। गन्धार। कश्मीर। साल्व। कुरु। रङ्कु।

१३४। मनुष्यतत्स्थयोर्वुञ्।

अनयोरर्थयोः कच्छादिभ्यो वुञ् स्यात्। काच्छको मनुष्यः। सैन्धवकः। साल्वकः। तत्स्थे। काच्छकमस्य हसितम्। काच्छिका चूडा। सैन्धविका।

१३५। अपदातौ साल्वात्।

अपदातावेव साल्वाद् वुञ् स्यात्। साल्वको मनुष्यः। नेह। साल्वः पदातिः।

१३६। गोयवाग्वोश्च।

अनयोः साल्वाद्वुञ् स्यात्। साल्वको गौः। साल्विका यवागूः।

१३७। गर्त्तोत्तरपदाच्छः।

गर्त्तान्ताद् देशाच्छः स्यात्। वृकगर्त्तीयः। श्वगर्त्तीयः।

१३८। गहादिभ्यश्च।

एभ्यश्छः स्यात्। गहीयः। अन्तस्थीयः। मान्तरीयः। एकग्रामीयः। गह। अन्तस्थ। मान्तर। सम। विषम। आकृतिगणोऽयम्। तेनाक्षाधिकारीयः। नगरीयः। पूर्वशालिकीय इत्यादि सिध्यति।

(क) पृथिवीमध्यस्य मध्यमश्च। मध्यमीयः।

(ख) चरणेऽण् च। माध्यमः। मध्यमीयः।

(1) मुखपार्श्वतसोर्लोपः। मुखतीयः। पार्श्वतीयः।

(2) कुग् जनस्य परस्य च। जनकीयम्। परकीयम्।

(3) देवस्य चेति वक्तव्यम्। देवकीयम्। चान्द्रास्तु परजनदेवराज्ञां कुक् चेति पठन्ति। स्वस्य च। स्वकीयम्। वामनस्तु अयमच्छादपि दारादीनामेत्वमेवागम (७।१।४) मुदाहरिष्यति स्वकेदं सोयमिति।

(4) वेणुकादिभ्यो छण्वि। वैणुकीयम्। वैत्रकीयम्।

१३९। प्राचां कटादेः।

कटपूर्वात् प्राग्देशाच्छः स्यात्। कटनगरीयम्। कटघोषीयम्।

१४० । राज्ञः क च ।

राज्ञश्छः स्यात् ककारान्तादेशः । राजकीयम् ।

१४१ । वृद्धादकेकान्तखोपधात् ।

वृद्धादकेकान्तात् खोपधाच्च देशाच्छः स्यात् । आरीहणकीयम् । आश्वत्थिकीयम् । कौटशिखीयम् ।

१४२ । कन्थापलदनगरग्रामह्रदोत्तरपदात् ।

कन्थाद्यन्ताद् देशाच्छः स्यात् । वाहीकग्रामविधेरपवादः । दाक्षिकन्थीयः । दाक्षिपलदीयः । दाक्षिनगरीयः । वाहीकग्रामीयः । माहिषग्रामीयः । वाहीकह्रदीयः । माहिषह्रदीयः ।

१४३ । पर्वताच्च ।

छः स्यात् । "पर्वतीय इति मावजीगवः" ।

१४४ । विभाषाऽमनुष्ये ।

मनुष्यादन्यत्र पर्वताज्जातादौ छो वा स्यात् । पर्वतीयं फलम् पार्वतं वा ।

१४५ । कृकणपर्णाद् भारद्वाजे ।

भारद्वाजदेशे कृकणपर्णाभ्यां छः स्यात् । कृकणीयम् । पर्णीयम् । उक्तं देशे ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४।२ ॥ समाप्तश्च रक्तपादः ।

अथ

भाषावृत्तिः ।

चतुर्थोऽध्यायः । तृतीयः पादः ।

१ । युष्मदस्मदोरन्यतरस्यां खञ्च ।

शेष इत्येव । युष्मदस्मदोः खञ् छश्च स्याताम् । यौष्माकीणम् । आस्माकीनम् । युष्मदीयम् । अस्मदीयम् । पक्षेऽण् च । यौष्माकम् । आस्माकम् ।

२ । तस्मिन्नणि च युष्माकास्माकौ ।

तस्मिन् खञि अणि च युष्मदस्मदोर्युष्माकास्माकादेशौ स्याताम् । तथैवोदाहृतम् ।

३ । तवकममकावेकवचने ।

एकार्थे युष्मदस्मदोस्तवकममकौ स्यातां खञि । अणि च । तावकीनम् । मामकीनम् । तावकम् । मामकम् ।

४ । अर्द्धाद् यत् ।

अर्द्धाद् यत् स्यात् । अर्द्धम् ।

(वा) सपूर्वपदाद् ठञ् वक्तव्यः । गौतमार्द्धिकम् ।

५ । परावराधमोत्तमपूर्वाच्च ।

एतत्पूर्वपदादर्द्धाद् यत् स्यात् । परार्द्ध्यम् । अवरार्द्ध्यम् । अधमार्द्ध्यम् । उत्तमार्द्ध्यम् ।

६ । दिक्पूर्वपदाट् ठञ्च ।

दिक्पूर्वपदादर्द्धात् ठञ् स्यात् । यच्च । पौर्वार्द्धिकम् । पूर्वार्द्ध्यम् । दाक्षिणार्द्धिकम् । दक्षिणार्द्ध्यम् ।

७ । ग्रामजनपदैकदेशादञ्ठञौ ।

अनयोरेकदेशाद् दिक्पूर्वपदादर्द्धादञ्ठञौ स्याताम् । इमेऽस्य ग्रामस्य जनपदस्य वा पौर्वार्द्धाः पौर्वार्द्धिकाः ।

८ । मध्यान्मः ।

मध्यशब्दाच्छेषे मः स्यात् । मध्यमः ।

(क) आदेश्च । आदिमः ।

(ख) अवोऽधसोर्लोपश्चेत्येके । अवमः । अधमः ।

९ । अ सांप्रतिके ।

मध्यादकारः साम्प्रत्ये नात्युच्चैर्नातिनीचैः । मध्यं काष्ठम् । मध्यस्तार्किकः ।

१० । द्वीपादनुसमुद्रं यञ् ।

समुद्रसमीपे द्वीपाद् यञ् स्यात् । द्वैप्या वणिजः ।

११ । कालाट् ठञ् ।

शेषे कालवाचिनष्ठञ् स्यात् । द्विवार्षिकः । द्वैवर्षिकः । मासिकः । सांवत्सरिकः । पाक्षिकः । मौहूर्त्तिकः । कालाधिकारः प्राक् तत्र जातात् (४।३।२५) ।

१२ । श्राद्धे शरदः ।

श्राद्धे शरदष्ठञ् स्यात् । शारदिकं श्राद्धम् । शारदमन्यत् ।

१३ । विभाषा रोगातपयोः ।

अनयोरर्थयोः शरदष्ठञ् स्याद्वा । शारदिकः शारदो वा रोग आतपो वा । ठञा सिद्धे वचनम् (४।३।१६) ।

१४। निशाप्रदोषाभ्यां च।

भ्याम् च ठञ् वा स्यात्। नैशिकं नैशं वा तमः। प्रादोषिकः प्रादोषो वा।

१५। श्वसस्तुट् च।

श्वःशब्दात् ठञ् वा स्यात्। तुट् चागमः। श्वो भविता शौवस्तिकः। "शौवस्तिकत्वं विभवा न येषाम्।" पक्षे श्वस्त्यम्। श्वस्तनम्।

१६। सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।

एभ्यः शैषेऽण् स्यात्। सन्धिवेलादेः। सान्धिवेलम्। सान्ध्यम्। आमावास्यम्। पौर्णमासम्। त्रायोदशम्। चातुर्दशम्। प्रातिपदम्। ऋतोः। ग्रैष्मम्। शैशिरम्। नक्षत्रात्। तैषम्। तिष्यपुष्ययोर्नक्षत्राणीति (६।४।१४९, वा) यलोपः। पौषम्।

(1) संवत्सरात् फलपर्वणोरेव। सांवत्सरं फलं पर्व वा। नेह। सांवत्सरिको व्याधिः।

१७। प्रावृष एण्यः।

स्यात्। प्रावृषेण्यो मेघः। "प्रावृषेण्यं पयोवाहम्"।

१८। वर्षाभ्यष्ठक्।

स्यात्। वार्षिकम्। तदन्ताच्च। पौर्ववर्षिकम्।

१९। छन्दसि ठञ्।

२०। वसन्ताच्च।

छन्दःसूत्रद्वयम्।

२१। हेमन्ताच्च।

२२। सर्वत्राण् च तलोपश्च।

हेमन्तादण् स्यात् तलोपश्च। हैमनम्। "रजनीष्वपि हैमनीषु"। अतलोपमपीष्यते। हैमन्तम्। पूर्वसूत्रे ठञ्प्रत्ययेनाभिसम्बन्धाद् भाषायामपि। हैमन्तिकः। सर्वत्रेत्येकवृत्तौ (40) छन्दोऽधिकारनिवृत्त्यर्थम्।

---

(40) एकवृत्तावपि [illegible] [illegible]। Vide the notes on 1. 1. 16 and on 3. 4. 99.

२३ । सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।

सायमादिभ्युट्युलौ स्याताम् । तुट् चागमः । सायन्तनम् । चिरन्तनम् । निपातनान्मकारः । "सायन्तनीं तिथिप्रश्नः" । प्राह्णेतनम् । प्रगेतनम् । निपातनादेकारः । अव्ययात् । दिवातनम् । दोषातनम् । इह ट्युट्युलौ भवतो विप्रतिषेधेन । प्राक्तनम् । प्रातस्तनम् । चिरपरुत्परारिभ्यस्त्न इति जयादित्यः । चिरत्नम् । परुत्नम् । परारित्नम् । अग्रपश्चाड्डिमजिति च्छान्दसमिति भागवृत्तिः । अग्रिमम् । पश्चिमम् । अन्ताच्च डिमजिति जयादित्यः । अन्तिमम् ।

२४ । विभाषा पूर्वाह्णापराह्णाभ्याम् ।

आभ्यां ट्युट्युलौ वा स्याताम् । तुट् च । पूर्वाह्णेतनम् । अपराह्णेतनम् । घकालतनेष्विति (६।३।१७) सप्तम्या अलुक् । पक्षे कालाट् ठञ् (४।३।११) । पौर्वाह्णिकः । आपराह्णिकः । पूर्वः कालाधिकारः ।

२५ । तत्र जातः ।

अत्रार्थे यथाविहितमणादयो घादयश्च स्युः । माथुरः । स्रौघ्नः । औत्सः । राष्ट्रियः । कालेयकः ।

२६ । प्रावृष ष्ठप् ।

प्रावृषो जातार्थे ठप् स्यात् । प्रावृषिकः ।

२७ । संज्ञायां शरदो वुञ् ।

नाम्नि शरदो वुञ् स्यात् । शारदका मुद्गाः । शारदमन्यत् ।

२८ । पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् ।

एभ्यो जातार्थे नाम्नि वुन् स्यात् । पूर्वाह्णकः । अपराह्णकः । आर्द्रकम् । मूलकम् । प्रदोषकः । अवस्करकः ।

२९ । पथः पन्थ च ।

पथो वुन् स्यात् । पन्थादेशश्च जातार्थे । पन्थको वत्सः ।

३० । अमावास्याया वा ।

अतो वा वुन् स्यात् । अमावास्यकः । आमावास्यो वा ।

३१ । अ च ।

अस्या अकारश्च स्यात् । अमावास्यः ।

३२ । सिन्ध्वपकराभ्यां कन् ।

जातार्थे आभ्यां कन् स्यात् । सिन्धुकः । अपकरकः ।

३३ । अणञौ च ।

आभ्यामिमौ स्याताम् । सैन्धवः । आपकरः । स्वरे भेदः ।

३४ । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ।

एभ्यो जातार्थे नक्षत्राणो लुक् स्यात् । लुक् तद्धितलुकीति (१।२।४९) स्त्रीप्रत्ययस्य लुक् । श्रविष्ठः । फल्गुनोऽर्जुनः । स्वार्थेऽपि "फाल्गुनो माघे चार्जुने" इति । पुनर्वसुर्वररुचिः । बहुलः ।

(क) चित्रारेवतीरोहिणीभ्यः स्त्रियां लुक् । चित्रा । रेवती । रोहिणी । प्रत्यये लुप्ते पुनष्टाप् । यथासम्भवं गौरादिङीष् वा ।

(ख) फल्गुन्याषाढाभ्यां टानौ । आभ्यां स्त्रियां टानौ स्यात् । फल्गुनी । अषाढा ।

(ग) श्रविष्ठाषाढाभ्याञ्छण् । श्राविष्ठीयः । आषाढीयः ।

३५ । स्थानान्तगोशालखरशालाच्च ।

एभ्यो जातार्थप्रत्ययस्य लुक् स्यात् । गोस्थाने जातो गोस्थानः । अश्वस्थानः । गोशालः । खरशालः ।

३६ । वत्सशालाभिजिदश्वयुक्छतभिषजो वा ।

एभ्यो जातार्थप्रत्ययस्य लुग् वा स्यात् । वत्सशालो वात्सशालो वा । अभिजित् आभिजितो वा । अश्वयुक् आश्वयुजो वा । शतभिषक् शातभिषजो वा ।

३७ । नक्षत्रेभ्यो बहुलम् ।

नक्षत्रवाचिभ्यो बहुलं सन्धिवेलाद्यृतु (४।३।१६) लुक् स्यात् । रोहिणः । रोहिणः । मार्गशीर्षः । मृगशिराः । पूर्वो आतार्थः । तत्रेति वर्त्तते यावत् तदस्य सोढम् (४।३।५२) ।

३८ । कृतलब्धक्रीतकुशलाः ।

अत्र कृतादिषु यथाविहितं स्यात् । स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः । राष्ट्रियः ।

३९ । प्रायभवः ।

प्रायभव इत्यर्थे यथाविहितं स्यात् । स्रुघ्ने प्रायेण भवति स्रौघ्नः । राष्ट्रियः ।

४० । उपजानूपकर्णोपनीवे ष्ठक् ।

एभ्यः प्रायभवेऽर्थे ठक् स्यात् । "पाणी यस्यौपजानुकौ" । "औपकर्णिक-शोभनः ।" "औपनीविकमरुत्र किल स्त्री वल्लभस्य करमात्मकराभ्याम् ।"

४१ । सम्भूते ।

अत्रार्थे यथाविहितं स्यात् । स्रुघ्ने सम्भवति स्रौघ्नः प्रमाष्टत् । स्थानमिह सम्भवार्थः ।

४२ । कोशाड्ढञ् ।

कौशेयम् । रूढ्या वस्त्रमेव विकारेऽभिधानम् ।

४३ । कालात् साधुपुष्प्यत्पच्यमानेषु ।

एष्वर्थेषु कालाद् यथाविहितं स्यात् । हैमन्ते साधु हैमनं वासः । शैशिर-मनुलेपनम् । ग्रैष्मम् । वसन्ते पुष्प्यति वासन्ती लता । माधवी । शरदि पच्यन्ते शारदा माषाः । कालादित्यधिकारः प्राक् तत्र भवात् (४।३।५३) ।

४४ । उप्ते च ।

उप्तेऽर्थे कालाद् यथाविहितं स्यात् । हैमना यवाः । ग्रैष्माः शालयः । तत्रोप्ता इत्यर्थः ।

४५। आश्वयुज्या वुञ्।

आश्वयुजीशब्दाद् वुञ् स्यादुप्तेऽर्थे। ठञो बाधा। आश्वयुज्यां पौर्णमास्यामुप्ता आश्वयुजका माषाः।

४६। ग्रीष्मवसन्तादन्यतरस्याम्।

आभ्यामुप्तेऽर्थे वुञ् वा स्यात्। ग्रैष्मकम्। वासन्तकम्। पक्षे ऋत्वण् (४।३।१६)। ग्रैष्मम्। वासन्तम्।

४७। देयमृणे।

सप्तम्यर्थे यथाविहितं स्यात्। मासे देयमृणम् मासिकम्। सांवत्सरिकम्।

४८। कलाप्यश्वत्थयवबुसाद्वुन्।

यत्र मयूराः कलापिनोऽश्वत्थाः फलिनो यवबुसा चोत्पद्यन्ते स कालस्तथा। तस्मात् पूर्वार्थे वुन् स्यात्। कलापिनि काले देयमृणं कलापकम्। अश्वत्थकम्। यवबुसकम्।

४९। ग्रीष्मावरसमाद्वुञ्।

आभ्यां पूर्वार्थे वुञ् स्यात्। ग्रैष्मकम्। आवरसमकम्।

५०। संवत्सराग्रहायणीभ्यां ठञ्च।

आभ्यां ठञ् स्याद्वुञ् च। संवत्सरे देयमृणं सांवत्सरिकं सांवत्सरकं वा। आग्रहायणिकम्। आग्रहायणकं वा।

५१। व्याहरति मृगः।

सप्तम्यर्थे कालाद् यथाविहितं स्यात्। निशायां व्याहरति नैशो मृगः। नैशिको वा। तत्रेति निवृत्तम्।

५२। तदस्य सोढम्।

प्रथमार्थे कालाद् यथाविहितं स्यात्। निशासहचरितं कर्म निशा। तत् सोढं जितमभ्यस्तमस्य नैशिकस्तापो नैशो वा। प्रादोषिकः प्रादोषो वा। उक्तं कालात्।

५३ । तत्र भवः ।

सप्तम्यर्थे यथाविहितं स्यात् । स्रुघ्ने भवो विद्यमानः स्रौघ्नः । राष्ट्रियः । तत्रभवाधिकारः प्राक् तत आगत इत्यस्मात् (४।३।७४) ।

५४ । दिगादिभ्यो यत् ।

एभ्यो यत् स्यात् । दिशि भवं दिश्यम् । वन्यम् । रहस्यम् । आद्यम् । अन्त्यम् । यूथ्यम् । गण्यम् । रस्यम् ।

(1) उदकात् संज्ञायाम् । उदक्या रजस्वला । अन्यत्र औदको मत्स्यः ।

५५ । शरीरावयवाच्च ।

यत् स्यात् । दन्त्यम् । तालव्यम् । कण्ठ्यम् । ओष्ठ्यम् । जरव्यम् । उरस्यम् । मूर्धन्यम् । मुख्यम् ।

५६ । दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ।

एभ्यो ढञ् स्यात् । दार्त्तेयम् । कौक्षेयोऽसिः । कालशेयं जलम् । वास्तेयम् । आस्तेयम् । आहेयम् । "भोगान् भोगानिवाहेयानि"ति ।

५७ । ग्रीवाभ्योऽण् च ।

अस्या अण्ढञौ स्याताम् । ग्रैवम् । ग्रैवेयम् । बहुवचनं वैचित्र्यार्थम् ।

५८ । गम्भीराञ्ञ्यः ।

स्यात् । गाम्भीर्यम् ।

(क) बहिर्देवपञ्चजनेभ्यश्च । बहिषष्टिलोपः । बाह्यम् । दैव्यम् । पाञ्चजन्यम् ।

५९ । अव्ययीभावाच्च ।

अस्माद् भवार्थे ञ्यः स्यात् । पारिमुख्यम् । पारिहनव्यम् । नोप-कूलादिभ्यः । औपकूलः । औपशालः ।

६० । अन्तःपूर्व्वपदाट् ठञ् ।

अन्तःपूर्वपदादव्ययीभावाट् ठञ् स्यात् । आन्तर्देशिकः । आन्तर्वेश्मिकः । आन्तर्वेगिकः ।

(क) अध्यात्मादिभ्यश्च । भवार्थे ठञ् स्यात् । आध्यात्मिकम् । आधिभौतिकम् । आधिदैविकम् । औपसर्गिकम् । चातुरर्थिकम् । त्रैवर्णिकम् । साम्प्रतिकम् । गैरिकमित्यादि । आकृतिगणोऽयम् ।

(ख) समानस्य तदादेश्च । सामानिकः । सामानग्रामिकः ।

(ग) ऊर्ध्वंदमोर्ध्वंदेहाच्च । और्ध्वन्दमिकः । और्ध्वदेहिकः । (41)

(घ) लोकोत्तरपदस्य च । ऐहलौकिकः । पारलौकिकः ।

(ङ) मुखपार्श्वतसोरीयः । मुखतीयः । पार्श्वतीयः । अव्ययानां भमात्रे टिलोपः ।

(च) कुग्जनस्य परस्य च । जनकीयः । परकीयः ।

(छ) ईयः कार्य्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा । मध्यीयः । माध्यमः । मध्यमीयः ।

(ज) मध्यस्य मध्यं दिनण् च प्रत्ययः । माध्यन्दिनमुपगायति ।

(झ) लुक् स्थाम्नोऽजिनान्ताच्च । अश्वत्थामा । क्षाजिनः ।

६१ । ग्रामात् पर्य्यनुपूर्वात् ।

आभ्यामव्ययीभावात् ठञ् स्यात् । पारिग्रामिकः । आनुग्रामिकः ।

६२ । जिह्वामूलाङ्गुलेश्छः ।

आभ्यां छः स्यात् । यतो बाधा । जिह्वामूलीयम् । अङ्गुलीयम् ।

६३ । वर्गान्ताच्च ।

वर्गान्ताच्छः स्यात् । कवर्गीयः । पवर्गीयः । चवर्गीयः ।

६४ । अशब्दे यत्खावन्यतरस्याम् ।

वर्गान्तादशब्दे यत्खौ वा स्याताम् । मित्रवर्ग्यः । मित्रवर्गीणः । मित्रवर्गीयो वा । अशब्दे किम् ? कवर्गीयो वर्णः ।

६५ । कर्णललाटात् कनलङ्कारे ।

आभ्यामलङ्कृतौ कन् स्यात् । कर्णे भवोऽलङ्कारः कर्णिका । ललाटिका ।

---

(41) ऊर्ध्वंदेहशब्दो गाम्भीर्य्यमित्यादिरित्येव बहवः ।

६६। तस्य व्याख्यान इति व्याख्यातव्यनाम्नः।

तस्य व्याख्यानार्थे चकाराद् भवार्थे च व्याख्येयनाम्नो यथाविहितं स्यात्। सुपां व्याख्यानो ग्रन्थः सुप्सु भवो वा सौपो ग्रन्थः। तैङः। कार्त्तः।

६७। बह्वचोऽन्तोदात्ताट् ठञ्।

व्याख्येयनाम्नो बह्वचः प्रातिपदिकाट् ठञ् स्याद् भवव्याख्यानयोः। षात्वणत्विकः। कार्त्तचितिकः। समासस्वरेणान्तोदात्ता प्रकृतिः।

६८। क्रतुयज्ञेभ्यश्च। (42)

क्रतुभ्यो यज्ञेभ्यश्च भवव्याख्यानयो ठञ् स्यात्। आग्निष्टोमिकः। पाञ्चौ-दनिकः। पाकयज्ञिकः। नावयज्ञिकः।

६९। अध्यायेष्वेवर्षेः।

ऋषिवाचिनो व्याख्येयनाम्नः पूर्वार्थयो ठञ् स्यादध्यायश्चेत्। वासिष्ठिको-ऽध्यायः। वैश्वामित्रिकः।

७०। पौरोडाशपुरोडाशात् ष्ठन्।

आभ्यां पूर्वार्थयोः ष्ठन् स्यात्। पौरोडाशिकी। पुरोडाशिकी।

७१। छन्दसो यदणौ।

अस्मादिमौ स्याताम्। छन्दस्यः। छान्दसः।

७२। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट् ठक्।

द्व्यजादिभ्यः पूर्वार्थयो ठक् स्यात्। द्व्यचः। ऐष्टिकः। ऋतः। चातु-र्होतृकः। ऋचः। आर्चिकः। ब्राह्मणिकः। प्राथमिकः। आध्वरिकः। पौरश्चरणिकः। नामाख्यातिकः।

(क) विगृहीताच्च। नामिकः। आख्यातिकः।

---

(42) क्रतुभ्य इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्योऽपि यथा स्यात्। पाञ्चौदनिकः। दाशौदनिक इति।

७३। ऋगयनादिभ्यः।

ऋगयनादेः पूर्वार्थयोरण् स्यात्। आर्गयनः। नैरुक्तः। शैक्षः। नैगमः। दैयाकरणः। यौगः। पदस्य व्याख्यानः पादः। भवव्याख्याने निवृत्ते।

७४। तत आगतः।

अस्मार्थे यथाविहितं स्यात्। स्रुघ्नादागतः स्रौघ्नः। माथुरः। राष्ट्रियः। अधिकारोऽयं प्रभवतीति (४।३।८३) यावत्।

७५। ठगायस्थानेभ्यः।

आयस्थानवाचिभ्य ठक् स्यात्। आपणादागत आपणिकः। शौल्क-शालिकः।

७६। शुण्डिकादिभ्योऽण्।

एभ्य आयस्थानवाचिभ्य ठगपवादोऽण् स्यात्। शौण्डिकः। कार्कणः।

७७। विद्यायोनिसम्बन्धेभ्यो वुञ्।

विद्यायोनिकृतः सम्बन्धो येषां तेभ्य आगतार्थे वुञ् स्यात्। औपाध्यायकम्। आचार्य्यकम्। पैतामहकम्। मातुलकम्।

७८। ऋतष्ठञ्।

विद्यायोनिसम्बन्धादृतष्ठञ् स्यात्। हौतृकम्। मातृकम्। स्वासृकम्। भ्रातृकम्।

७९। पितुर्यच्च।

पितुर्य्यत् स्यात् ठञ् च। पित्र्यम्। पैतृकम्।

८०। गोत्रादङ्कवत्।

गोत्रान्तादागतार्थेऽङ्कवत् प्रत्ययः स्यात्। अङ्कग्रहणं तस्येदमित्यर्थोपलक्षणार्थम् (४।३।१२०)। औपगवेभ्य आगत औपगवकः। नाडायनकः। गोत्रचरणाद् वुञिति वुञ् (४।३।१२६)।

८१। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः।

हेतोर्मनुष्याच्चागतार्थे रूप्यो वा स्यात्। समादागतं समरूप्यं समीयं वा। गहादित्वाच्छः (४।२।१३८)। देवदत्तरूप्यं देवदत्तीयं वा।

८२। मयट् च।

आभ्यां मयट् च स्यात्। सममयम्। देवदत्तमयम्। पूर्वं आगताधिकारः। तत इति वर्त्तत एव।

८३। प्रभवति।

ततः प्रभवतीत्यर्थे यथाविहितं स्यात्। हिमवतः प्रभवति हैमवती गङ्गा। दारदो नदः। दारदी सिन्धुः।

८४। विदूराञ्ञ्यः।

अतो ञ्यः स्यात्। विदूरात् प्रभवति वैदूर्य्यो मणिः। (43)

*८५। तद्गच्छति पथिदूतयोः।

तद् गच्छतीत्यर्थे यथाविहितं स्यात् पथिदूतौ चेत्। स्रुघ्नं गच्छति स्रौघ्नः पन्थाः। माथुरो दूतः।

८६। अभिनिष्क्रामति द्वारम्।

अभिनिष्क्रामत्यर्थे यथाप्राप्तं स्याद् द्वारञ्चेत्। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम्। उपचाराद् द्वारं कर्त्तृ।

८७। अधिकृत्य कृते ग्रन्थे।

अत्र यथाप्राप्तं स्यात्। सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः। भैमरथी आख्यायिका। साहचर्य्याद् वासवदत्ता आख्यायिका। कादम्बरी कथा।

---

(43) मणिरयं वस्तुतो वालवायनाम्नि पर्वते उत्पद्यते। विदूराख्यनगरे तु संस्क्रियते। अतोऽत्र वार्त्तिकम्—"वालवायो विदूरञ्च प्रकृत्यन्तरमेव वा। न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्" ॥१॥ इति। माघे च—"अभवन् मदङ्गनभुवः सततं वालवायजमणिस्थलाङ्कुरा" इति। कालिदासप्रयोगस्तु सूत्रानुसारी यथा "विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेवेति"।

८८। शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः।

एभ्यः पूर्वार्थे छः स्यात्। शिशुक्रन्दं रोगमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः। यमसभीयः। द्वन्द्वात्। श्येनकपोतीयः। वाक्यपदीयम्। शब्दार्थसम्बन्धीयं प्रकरणम्। किरातार्जुनीयम्। इन्द्रजननादिराकृतिगणः। इन्द्रजननीयः। शिष्योपनयनीयोऽध्यायः। सीतान्वेषणीयं काव्यम्। प्रद्युम्नागमनीयम्।

(क) द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः। दैवासुरम्। गौणमुख्यम्।

८९। सोऽस्य निवासः।

अत्रार्थे यथाप्राप्तं स्यात्। स्रुघ्नो निवासोऽस्य स्रौघ्नः। राष्ट्रियः। माथुरः। सोऽस्येत्यधिकारो यावत् तेन प्रोक्तमिति (४।३।१०१)।

९०। अभिजनश्च।

सोऽस्याभिजन इत्यर्थे यथाविहितं स्यात्। स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। माथुरः। राष्ट्रियः। कुलस्थानमभिजनः।

९१। आयुधजीविभ्यश्छः पर्वते।

पर्वतात् पूर्वार्थे छः स्यादायुधजीविषु। लोहितगिरिः पर्वतोऽभिजन एषां लोहितगिरीयाः शस्त्रजीविनः। आयुधजीविभ्यः किम्? आर्क्षोदः पर्वतोऽभिजन एषामार्क्षोदा ब्राह्मणाः।

९२। शण्डिकादिभ्यो ञ्यः।

शण्डिकोऽभिजनोऽस्य शाण्डिक्यः। चार्वक्यः। शाक्यः।

९३। सिन्धुतक्षशिलादिभ्योऽणञौ।

सिन्ध्वादेरण् स्यात्। सिन्धुरेषामभिजनः सैन्धवाः। काश्मीराः। तक्षशिलादेरञ्। ताक्षशिलः। पार्वतः।

९४। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः।

एभ्य एते स्युः। तूद्यभिजनोऽस्य तौदेयः। शालातुरीयः (44)। वार्मतेयः। कौचवार्य्यः।

९५। भक्तिः।

भज्यते सेव्यतेऽसौ भक्तिः। अत्रार्थे यथाविहितं स्यात्। बुघो भक्तिरस्य बौघः। शैवः। सौरः। चाण्डः। स्रौघ्नः। माथुरः।

९६। अचित्तादेशकालाट्ठक्।

अदेशकालादचित्तात् ठक् स्यात्। अपूपो भक्तिरस्य आपूपिकः। मौदकिकः। अदेशकालात् किम्? स्रौघ्नः। ग्रैष्मः।

९७। महाराजाट्ठञ्।

अस्माट्ठञ् स्यात्। महाराजो भक्तिरस्य माहाराजिकः।

९८। वासुदेवार्जुनाभ्यां वुन्।

आभ्यां वुन् स्यात्। वासुदेवकः (45)। अर्जुनकः। सोऽस्य भक्तिः।

९९। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्।

गोत्रप्रत्ययान्तेभ्यः क्षत्रियाख्येभ्यश्च बहुलं वुञ् स्यात्। औपगवो भक्तिरस्य औपगवकः। नाकुलकः। बाहुल्यादेव। पाणिनीयः। सौरमसीयः। पौरवीयः।

१००। जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने।

बहुत्वे जनपदेन तुल्यशब्दानां जनपदिनां जनपदवत् सर्वं कार्य्यं स्यात्। जनपदतदवध्यो (४।२।१२४) रित्युक्ताः प्रत्यया जनपदिभ्योऽप्यतिदिश्यन्ते।

---

(44) शालातुरीयः पाणिनिरिति न्यासादावुक्तम्।

(45) वासुदेवोऽयं परमात्मरूपो देवताविशेषः। न गोत्राख्यः। नापि क्षत्रियः।

यथा पल्लानां निवासो जनपदोऽङ्गाः। तत्र जात वृत्वाद्वादपीति (४।२।१२५) वुञ्। आङ्गकः। सौह्मकः। तद्वदङ्गा जनपदिनः क्षत्रिया भक्तिरस्य आङ्गकः। सौह्मकः। पूर्वाविधिर्भक्त्यधिकारः। सोऽस्येत्यधिकारः सम्पूर्णः।

१०१। तेन प्रोक्तम्।

अथार्थे यथाविहितं स्यात्। अन्येन कृता माथुरेण प्रोक्ता व्याख्याता माथुरी वृत्तिः।

१०२। तित्तिरिवरतन्तुखण्डिकोखाच्छण्।

एभ्यश्छण् स्यात्। तद्विषयता चाप्रोक्ता। तित्तिरिणा प्रोक्तं छन्दोऽधीयते तैत्तिरीयाः। वारतन्तवीयाः। खाण्डिकीयाः। औखीयाः।

१०३। काश्यपकौशिकाभ्यामृषिभ्यां णिनिः।

आभ्यां तेन प्रोक्ते णिनिः स्यात्। तद्विषयता च। काश्यपेन प्रोक्तं छन्दोऽधीयते काश्यपिनः। कौशिकिनः।

१०४। कलापिवैशम्पायनान्तेवासिभ्यश्च।

कलाप्यन्तेवासिभ्यश्चतुर्भ्यो णिनिः स्यात्। हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। तुम्बुरु। उलप। छगलिन्। वैशम्पायनशिष्येभ्यो नवभ्यश्च। आलम्बिनः। कामलिनः। एवं पलङ्ग। कमाभ। ऋचाभ। आरुणि। ताण्ड्य। श्यामायन। कठ। कलापिन्।

१०५। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु।

पुराणैर्महर्षिभिः प्रोक्तेषु ब्राह्मणेषु कल्पेषु च णिनिः स्यात्। भाल्लविनो ब्राह्मणाः। पैङ्गी कल्पः।

१०६। शौनकादिभ्यश्छन्दसि।

छन्दसि विषये शौनकादेर्णिनिः स्यात्। शौनकेन प्रोक्तं छन्दोऽधीयते शौनकिनः। वाजसनेयिनः।

१०७ । कठचरकाल्लुक् ।

आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात् । कठेन प्रोक्तं छन्दोऽधीयते कठाः । चरकाः ।

१०८ । कलापिनोऽण् ।

स्यात् । कलापिना प्रोक्तं छन्दोऽधीयते कालापाः । सब्रह्मचारीति (६।४।१४४, वा) टिलोपः । अपृथग्वचनमधिकविध्यर्थम् । मौदाः ।

१०९ । छगलिनो ढिनुक् ।

अतो ढिनुक् स्यात् । छागलेयिनः । न स्तद्धित इति (६।४।१४४) टिलोपः ।

११० । पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।

पाराशर्य्याद् भिक्षुसूत्रे शिलालिनो नटसूत्रे प्रोक्तार्थे णिनिः स्यात् । पाराशर्य्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः । अन्यत्र पाराशरीयाः श्लोकाः ।

१११ । कर्म्मन्दकृशाश्वादिनिः ।

आभ्यां प्रोक्ते तयोः सूत्रे स्यादिनिः । कर्म्मन्दी भिक्षुः । कृशाश्वी नटः । गतः प्रोक्ताधिकारः ।

११२ । तेनैकदिक् ।

अत्रार्थे यथाविहितं स्यात् । सुदाम्ना एकदिक् सौदामनी विद्युत् । सौरी बलाका ।

११३ । तसिश्च ।

पूर्वार्थे तसिः स्यात् । सुदामतः । सूर्यतः ।

११४ । उरसो यच्च ।

उरसो यत्तसी स्याताम् । उरसा एकदिक् उरस्यो दारः । उरस्तः ।

११५। उपज्ञाते।

अत्रार्थे यथाविहितं स्यात्। पाणिनिना उपज्ञातं प्रथमं ज्ञातं पाणिनीयमकालकं व्याकरणम्। सौरः संग्रहः।

११६। कृते ग्रन्थे।

तेन कृते ग्रन्थे यथाविहितं स्यात्। वाररुचाः श्लोकाः।

११७। संज्ञायाम्।

माक्षि तेन कृते यथाविहितं स्यात्। माक्षिकं मधु। सारघम्।

११८। कुलालादिभ्यो वुञ्।

एभ्यस्तेन कृते संज्ञायां वुञ् स्यात्। कौलालकं पात्रम्। वारुडकम्। ऐन्द्रियकं ज्ञानम्।

११९। क्षुद्राभ्रमरवटरपादपादञ्।

एभ्योऽञ् स्यात्। क्षौद्रं मधु। भ्रामरम्। वाटरम्। पादपम्। पूर्ववत्तेन कृतार्थः।

१२०। तस्येदम्।

अत्रार्थे यथाविहितं स्यात्। उपगोरिदमौपगवम्। राष्ट्रियम्। शास्त्रीयं कार्य्यम्। तस्येदमित्यधिकारो विकारं यावत् (४।३।१३४) वर्त्तते।

(क) संवहेस्तुरन्तादणिट् च। संवोढुरिदं सांवहित्रम्।

(ख) अग्नीधः शरणे रण् भत्वञ्च। आग्नीध्रं शरणम्। भत्वात् पदकार्यं जश्त्वं न भवति।

(ग) समिधामाधाने षेण्यण्। सामिधेनी ऋक्।

१२१। रथाद् यत्।

रथस्येदं रथ्यं चक्रम्। रथोत्तरपदाच्च। परमरथ्यम्।

१२२। पत्रपूर्वादञ्।

वाहनपूर्वाद् रथादञ् स्यात्। आश्वरथं चक्रम्।

१२३। पत्त्राध्वर्युपरिषदश्च।

एभ्योऽण् स्यात्। पत्त्रस्येदमाश्वम्। औष्ट्रो भारः। आध्वर्यवं प्रकटम्। पारिषदो दासः। पारिषदः समयः।

१२४। हलसीराट्ठक्।

हलस्येदं हालिकम्। सैरिकम्।

१२५। द्वन्द्वाद्वुन् वैरमैथुनिकयोः।

द्वन्द्वाद् वुन् स्यात्। वैरे। काकोलूकिका। अश्वमहिषिका। मैथुनिकायां विवाहे। अत्रिभारद्वाजिका।

(वा) द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः। दैवासुरं वैरम्। (46)

१२६। गोत्रचरणाद्वुञ्।

आभ्यां वुञ् स्यात्। औपगवानामिदमौपगवकम्।

(वा) चरणाद्धर्माम्नाययोरभिधानम्। काठकम्। कालापकम्। मौदकम्।

१२७। संघाङ्कलक्षणेष्वञ्यञिञामण्।

अञाद्यन्तादण् स्यात् संघादौ वाच्ये। घोषग्रहणमपि। अञन्तात्। बैदानामयं संघोऽङ्को लक्षणं घोषो वा बैदः। यञन्तात्। गार्गः। इञन्तात्। दाक्षः।

१२८। शाकलाद्वा।

शाकलादण् वा स्यात्। पक्षे वुञ्। शाकलः संघादिः। शाकलको वा।

१२९। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः।

एभ्यो ञ्यः स्यात्। छन्दोगादयो निर्दिष्टाः। सामान्येन तस्येदमित्यर्थे। धर्माम्नाययोर्विधिरित्यन्ये। छान्दोग्यम्। औक्थिक्यम्। याज्ञिक्यम्। बाह्वृच्यम्। नाट्यम्।

---

(46) कथं दैवासुरमभूद् युद्धं पूर्वमद्भुतं पुरेति देवीमाहात्म्ये? अत्र चादित्वादण् (४।२।१२०) सिद्धम्। दैवा असुराश्च सहचारिणो अत्रेति।

१३०। न दण्डमाणवान्तेवासिषु।

एषु गोत्रचरणाद् वुञ् न स्यात्। गौकक्षा दण्डमाणवाः। दाक्षा अन्तेवासिनः।

१३१। रैवतिकादिभ्यश्छः।

एभ्यो गोत्रचरणाद् वुञपवादश्छः स्यात्। रैवतिकीयम्। स्वापिशीयम्।

१३२। कौपिञ्जलहास्तिपदादण्।

आभ्यामण् स्यात्। कौपिञ्जलः। हास्तिपदः।

१३३। आथर्वणिकस्येकलोपश्च।

आथर्वणिकादण् स्यादिकलोपश्च। आथर्वणो धर्म आम्नायो वा।

पूर्वः शेषाधिकारः।

१३४। तस्य विकारः।

षष्ठ्यर्थे यथाविहितं स्यात्। अश्मनो विकार आश्मः (47) प्रासादः। "यथापमाश्मनमस्य सेतुं धत्तेऽन्यदुर्वहम्।" भास्मनः। मार्त्तिकः।

१३५। अवयवे च प्राण्योषधिवृक्षेभ्यः।

प्राण्यादिभ्यो विकारावयवयोर्यथाविहितं स्यात्। प्राणिभ्योऽञं वक्ष्यति। ओषधेः। मौर्वं काण्डं भस्म वा। वृक्षात्। कारीरम्। अतःपरं प्राण्यादेर्विकारावयवयोः प्रत्ययः। इतरेभ्यो विकारमात्रे।

१३६। बिल्वादिभ्योऽण्।

विकारेऽवयवे च स्यात्। बैल्वः। व्रैहः। मौद्गः।

१३७। कोपधाच्च।

कोपधादण् स्यात्। माधूकम्। वार्त्ताकवम्। तैत्तिडीकम्।

१३८। त्रपुजतुनोः षुक्।

आभ्यामण् स्यात्। षुगागमश्च। त्रापुषम्। जातुषम्।

---

(47) अश्मनो विकार उपसंख्यानमिति (६।४।१४४, वा) विकारार्थे नकारलोपे आश्मः। [illegible]

१३९। ओरञ्।

उवर्णान्तादञ् स्यात्। दैवदारवम्।

१४०। अनुदात्तादेश्च।

एभ्योऽञ् स्यात्। कापित्थम्। दाधित्थम्।

१४१। पलाशादिभ्यो वा।

अञ् वा स्यात्। पालाशम्। खादिरम्। पक्षेऽण्। स्वरे भेदः।

१४२। शम्याष्ट्लञ्।

ट्लञ् स्यात्। शामीलम् भस्म। शामीली स्रुक्।

१४३। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः।

विकारावयवयोर्भाषायां मयड् वा स्यात्। अश्ममयम्। आश्मं वा। दूर्वामयं दौर्वं वा। कपोतमयं कापोतं वा। लोहमयं लौहं वा। अभक्ष्याच्छादनयोरिति किम्? मौद्गः सूपः। कार्पासं वासः।

१४४। नित्यं वृद्धशरादिभ्यः।

वृद्धसंज्ञकाच्छरादेश्च नित्यं मयट् स्यात्। आम्रमयम्। शालमयम्। शरमयम्। मृण्मयम् (48)। दर्भमयम्। तृणमयम्। नित्यमेकाचोऽशरादेरपीच्छन्ति। त्वङ्मयम्। वाङ्मयम्।

१४५। गोश्च पुरीषे।

मयट् स्यात्। गोः पुरीषं गोमयम्। गव्यमन्यत्।

१४६। पिष्टाच्च।

नित्यं मयट् स्यात्। पिष्टमयं भस्म।

---

(48) यरोऽनुनासिकेऽनुनासिको वेत्यत्र (८।४।४५) प्रत्यये भाषायां नित्यवचनमित्युपसंख्यानात् मृण्मय-निष्पत्तौ पदान्ते डकारस्य नित्यं णत्वम्। ततो णत्वस्यासिद्धत्वेन डकारत्वात् पदान्ते नलोपः प्रातिपदिकान्तस्येति (८।२।७) तस्य न लोपः। तथा पदान्तस्येत्यस्य (८।४।३७) भाष्यकृता प्रत्याख्यातत्वेऽपि पूर्ववदसिद्धत्वेन डकारत्वादस्य रषाभ्यामित्यनेनापि (८।४।१) न णत्वम्।

१४७। संज्ञायां कन्।

पिष्टमात्रिर्ज्ञ कन् स्यात्। पिष्टकः। पिष्टिका।

१४८। व्रीहेः पुरोडाशे।

पश्चादत्र मयट् स्यात्। व्रीहिमयः पुरोडाशः। व्रैहमन्यत्।

१४९। असंज्ञायां तिलयवाभ्याम्।

आभ्यां मयट् स्यात्। तिलमयम्। यवमयम्। असंज्ञायां किम्? तैलम्। यावकः।

१५०। द्व्यचश्छन्दसि।

१५१। नोत्वद्वर्ध्रबिल्वात्।

इह च्छन्दःसूत्रद्वयम्।

१५२। तालादिभ्योऽण्।

एभ्यः स्यादण्। मयड़ादेर्बाधा। तालं धनुः। वार्हिणम्।

१५३। जातरूपेभ्यः परिमाणे।

सुवर्णवाचिभ्यः परिमाणे विकारेऽण् स्यात्। हाटकस्य विकारो निष्को हाटकः। जातरूपं कार्षापणम्। परिमाणे किम्? हाटकमयी यष्टिः।

१५४। प्राणिरजतादिभ्योऽञ्।

प्राणिभ्यो रजतादेश्च मयड्बाधकोऽञ् स्यात्। कापोतम्। मायूरम्। मौनम्। राजतम्। दारवं पात्रादि। सैसम्। लौहम्। औदुम्बरम्। "पुरीं कृत्वा काञ्चनीम्।" "काञ्चनी वासयष्टिः"।

१५५। ञितश्च तत्प्रत्ययात्।

विकारावयवयो र्यो ञितप्रत्ययस्तदन्तात् पुनस्तयोरञ् स्यात्। मयटो बाधा। दैवदारवस्य विकारोऽवयवो वा दैवदारवो यूपः। दाधित्थम्। पालाशम्। शामीलस्य विकारः शामीलः। ञितः किम्? मयस्मात्। तैलमयम्।

१५६। क्रीतवत् परिमाणात्।

संख्याप्यत्र परिमाणं गृह्यते। न रूढ़िमात्रम्। परिमाणवाचिनो विकारे क्रीतार्थवत् प्रत्ययो वाच्यः। यथा निष्केण क्रीतो नैष्किकः तथा निष्कस्य विकारोऽपि नैष्किकः। शत्यः। शतिकः। लुक् च क्रीतवत्। द्विसहस्रः। द्विसाहस्रः।

१५७। उष्ट्राद् वुञ्।

स्यात्। उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः।

१५८। उमोर्णयोर्वा।

आभ्यां वुञ् वा स्यात्। औमकम्। औमं वा। और्णकम्। और्णं वा।

१५९। एण्या ढञ्।

स्यात्। ऐणेयं मांसम्। ऐणेयी जङ्घा। एणादञेव। ऐणम्।

१६०। गोपयसो र्यत्।

आभ्यां यत् स्यात्। गव्यम्। पयस्यम्।

१६१। द्रोश्च।

द्रोर्यत् स्यात्। द्रव्यम्।

१६२। माने वयः।

द्रोर्माने वयः स्यात्। द्रुवयम् मानम्।

१६३। फले लुक्।

विकारावयवयोर्विहितस्य फले लुक् स्यात्। बदर्या विकारोऽवयवो वा फलं बदरम्। बकुलम्। कदलम्। आमलकम्। कुवलम्। लुक् तद्धित-लुकीति (१।२।४९) ङीपो लुक्।

१६४। प्लक्षादिभ्योऽण्।

प्लक्षादेः फले वाच्येऽण् स्यात्। लुको बाधा। प्लाक्षम्। नैयग्रोधम्। काकुभम्। बार्हतम्। आश्वत्थम्।

१६५। जम्ब्वा वा।

जम्बुशब्दात् फलेऽञ् वा स्यात्। जाम्बवं फलम्। पक्षे योरञ् (४।३।१३९)। फले लुक् (४।३।१६३)। जम्बु फलम्।

१६६। लुप् च।

जम्ब्वाः फलेऽर्थे वा लुप् स्यात्। लुग्लुपोर्युक्तवद्भावकृतो विशेषः। जम्बूः फलम्। जम्ब्वः फलानि। लुकि तु जम्बूनि फलानि। अभिधेयस्येव लिङ्गसंख्ये।

(क) फलपाकशुषाञ्च। यवादीनां प्रत्ययस्य लुप् स्यात्। यवानां फलानि यवाः। तिलाः। मुद्गाः। व्रीहयः। गोधूमाः।

(ख) पुष्पफलमूलेषु बहुलम्। विकारावयवयोः प्रत्ययस्य लुप् स्यात्। मल्लिकायाः पुष्पं मल्लिका। करवीरम्। जाती। बकुलस्य फलं बकुलः। विदार्या मूलं विदारी। बाहुल्यादेव। पाटलम्। आशोकम् पुष्पम्। बैल्वानि फलानि।

१६७। हरीतक्यादिभ्यश्च।

हरीतक्यादेः फले लुप् स्यात्। लुको बाधा। हरीतक्याः फलं हरीतकी। हरीतक्यः फलानि। कोषातकी। द्राक्षा। शेफालिका। कण्टकारिका।

१६८। कंसीयपरशव्ययोर्यञञौ लुक् च।

प्राक् क्रीताच्छः (५।१।१)। कंसीयः। उगवादिभ्यो यत् (५।१।२)। परशव्यः। ताभ्यां यञञौ स्याताम्। लुक् च तयोः। कंसीयस्य विकारः कांस्यः। परशव्यस्य विकारः पारशवः। विकारावयवौ प्राग्दीव्यतीयाच्च पूर्वौ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

चतुर्थाध्यायस्य तृतीयः पादः ॥४।३॥

समाप्तश्च चतुर्थपादः।

अथ

भाषावृत्तिः ।

चतुर्थोऽध्यायः । चतुर्थः पादः ।

१ । प्राग् वहतेष्ठक् ।

तद्वहतीति (४।४।७६) वक्ष्यति । ततः प्रागर्थेषु ठग् वाच्यः ।

(क) तदाहेति माशब्दादिभ्यः । ठक् स्यात् । माशब्दमाह माशब्दिकः । नैत्यशब्दिकः । प्रभूतमाह प्राभूतिकः । पर्य्याप्तमाह पार्य्याप्तिकः ।

(ख) पृच्छतौ सुस्नातादिभ्यः । सुस्नातं पृच्छति सौस्नातिकः । "सौस्नातिको यस्य भवत्यगस्त्यः ।" सौखरात्रिकः ।

(ग) गच्छतौ परदारादिभ्यः । परदारान् गच्छति पारदारिकः । गौरुतल्पिकः ।

२ । तेन दीव्यति खनति जयति जितम् ।

एतदर्थे ठक् स्यात् । अक्षैर्दीव्यति जयति वा आक्षिकः । हलेन दीव्यति खनति जयति जितं वा हालिकः । कुद्दालेन खनति कौद्दालिकः । अक्षैर्जितं द्रव्यमाक्षिकम् । मुद्गरैर्जयति मौद्गरिकः । आख्यातार्थेऽपि विहितस्तद्धितः स्वभावात् साधनप्रधानः ।

३ । संस्कृतम् ।

तेन संस्कृतमित्यर्थे ठक् स्यात् । दध्ना संस्कृतं दाधिकम् । उत्कर्षाधानं संस्कारः ।

४ । कुलत्थकोपधादण् ।

आभ्यामण् स्यात् । कुलत्थैः संस्कृतं कौलत्थम् । तैत्तिडीकम् ।

५। तरति।

तेन तरतीत्यर्थे ठक् स्यात्। तृणप्लवेन तरति तार्णप्लविकः। शरप्लवेन तरति शारप्लविकः।

६। गोपुच्छाट् ठञ्।

स्यात्। गोपुच्छेन तरति गौपुच्छिकः। ठक्ठञोः स्वरे भेदः।

७। नौद्व्यचष्ठन्।

आभ्यां ठन् स्यात्। नावा तरति नाविकः। द्व्यचः। घटिकः। घटिका स्त्री। बाहुकः। कुम्भिकः। नकारः सांहितिकः। नानुबन्धः।

८। चरति।

तेन चरतीत्यर्थे ठक् स्यात्। चर गतौ भक्षणे च। शाकटिकः। दाधिकः।

९। आकर्षात् ष्ठल्। (49)

अस्मात् ष्ठल् स्यात्। आकर्षेण चरति आकर्षिकः। आकर्षिकी। आकर्षो निकषोपल उच्यते।

१०। पर्पादिभ्यः ष्ठन्।

पर्पेण चरति पर्पिकः। अश्विकः। रथिकः। षित्त्वात् ङीष्। पर्पिकी। अश्विकी। रथिकी। तदुक्तम्—

(क) आकर्षा(षा)त् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च।
आवसथात् किसरादेः षितः षडेते ठगधिकारे॥१॥ इति।

११। श्वगणाट् ठञ्च।

श्वगणशब्दात् ठञ् स्यात्। श्वगणेन चरति श्वागणिकः। श्वागणिकी। चकारात् ठनपि। श्वगणिकः। श्वगणिका।

१२। वेतनादिभ्यो जीवति।

एभ्यस्तेन जीवतीत्यर्थे ठक् स्यात्। वैतनिकः। वाहिकः। आसिकः। वार्त्तिकः।

---

(49) अस्मिन् सूत्रे सर्वत्राकर्षशब्दस्थाने आकष इति पाठान्तरम्।

१३। वस्नक्रयविक्रयाट्ठन्।

आभ्यां ठन् स्यात्। वस्नेन जीवति वस्निकः। क्रयविक्रयिकः। विगृहीताच्च। क्रयिकः। विक्रयिकः।

१४। आयुधाच्छ च।

छः स्यात्। ठंश्च। आयुधीयः। आयुधिकः।

१५। हरत्युत्सङ्गादिभ्यः।

उत्सङ्गादिभ्यस्तेन हरतीत्यर्थे ठक् स्यात्। उत्सङ्गेन हरति औत्सङ्गिकः। औडुपिकः।

१६। भस्त्रादिभ्यः ष्ठन्।

स्यात्। भस्त्रया हरति भस्त्रिकः। भस्त्रिकी।

१७। विभाषा विवधवीवधात्।

आभ्यां ष्ठन् वा स्यात्। पक्षे ठक्। विवधेन हरति विवधिकः विवधिकी। वीवधिकः वीवधिकी। पक्षे ठक्। वैवधिकः। एतौ पर्य्याहारे वर्त्तेते। (50)

१८। अण् कुटिलिकायाः।

अस्या अण् स्यात्। कुटिलिकया गत्या हरति कौटिलिको मृगः। कौटिलिकी वेश्या।

१९। निर्वृत्तेऽक्षद्यूतादिभ्यः।

एभ्यो निर्वृत्तार्थे ठक् स्यात्। अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम्। गातागतिकं प्रेम। आघोपघातिकं कार्य्यम्।

२०। त्रेर्मम्नित्यम्।

त्र्यन्तान्नित्यं मप् स्यात्। ग्रहं चान्तं न प्रयुज्यते। पाकेन निर्वृत्तं पक्त्रिमम्। संस्कृत्रिमम्। लब्ध्रिमम्।

---

(50) पर्य्याहार उभयतो बद्धशिक्यः स्कन्धवाह्यः काष्ठविशेषः। विवधो वीवधश्चापि पर्य्याहारेऽध्वभारयोरिति विश्वः। पर्य्याहारश्च मार्गश्च विवधौ वीवधौ च तावित्यमरः। A yoke to carry burdens ;—a highway. अतएव उद्विवध इत्यस्य जलप्रवाहपथ इत्यर्थः।

(क) भावप्रत्ययान्तादिमब् वक्तव्यः। कारिमः। पाकिमं फलम्। कुट्टिमा भूः। सेकिमा लता। दाहिमम्। दाहिमा। पूर्णिमा।

२१। अपमित्ययाचिताभ्यां कक्कनौ।

निर्वृत्तार्थे आभ्यां कक्कनौ स्याताम्। आपमित्यकं धनम्। याचितकं मण्डनम्। अपमित्येति मेङो ल्यप्।

२२। संसृष्टे।

अत्र यथाविहितं स्यात्। दध्ना संसृष्टमेकीभूतं दाधिकमन्नम्। गौडिकं पयः।

२३। चूर्णादिनिः।

चूर्णेन संसृष्टा चूर्णिनोऽपूपाः।

२४। लवणाल्लुक्।

लवणशब्दात् संसृष्टार्थे प्रत्ययस्य लुक् स्यात्। लवणः सूपः।

२५। मुद्गादण्।

मुद्गेन संसृष्टा मौद्गी यवागूः।

२६। व्यञ्जनैरुपसिक्ते।

अत्रार्थे यथाप्राप्तं ठक् स्यात्। दध्ना उपसिक्तं दाधिकम्। सौपिकम्।

२७। ओजःसहोऽम्भसा वर्त्तते।

एभ्यो वर्त्तत इत्यर्थे ठक् स्यात्। ओजसा वर्त्तते औजसिकः। साहसिकः। आम्भसिकः। तेनेति निवृत्तम्।

२८। तत्प्रत्यनुपूर्वमीपलोमकूलम्।

तदिति द्वितीयासमर्थात् प्रत्यनुपूर्वादीपादे र्वर्त्तत इत्यर्थे ठक् स्यात्। प्रतीपं वर्त्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। तां प्रातिकूलिकीं मत्वेति भट्टी। "आनुकूलिकतया हि नराणाम्"। इह प्रतीपादयः क्रियाविशेषणानि। क्रियायाश्च साध्यत्वेन तद्विशेषणानामपि साध्यत्वात्

कर्मणि द्वितीया (२।३।२)। क्रियायाश्चासत्त्वभूतत्वात् सामान्यलिङ्गेन विना विशेषणस्य निर्देष्टुमशक्यत्वान्नपुंसकलिङ्गतेति न्यायः। तदिति वर्त्तते यावत् तस्य धर्म्यम् (४।४।४७)।

२६। परिमुखञ्च।

परिमुखं वर्त्तते पारिमुखिकः सेवकः। चकारात् पारिपार्श्विकः।

३०। प्रयच्छति गर्ह्यम्।

अत्रार्थे ठक् स्यात्। द्विगुणार्थं द्रव्यं द्विगुणम्। अल्पकालत्वाच्च गर्ह्यमिदम्। तत् प्रयच्छति द्वैगुणिकः। त्रैगुणिको धनी।

(क) ठकि वृद्धेर्वृधुषिभावश्च। वृद्धिं गर्ह्यां प्रयच्छति वार्धुषिकः।

३१। कुसीददशैकादशात् ष्ठन्ष्ठचौ।

आभ्यामेतौ स्याताम्। कुसीदं गर्ह्यं प्रयच्छति कुसीदिकः (51)। एकादशार्थान् दश प्रयच्छति दशैकादशिकः। दशैकादशिकी।

३२। उञ्छति।

अत्रार्थे ठक् स्यात्। शाकानुञ्छति शाकिकः। बादरिकः।

३३। रक्षति।

अत्रार्थे ठक् स्यात्। समाजं रक्षति सामाजिकः। सान्निवेशिकः।

३४। शब्ददर्दुरं करोति।

आभ्यां करोत्यर्थे ठक् स्यात्। शाब्दिकः पटुवक्ता वा। दार्दुरिकः कुलालः।

३५। पक्षिमत्स्यमृगान् हन्ति।

एभ्यो हन्त्यर्थे ठक् स्यात्। स्वरूपस्य तत्पर्य्यायाणां तद्विशेषणानाञ्च ग्रहणम्। पाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यिकः। मैनिकः। माद्गुरिकः। शाकुलिकः। शौष्ठिकः। मार्गिकः। हारिणिकः। शौकरिकः।

---

(51) छन्ठनोः स्वरे विशेषः। ञ्नित्यादिर्नित्यमिति (६।१।१९७) छन्नन्त आद्युदात्तः। ठन्नन्तस्यान्तोदात्तः। चित्वात् (६।१।१६३)।

३६। परिपन्थञ्च तिष्ठति।

परिपन्थशब्दोऽव्ययीभावः। अतएव निपातनात् साधुः। तत् तिष्ठति अकारायन्ति वा पारिपन्थिकश्चौरः।

३७। माथोत्तरपदपदव्यनुपदं धावति।

एभ्यो धावत्यर्थे ठक् स्यात्। माथः पन्थाः। तदुत्तरपदात्। दण्डमाथं धावति दाण्डमाथिकः। पदवी पादविकः। अनुपदमानुपदिकः।

३८। आक्रन्दाट्ठञ्च।

अस्मात् ठञ् स्यात्। ठक् च। आक्रन्दिकः। (52)

३९। पदोत्तरपदं गृह्णाति।

पदान्ताद् गृह्णात्यर्थे ठक् स्यात्। पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः। प्रातिपदिकम्।

४०। प्रतिकण्ठार्थललामञ्च।

एभ्यष्ठक् स्यात्। प्रतिकण्ठं गृह्णाति प्रातिकण्ठिको वल्लभः। आर्थिकः। लालामिकः।

४१। धर्मं चरति।

धार्मिकः।

(क) अधर्माच्चेति वक्तव्यम्। आधर्मिकः।

४२। प्रतिपथमेति ठंश्च।

प्रतिपथादेतीत्यर्थे ठञ्ठकौ स्याताम्। प्रतिपथिकः। प्रातिपथिकः।

४३। समवायान् समवैति।

पर्यायग्रहणमत्र। समूहवाचिभ्योऽत्रार्थे ठक् स्यात्। सामवायिकः। सामुदायिकः। सामूहिकः।

---

(52) ठञ्ठकोः स्वरे विशेषः। ठञन्तो ञ्नित्यादिर्नित्यमित्याद्युदात्तः (६।१।१९७)। ठगन्तः कित इति (६।१।१६५) अन्तोदात्तः।

४४। परिषदो ण्यः।

ण्यः स्यात्। परिषदं समवैति पारिषद्यः।

४५। सेनाया वा।

ण्यः स्याद्वा। सेनां समवैति सैन्यः। पक्षे ठक्। सैनिकः।

४६। संज्ञायां ललाटकुक्कुट्यौ पश्यति।

संज्ञा चेल् ललाटकुक्कुटीभ्यां पश्यत्यर्थे ठक् स्यात्। अर्थनियमश्चायं संज्ञा। न रूढिः। य एव ललाटमात्रं दूरात् पश्यति न तु कार्ये व्याप्रियते स लालाटिकः सेवकादिः। य एवाविक्षिप्तदृष्टिः कुक्कुटीपादपतनयोग्यमल्प-देशं पश्यन् याति स कौक्कुटिकस्तपस्व्यादिः।

४७। तस्य धर्म्यम्।

षष्ठ्यर्थे ठक् स्यात्। धर्म्यं न्याय्यमाचार इत्यर्थः। शुल्कस्य धर्म्यं शौल्किकम्। आपणिकम्।

४८। अण् महिष्यादिभ्यः।

महिष्या धर्म्यं माहिषम् मूल्यम्। पौरोहितम्। प्राजापतम्।

४९। ऋतोऽञ्।

ऋदन्तादञ् स्यात्। होतुर्धर्म्यं हौत्रम्। औद्गात्रम्।

(क) नृनराभ्यां च। नुः नरस्य धर्म्यं नारम्। नारी। जातिशब्दोऽय-मित्यागमः।

(ख) विशसितुरिड्लोपश्च। वैशस्तम्।

(ग) विभाजयितुर्णिलोपश्च। वैभाजित्रम्।

५०। अवक्रयः।

तस्यावक्रय इत्यर्थे ठक् स्यात्। शुल्कस्यावक्रयः पारिभाषिकं मूल्यं शौल्किकः पिण्डः। आपणिकः।

५१। तदस्य पण्यम्।

षष्ठ्यर्थे ठक् स्यात्। मोदकाः पण्यमस्य मौदकिकः। आपूपिकः।

५२। लवणाट्ठञ्।

लवणं पण्यमस्य लावणिकः।

५३। किशरादिभ्यः ष्ठन्।

५४। शलालुनोऽन्यतरस्याम्।

किशरादेर्गन्धद्रव्यवाचकात् ष्ठन् स्यात्। तदस्य पण्यम् (४।४।५१)। किशरिकः। किशरिकी। शलालुकः। पक्षे ठक्। शालालुकः। पण्यमिति निवृत्तम्। तदस्येति वर्त्तते यावत् तदस्मै दीयते (४।४।६६)।

५५। शिल्पम्।

अत्र ठक् स्यात्। मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः। पाणविकः।

५६। मड्डुकझर्झरादणन्यतरस्याम्।

आभ्यामण् वा स्यात्। तदस्य शिल्पम्। माड्डुकः। झार्झरः। पक्षे माड्डुकिकः। झार्झरिकः।

५७। प्रहरणम्।

अत्र ठक् स्यात्। असिः प्रहरणमस्य आसिकः। प्रासिकः। धानुष्कः। चाक्रिकः। पाशिकः।

५८। परश्वधाट्ठञ् च।

परश्वधाट् ठञ्ठकौ स्याताम्। पारश्वधिकः। स्वरे भेदः।

५९। शक्तियष्ट्योरीकक्।

आभ्यामीकक् स्यात्। शक्तिः प्रहरणमस्य शाक्तीकः। याष्टीकः। याष्टिकी।

६०। अस्तिनास्तिदिष्टं मतिः।

अत्रार्थे ठक् स्यात्। अस्ति मतिरस्य आस्तिकः। नास्तिकः। दैष्टिकः। अस्तिनास्तीति शब्दौ तिङन्तावित्येके। तिङन्तप्रतिरूपकौ निपातावित्यन्ये।

६१। शीलम्।

अत्रार्थे ठक् स्यात्। पवमवचनं शीलमस्य पावचिकः। आक्रोशिकः। कारचिकः।

६२। छत्रादिभ्यो णः।

छादनं छत्रं शीलमस्य च्छात्रः। शैचः। तापसः। चुरा चौरः।

६३। कर्माध्ययने वृत्तम्।

अत्रार्थे ठक् स्यात्। एकमन्यदध्ययनेऽपपाठलक्षणं कर्म वृत्तमस्य ऐकान्यिकः। द्वैयन्यिकः। तद्धितार्थे इति (२।१।५१) समासः। ऐकरूपिकः। ऐकग्रन्थिकः।

६४। बह्वच्पूर्वपदाट् ठच्।

बह्वच्पूर्वाट् ठच् स्यात् पूर्वार्थे। द्वादशान्यिकः। त्रयोदशग्रन्थिकः।

६५। हितं भक्षाः।

अत्रार्थे ठक् स्यात्। अपूपा हितमस्मै आपूपिकः। औदनिकः। मौदकिकः। हितयोगे चतुर्थी।

६६। तदस्मै दीयते नियुक्तम्।

अत्रार्थे ठक् स्यात्। नियुक्तं कल्पितमग्रभोजनमस्मै दीयते आग्रभोजनिकः। प्राथमकल्पिकः।

६७। श्राणामांसौदनाट् टिठन्।

आभ्यां पूर्वार्थे एव टिठन् स्यात्। इकार उच्चारणार्थः। श्राणिकः। मांसौदनिकः। विग्टहीताच्च। मांसिकः। औदनिकः। मांसिकी।

६८। भक्तादणन्यतरस्याम्।

वा स्यात्। भक्तमस्मै दीयते भाक्तः। भाक्तिको वा।

६९। तत्र नियुक्तः।

अत्रार्थे ठक् स्यात्। द्वारि नियुक्तो दौवारिकः। शौल्किकः। तत्रेति वर्त्तते यावत् तत्रहति (४।४।७६)।

७०। अगारान्ताट् ठन्।

देवागारे नियुक्तो देवागारिकः। भाण्डागारिकः। केवलाट् ठगेव। आगारिकः।

७१। अध्यायिन्यदेशकालात्।

अदेशकालाद्ध्यायिन्यर्थे ठक् स्यात्। श्मशानेऽधीते श्माशानिकः। चातुष्पथिकः। अकालात्। चातुर्दशिकः। आष्टमिकः। शास्त्रे निषिद्धौ देशकालौ प्रकृती।

७२। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति।

एभ्यो व्यवहरत्यर्थे ठक् स्यात्। वंशकठिने व्यवहरति वांशकठिनिकः। प्रास्तारिकः। सांस्थानिकः।

७३। निकटे वसति।

निकटाद् वसत्यर्थे ठक् स्यात्। नैकटिको भिक्षुः।

७४। आवसथात् ष्ठल्।

आवसथे वसति आवसथिकः। आवसथिकी। ठकः पूर्णोऽधिकारः।

७५। प्राग्घिताद् यत्।

(५।१।५) तस्मै हितमित्यतः प्रागर्थेषु यद् वेदितव्यः।

७६। तद्वहति रथयुगप्रासङ्गम्।

तद्वहतीत्यर्थे रथादेर्यत् स्यात्। द्वौ रथौ वहति तद्धितार्थे (२।१।५१) द्विगुसमासः। द्विरथ्यः। त्रिरथ्यः। केवलात्तु रथाद् यतोऽसिद्धिरिति स्मृतिः (53)। युग्यः। प्रासङ्ग्यः।

७७। धुरो यड्ढकौ।

स्याताम्। धुरं वहति धुर्यः। धौरेयः।

---

(53) एतच्च काशिकादिविरुद्धम्। रथं वहति रथ्य इति काशिकोदाहरणात्। रथ्यो वोढा रथस्य च इत्यमरश्च। तथा च माघे सूर्यस्य रथ्याः परितः स्फुरन्तीति।

७८। खः सर्वधुरात्।

स्यात्। सर्वधुरां वहति सर्वधुरीणः। योगविभागादुत्तरधुरीणदक्षिणधुरीणौ चेत्येके। धुरीणश्चेत्यन्ये।

७९। एकधुराल्लुक् च।

एकधुरात् खस्य लुक् स्यात्। अवश्च। एकधुरः। एकधुरीणः।

८०। शकटादण्।

शकटं वहति शाकटः। हैमशकटः।

८१। हलसीराट्ठक्।

हालिकः। हैहलिकः। सैरिकः। हैसीरिकः। त्रैसीरिकः।

८२। संज्ञायां जन्याः।

नाम्नि जन्याः स्युः। जनीं वधूं वहन्ति जन्या जामातुर्वयस्याः।

८३। विध्यत्यधनुषा।

तद् विध्यतीत्यर्थे कर्मणो यत् स्यान् न चेद् धनुः करणं भवति। पादौ विध्यति पथ्यः पाषाणः। जरण्याः कण्टकाः। नेह। चौरं विध्यति धानुष्कः।

८४। धनगणं लब्धा।

आभ्यां लब्धेत्यर्थे यत् स्यात्। धनं लब्धा धन्यो बालकः। गण्यो मृगः। लब्धेति तृन्।

८५। अन्नाण्णः।

अन्नं लब्धा आन्नश्चात्रः।

८६। वशं गतः।

वशाद् गत इत्यर्थे यत् स्यात्। "वश्यः सर्वो जनः स्त्रीणाम्।"

८७। पदमस्मिन् दृश्यम्।

दृश्यं गम्यात् पदादधिकरणे यत् स्यात्। पदं दृश्यमस्मिन् पद्यः कर्दमः। पद्यः पन्थाः।

८८। मूलमस्याबर्हि ।

षष्ठ्यर्थे यत् स्यात् । मूलमेषामाबर्हि (54) कोमलत्वाद् ग्रहण-मात्रेणोत्पटति मूल्या मुद्गाः । उच्च उद्यमे ।

८९। संज्ञायां धेनुष्या ।

इयं नाम्नि निपात्यते । धेनुष्या गौ र्महिषी वा यावद् या दुग्ध-बन्धने स्थिता ।

९०। गृहपतिना संयुक्ते ञ्यः ।

गृहपतिशब्दान्नाम्नि ञ्यः स्यात् । गार्हपत्योऽग्निभेदः ।

९१। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्य्यतुल्यप्राप्य-वध्यानाम्यसमसमितसम्मितेषु ।

नावाद्यष्टकात् तार्य्यादौ यत् स्यात् । नावा तार्य्यं नाव्यम् । "नाव्यं पयः केचिदतारिषुर्भुजैः ।" वयसा तुल्यो वयस्यः । धर्मेण प्राप्यो धर्म्यो भोगः । विषेण वध्यो विष्यः शत्रुः । मूलेन धनाम्य मनभिभवनीयं मूल्यं क्षेत्रम् । मूलेन समो मूल्यः पटो जातः । सीतया समितं सीत्यम् । द्विसीत्यम् । त्रिसीत्यम् । तुलया सम्मितं तुल्यं कनकम् । रथसीताहलेभ्यो यद्विधौ तदन्तविधिः । (२।१।७२, वा) बहुसीत्यम् ।

९२। धर्मपथ्यर्थन्यायादनपेते ।

एभ्योऽनपेते यत् स्यात् । धर्मादनपेतो धर्म्यो नृपः । पथ्यम् । अर्थ्यम् । न्याय्यम् ।

९३। छन्दसो निर्मिते ।

छन्दसोऽत्र यत् स्यात् । छन्दसा इच्छया निर्मितं छन्दस्यं जगत् ।

९४। उरसोऽण् च ।

उरसा निर्मित औरसः पुत्रः । यच्च । उरस्यः ।

---

(54) नावर्हयनामरं तत्पाठनम् । नावर्होऽनाशोबहिं ।

९५। हृदयस्य प्रियः।

हृदयात् प्रिय इत्यर्थे यत् स्यात्। हृद्यः। पुत्रेऽनभिधानम्।

९६। बन्धने चर्षौ।

ऋषौ वेदे हृदयाद् यत् स्याद्बन्धने मन्त्रे। हृदयस्य बन्धनं हृद्यो वशीकरणमन्त्रः।

९७। मतजनहलात् करणजल्पकर्षेषु।

मतादेः करणादौ यत् स्यात्। मतस्य करणं मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। द्विहल्यः।

९८। तत्र साधुः।

सप्तम्यर्थे यत् स्यात्। सामसु साधुः सामन्यो विप्रः। ब्रह्मण्यः। कर्मण्यः। वंश्यः। साधुरिह प्रवीणो योग्यो वा।

९९। प्रतिजनादिभ्यः खञ्।

एभ्यः खञ् स्यात्। प्रतिजने साधुः प्रातिजनीनः। सांयुगीनः। सार्वजनीनः।

१००। भक्ताण्णः।

भक्ते साधवो भाक्तास्तण्डुलाः।

१०१। परिषदो ण्यः।

परिषदि साधुः पारिषद्यः। णोऽपीष्यत इति जयादित्यः। पारिषदः।

१०२। कथादिभ्य ठक्।

कथायां साधुः काथिकः। वैकथिकः। वार्त्तिकः।

१०३। गुडादिभ्यष्ठञ्।

गुडे साधुर् गौडिक इक्षुः। कौल्माषिका यवाः। सांग्रामिको भटः। प्रावासिको वणिक्।

१०४। पथ्यतिथिवसतिस्वपतेर्ढञ्।

पथ्यः साधौ ढञ् स्यात्। पथि साधु पाथेयम्। आतिथेयम्। वासतेयम्। वासतेयी। स्वापतेयं धनम्।

१०५। सभाया यः।

स्यात्। सभायां साधुः सभ्यः।

१०६। ढश्छन्दसि।

छन्दः सूत्रमेकम्।

१०७। समानतीर्थे वासी।

समानतीर्थात् तत्र वासीत्यर्थे यः स्यात्। सतीर्थ्याश्चैकगुरवः। तीर्थे ये (६।३।८७) इति सभावः। तीर्थं दर्शनं गुरुश्च।

१०८। समानोदरे शयित ओ चोदात्तः।

तत्रार्थे यः स्यात्। समानोदर्य्यो भ्राता।

१०९। सोदराद् यः।

अस्माद् यः स्यात्। समानोदरे शयितः सोदर्य्यः। विभाषोदरे (६।३।८८) इति समानस्य सभावः। इहेदानीमापादपरिसमाप्तेश्छन्दोऽधिकारः। तत्रापि भवार्थे। (55)

११४। सगर्भसयूथसनुताद् यन्।

स्यात्। सगर्भ्यो भ्राता। सयूथ्यो वत्सः। सनुत्यः प्रसादः।

११६। अग्राद् यत्।

स्यात्। अग्र्यम्।

११७। घच्छौ च।

स्याताम्। अग्रियम्। अग्रीयम्।

---

(55) The Sutras omitted here by the author are the following :—

११०। भवे छन्दसि। १११। पाथोनदीभ्यां ड्यण्। ११२। वेशन्तहिमवद्भ्यामण्। ११३। स्रोतसो विभाषा ड्यड्ड्यौ। ११५। तुग्राद् घन्। ११९। बर्हिषि दत्तम्। १२१। रक्षोयातूनां हननी।

११८ । समुद्राभ्राद् घः ।

आभ्यां घः स्यात् । समुद्रियम् । अभ्रियम् । छश्च । समुद्रीयम् । अभ्रीयम् ।

१२० । दूतस्य भागकर्मणी ।

अस्माद् यत् स्यात् । दूत्यम् ।

१२८ । मत्वर्थे मासतन्वोः ।

आभ्यां यत् स्यात् । नभांसि यत्र सन्ति नभस्यो मासः । सहस्यः । तपस्यः । तेजस्या तनुः ।

१२९ । मधोर्ञ च ।

माधवो मासः । तथा

(वा) लुगकारेकाररेफाश्चेति वक्तव्यम् । लुक् । मधु अत्रास्ति मधुर्मासः । अकारः । इट् अत्रास्ति इषः । ऊर्क् अस्मिन्नस्ति ऊर्जो मासः । इकारः । शुगस्मिन्नस्ति शुचिर्मासः । रेफः । शुक्रो मासः ।

१४१ । नक्षत्राद् घः ।

नक्षत्रियम् । छश्च । नक्षत्रीयम् ।

१४२ । सर्वदेवात् तातिल् ।

१४३ । शिवशमरिष्टस्य करे ।

एभ्यः करे स्यात् तातिल् । शिवतातिः । शन्तातिः । अरिष्टतातिः ।

---

१२२ । रेवतीजगतीहविष्याभ्यः प्रशस्ये । १२३ । असुरस्य स्वम् । १२४ । मायायामण् । १२५ । तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः । १२६ । अश्विमानण् । १२७ । वयस्यासु मूर्ध्नो मतुप् । १३० । ओजसोऽहनि यत्खौ । १३१ । वेशोयशआदेर्भगाद्यल् । १३२ । ख च । १३३ । पूर्वैः कृतमिनयौ च । १३४ । अद्भिः संस्कृतम् । १३५ । सहस्रेण संमितौ घः । १३६ । मतौ च । १३७ । सोममर्हति यः । १३८ । मये च । १३९ । मधोः । १४० । वसोः समूहे च ।

अमी शब्दाश्छान्दसा अपि क्वचिद् भाषायां प्रयुज्यन्त इति त्रिकाण्डे (56) भागुरिनिबन्धनाद्वा ऽव्युत्पन्नसंज्ञाशब्दत्वाद्वा सर्वथा भाषायां साधवः ।

१४४ । भावे च ।

छन्दःसूत्रम् ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४।४ ॥
समाप्तश्च ठक्पादश्चतुर्थोऽध्यायश्च ॥

---

(56) So त्रिकाण्ड is the name of the lexicography by भागुरि. Says सृष्टिधर in his अर्थविवृति—"त्रिकाण्डे कोषविशेषे भागुरिणाचार्येण यदेषां निबन्धनं तस्मात् ।"

अथ

भाषावृत्तिः।

पञ्चमोऽध्यायः। प्रथमः पादः।

१। प्राक् क्रीताच्छः।

क्रीतात् प्राग् हितं प्रकृतिरस्येत्यस्मिन्नर्थे छो वाच्यः।

२। उगवादिभ्यो यत्।

उवर्णान्ताद् गवादेश्चापवादः यत् स्यात्। शङ्कव्यं दारु। चरव्या स्तण्डुलाः। कमण्डलव्या मृत्। सक्तव्या धानाः। गवादेः। गव्यम्।

(1) नाभि नभञ्च। नाभ्यर्था प्रकृतिः। नभ्यं काष्ठम्।

(2) शुनः संप्रसारणं वा च दीर्घः। शुने हितं शुन्यं शून्यं वा।

(3) ऊधसोऽनङ् च। ऊधसो यत्स्यादनङादेशश्च। ऊधन्यः। (1)

३। कम्बलाच्च संज्ञायाम्।

कम्बलनाम्नि यत् स्यात्। कम्बल्यमूर्णापलशतम्।

४। विभाषा हविरपूपादिभ्यः।

एभ्यो यद्वा स्यात्। हविर्वाचिनः। आमिक्ष्यमामिक्षीयं वा दधि। पुरोडाश्यं पुरोडाशीयं वौषधम्। हविःशब्दाद् गवादिपाठान्नित्यं यत्। हविष्यम्। अपूपादेः। अपूप्यमपूपीयं वा। तण्डुल्यं तण्डुलीयं वा। यवविकारेभ्यश्च। सुरीयाः सुर्य्या (2) वा तण्डुलाः।

---

(1) यव सक्तव्या यवाः। पयस्यं वनम्। वधूभ्यो हितं वधव्यं गृहमिति क्वचिदधिकः पाठः। परन्त्वर्थविकृती ह्येतानि प्रायशो दृश्यन्ते। मनु मूर्खे।

(2) सुरायै हिता इति विग्रहः। न भकुर्छुरामिति (८।२।७९) न दीर्घः।

५। तस्मै हितम्।

अस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्। वत्सेभ्यो हितं वत्सीयं गवदनम्। पयस्यम्। गव्यम्। पटव्यम्।

६। शरीरावयवाद् यत्।

स्यात्। दन्तेभ्यो हितं दन्त्यम्। कण्ठ्यम्। तालव्यम्। नाभ्यं तैलम्। ओष्ठ्यम्। मूर्धन्यम्।

(क) रथाच्च। रथाय हिता रथ्या प्रतोली।

७। खलयवमाषतिलवृषब्रह्मणश्च।

एभ्यो हिते यत् स्यात्। खलाय हितं खल्यम्। यव्यम्। माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मणे हितो ब्रह्मण्यो राजा।

८। अजाविभ्यां थ्यन्।

आभ्यां हिते थ्यन् स्यात्। अजथ्या भूमिः। अविथ्या।

९। आत्मन्विश्वजनभोगोत्तरपदात् खः।

एभ्यो हिते खः स्यात्। आत्मन्निति नकारोच्चारणमवधिज्ञापनार्थम्। आत्मने हितमात्मनीनम्। "पथ्यं मया विश्वजनीनमुच्यते"। मातृभोगीणः। आचार्य्यादणत्वञ्च (४।१।४९, वा)। आचार्य्यभोगीनः। स्वभोगीनः। भोगः शरीरमिति वृत्तिः।

(क) पञ्चजनाच्च। खः स्यात्। "गायनवादकनर्त्तकदासीभण्डरतः (3) खलु पञ्चजनीनः।"

(ख) सर्वजनाट् ठञ् खश्च। सार्वजनिकः। सर्वजनीनः।

(ग) महाजनान्नित्यं ठञ्। माहाजनिकः।

विश्वजनादेः कर्मधारयादभिधानम्। तेन षष्ठीसमासादौ न भवति। विश्वजनीयमिति।

---

(3) भडि परिभाषणे पचाद्यच्। भण्डः परिहासचतुरः। गायनवादकनर्त्तकदासीभण्डेषु रत इत्यर्थः। भण्ड is a buffoon.

१० । सर्वपुरुषाभ्यां णढञौ ।

आभ्यां हिते णढञौ स्याताम् ।

(क) तत्र सर्वाण्णस्य वा वचनं कर्त्तव्यम् । सार्वः । सर्व्वीयः ।

(ख) पुरुषाद् वधविकारसमूहतेनकृतेषु ढञ् । पौरुषेयो वधादिः ।

११ । माणवचरकाभ्यां खञ् ।

आभ्यां हिते खञ् स्यात् । माणवीनः । चारकीणः ।

१२ । तदर्थं विकृतेः प्रकृतौ ।

विकृतार्थे यथाविहितं प्रत्ययः स्यात् तदर्था प्रकृतिश्चेद् वाच्या भवति । अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि । यूपीयं दारु । शङ्कव्यम् । पिचव्यः कार्पासः । (4)

१३ । छदिरुपधिबलेर् ढञ् ।

एभ्यस्तदर्थायां प्रकृतौ ढञ् स्यात् । छादिषेयाणि तृणानि । उपधेः स्वार्थे ढञिति स्मृतिः । औपधेयं रथदारु । बल्यर्थास्तण्डुला बालेयाः ।

१४ । ऋषभोपानहोर्ञ्यः ।

आभ्यां तथैव ञ्यः स्यात् । आर्षभ्यो वत्सः । औपानह्यं चर्म्म ।

१५ । चर्म्मणोऽञ् ।

चर्म्मणो विकृतेरञ् स्यात् तदर्थायां प्रकृतौ । वार्ध्रम् । वारत्रं चर्म्म । (5)

१६ । तदस्य तदस्मिन् स्यादिति ।

षष्ठ्यर्थद्वये यथाविहितं प्रत्ययः स्यात् । प्राकार आसामिष्टकानां स्यात् सम्भवेत् प्राकारीया इष्टकाः । प्रासादोऽस्यां भूमौ सम्भवेत् प्रासादीया भूमिः ।

१७ । परिखाया ढञ् ।

अस्याःप्रागर्थे ढञ् स्यात् । पारिखेयी भूमिः । खयतो पूर्वावधी ।

---

(4) पिचुस्तूलः, cotton.

(5) चर्म्मरज्जुः Leather rope, नध्री वार्ध्री वरत्रा स्यादित्यमरः—i. e. a thong.

१८। प्राग् वते ठञ्।

तेन तुल्यं क्रिया चेद् वतिः (५।१।११५) रित्यतः प्रागर्थेषु ठञ् वेदितव्यः। गोपुच्छेन क्रीतं गौपुच्छिकम्। पारायणं वर्त्तयति पारायणिकः। द्वैपारायणिकः। साप्ततिकम्।

१६। आऽर्हादगोपुच्छसंख्यापरिमाणाट् ठक्।

अभिविधावाङ्। तदर्हतीति (५।१।६३) पर्य्यन्तेषु क्रीतंनिमित्तमीश्वरोविदितोवापस्तदस्मिंस्तहरतिवहत्यावहतिसम्भवत्यवहरतिपचतिसोऽस्यतदस्यतदर्हतीत्यर्थेषु ठग् वक्तव्यः। नैष्किकः। गोपुच्छादेः पर्य्युदासात् प्राग् वते ठञेव (५।१।१८)। गौपुच्छिकः। साप्ततिकः। प्रास्थिकः। स्वरे भेदः।

२०। असमासे निष्कादिभ्यः।

निष्कादेरसमासे ठक् स्यादार्हीयेष्वर्थेषु। नैष्किकः। निष्क। पण। माष। द्रोण। षष्टि। पाद। समासे तु ठञेव स्यात्। द्विनैष्किकम्। अतएवासमासग्रहणात् पूर्वत्र तदन्तविधिः। तेन गव्यमतिगव्यम्। दत्तं राजदत्तमित्यादि। इत उत्तरञ्च—

(क) प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति स्मृतिः। पारायणिकः। द्वैपारायणिकः।

२१। शताच्च ठन्यतावशते।

शतादार्हीयार्थेषु ठन्यतौ स्याताम्। कनो बाधा। शत्यः। शत्यः। शतिकः कम्बलः। शतिकं वासः। शत्यं वा। अशते किम्? शतमध्यायाः परिमाणमस्य शतकं निदानम्। शतकं काव्यम्। शतमेव।

२२। संख्याया अतिशदन्तायाः कन्।

संख्याया आर्हीयेषु कन् स्यात्। पञ्चकः। बहुकः। गणकः। अतिशदन्तायाः किम्? साप्ततिकः। पाञ्चाशत्कः। डतेरप्रतिषेधः। कतिकः।

२३। वतोरिड् वा।

वतोः संख्यायाः कन इड् वा स्यात्। तावतिकः। तावत्को वा।

२४ । विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ।

योगविभागोऽत्र क्रियते । आभ्यामार्हीयेषु कन् स्यात् । विंशतिकः । त्रिंशत्कः । असंज्ञायां ड्वुन् । विंशकः । त्रिंशकः । ति विंशतेर्डितीति (६।४।१४२) टिलोपः ।

२५ । कंसाट् टिठन् ।

कंसात् परिमाणादार्हीयेषु टिठन् स्यात् । कंसिकः पटः । कंसिकी । इकार उच्चारणार्थः ।

(क) अर्धाच्च । अर्धिकः । अर्धिकी ।

(ख) कार्षापणाद्वा प्रतिरादेशश्च । कार्षापणिकः । प्रतिकी वा ।

२६ । शूर्पादञन्यतरस्याम् ।

शूर्पादञ् वा स्यादार्हीयेषु । शौर्पं शौर्पिकं वा ।

२७ । शतमानविंशतिकसहस्रवसनादण् ।

एभ्य आर्हीयेष्वण् स्यात् । शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ।

२८ । अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ।

अध्यर्धपूर्वाद् द्विगोश्चार्हीयस्य लुक् स्यात् । अध्यर्धकंसेन क्रीतमध्यर्धकंसम् । द्विगोः । द्विकंसम् । त्रिकंसम् । असंज्ञायां किम् । पाञ्चकपालिकः ।

२९ । विभाषा कार्षापणसहस्राभ्याम् ।

(क) सुवर्णशतमानयोश्च ।

एतदन्तात् पूर्वको लुग् वा स्यात् । अध्यर्धकार्षापणम् । अध्यर्धकार्षापणिकं वा । द्विकार्षापणिकम् । द्विकार्षापणं वा । अध्यर्धसहस्रम् । अध्यर्धसाहस्रं वा । संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः (७।३।१५) । अध्यर्धसुवर्णम् । अध्यर्धसौवर्णिकं वा । अध्यर्धशातमानम् । अध्यर्धशतमानं वा । द्विसुवर्णं द्विसौवर्णिकं वा । द्विशतमानं द्विशातमानं वा । परिमाणान्तस्येत्युत्तरपदवृद्धिः (७।३।१७) ।

३० । द्वित्रिपूर्वान्निष्कात् ।

(क) बहुपूर्वाच्च ।

द्व्यादिपूर्वान्निष्कादार्हीयस्य लुग् वा स्यात् । द्विनिष्कं द्विनैष्किकं वा । त्रिनिष्कं त्रिनैष्किकं वा । बहुनिष्कं बहुनैष्किकं वा ।

३१ । बिस्ताच्च ।

बिस्ताच्च तथा स्यात् । द्विबिस्तं द्विबैस्तिकं वा । त्रिबिस्तं त्रिबैस्तिकं वा । बहुबिस्तं बहुबैस्तिकं वा ।

३२ । विंशतिकात् खः ।

अस्मादार्हीयस्य लुग्विषये खः स्यात् । अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् ।

३३ । खार्य्या ईकन् ।

लुको विषये खार्य्या ईकन् स्यात् । अध्यर्धखारीकम् । द्विखारीकम् ।

(क) काकिण्याश्च । अध्यर्धकाकिणीकम् । द्विकाकिणीकम् ।

(ख) केवलाभ्याञ्च । खारीकम् । काकिणीकम् ।

३४ । पणपादमाषशताद् यत् ।

एभ्यो यत् स्यात् । अध्यर्धपण्यम् । द्विपण्यम् । अध्यर्धपाद्यम् । द्विपाद्यम् । अध्यर्धमाष्यम् । अध्यर्धशत्यम् ।

३५ । शाणाद्वा ।

शाणाद् यद्वा स्यात् । अध्यर्धशाण्यम् । पक्षे ठञो लुगेव । अध्यर्धशाणम् । द्विशाणम् ।

(क) शताच्च । अध्यर्धशत्यम् । अध्यर्धशतं वा । द्विशत्यम् । द्विशतं वा ।

३६ । द्वित्रिपूर्वादण् च ।

द्वित्रिपूर्वाच्छाणादण् यच्च वा स्यात् । द्वैशाणं द्विशाण्यं वा । लुक् च । द्विशाणम् ।

३७। तेन क्रीतम्।

अत्रार्थे प्राग्वती ठञादयस्त्रयोदश प्रत्यया वेदितव्याः। सप्तत्या क्रीतं साप्ततिकम्। नैष्किकम्। मुद्गैः क्रीतं मौद्गिकम्। शत्यं शतिकम्। संख्याया अतिशदन्तायाः (५।१।२२) कन्। द्विकम्। त्रिकम्। पञ्चकम्।

३८। तस्य निमित्तं संयोगोत्पातौ।

संयोग आकस्मिकः सम्बन्धः। शुभाशुभसूचक उत्पातः। अत्रार्थे ठञादयो वेदितव्याः। शतस्य निमित्तमधमर्णेन संयोगः शत्यः शतिकः। सहस्रस्य निमित्तं दक्षिणाक्षिस्पन्दनं साहस्रम्।

(क) वातपित्तश्लेष्मसन्निपातेभ्यश्च। शमनकोपनयोरभिधानम्। वातस्य शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्। सान्निपातिकम्।

३९। गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्।

गोशब्दाद् द्व्यचश्च निमित्तार्थे यत् स्यात्। ठञादेर्बाधा। गोनिमित्तं संयोग उत्पातो वा गव्यः (6)। द्व्यचः। धन्यः। स्वर्ग्यः। यशस्यम्। आयुष्यम्। संख्यादेर्निषेधः किम्? पञ्चानां निमित्तं पञ्चकः। प्रास्थिकः। अश्मादिर्गणः। आश्मिकः। हास्तिकः।

४०। पुत्राच्छ च।

पुत्राच्छः स्याद् यश्च। पुत्रस्य निमित्तं संयोग उत्पातो वा पुत्रीयः पुत्र्यः।

४१। सर्वभूमिपृथिवीभ्यामणञौ।

आभ्यां निमित्तार्थे यथासंख्यमणञौ स्याताम्। सार्वभौमः। अनुशतिकादिः (७।३।२०)। पृथिव्या निमित्तं पार्थिवः।

४२। तस्येश्वरः।

अत्रार्थे ताभ्यां तौ स्याताम्। सर्वभूमेरीश्वरः सार्वभौमः। पार्थिवः।

---

(6) 'शैवराख्य अनिवारपञ्चको गोर्विनाशसूचक उत्पातो वा गव्यः। तथा धन्या धन्वतरी धन-विनाशसूचिकेत्यर्थः। 'यथा बडावा गुदवर्जितानामैक्ये मठो निर्धनता प्रयातीति। एवं यस्मै धनुर्वंशी धन्या। तत्र आवर्त धनेहरविकारीत्यर्थः" ।—इति हरिहरः।

४३। तत्र विदित इति च।

अत्रार्थे ताभ्यामणञौ स्याताम्। सार्वभौमः। पार्थिवः।

४४। लोकसर्वलोकाट्‌ ठञ्‌।

आभ्यां तत्र विदित इत्यर्थे ठञ्‌ स्यात्। लौकिकः। "स रामःसार्व-लौकिकः"। अनुशतिकादिः (७।३।२०)।

४५। तस्य वापः।

अत्रार्थे यथाविहितं प्रत्ययः स्यात्। प्रस्थस्य वापः क्षेत्रं प्रास्थिकम्। द्रौणिकम्। उप्यतेऽस्मिन्निति वापः।

४६। पात्रात्‌ ष्ठन्‌।

स्यात्। पात्रस्य वापः क्षेत्रं पात्रिकम्। षित्त्वात्‌ ङीष्। पात्रिकी भूमिः।

४७। तदस्मिन्‌ वृद्ध्यायलाभशुल्कोपदा दीयते।

अत्रार्थे यथाविहितं प्रत्ययः स्यात्। पञ्चास्मिन्‌ वृद्धिरायो लाभः शुल्क उपदा वा दीयते पञ्चकः। शतिकः। शत्यः।

(क) चतुर्थ्यर्थे चोपसंख्यानम्। शतमस्मै वृद्ध्यादिकं दीयते शत्यो विप्रः।

४८। पूरणार्द्धाट्‌ ठन्‌।

पूरणान्तादर्द्धाच्च ठन्‌ स्यात्। द्वितीयो वृद्ध्यादिरस्मिन्‌ दीयते द्वितीयिकः। पञ्चमिकः। अर्द्धिकः।

४९। भागाद्‌ यच्च।

भागशब्दाद्‌ यट्ठनौ स्याताम्। भागो वृद्ध्यादिरस्मिन्‌ दीयते भाग्यः। भागिकः।

५०। तद्धरति वहत्यावहति भाराद्‌ वंशादिभ्यः।

वंशादेः परस्माद्‌ भारादर्थत्रये ठक्‌ स्यात्। वंशभारं हरति वहति आवहति उत्पादयति वा वांशभारिकः। कौटजभारिकः।

५१। वस्नद्रव्याभ्यां ठन्कनौ।

आभ्यामिमौ स्याताम्। वस्नं हरति वहत्यावहति वस्निकः। द्रव्यकः।

५२। सम्भवत्यवहरतिपचति।

एषु यथाविहितं स्यात्। प्रस्थं सम्भवति पचति वा प्रास्थिकः कटाहः। खारीकः। प्रमाणानतिरेकः सम्भवः। संहरणमवहारः।

(क) पचतौ द्रोणादण् च। द्रोणं पचति द्रौणः कटाहः। द्रौणी द्रौणिकी वा स्थाली।

५३। आढकाचितपात्रात् खोऽन्यतरस्याम्।

एभ्यः पूर्वार्थेषु खो वा स्यात्। आढकं सम्भवत्यवहरति पचति वा आढकीना। आढकिकी वा। आचितीना। आचितिकी वा। पात्रीणा पात्रिकी वा।

५४। द्विगोःष्ठंश्च।

द्विगोः पूर्वार्थेष्वाढकाद्यन्तात् ष्ठन् वा स्यात्। खश्च। षित्वात् ङीष्। द्व्याढकिकी द्व्याढकीना वा। द्व्याचितिकी द्व्याचितीना वा। पक्षे ठञ्। तस्याध्यर्धेति (५।१।२८) लुक्। द्व्याढकी। द्विगोरिति (४।१।२१) ङीप्। द्व्याचिता।

५५। कुलिजाल्लुक्खौ च।

द्विगोः कुलिजाल्लुक्खौ वा स्याताम्। चकारात् ष्ठंश्च। द्विकुलिजी (7)। द्विकुलिजीना। द्विकुलिजिकी वा। पक्षे ठञः श्रुतिरेव। द्वैकुलिजिकी।

५६। सोऽस्यांशवस्नभृतयः।

षष्ठ्यर्थे यथाविहितं स्यात्। पञ्चांशा वस्नानि भृतयो वाऽस्य पञ्चकः। शत्यः। शतिकः। शतकः।

---

(7) द्विगोरिति (४।१।२१) ङीप्। कुलिजकार्षिकाभ्यां द्विकुलिजेति टाप् इच्छन्ति। स मुद्राकरभ्रम इति प्रतिभाति।

५७। तदस्य परिमाणम्।

प्रथमासमर्थात् परिमाणार्थे यथाविहितं स्यात्। प्रस्थः परिमाणमस्य प्रास्थिको राशिः। खारीकः। वार्षशतिको यामः। षष्टिर्जीवितपरिमाणमस्य षाष्टिकः। इह द्वे षष्टी जीवितपरिमाणमस्येति ठञोऽध्यर्द्धपूर्वेति (५।१।२८) लुक्। सोऽस्येति प्रकृतेः पुनस्तदस्येति निर्देशात् पुनष्ठञ्। तस्य च विधान-सामर्थ्यादलुगिति जयादित्यः। संख्यायाः संवत्सरसंख्यस्य (७।३।१५) चेत्युत्तर-पदवृद्धिः। द्विषाष्टिकः। द्विसाप्ततिकः। त्रिसाप्ततिकः।

५८। संख्यायाः संज्ञासंघसूत्राध्ययनेषु।

संख्यावाचिनः पूर्वार्थे यथाविहितं स्यात्। संज्ञायां स्वार्थे विधिः। पञ्चैव पञ्चका शकुनाः। पञ्च परिमाणमस्य पञ्चकः संघः। सूत्रे। अष्टावध्यायाः परिमाणमस्याष्टकं पाणिनीयं सूत्रम्। पञ्चावृत्तयः परिमाणमस्य पञ्चक-मध्ययनम्।

५९। पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्य-शीतिनवतिशतम्।

पङ्क्त्यादयः साधवः स्युः। सहस्रादिवत् संज्ञाशब्दा एते। द्वौ पञ्चतो पङ्क्तिः। द्वौ दशतो विंशतिरित्यादि व्युत्पत्तिमात्रम्। नान्वयः। तदुक्तं भाष्ये समारम्भो वा प्रातिपदिकविज्ञानाद् यथा सहस्रादिष्विति।

६०। पञ्चद्दशतौ वर्गे वा।

एतौ वर्गे निपात्येते वा। पञ्च परिमाणमस्य पञ्चद् वर्गः। पक्षे कन्। पञ्चकः। दशद् वर्गो दशको वा।

६१। सप्तनोऽञ्छन्दसि।

साप्तः वृत्तम्।

६२। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्।

आभ्यां ब्राह्मणे वाच्ये डण् स्यात्। त्रिंशदध्यायाः परिमाणमेषां त्रैंशानि ब्राह्मणानि। चात्वारिंशानि।

६३। तदर्हति।

अत्रार्थे यथाविहितं स्यात्। छत्रमर्हति च्छात्रिकः। शत्यः। शतिकः। तदिति वर्त्तते प्रागुत्तरपथात् (५।१।७७)।

६४। छेदादिभ्यो नित्यम्।

छेदादेर्नित्यमर्हतीत्यर्थे यथाविहितं स्यात्। छैदिकः। भैदिकः। नित्यमिति क्रियाविशेषणम्।

६५। शीर्षच्छेदाद् यच्च।

अस्मात् तदर्हतीत्यर्थे यत् स्यात्। ठक् च। शीर्षच्छेद्यः। शैर्षच्छेदिको वा। प्रत्ययसन्नियोगेन शिरसो निपातनाच्छीर्षादेशः।

६६। दण्डादिभ्यो यः।

एभ्यो यः स्यात्। दण्डमर्हति दण्ड्यः। वध्यः। कण्ठ्यः। मधुपर्क्यः। युग्यः। कम्यः। धन्यः।

६७। छन्दसि च।

छन्दः सूत्रम्।

६८। पात्राद् घंश्च।

पात्राद् घन् स्यात्। यच्च। पात्रमर्हति पात्रियः। पात्र्यः।

६९। कडङ्करदक्षिणाच्छ च। (४)

आभ्यां छः स्याद् यच्च। कडङ्करमर्हति कडङ्करीयो गृषः। कडङ्कर्यः। दक्षिणीयः। दक्षिण्यः।

७०। स्थालीबिलात्।

अस्माच्छः स्याद् यच्च। स्थालीबिलमर्हन्ति स्थालीबिलीयाः स्थालीबिल्या वा तण्डुलाः। पाकयोग्या इत्यर्थः।

---

(४) मतान्तरे कडङ्करशब्दोऽयम्। तथाच हरदत्तः—कड मदे। कडतीति कडः। कडं करोतीत्यत एव निपातनात् खच्। कडंकरो माषमुद्गादिकाष्ठमुच्यते। कडंकरो बुसं क्लीबे इत्यमरः।

७१। यज्ञर्त्विग्भ्यां घखञौ।

आभ्यां घखञौ स्याताम्। यज्ञमर्हति यज्ञियो ब्राह्मणः। आर्त्विजीनो यजमानः।

(वा) तत्कर्मार्हतीत्युपसंख्यानम्। यज्ञियो देशः। आर्त्विजीनं विप्रकुलम्। आर्हीयाः पूर्वाः। अतः परं प्राग्वते ठञेव (५।१।१८)।

७२। पारायणतुरायणचान्द्रायणं वर्त्तयति।

एभ्यो वर्त्तयतीत्यर्थे ठञ् स्यात्। पारायणिकः। द्वैपारायणिकः। तौरायणिकः। चान्द्रायणिकः।

७३। संशयमापन्नः।

ठञ् स्यात्। सांशयिकः।

७४। योजनं गच्छति।

ठञ् स्यात्। यौजनिकः।

(वा) क्रोशशतयोजनशतयोरुपसंख्यानात्।

७५। पथः ष्कन्।

पन्थानं गच्छति पथिकः। षित्त्वात् ङीष्। पथिकी।

७६। पन्थो ण नित्यम्।

पथो णः स्यात् पन्थादेशश्च नित्यं गन्तरि। "पान्थः प्रसृतो युवा"। स्त्रियां टाप्। पान्था स्त्री।

७७। उत्तरपथेनाहृतञ्च।

उत्तरपथात् ठञ् स्यात्। तेनाहृतमौत्तरपथिकं दारु। चकारात् तेन गच्छति। औत्तरपथिको दूतः।

(वा) वारिजङ्गलस्थलकान्ताराजशङ्कुपूर्वाच्च। एतत् पूर्वात् पथष्ठञ् स्यात्। तेनाहृतं गच्छति वा। वारिपथिकम्। जाङ्गलपथिकम्। स्थालपथिकम्। कान्तारपथिकम्। आजपथिकम्। शाङ्कुपथिकम्।

(ख) स्थलवारिभ्यां पथो मधुकमरिचयोरण् । स्थालपथं वारिपथं मधुकं मरिचं वा ।

७८ । कालात् ।

कालवाचिनः प्रत्यया वाच्याः । व्युष्टादिभ्योऽणिति (५।१।९७) यावत् ।

७९ । तेन निर्वृत्तम् ।

अत्रार्थे कालाट् ठञ् स्यात् । अह्ना निर्वृत्तमाह्निकम् । अह्नष्टखोरेवेति (६।४।१४५) नियमान्न टिलोपः । मासिकः । द्विसांवत्सरिकः । संख्यायाः संवत्सरेत्युत्तरपदवृद्धिः (७।३।१५) ।

८० । तमधीष्टो भृतो भूतो भावी ।

तमिति द्वितीयासमर्थात् कालवाचिशब्दादधीष्टाद्यर्थे ठञ् स्यात् । मासमधीष्टो भृतो भूतो भावी वा मासिकः । सांवत्सरिको गुरुर्दासो व्याधिरुत्सवो वा ।

८१ । मासाद् वयसि यत्खञौ ।

वयसि गम्ये मासादिमौ स्याताम् । मासं भूतो भावी वा मास्यः । मासीनः शिशुः । वयसि किम् ? मासिकः कर्मकरः ।

८२ । द्विगोर्यप् ।

द्विगोर्मासाद् वयसि यप् स्यात् । द्वौ मासौ भूतो भावी वा द्विमास्यः । त्रिमास्यः ।

८३ । षण्मासाण्ण्यच्च ।

षण्मासाद् वयसि ण्यत् स्यात् । यप् च । षाण्मास्यः । षण्मास्यः । ठञपीत्येके । षाण्मासिकः ।

८४ । अवयसि ठंश्च ।

अवयसि षण्मासाट् ठन् स्यात् । ण्यश्च । षण्मासिको रोगः । षाण्मास्यः । ठञपीत्येके । षाण्मासिकः ।

८५। समायाः खः।

समाश्रब्दान्निर्वृत्ताद्यर्थपञ्चके खः स्यात्। समीनः।

८६। द्विगोर्वा।

द्विगोः समान्तान्निर्वृत्तादौ खः स्याद्वा। द्विसमीनः। द्वैसमिको वा।

८७। रात्र्यहःसंवत्सराच्च।

रात्र्याद्यन्ताद् द्विगोर्निर्वृत्तादौ खो वा स्यात्। पक्षे ठञ्। द्विरात्रीणः। द्वैरात्रिको वा। द्व्यह्नीनः। द्वैयह्निको वा। द्विसंवत्सरीणः। द्विसांवत्सरिको वा। इह द्व्यह्नीन इत्यत्र समासान्तविधेरनित्यत्वान्न टच्। ततो नाह्नादेशः। तस्य टचि विधानात्।

८८। वर्षाल्लुक् च।

वर्षान्ताद् द्विगो र्निर्वृत्तादौ खठञौ वा स्याताम्। तल्लुक् च वा। द्विवर्षीणो व्याधिः। द्विवार्षिको वा। पक्षे लुक्। द्विवर्षः। वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः (७।३।१६)। भाविनि तु द्वैवर्षिकः।

८९। चित्तवति नित्यम्।

प्राणिनि वर्षान्ताद् द्विगोर्निर्वृत्तादौ नित्यं लुक् स्यात्। द्विवर्षो बालकः। द्विवर्षो वत्सः।

९०। षष्टिकाः षष्टिरात्रेण पच्यन्ते।

षष्टिरात्रात् कन् स्यादुत्तरपदलोपश्च निपात्यते। षष्टिकाः। बहुलमतन्त्रम्। तेन षष्टिको व्रीहिरित्याहुः।

९१। वत्सरान्ताच्छश्छन्दसि।

९२। संपरिपूर्वात् ख च।

छन्दः सूत्रद्वयम्।

९३। तेन परिजय्यलभ्यकार्य्यसुकरम्।

एष्वर्थेषु कालाट् ठञ् स्यात्। मासेन परिजेतुं शक्यो लभ्यः कार्य्यः सुकरो वा मासिकः। सांवत्सरिकः।

६४ । तदस्य ब्रह्मचर्य्यम् ।

कालादव्रार्थे ठञ् स्यात् । मासं ब्रह्मचर्य्यमस्य मासिको विप्रः । मासमित्यत्यन्तसंयोगे द्वितीया (२।३।५) । तदिति प्रथमान्तम् । तेन मासोऽस्य ब्रह्मचर्य्यस्य मासिकं ब्रह्मचर्य्यमित्येके ।

(क) तच्चरति महानाम्न्यादिभ्यः । ठञ् स्यात् । महानाम्नी नाम ऋचस्तत्सहचरितं व्रतं महानाम्न्यः । ताच्चरति माहानाम्निकः (9) आदित्यव्रतिकः ।

(ख) अवान्तरदीक्षादिभ्यो डिनिः । पूर्वार्थे डिनिः स्यात् । तच्चरति । अवान्तरदीक्षी । देवव्रती ।

(ग) अष्टचत्वारिंशतो ड्वुण् डिनिश्च । अष्टचत्वारिंशद् वर्षाणि व्रतं चरति अष्टचत्वारिंशकः । अष्टचत्वारिंशी (10) विप्रः ।

(घ) चातुर्मास्यानां यलोपश्च । चातुर्मास्यानि व्रतानि चरति चातुर्मासकः । चातुर्मासी ।

(ङ) चतुर्मासाण् ण्यो यज्ञे तत्र भवे । चतुर्मासे भवो यज्ञश्चातुर्मास्यः ।

(च) संज्ञायामण् । चातुर्मासी । पौर्णमास्याः संज्ञा ।

६५ । तस्य च दक्षिणा यज्ञाख्येभ्यः ।

यज्ञनाम्नस्तस्य दक्षिणेत्यर्थे ठञ् स्यात् । अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी । राजसूयिकी ।

६६ । तत्र च दीयते कार्यं भववत् ।

तत्रेति सप्तम्यन्ताद् दीयते कार्य्यमित्यर्थयोस्तत्रभववत्प्रत्ययाः स्युः । मासे दीयते कार्य्यं वा मासिकम् । प्रावृषेण्यम् । हैमनम् । उक्तः कालाधिकारः ।

---

(9) हरदत्तस्तु माहानामिक इत्याह । भस्याढे इति पुंवद्भावात् (६।३।३५ वा) । महान्ति नामानि यासां ता महानाम्न्यो विद्याप्रवचनविशेषा ऋचः । नित्यं संज्ञाछन्दसोरिति (४।१।२९) ङीप् । चरणमनुष्ठानमित्यर्थः । तत्र क्रियाविषयमिति तत्सहचरितं व्रतञ्च ।

(10) प्रतिवेदं द्वादशवर्षाणि व्रतं चरत्येवमनुष्ठाती ।

९७। व्युष्टादिभ्योऽण्।

एभ्योऽण् स्यात्। व्युष्टे दीयते कार्यं वा वैयुष्टम्। नैत्यम्।

९८। तेन यथाकथाचहस्ताभ्यां णयतौ।

आभ्यां णयतौ स्याताम्। तेन दीयते कार्यं वा। याथाकथाचम्। हास्त्यम्। यथाकथाचेत्यव्ययसमुदायोऽनादरार्थकः।

९९। सम्पादिनि।

अत्र ठञ् स्यात्। चन्दनेन सम्पादि शोभि चान्दनिकम्। "वपुश्चान्दनिकं यस्य कार्णवेष्टकिकं मुखम्।" वास्त्रयुगिकं शरीरम्।

१००। कर्मवेषाद् यत्।

आभ्यां यत् स्यात् तेन सम्पाद्यर्थे। कर्मण्यं शरीरम्। वेष्या स्त्री। वेष्यं वपुः।

१०१। तस्मै प्रभवति सन्तापादिभ्यः।

सन्तापादिभ्यष्ठञ् स्यात्। सन्तापाय प्रभवति सान्तापिकम्। सांग्रामिकम्। सक्तुमांसौदनिकः। साक्तुकः। मांसिकः। औदनिकः।

१०२। योगाद् यच्च।

योगाय प्रभवति योग्यम्। ठञ् च। यौगिकम्।

१०३। कर्मण उकञ्।

कर्मणे प्रभवतीति कार्मुकं धनुः।

१०४। समयस्तदस्य प्राप्तम्।

समयादस्यार्थे ठञ् स्यात्। समयः प्राप्तोऽस्य सामयिकं कार्यम्। "क्षिप्रसामयिकं वितन्वता"। तदस्यानुवृत्तिः प्राग् वतेः (५।१।११५)।

१०५। ऋतोरण्।

तस्मादण् स्यात्। ऋतुः प्राप्तोऽस्यार्तवं पुष्पम्। आर्तवं फलम्।

१०६। छन्दसि घस्।

छन्दः सूत्रम्।

१०७ । कालाद् यत् ।

कालः प्राप्तोऽस्य काल्यं वस्त्रम् । काल्या गौः प्रजने । काल्यं शीतम् ।

१०८ । प्रकृष्टे ठञ् ।

प्रकृष्टः कालोऽस्य कालिकं वैरम् । ठञिति विस्पष्टार्थम् । कालिकमृणम् ।

१०९ । प्रयोजनम् ।

तदस्य प्रयोजनमित्यर्थे ठञ् स्यात् । ऐन्द्रमहिकम् । भौत्सविकम् ।

११० । विशाखाषाढादण् मन्थदण्डयोः ।

आभ्यामनयोरण् स्यात् । वैशाखो मन्थः । “द्रुततरकरदक्षाः क्षिप्रवैशाखशैले ।” आषाढो दण्डः (11) । “यथाजिनाषाढधरस्तपस्वी” । (12)

(क) चूडादिभ्यश्च । चूडा प्रयोजनमस्य चौडम् । श्रद्धा प्रयोजनमस्य श्राद्धम् । श्राद्धः ।

१११ । अनुप्रवचनादिभ्यश्छः ।

एभ्यश्छः स्यात् तदस्य प्रयोजनमित्यर्थे । अनुप्रवचनीयम् । अनुप्रयोजनीयम् । उत्थापनीयम् ।

(क) विशिपदिपूरिरुहिप्रकृतेरनाम्नात् सपूर्वपदात् । गेहानुप्रवेशनीयम् । प्रपापूरणीयम् । अश्वारोहणीयम् । अश्वप्रपदनीयम् । प्रासादारोहणीयम् ।

(ख) स्वर्गादिभ्यो यत् । स्वर्गः प्रयोजनमस्य स्वर्ग्यः । आयुष्यः । यशस्यः । धन्यम् ।

(ग) पुण्याहवाचनादिभ्यो लुग् वक्तव्यः । पुण्याहवाचनं कर्म । स्वस्तिवाचनम् ।

११२ । समापनात् सपूर्वपदात् ।

विद्यमानपूर्वपदात् समापनाच्छः स्यात् तदस्य प्रयोजनमित्यर्थे । व्रतसमापनीयं भोजनम् । कलशसमापनीयं दानम् । छन्दःसमापनीयम् ।

---

(11) “पूर्वाषाढायां यतिभिर्दण्डो धार्यत इति प्रयोजनम्” ।—इति सृष्टिधरः ।

(12) यथाजिनाषाढधरः प्रवक्ष्यामीति कुमारे पाठः ।

११३। ऐकागारिकट् चौरे।

अयं चौरे निपात्यते। ऐकागारिकश्चौरः। "ऐकागारिकवद् भूमौ दूराज्जग्मुरदर्शनम्"। ऐकागारिकी। टित्त्वात् ङीप्।

११४। आकालिकडाद्यन्तवचने।

स्तोककालयोराद्यन्तयोर्वचनेऽयं निपात्यते। आकालिको मेघः। टित्त्वादाकालिकी। "आकालिकीं वीक्ष्य मधुप्रवृत्तिम्"। प्राग्वतेष्ठञुक्तः।

११५। तेन तुल्यं क्रिया चेद् वतिः।

तृतीयासमर्थात् क्रियातौल्ये वतिः स्यात्। विप्रेण तुल्यं विप्रवदधीते। इह क्रियया तुल्यत्वं क्रियाया एव सम्भवति। विप्रवदधीत इति विप्रकर्तृकाध्ययनक्रियावृत्तेर्विप्रशब्दाद्वतिः। विप्रेण तुल्यं विप्रकर्तृकाध्ययनेन तुल्यं यथा स्यादेवमधीत इत्यर्थः। एवं "पुत्रं मित्रवदाचरेत्।" मित्रकर्मकाचरणक्रियया तुल्यं यथा स्यादेवं पुत्रमाचरेत्। तथा पूर्ववत् सन (१।३।६२) इत्यात्मनेपदं भवति। पूर्वस्मात्प्रापादानकात्मनेपदभवनक्रियया तुल्यं यथा स्यात् तथा सनन्तादात्मनेपदं भवति। एवं गुरुवद् गुरुपुत्रेषु प्रवर्त्तितव्यम्। पूर्वाधिकरणकप्रवर्त्तनक्रियया तुल्यं तत्पुत्रेषु प्रवर्त्तनमिति। क्रियाग्रहणं किम्? गुणतुल्ये मा भूत्। तेन पुत्रेण तुल्यः स्थूलः।

११६। तत्र तस्येव।

सप्तमीषष्ठीसमर्थादिवार्थे वतिः स्यात्। मथुरावत् स्रुघ्ने प्राकाराः। ब्राह्मणवत् क्षत्रियस्य दन्ताः शुक्लाः।

११७। तदर्हम्।

अर्हार्थे वतिः स्यात्। अर्हतीत्यर्हम्। पचाद्यच्। राजानमर्हति राजवत् वृत्तम्। मुनिवच्चरित्रम्। नेह विप्रमर्हति दधीति। अनभिधानात्।

११८। उपसर्गाच्छन्दसि धात्वर्थे।

छन्दः सूत्रम्।

११९। तस्य भावस्त्वतलौ।

भवतोऽस्मादभिधान-प्रत्ययाविति भावः शब्दप्रवृत्तिनिमित्तं जात्यादि-

वैसुधर्मः । तस्य भाव इत्यर्थे त्वतलौ स्याताम् । गोत्वं गोता । शुक्लत्वं शुक्लता । रूपत्वं रूपता । क्रियात्वं क्रियाता । रसत्वं रसता । समासतद्धितेषु सम्बन्धः प्रवृत्तिनिमित्तम् । राजपुरुषत्वम् । पाचकत्वम् । गार्ग्यत्वम् । यौष्माकीणत्वम् । यदृच्छाशब्दात् स्वरूपमात्रेऽभिधानम् । डित्थत्वम् । डवित्थत्वम् । शुत्वम् । घुत्वम् ।

१२० । आ च त्वात् ।

आ प्रकृष्य स्वा-(५।१।१२६) इत्यपवादैः सह त्वतलौ समाविशतः । चकारान्नञ्स्नञ्भ्यां च । प्रथिमा पृथुत्वं पृथुता । एवं पाटवं पटुत्वं पटुता । स्त्रैणं स्त्रीत्वं स्त्रीता । पौंस्नं पुंस्त्वं पुंस्ता ।

१२१ । न नञ्पूर्वात् तत्पुरुषादचतुरसङ्गतलवणवटबुधकतरसलसेभ्यः ।

नञ्तत्पुरुषाद् वक्ष्यमाणभावप्रत्ययो न स्यात् । यथा पत्यन्तपुरोहितादिभ्यो यक् (५।१।१२८) । वार्हस्पत्यम् । नञ्पूर्वान्न भवति । अपतित्वम् । अपतिता । अचतुरादिभ्यः किम् ? आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आबुध्यम् । आकतत्वम् । आरस्यम् । आलस्यम् ।

१२२ । पृथ्वादिभ्य इमनिज् वा ।

एभ्य इमनिज् स्याद्वा । वावचनमणा समावेशार्थम् । पृथोर्भावः प्रथिमा पार्थवं पृथुत्वम् पृथुता वा । तनिमा तानवं तनुता तनुत्वं वा । पृथुमृदुपटुमहद्गुरुलघुप्रियक्षिप्रक्षुद्रदीर्घबहुलादिः पृथ्वादिः ।

१२३ । वर्णदृढादिभ्यः ष्यञ् च ।

एभ्यः ष्यञिमनिचौ स्याताम् । वर्णात् । शौक्ल्यं शुक्लिमा । कार्ष्ण्यं कृष्णिमा । दृढादेः । दार्ढ्यं द्रढिमा । माधुर्यं मधुरिमा । वैमनस्यं विमनिमा (13) । चकारो ङीबर्थः । औचिती । आनुपूर्वी । वैदग्धी । त्वतलौ सर्वत्रोदाहर्तव्यौ । इह गुणवचनादेव ष्यञि सिद्धे वर्णग्रहणमिमनिजर्थम् ।

(13) अत्र (1) वैमनस्यमनतिमनःशारदानाम् । (2) समौ मतिमनसोरिति नवसूत्रवचनम् । तेन विमनसः ष्यञिमनिचौ ।

बधिरजडमौनोच्चमधुरादीनाञ्च दृढादौ पाठः पक्षे इमनिजर्थः । कर्मणि च ष्यञ् मा भूत् ।

१२४ । गुणवचनब्राह्मणादिभ्यः कर्मणि च ।

एभ्यो भावे क्रियायाञ्च ष्यञ् स्यात् । गुणवचनात् । जडस्य भावः क्रिया वा जाड्यम् । मौढ्यम् । कार्श्यम् । सौख्यम् । ब्राह्मणादेराकृतिगणत्वात् । ब्राह्मण्यम् । दौत्यम् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् दूतीनां कर्म दौत्यम् । "आगतप्रियसखेरभिदौत्यम् ।" ब्राह्मण दूत चौर मध्यस्थ कुशल चपल निपुण पिशुन दायाद कवि अक्षेत्रज्ञ । आकृतिगणोऽयम् । "चापल्यादय सरसस्तरकृत्स्नैः" ।

(क) अर्हतो नुम् च । आर्हन्त्यमार्हन्ती ।

(ख) चातुर्वर्ण्यादीनां स्वार्थे ष्यञ् । चातुर्वर्ण्यम् । आन्यभाव्यम् । आन्यभाव्यं तु कालशब्दव्यवायादिति वररुचिः (14) । औपम्यम् । यौगपद्यम् । सान्निध्यम् । चातुर्वैद्यम् । षाड्गुण्यम् । तादर्थ्यम् । त्रैलोक्यम् । साहित्यम् (15) । अतःपरं भावे कर्मणि चेत्यापादमनुवर्त्तते ।

१२५ । स्तेनाद् यन्नलोपश्च ।

स्तेनशब्दाद् यत् स्यात् । नकारलोपश्च । स्तेन चौरः । तस्य भावः क्रिया वा स्तेयम् । स्तैन्यशब्दस्तु पाश्चायतनलौहितिक इतिवदागमिक इति भागवृत्तिः (16) । योगविभागात् ष्यञिति जयादित्यः ।

१२६ । सख्युर्यः ।

स्यात् । सख्यम् । दूतवणिग्भ्याञ्चेति जयादित्यः । दूत्यम् । वणिज्या । ब्राह्मणादिपाठाद् वाणिज्यम् । दौत्यञ्च ।

---

(14) This is a वार्त्तिक (in the ष्यञ् प्रकरण) by कात्यायन who is also called वररुचि ।

(15) "निर्दोषौ गुणसम्पन्नौ सालङ्कारौ रसान्वितौ । शब्दार्थौ सहितौ काव्यमतः साहित्यमुच्यते ॥१॥" इति ।

(16) अत्र सृष्टिधरः—"पश्चायतनस्य भावः पाश्चायतनम् । लौहितको मणिः । तस्य भावो लौहितिकम् । एतौ प्रयोगाविति । न चानयोरन्योऽर्थो वा विधानं सूत्रमस्ति । तत्राचार्यमिति योगविभागाद् यथेदं तथा स्तेनात् स्तैन्यमिति च स्तेयमिति भावः । आगमः परम्परा । तत आगत आगमिकः । "चौरिका स्तैन्यचौर्ये च" इत्यमरोऽपि" । इति ।

१२७। कपिज्ञात्योर्ढक्।

आभ्यां ढक् स्यात्। कापेयम् (17)। ज्ञातेयम्। भावः कर्म वेत्यर्थे।

१२८। पत्यन्तपुरोहितादिभ्यो यक्।

एभ्यो यक् स्यात्। पत्यन्तात्। सैनापत्यम्। प्राजापत्यम्। गार्हपत्यम्। पुरोहितादेः। पौरोहित्यम्। राज्यम्। सैन्यम्।

१२९। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्।

एभ्योऽञ् स्यात्। प्राणिजातेः। औष्ट्रम्। वयोवचनात्। कौमारम्। उद्गात्रादेः। औद्गात्रम्। औन्नेत्रम्।

१३०। हायनान्तयुवादिभ्योऽण्।

एभ्योऽण् स्यात्। हायनान्तात्। द्वैहायनम्। यूनो भावः कर्म वा यौवनम्। स्थाविरम्। पौरुषम्। सुहृद्। दुर्हृद्। चपल। निपुण। कुशल। क्षेत्रज्ञ। पिशुन। कुतूहल।

(क) श्रोत्रियस्य यलोपश्च। श्रौत्रम्।

१३१। इगन्ताच्च लघुपूर्वात्।

इग् यस्यान्ते तत्पूर्वश्च यो लघु तस्मादण् स्यात्। मौनम्। गौरवम्। शौचम्। पाटवम्। लाघवम्। हारीतकम्। लघुपूर्वात् किम्? पाण्डुत्वम्। काव्यं तु ब्राह्मणादित्वात्।

१३२। योपधाद् गुरूपोत्तमाद् वुञ्।

त्रिप्रभृतीनामन्त्यमुत्तमम्। तत्समीपमुपोत्तमम्। गुरूपोत्तमाद् योपधाद् वुञ् स्यात्। रामणीयकम्। आचार्य्यकम्। साहायकम्। साहाय्यमित्यपि ब्राह्मणादित्वादिति जयादित्यः। नेति भागवृत्तिः। गुरूपोत्तमात् किम्? क्षत्रियत्वम्।

---

(17) "बहूनामप्यचित्तानामेको भवति चित्तवान्। पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते ॥१॥ नैवं मनुष्याः सचिवोऽसमीक्ष्योऽपि हि यथा वयम्। एतदप्यस्य कापेयं यदर्कमुपतिष्ठति" ॥२॥ इति।

१३३। द्वन्द्वमनोज्ञादिभ्यश्च।

एभ्यो वुञ् स्यात्। द्वन्द्वात्। शैष्योपाध्यायिका। पैतापुत्रिका। कौत्सकुशिकिका। मनोज्ञादेः। मानोज्ञकम्। प्रैयरूपकम्। आभिरूपकम्। अमुष्यपुत्र। अमुष्यकुल। आढ्य। ग्राम।

१३४। गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु।

आभ्यां श्लाघाधिक्षेपे तत्प्राप्तिविषये भावे कर्मणि च वुञ् स्यात्। गोत्रात्। गार्गिकया श्लाघते। गार्गिकयात्याकुरुते। दाक्षिकामवेतः। चरणात्। काठिकया श्लाघते। काठिकयात्याकुरुते। बाह्वृचिकामवेतः। श्लाघादिभ्योऽन्यत्र गार्ग्यत्वमित्येव।

१३५। होत्राभ्यश्छः।

होत्राशब्दोऽयमृत्विजां वाचकः। बहुवचनं स्वरूपविधिनिरासार्थम्। होत्रावाचिभ्यश्छः स्यात्। अच्छावाकीयम्। मित्रावरुणीयम्। ब्राह्मणाच्छं-सीयम्।

१३६। ब्रह्मणस्त्वः।

होत्रावाचिनो ब्रह्मन्शब्दाच्छापवादस्त्वः स्यात्। ब्रह्मत्वम्। पूर्णो भाव-कर्माधिकारः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

पञ्चमाध्यायस्य प्रथमः पादः॥५।१॥

समाप्तश्च क्रीतपादः॥

—

अथ

भाषावृत्तिः ।

पञ्चमोऽध्यायः । द्वितीयः पादः ।

१ । धान्यानां भवने क्षेत्रे खञ् । (18)

धान्यवाचिभ्योऽत्र खञ् स्यात् । भवन्त्यत्रेति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् । धान्यीनम् । कौलत्थीनम् । कौद्रवीणम् ।

२ । व्रीहिशाल्योर्ढक् ।

आभ्यां ढक् स्यात् । व्रैहेयम् । शालेयम् ।

३ । यवयवकषष्टिकाद्यत् । (19)

एभ्यो यत् स्यात् । यव्यं क्षेत्रम् । यवक्यम् । षष्टिक्यम् ।

४ । विभाषा तिलमाषोमाभङ्गाणुभ्यः ।

एभ्यो यद्वा स्यात् । तिल्यं क्षेत्रम् । तैलीनं वा । माष्यं माषीणं वा । उम्यमौमीनं वा । भङ्ग्यं भाङ्गीनं वा । अणव्यमाणवीनं वा । (20)

---

(18) "यवगोधूमधान्यानि तिलाः कङ्गुकुलत्थकाः । माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः ॥ १ ॥ गवेधुकाश्च नीवारा आढक्यश्च सतीनकाः । चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु" ॥२॥ इति स्कान्दे।
यव is barley, गोधूम = wheat, धान्य = व्रीहि, कङ्गु = प्रियङ्गु = काउनि = panick seed, मसूर = Lentil, श्याम = श्यामाक, नीवार = चारव्रीहि । आढकी = रहरी = तुवरी ; सतीनक = कलाय = मटर = सतीन = peas. चणक = छोला = बुट = gram. चीनकस्तु कोद्रव प्रभेदः । = Some grain. मतान्तरे कोद्रव is भङ्गा । कुलत्थ is some corn.

(19) यवकं घोरकधान्यम् = घोरीधान ।

(20) माष = माषकलाय । अतसी स्यादुमा क्षुमेत्यमरः । उमा = अतसी = तिसि = Linseed. भङ्गा = शणः = चीरपः = काश्मीरादिजातधान्यविशेषः । भङ्गा मतान्तरे कार्पासः । अणु = चीनक = चीना ।

५। सर्वचर्मणः कृतः खखञौ।

अस्मात् कृतार्थे खखञौ स्याताम्। सर्वं एव चर्मणा कृतः सर्वचर्मीणो रथः। सार्वचर्मीणः।

६। यथामुखसंमुखस्य दर्शनः खः।

आभ्यां दर्शनार्थे खः स्यात्। मुखस्य सादृश्यं यथामुखम्। निपातनात् समासः। समं मुखं सम्मुखम्। दृश्यतेऽस्मिन्निति दर्शनः। यथामुखस्य दर्शनो यथामुखीनो दर्पणः। "यथामुखीनः सीताया हेमरत्नमयो मृगः"(21)। सम्मुखस्य दर्शनः सम्मुखीनः।

७। तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति।

सर्वादिकात् पथ्यङ्गादेस्तद्व्याप्नोतीत्यर्थे खः स्यात्। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वाङ्गीणं वासः। सर्वकर्मीणः पाणिः। सर्वपत्रीणः सारथिः। सर्वपात्रीणः ओदनः।

८। आप्रपदं प्राप्नोति।

अत्रार्थे खः स्यात्। आप्रपदीनः पटः।

९। अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु।

अनुपदादेर्बद्धादौ खः स्यात्। अनुपदं बद्धा अनुपदीना पादुका पादप्रमाणेत्यर्थः। सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः। अयः प्रदक्षिणम्। अनयः प्रसव्यम्। अयानयं नेयो ऽयानयीनः शारः।

१०। परोवरपरम्परपुत्रपौत्रमनुभवति।

एभ्योऽनुभवत्यर्थे खः स्यात्। परांश्चावरांश्चानुभवति। परस्योत्वं निपातनात्। परोवरीणः। "लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय"। परांश्च परांश्चेति। निपातनान्मत्वम्।

११। अवारपारात्यन्तानुकामं गामी।

एभ्यो गामीत्यर्थे खः स्यात्। अवारं गामी अवारीणः। पारीणः।

---

(21) यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्निति भट्टिः।

समुदायाच्च। अवारपारीणः। विपरीताच्च। पारावारीणः। अत्यन्तीनः। "अनुकामीनतां त्यज"। गामीति भविष्यन्निर्देशो वैचित्र्यार्थः। गन्तृमात्रे प्रत्ययः। (22)

१२। समां समां विजायते।

अत्रार्थे खः स्यात्। समांसमीना गौः। प्रत्यब्दप्रसवेत्यर्थः। पूर्वपदे सुपोऽलुग्वक्तव्यः।

१३। अद्यश्वीनावष्टब्धे।

इयमवष्टब्धे आसन्ने विजनने निपात्यते। अद्य श्वो वा विजायतेऽद्यश्वीना गौः। आसन्नप्रसवेत्यर्थः। कथमद्यश्वीनो वियोगः? विजायत इत्यस्याननुवृत्तेरिति जयादित्यः। स्त्रीलिङ्गनिर्देशादुपमानस्याप्यसम्भवान्नैतदिति भागवृत्तिः।

१४। आगवीनः।

निपात्यते। आ गोः प्रतिपादनात् कर्मकारी आगवीनः।

१५। अनुग्वलं गामी।

खः स्यात्। अनुगु गोः पश्चादलं गामी अनुगवीनो गोपः।

१६। अध्वनो यत्खौ।

अस्माद् यत्खौ स्याताम्। अध्वानमलंगामी अध्वन्यः। अध्वनीनः।

१७। अभ्यमित्राच्छ च।

अस्माच्छः स्यात्। यत्खौ च। अभ्यमित्रमलंगामी अभ्यमित्रीयः। अभ्यमित्र्यः। अभ्यमित्रीणः। अमित्रस्याभिमुखं सुष्ठु गच्छतीत्यर्थः।

१८। गोष्ठात् खञ् भूतपूर्वे।

स्यात्। गोष्ठो भूतः पूर्वं यत्र स गौष्ठीनो देशः।

१९। अश्वस्यैकाहगमः।

अस्मादेकाहगम्ये खञ् स्यात्। आश्वीनोऽध्वा।

---

(22) अत्यन्तीनो भृशं गन्तेत्यर्थः। अनुकामीनो यथेष्टं गन्तेत्यर्थः। अनुकामीनता स्वेच्छागमनम्।

२०। शालीनकौपीने अधृष्टाकार्य्ययोः।

एते द्वे निपात्येते। शालाप्रवेश मर्हति शालीना वधुः। अधृष्टेत्यर्थः। "अशाक शालीनतया न वक्तुम्।" कूपप्रवेशमर्हति कौपीनमकार्य्यम्।

२१। व्रातेन जीवति।

ये शरीर मायास्य जीवन्ति ते व्राता व्याधादयः। तत् कर्मापि व्रातम्। तस्माज्जीवत्यर्थे खञ् स्यात्। व्रातीनो विप्रः। व्रातीनसंघाः प्रकटं नरेन्द्रे स्ते राक्षसाः सङ्कटमाशु नीता इति व्योषः।

२२। साप्तपदीनं सख्यम्।

इदं सख्ये निपात्यते। उपचारात् तद्वति द्रुते: साप्तपदीनः सखापि।

२३। हैयङ्गवीनं संज्ञायाम्।

इदं घृतविशेषस्य संज्ञायां निपात्यते।

२४। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणबजाहचौ।

पील्वादेः पाके कुणप् स्यात्। पीलूनां पाकः पीलुकुणः। कर्कन्धुकुणः। शमीकुणः। करीर। कुवल। वदर। अश्वत्थ। खदिर। कर्णादे मूले जाहच्। कर्णस्य मूलं कर्णजाहम्। "कर्णजाहविलोचना"। अक्षिजाहम्। नख। मुख। केश। पाद। भ्रू। गुल्फ। ओष्ठ। शृङ्ग। आकृतिगणोऽयम्।

२५। पक्षात् तिः।

पक्षान्मूले तिः स्यात्। "चन्द्रलेखेव पक्षती"। "चलत्पक्षतिभिः खगैः"। पक्षतिः प्रतिपत्।

२६। तेन वित्तश्चुञ्चुप्चणपौ।

तेन वित्तार्थे चुञ्चुप्चणपौ स्याताम्। विद्यया वित्तः प्रतीतो विद्याचुञ्चुः। विद्याचणः। "रामोऽपि मायाचणमञ्चचुञ्चुः"।

२७। विनञ्भ्यां नानाञौ नसह।

असहार्थवृत्तिभ्यां विनञ्भ्यां नानाञौ स्याताम्। विना। नाना। स्वार्थे विधिः।

२८ । वेः शालच्छङ्कटचौ ।

वेरिमौ स्याताम् । विशालः । विशङ्कटः । विस्तितार्थः ।

२९ । संप्रोदश्च कटच् ।

एभ्यः कटच् स्यात् । संकटः । प्रकटः । उत्कटः । चकाराद् विकटः । निकटः ।

(क) अलाबूतिलमाषोमाभङ्गाणुभ्यो रजसि । एभ्यः कटच् स्यात् । अलाबूनां रजः अलाबूकटः । तिलकटः । उमाकटः । अणुकटः ।

(ख) गोष्ठादयः स्थानादिषु पशुनामादिभ्यः । गवां स्थानं गोगोष्ठम् । महिषीगोष्ठम् । उष्ट्रगोष्ठम् । अविगोष्ठम् ।

(ग) अवेः संघाते कटच् । अविकटः । तत्संघात इत्यर्थः ।

(घ) विस्तारे पटच् । अविपटः ।

(ङ) द्वित्वे गोयुगच् । गोगोयुगम् । अश्वगोयुगम् ।

(च) षट्त्वे षड्गवच् । हस्तिषड्गवम् । अश्वषड्गवम् ।

(छ) स्नेहने तैलच् । इङ्गुदीतैलम् । तिलतैलम् ।

(ज) भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ । इक्षुशाकटम् । मूलकशाकिनम् ।

३० । अवात् कुटारच्च ।

स्यात् । अवकुटारम् । चकारात् कटच । अवकटम् ।

३१ । नते नासिकायाः संज्ञायां टीटञ् नाटज्भ्रटचः ।

अवात् टीटजादयः स्युर्नासिकाया नमने संज्ञा चेत् । अवटीटः । अवनाटः । अवभ्रटः ।

३२ । नेर्बिडज्बिरीसचौ ।

नेरिमौ स्याताम् । निबिडम् । निबिरीसम् । 'अवनिबिरीसमितम्भारस्येदि ।"

३३ । कुनच् पिटच् चिक चि च ।

नेरिनच् पिटचौ स्यातां तत्सन्नियोगेन चिक चि चेत्येतावादेशौ स्तः । चिक्किनः । चिपिटः ।

(वा) कप्रत्यय चिक् चादेशो वक्तव्यः । चिक्कः ।

गुणशब्दा एते यथाकथञ्चिद्व्युत्पाद्या ज्ञेयाः । अतएवैते चिक्कपिक्कादयः शब्दाः क्रियाविपर्य्यायाः सूत्रकारेणोपेक्षिताः ।

३४ । उपाधिभ्यां त्यकन्नासन्नारूढयोः ।

आभ्यामनयो त्यकन् स्यात् । समुद्रस्यासन्ना भूमिरुपत्यका समुद्रस्य वनराजी । गिरिमधिरूढाऽधित्यका गिरेः । समुद्रोपत्यका हेमी पर्वताधित्यका पुरीति भट्टिः ।

३५ । कर्मणि घटोऽठच् ।

कर्मणि घटते कर्मठः । घटत इति घटः । पचाद्यच् ।

३६ । तदस्य संजातं तारकादिभ्य इतच् ।

अस्मार्थे तारकादेरितच् स्यात् । तारकाः संजाता अस्य तारकितं नभः । पुष्पितो वृक्षः । सुख । दुःख । फल । कुसुम । मुकुल । स्तबक । तन्द्रा । बुभुक्षा । पिपासा । ज्वर । व्रण । रोग । व्याधि । उत्कण्ठा । लज्जा ।

(1) गर्भादप्राणिनि । गर्भिताः शालयः । अप्राणिनि किम् ? गर्भिणी गौः । तदस्येति वर्त्तते यावत् तदस्मिन् (५।२।४५) ।

३७ । प्रमाणे द्वयसज्दघ्नञ्मात्रचः ।

अत्र एते स्युः । ऊरुः प्रमाणं अस्य ऊरुद्वयसम् पयः । जानुद्वयसी नदी । ऊरुदघ्नम् । "गिरिकूटदघ्नैः ।" द्वयसज्दघ्नञावूर्द्ध्वमाने । मात्रच् पुनरविशेषेण । प्रस्थमात्रं हुतम् । तन्मात्रम् । तावन्मात्रम् ।

(वा) प्रमाणे लच । लचेति लुकः पूर्वाचार्य्यसंज्ञा । प्रमाणप्रत्ययेभ्यो द्वयसजादेर्लुक् स्यात् । शमः प्रमाणमस्य शमः । दिष्टिः । वितस्तिः । हस्तः । शमवतुर्थ्याह्लुकः ।

(ख) द्विगोर्नित्यं लुक् । द्विजानु जलम् । द्विवितस्तिः । नित्यग्रहणं भाविनोऽपि संशये मात्रचो लुगर्थम् ।

(ग) डट् स्तोमे । सप्तदशः स्तोमः । विंशः स्तोमः । एकविंशः । डित्त्वाट्टिलोपः ।

(घ) शन्शतोर्डिनिः । पञ्चदश प्रमाणमेषां पञ्चदशिनोऽर्द्धमासाः । त्रिंशिनो मासाः ।

(ङ) विंशतेश्च । विंशिनोऽङ्गिरसः ।

(च) प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रच् । प्रमाणात् । शमं प्रमाणमस्य स्यान्नवेति शममात्रम् । हस्तमात्रम् । परिमाणात् । प्रस्थमात्रम् । संख्यायाः । पञ्चमात्रम् । दशमात्रम् ।

(छ) वत्वन्तात् स्वार्थे द्वयसज्मात्रचौ । तावदेव तावद्द्वयसम् । तावन्मात्रम् ।

३८ । पुरुषहस्तिभ्यामण् च ।

आभ्यां प्रमाणेऽण् स्यात् । पुरुषोऽस्य प्रमाणं पौरुषमम्भः । हास्तिनम् । चकाराद् द्वयसज्दघ्नञ्मात्रच उदाहार्य्याः ।

३९ । यत्तदेतेभ्यः परिमाणे वतुप् ।

एभ्योऽस्यार्थे वतुप् स्यात् । यत् परिमाणमस्य यावान् । तावान् । एतावान् ।

४० । किमिदंभ्यां वो घः ।

आभ्यां परिमाणे वतुप् स्यात् । वस्य च घः । कियान् । कियती । इयान् । इयती ।

४१ । किमः संख्यापरिमाणे डति च ।

किमः संख्यायाः परिच्छेदे डतिः स्यात् । वतुप् च । तस्य वस्य च यादेशः । का संख्या एषां कति गुणिनः । कियन्तः सन्ति गुणिनः ।

४२ । संख्याया अवयवे तयप् ।

अवयववृत्तेः संख्याया स्तयप् स्यात् । पञ्चावयवा अस्य छन्दस्य पञ्चतयम् । दशतयम् । चतुष्टयी रज्जुः ।

४३। द्वित्रिभ्यां तयस्यायज् वा।

आभ्यां तयपोऽयज् वा स्यात्। द्वयं द्वितयं वा (23)। त्रयं त्रितयं वा। द्वयी द्वितयी वा। त्रयी त्रितयी वा।

४४। उभादुदात्तो नित्यम्।

उभात् तयपो नित्यमयच् स्यात्। उभाववयवोऽस्य उभयो मणिः (24)। उभये देवमनुष्याः।

४५। तदस्मिन्नधिकमिति दशान्ताड्डः।

अत्रार्थे दशान्ताड् डः स्यात्। एकादश अधिका अस्मिन् शते एकादशं शतम्। द्वादशं शतम्। चतुर्दशं शतम्। सहस्रं वा। शतसहस्रयोरेवाभिधानम्। इह षष्ठं शतमिति मत्वर्थीयोऽच्।

४६। शदन्तविंशतेश्च।

शदन्ताद् विंशतेश्च पूर्वार्थे डः स्यात्। त्रिंशं शतम्। चत्वारिंशं शतं सहस्रं वा। विंशतेश्च। विंशं शतम्। तदन्ताच्च। एकविंशं शतं सहस्रं वा। द्वाविंशं सहस्रम्। संख्यापूर्वस्याभिधानाद् गोत्रिंशदादेरविधिः।

४७। संख्याया गुणस्य निमाने मयट्।

मयडूकप्रत्यया तदस्येत्येव। गुणस्य भागस्य निमाने मूल्ये संख्याया मयट्

---

(23) तयप्प्रत्ययान्तस्य जसेव प्रथमचरमेत्यादिना (१.१.३३) वा सर्वनामता। नत्वन्यत्र। कथं तर्हि "संपूर्णेन्दुमुखकमलगमनिःश्वसने: श्वसनैः प्रयाति पटहस्य शार्ङ्गिणि। सत्त्वानि निन्ये नितरां महान्त्यपि व्यथा द्वयेषामपि मेदिनीभृता" मिति माघः ? मुनित्रयमतविरोधेऽधुना चान्द्रमर्यादिमतानामपि निरासात् द्वयमन्दस्य सर्वासु विभक्तिषु सर्वनामत्वं वाच्यम्। कविभिरपि नैतदादृतम्। तथाहि कालिदासः—"चाक्षिन् द्वये रूपविधानयत्न" इति। माघश्च "गुरुद्वयाय गुरुणो रुभयोरथ कार्य्ययो" रिति। श्रीहर्षश्च "अपि ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्नतिप्रयोजन" इति। अतो द्वयेषामित्यत्र द्वयं येषामित्यन्वि गच्छन्तीति द्वयेष लेषामितोऽयतेः क्विपि रूपं बोध्यम्। अन्ये च व्यथोभयेषामपीति पठन्ति। एतच्च यदा कर्मणि श्लोकस्य पाठ स्तदा सम्भवति। इदानीन्तु श्लोकस्य कर्त्तर्य्येव पाठ उपलभ्यते यथा संपूर्णेन्दुमुखकमलगमनिःश्वसनः श्वसनः प्रयाति पटहस्य शार्ङ्गिणि। सत्त्वानि निन्ये नितरां महान्त्यपि व्यथां द्वयेषामपि मेदिनीभृतामिति। तत्र क्विपैव समाधेयम्।

(24) उभौ मकारलौ अवयवौ यस्य तुभयः। उभयो मणिः कौस्तुभ इति केचित्।

स्यात् । द्वौ भागौ निमान मस्योदश्विद्भागस्य द्विमयमुदश्वित् यवानाम् । त्रिमयी द्राक्षा गुड़स्य । चतुर्मयम् ।

४८ । तस्य पूरणे डट् ।

षष्ठ्यर्थे संख्याया डट् स्यात् । एकादशानां पूरण एकादशः सर्गः । द्वादशः पुत्रः । विंशी कारिका । एकादशी तिथिः ।

४९ । नान्तादसंख्यादेर्मट् ।

नान्तादसंख्यादे र्डटो मड़ागमः स्यात् । पञ्चानां पूरणः पञ्चमः । सप्तमः । नान्तात् किम् ? विंशः । त्रिंशः । असंख्यादेः किम् ? एकादशः ।

५० । थट् च छन्दसि ।

इदं छन्दःसूत्रमेकम् ।

५१ । षट्कतिकतिपयचतुरां थुक् ।

एषां डटि थुगागमः स्यात् । षषां पूरणः षष्ठः । कतिथः । कतिपयथः । चतुर्थः । कतिथी । कतिपयथी ।

(क) चतुरश्छयतावाद्यक्षरलोपश्च । तुरीयः । तुर्य्यः ।

५२ । बहुपूगगणसंघस्य तिथुक् ।

एषां डटि तिथुगागमः स्यात् । बहूनां पूरणो बहुतिथः । पूगतिथः । गणतिथः । "भिन्दन् संघतिथाम् द्विषः ।" इहच बह्वीनां पूरणीति भस्याढे तद्धिते विषयभूते पुंवद्भावः (६।३।३५, वा) । ततस्तिथुक् । बहुतिथी ।

५३ । वतोरिथुक् ।

वत्वन्ताद् डटि स्यादिथुक् । तावतां पूरण स्तावतिथः । यावतिथः ।

५४ । द्वे स्तीयः ।

द्वे स्तीयः स्यात् । डटो बाधा । द्वितीयः ।

५५ । त्रेः सम्प्रसारणञ्च ।

पूरणे त्रिशब्दात् संप्रसारणं तीयश्च स्यात् । तृतीयः ।

५६। विंशत्यादिभ्य स्तमडन्यतरस्याम्।

विंशत्यादे र्डटो वा तमडागमः स्यात्। विंशतेः पूरणो विंशतितमः। विंशो वा। त्रिंशत्तमो दिवसः। त्रिंशो वा। एकविंशतितमी। एकविंशी वा। एकत्रिंशत्तमम्। एकत्रिंशं वा।

५७। नित्यं शतादिमासार्द्धमाससंवत्सराच्च।

शतादेः संख्याया मासार्द्धमाससंवत्सरेभ्यश्च परस्य डटो नित्यं तमट् स्यात्। शतस्य पूरणः शततमः। सहस्रतमः। लक्षतमः। एकशततमः। द्विसहस्रतमः। षष्ठलक्षतमः। मासस्य पूरणो मासतमो दिवसः। अर्द्धमास-तमः। संवत्सरतमः।

५८। षष्ट्यादेश्चासंख्यादेः।

षष्टिसप्तत्यशीतिनवतीनां डटो नित्यं तमट् स्यात्। विंशत्यादिविकल्पस्य बाधा। षष्टेः पूरणः षष्टितमः। सप्ततितमः। अशीतितमः। नवतितमः। असंख्यादेः किम्? एकषष्टः। एकषष्टितमो वा। उक्तो डट्।

५९। मतौ छः सूक्तसाम्नोः।

मत्वर्थे प्रातिपदिकाच्छः स्यात् सूक्ते साम्नि चाभिधेये। अच्छावाक-शब्दोऽस्मिन्नस्तीत्यच्छावाकीयं सूक्तम्। वारतन्तवीयं साम।

६०। अध्यायानुवाकयोर्लुक्।

अनयोर्मत्वर्थे छस्य लुक् स्यात्। गर्दभाण्डोऽध्यायोऽनुवाको वा गर्द-भाण्डः। श्रुतिमपीच्छन्ति। अन्यतरस्यांग्रहणस्य मण्डूकप्लुत्यानुवृत्तेः। गर्द-भाण्डीयोऽध्यायः।

६१। विमुक्तादिभ्योऽण्।

एभ्यो मत्वर्थे तयोरण् स्यात्। विमुक्तोऽस्यास्ति अध्यायोऽनुवाको वा वैमुक्तः। देवासुरः।

६२ । गोषदादिभ्यो वुन् ।

एभ्यस्तथैव वुन् स्यात् । गोषदशब्दोऽस्मिन्नस्ति गोषदकोऽध्यायोऽनुवाको वा । गोषद । इषेत्व । मातरिश्वन् ।

६३ । तत्र कुशलः पथः ।

सप्तम्यर्थे पथो वुन् स्यात् । पथि कुशलः पथकः ।

६४ । आकर्षादिभ्यः कन् ।

आकर्षे कुशलः आकर्षकः । जयकः । तृसरकः ।

६५ । धनहिरण्यात् कामे ।

आभ्यां कामे कन् स्यात् । धने कामोऽभिलाषो धनकः । हिरण्यकः । "देहेऽपि निःस्पृहस्यास्य मुमुक्षोर्धनकः कुतः" ।

६६ । स्वाङ्गेभ्यः प्रसिते ।

एभ्योऽत्र कन् स्यात् । केशेषु प्रसितः केशकः । नखकः । दन्तकः ।

६७ । उदराट् ठगाद्यूने ।

स्यात् । उदरे प्रसित औदरिक आद्यूनः । आद्यूनोऽविजिगीषुः ।

६८ । सस्येन परिजातः ।

सस्यात् कन् स्यात् । सस्येन गुणेन परिजातः सम्पन्नोऽयं सस्यको मणिः । सस्यकः शालिः । सस्यको वत्सः ।

६९ । अंशं हारी ।

सप्तम्यर्थे कन् स्यात् । अंशको दायादः ।

७० । तन्त्रादचिरापहृते ।

कन् स्यात् । तन्त्रको नवकर्पटः ।

७१ । ब्राह्मणकोष्णिके संज्ञायाम् ।

एते कन्नन्तौ नाम्नि निपात्येते । ब्राह्मणको देशो यत्रायुधजीविनो ब्राह्मणाः । उष्णिका यवागूः ।

७२। शीतोष्णाभ्यां कारिणि।

कन् स्यात्। शीतं शिथिलं कारी शीतकोऽलसः। उष्णं शीघ्रं कारी उष्णको दक्षः।

७३। अधिकम्।

इदं निपात्यते अध्यारूढार्थे। अध्यारूढात् कन् स्यादुत्तरपदलोपश्च।

७४। अनुकाभिकाभीकः कमिता।

अनुकमभिकमभीकश्च कमितरि निपात्यन्ते।

७५। पार्श्वेनान्विच्छति।

पार्श्वमनृजूपायोपलक्षणम्। तेनान्विच्छत्यनुसरतीति (25) कन् स्यात्। पार्श्वकः शठः।

७६। अयःशूलदण्डाजिनाभ्यां ठक्ठञौ।

तेस्यादभ्यार्थाभ्यां ठक्ठञौ स्यातां तेनान्विच्छतीत्यर्थे। आयःशूलिकस्तीक्ष्णकारी। दाण्डाजिनिको दाम्भिकः।

७७। तावतिथं ग्रहणमिति लुग्वा।

तावतां पूरणं तावतिथम्। तस्मात् ग्रहणभूतात् स्वार्थे कन् स्यात्। पूरणप्रत्ययस्य च लुग्वा। द्वितीयेन रूपेण ग्रन्थग्रहणं द्विकं द्वितीयकं वा। त्रिकं तृतीयकं वा। चतुष्कं चतुर्थकं वा।

(क) तावतिथेन गृह्णातीति कन् वक्तव्यो लुक् च नित्यम्। षष्ठेन रूपेण गृह्णाति षट्को मेधावी।

७८। स एषां ग्रामणीः।

अत्रार्थे कन् स्यात्। त्वं ग्रामणीरेषामिमे त्वत्काः। मत्काः। देवदत्तका इमे। मत्कं मतम्।

७९। शृङ्खलमस्य बन्धनं करभे।

शृङ्खलं बन्धनमस्येत्यर्थे कन् स्यात्। शृङ्खलकः करभस्य नाम।

---

(25) अनुसरतीत्यत्र ओषतीति पाठान्तरम्।

८०। उत्क उन्मनाः।

उत्कः स्यादुन्मनाश्चेत्।

८१। कालप्रयोजनाद् रोगे।

आभ्यां रोगे कन् स्यात्। कालात्। दिवसे सम्भवति दिवसको ज्वरः। मासकः। द्वितीयेऽह्नि भवो द्वितीयकः। चतुर्थकः। प्रयुज्यतेऽनेनेति प्रयोजनं कारणम्। विषपुष्पेण प्रयुक्तो विषपुष्पको ज्वरः। काशपुष्पकः। तापेन भाविना प्रयुक्तस्तापकः। शीतकः। फलञ्च प्रयोजनमिति जयादित्यः। शीतं कार्य्यमस्येति शीतको ज्वरः। इह चोत्तरं संज्ञाग्रहणं सम्बध्यते। तेनेष्टार्थपरिग्रहः।

८२। तदस्मिन्नन्नं प्रायेण संज्ञायाम्।

अत्रार्थे नाम्नि कन् स्यात्। गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पूर्णिमा। तिलापूपिका।

(क) वटकेभ्य इनि र्वक्तव्यः। वटकिनी पौर्णमासी। पृथुकिनी।

८३। कुल्माषादञ्।

पूर्वार्थेऽञ् स्यात्। कौल्माषी तिथिः। (26)

८४। श्रोत्रियंश्छन्दोऽधीते।

अयमत्रार्थे निपात्यते। घन् प्रत्ययः। तस्य नकारः स्वरार्थः। श्रोत्रियो ब्राह्मणः।

८५। श्राद्धमनेन भुक्तमिनिठनौ।

श्राद्धमनेन भुक्तमित्यर्थे इनिठनौ स्याताम्। श्राद्धी। श्राद्धिकः।

८६। पूर्वादिनिः।

अनेनेति कर्त्तानुवर्त्तते। स च क्रियापेक्षः। ततो यां काञ्चित् क्रियामध्याहृत्य पूर्वादिनिः स्यात्। पूर्वमनेनासितं अधीतं गतं भुक्तं पीतं वा पूर्वी। पूर्विणौ। पूर्विणः।

---

(26) कुल्माषा मुद्गा इति हरदत्तः।

८७। सपूर्वाच्च।

सपूर्वपदाच्च पूर्वादिनिः स्यात्। कृतं पूर्वमनेनेति सुप्सुपेति समासः। कृतपूर्वी कटान्। भुक्तपूर्वी ओदनम्। भुक्तपूर्वी दध्नीनि।

८८। इष्टादिभ्यश्च।

इनिः स्यात्। इष्टमनेनेति इष्टी यागेषु। अधीती व्याकरणे। निराकृती। अधीती। "कृती श्रुती वृद्धमतेषु धीमान्"।

८९। छन्दसि परिपन्थिपरिपरिणौ पर्य्यवस्थातरि।

छन्दः सूत्रमेकम्।

९०। अनुपद्यन्वेष्टा।

अनुपदी स्यादन्वेष्टा चेत्। "मृगस्यानुपदी रामः।"

९१। साक्षाद् द्रष्टरि संज्ञायाम्।

साक्षाच्छब्दादिनिः स्याद् द्रष्टरि वाच्ये संज्ञा चेत्। साक्षाद् द्रष्टा साक्षी। साक्षिणौ।

९२। क्षेत्रियच् परक्षेत्रे चिकित्स्यः।

परक्षेत्रं जन्मान्तरशरीरम्। तत्र चिकित्स्य इत्यर्थे क्षेत्रियो निपात्यते। क्षेत्रियः कुष्ठव्याधिः। असाध्य इत्यर्थः।

९३। इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा।

इन्द्रियं निपात्यते। इन्द्र आत्मा। तस्य लिङ्गं तेन वा दृष्टं सृष्टमित्याद्यर्थे। संज्ञाशब्दानां व्युत्पत्तेरनियमदर्शनार्थोऽयं योगः।

९४। तदस्यास्त्यस्मिन्निति मतुप्।

तदिति प्रथमान्तादस्त्युपाधिकात् षष्ठीसप्तम्योरर्थे मतुप् स्यात्। गावोऽस्य सन्ति गोमान्। यवा अस्मिन् सन्ति यवमान् देशः। इतिकरणादर्थनियमः।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥१॥

गोमान् । ककुदावर्त्ती । रूपवान् । चीरी वृक्षः । उदरिणी कन्या । दण्डी । छत्री ।

(क) गुणवचनेभ्यो मतुपो लुग् वक्तव्यः । शुक्लोऽस्यास्तीति शुक्लः पटः । यदा तु स्वभावाद् गुणिनि गुणे च शुक्लादयो वर्त्तन्त इत्युपगमस्तदा नार्थो लुका । मत्वर्थे विधानमापादम् ।

९५ । रसादिभ्यश्च ।

रसादेर्मतुबेव स्यात् । नान्ये मत्वर्थीयाः । रसवान् । रूपवान् । गन्ध । शब्द । स्पर्श । स्नेह । भाष्यकारस्य तु सूत्रस्यास्य प्रत्याख्यानमभिमतम् । रसिको राजा । रूपिण्योऽप्सरसः । स्पर्शी वायुरित्यादिदर्शनात् ।

९६ । प्राणिस्थादातो लजन्यतरस्याम् ।

प्राण्यङ्गादादन्तान्मत्वर्थे लज् वा स्यात् । चूडालः । शिरालः । जङ्घालः । विकल्पो मतुप्समुच्चयार्थः । चूडावानिति । प्राणिस्थात् किम् ? शिखावान् प्रदीपः ।

९७ । सिध्मादिभ्यश्च ।

एभ्यो लच् स्यात् । सिध्मलः । गडुलः ।

(1) वातदन्तबलललाटगलानामूङ् च । वातूलः । दन्तूलः । बलूलः ललाटूलः । गलूलः ।

(2) पार्श्विधमन्योर्दीर्घश्च । पार्श्वीलः । धमनीलः ।

(3) जटाघटाकालात् क्षेपे । लच् स्यात् । जटालः । घटालः । कालालः ।

(4) यूकजन्तूपतापाच्च । यूकालः । मूर्च्छालः । विचर्चिकालः । विकल्पानुवृत्त्या सर्वत्र मतुप् समुच्चीयते । सिध्मवानिति ।

९८ । वत्सांसाभ्यां कामबले ।

आभ्यां कामबलयोर्मत्वर्थे लच् स्यात् । वत्सलः कामवान् । अंसलो बलवान् ।

९९ । फेनादिलच ।

फेनादिलच्लचौ स्याताम् । फेनिलः । फेनलः । मतुप् च । फेनवान् ।

१०० । लोमादिपामादिपिच्छादिभ्यः शनेलचः ।

लोमादेर्मत्वर्थे शः स्यात् । लोमशः । लोमवान् । कपिशः । गिरिशः । पामादेर्नः । पामनः पामवान् । श्लेष्मणः । हेमनः । वलिनः ।

(1) लक्ष्म्या अच्च । लक्ष्मणः ।

(2) अङ्गात् कल्याणे । अङ्गना प्रशस्ताङ्गी ।

(क) दद्रुवा ह्रस्वत्वञ्च । दद्रुणः ।

पिच्छादेरिलच् । पिच्छिलः । जटिलः । उरसिलः ।

१०१ । प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ।

मत्वर्थे एभ्यो णः स्यात् । प्राज्ञः प्रज्ञावान् पण्डितः । प्राज्ञा स्त्री । श्राद्धः श्रद्धावान् । आर्चः । अर्चावान् । वार्त्तः । वृत्तिमान् ।

१०२ । तपःसहस्राभ्यां विनीनी ।

आभ्यामेतौ स्याताम् । तपस्वी । सहस्री । असन्तादन्ताच्च विनीनि-सिद्धौ वचनमिदमणा बाधा मा भूदिति ।

१०३ । अण् च ।

आभ्यामण् स्यात् । तापसः । साहस्रः ।

(क) ज्योत्स्नादिभ्य उपसंख्यानम् । अण् स्यात् । ज्यौत्स्नः पक्षः । तामिस्रः । कौण्डिनः ।

१०४ । सिकताशर्कराभ्याञ्च ।

आभ्यामण् स्यात् । सैकतो घटः । शार्करं मधु ।

१०५ । देशे लुबिलचौ च ।

आभ्यां देशे लुप् स्यात् । इलच् । चकारादण् च । सिकता देशः । सिकतिलः । सैकतः । मतुप् च । सिकतावान् । शर्करा । शर्करिलः । शार्करः । शर्करावान् ।

१०६ । दन्त उन्नत उरच् ।

दन्त उन्नतोऽस्यास्तीति दन्तुरः ।

१०७ । ऊषसुषिमुष्कमधो रः ।

एभ्यो मत्वर्थे रः स्यात् । ऊषरः । सुषिरम् । मुष्करः । मधुरः ।

(क) खमुखकुञ्जनगनखपाण्डुपांसुभ्यश्च । खरः । मुखरः । कुञ्जरः । नगरम् । नखरः । पाण्डुरः । पांसुरः पादः । कच्छ्वा ह्रस्वश्चेति जयादित्यः । कच्छुरः ।

१०८ । द्युद्रुभ्यां मः ।

आभ्यां मः स्यात् । द्युमः । द्रुमः ।

१०९ । केशाद्वोऽन्यतरस्याम् ।

केशाद्वो वा स्यात् । केशवः केशी केशिको केशवान् वा ।

(क) अन्येभ्योऽपि दृश्यते इति वक्तव्यम् । वः स्यात् । मणिवः । हिरण्यवः । इष्टकावः । राजीवम् ।

(ख) अर्णसो लोपश्च । अर्णवः ।

(ग) मेधारथाभ्यामिरन्निरचावित्येके । मेधिरः । रथिरः । रथिररथिकौ रथीत्यमरः । (27)

११० । गाण्ड्यजगात् संज्ञायाम् ।

आभ्यां नाम्नि वः स्यात् । गाण्डीवं पार्थस्य धनुः । ह्रस्वादपि गाण्डिवमिति जयादित्यः (28) । अजगवं पिनाकः । अजो विष्णुः । को ब्रह्मा । तद्योगादजकवमित्यन्ये ।

१११ । काण्डाण्डादीरन्नीरचौ ।

आभ्यामिमौ स्याताम् । काण्डीरः । अण्डीरः । स्त्री भेदः ।

११२ । रजःकृष्यासुतिपरिषदो वलच् ।

एभ्यो मत्वर्थे वलच् स्यात् । रजस्वला स्त्री । वले इति (६।३।११८) दीर्घः । कृषीवलः । आसुतीवलः शौण्डिकः । परिषद्वलो राजा । परिपूर्वात् सदेः सत्सूद्विषेत्यादिना (३।२।६१) क्विप् । सदिरप्रतेरिति (८।३।६६) षत्वम् ।

---

(27) रथिर is the owner of a car.

(28) गाण्डीवी कनकशिलानिभं भुजाभ्यामिति अधिरोहति गाण्डिवं महेषावित्युभयत्र भारविप्रयोगः ।

या संप्रति प्राक्परिचयस्थानामिति लोपः। परिचयवान् प्रचारचीरिति भट्टिः। इह तु नवाक्षरैकपादेऽपि वृत्तभेदोऽस्त्यस्तीति यथा प्रधाने कर्मण्यभिधेये लादीनाहुर्द्विकर्मणामिति भाषावृत्तिः (29)। पृषोदरादित्वादिकारलोप एकदेशविकारद्वारेव पर्यवसानादपि वलजिति केशवः।

(क) अन्येभ्योऽपि दृश्यते इति वक्तव्यम्। वलच्। भ्रातृवलः। पुत्रवलः।

११३। दन्तशिखात् संज्ञायाम्।

आभ्यां वलच् स्यात्। दन्तावलो हस्ती। शिखावलो मयूरः।

११४। ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः।

अष्टा एते मत्वर्थे निपात्यन्ते। तमिस्रेति स्त्रीत्वमतन्त्रम्। अन्यत्रापि दृश्यते। तमिस्रं नभः।

११५। अत इनिठनौ।

अदन्तादिनिठनौ स्याताम्। दण्डी दण्डिकः। मतुप् च सर्वत्र। दण्डवान्। तण्डुली तण्डुलिकः। कार्यी कार्यिकः। हार्यी हार्यिकः। क्वचिदनभिधानान्न। स्ववान्। कारकवान्। वृक्षवान्। व्याघ्रवान्। दण्डा यस्यां सन्ति दण्डवती शाला। तदुक्तम्।

"एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ।
तद्धितानां विधाने यदभिधानमपेक्षते ॥१॥" इति।

११६। व्रीह्यादिभ्यश्च।

व्रीह्यादेर्यथाभिधानमिनिठनौ स्याताम्। व्रीही व्रीहिकः। मतुप् च सर्वत्रेत्युक्तम्। व्रीहिमान्। मायी मायिकः। शिखादिभ्य इनिरेव। शिखी। शिखावान्। माली। मालावान्। मेखली। वीची। संज्ञी। मनीषी। पताकी (30)। कर्मी। चर्मी। नावादिभ्यष्ठन्नेव। नाविकः। यवखदिकः। यवखदवान्।

---

(29) Others changed it thus प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।

(30) पातकीति क्वचित् पाठः।

११७ । तुन्दादिभ्य इलच्च ।

एभ्य इलच् स्यात् । तौ च । तुन्दिलः । तुन्दिकः । तुन्दी । तुन्दवान् । उदरिलः । उदरिकः । उदरी । पिचिण्डिलः । एवं पिचिण्ड । यव । व्रीहि ।

(1) व्रीहीत्यर्थग्रहणम् । शालिलः । शालिकः । शाली । मतुप् सर्वत्रेत्युक्तम् ।

(2) स्वाङ्गाद् वृद्धौ च । स्थूलकर्णः कर्णी कर्णिलः कर्णिकः । अवृद्धौ तु कर्णवान् । नह्यत्र ।

११८ । एकगोपूर्वाट्ठञ् नित्यम् ।

एकपूर्वाद् गोपूर्वाच्च नित्यं ठञ् स्यात् । ऐकशतिकः । ऐकसहस्रिकः । गौसहस्रिकः । कथमेकदेशी अवयवी ? इतिकरणानुवृत्तेः । कर्मधारया-देवायं ठञिष्यते । नित्यग्रहणं प्रत्ययान्तरनिवृत्त्यर्थम् ।

११९ । शतसहस्रान्ताच्च निष्कात् ।

नित्यं ठञ् स्यात् । नैष्कशतिकः । नैष्कसहस्रिकः ।

१२० । रूपादाहतप्रशंसयोर्यप् ।

रूपादाहते प्रशंसायाञ्च मत्वर्थे यप् स्यात् । आहतं ताड़नाभिव्यादितम् पुरुषादि। रूपमस्यास्तीति रूप्यो दीनारः । प्रशस्तं रूपमस्यास्ति रूप्यः पुरुषः ।

(क) अन्येभ्योऽपि दृश्यते । यप् । हिममत्रास्ति हिम्याः पर्वताः । पद्यं श्लोकः । गुण्या मुनयः । "अर्थिनं गुण्यगुण्य इति न व्यचारयत् ।"

१२१ । अस्मायामेधास्रजो विनिः ।

एभ्यो विनिः स्यात् । असन्तात् । पयस्वी । यशस्वी । "भवन्ति माया-विदु ये न मायिनः" । मायी । मायिकः । मायाशब्दाद् व्रीह्यादित्वादिनि-ठनौ च । मेधावी । स्रग्वी । तसौ मत्वर्थे (१।४।१९) इत्यत्र पयस्वान् यश-स्वानिति भाष्योदाहरणादेकगोपूर्वाट्ठञ् नित्य (५।२।११८) मित्यतः परेणापि मतुप्समुच्चयोऽनुमीयते । सरस्वान् सरस्वतीत्यत्र विनेरनभिधानम् ।

१२२ । बहुलञ्छन्दसि ।

छन्दः सूत्रम् ।

(क) आमयस्य दीर्घः। विनिश्च स्यात्। आमयावी।

(ख) शृङ्गवृन्दाभ्यामारकन्। आभ्यामारकन् स्यात्। शृङ्गारकः। वृन्दारकः।

(ग) फलबर्हाभ्यामिनच्। फलिनः। बर्हिणः। इनिश्च दृश्यते। फली। बर्ही।

(घ) हृदयादालुरन्यतरस्याम्। हृदयालुः। हृदयी। हृदयिकः। हृदयवान् वा।

(ङ) शीतोष्णतिप्रेभ्यस्तन्न सहते। शीतालुः। उष्णालुः। तिप्रालुः (31)। कुत्सायामभिधानम्।

(च) हिमाच्चेलुः। हिमेलुः।

(छ) बलादूलच्। बलं न सहते बलूलः।

(ज) वातात् समूहे च। वातूलः। वातासहो वातसंघो वा।

(झ) पर्वमरुद्भ्यां तप्। पर्वतः। मरुत्तः।

१२३। ऊर्णाया युस्।

ऊर्णायुर्मेषकम्बलः।

१२४। वाचो ग्मिनिः।

वागस्यास्ति वाग्ग्मी। द्विगकारः।

१२५। आलजाटचौ बहुभाषिणि।

वाच इमौ स्याताम् बहुभाषिणि। वाचालः। वाचाटः। कुत्सायामभिधानम्।

१२६। स्वामिन्नैश्वर्य्ये।

स्वामिन्नैश्वर्य्ये गम्ये स्यात्। स्वमस्यास्तीति स्वामी।

१२७। अर्श आदिभ्योऽच्।

अर्श आदेराकृतिगणात् मत्वर्थेऽच् स्यात्। अर्शसः। उरसः। तुन्दः। काणः। खञ्जः। पलितः। मलिनः। लवणः। स्थूलः। नीलः। अम्लः। गोधूमः।

---

(31) The काशिका gives तृप्र and तृप्रालुः and not तिप्र and तिप्रालुः।

१२८ । द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः ।

एभ्य इनिः स्यात् । ठनादेर्बाधा । द्वन्द्वात् । कटकवलयिनी । शङ्खनूपुरिणी । उपतापो रोगः । कुष्ठी । किलासी । "शूली कदन्नाशनात्" । गर्ह्यं निन्द्यम् । ककुदावर्त्ती । प्राणिस्थात् किम् ? पुष्पफलवांस्तरुः । प्राण्यङ्गान्नेष्यते । पाणिपादवती । स्तनकेशवती । अत इत्येव । चित्रकललाटिकावती । मूर्च्छावान् ।

१२९ । वातातिसाराभ्यां कुक् च ।

आभ्यामिनिः स्यात् कुक् चागमः । वातकी । अतिसारकी ।

(क) पिशाचाच्च । पिशाचकी वैश्रवणः ।

१३० । वयसि पूरणात् ।

वयसि द्योत्ये पूरणान्तादिनिरेव स्यात् । पञ्चमो मासो वर्षं वास्यास्ति पञ्चमी उष्ट्रः । दशमी वृद्धः ।

१३१ । सुखादिभ्यश्च ।

इनिः स्यात् । सुखी । कृच्छ्री । दुःखी ।

१३२ । धर्मशीलवर्णान्ताच्च ।

धर्माद्यन्तादिनिः स्यात् । द्विजधर्मी । भिक्षुशीली । ब्राह्मणवर्णी ।

१३३ । हस्ताज्जातौ ।

हस्तादिनिः स्यात् । हस्ती । जातौ किम् ? हस्तवान् ।

१३४ । वर्णाद् ब्रह्मचारिणि ।

वर्णादिनिः स्याद् ब्रह्मचारी चेत् । वर्णी (32) ।

१३५ । पुष्करादिभ्यो देशे ।

एभ्य इनिः स्यात् । पुष्करिणी । पद्मिनी । उत्पलिनी । देशे किम् ? पुष्करवान् ।

(क) बलाद् बाह्वूरुपूर्वात् । बलाद् बाह्वूरुपूर्वादिनिः स्यात् । बाहुबली । ऊरुबली कश्चित् ।

---

(32) त्रैवर्णिको ब्रह्मचारी वर्णीति परिकीर्त्तित इति स्मृतिः ।

(ख) सर्वादेश। सर्वधनी। सर्वबीजी। सर्वकेशी नटः।

(ग) अर्थाच्चासन्निहिते। अर्थादिनिः स्यात्। असन्निहितोऽर्थो धनमस्यार्थी दरिद्रः। अन्यत्रार्थवान्। भाष्ये त्वेतत्प्रत्याख्यायार्थनमर्थ इति याच्ञावचनात् मत्वर्थीयं कृत्वार्थी अर्थिक इति च साधितम्। एवं च धनवचनादर्थशब्दादिनिर्याच्ञावचनाच्च मतुबनभिधानान्न भवतीति वाच्यम्।

(घ) तदन्ताच्च। धनार्थी। हिरण्यार्थी।

१३६। बलादिभ्यो मतुबन्यतरस्याम्।

एभ्यो मतुब् वा स्यात्। बलवान्। बली। उत्साहवान्। उत्साही।

१३७। संज्ञायां मन्माभ्याम्।

नाम्नि मन्नन्तमान्ताभ्यामिनिः स्यात्। दामिनी। सामिनी। हेमिनी। मान्तात्सोमिनी। नाम्नि किम्? सोमवान्।

१३८। कंशंभ्यां बभयुस्तितुतयसः।

कंशमिति स्वरादी उदककल्याणवचनौ। ताभ्यामेते सप्त प्रत्ययाः स्युः। बः। कंबो मेघः। शंबो वज्रः। भः। कंभः शंभः। युस्: सित्त्वात् पदत्वेऽनुस्वारः। कंयुः। "कुर्वाणा पश्यतः शंयून्।" तिः। कन्तिः। शन्तिः। तुः। कन्तुः। शन्तुः। तः। कन्तः। शन्तः। यस्। कंयः। शंयः।

१३९। तुन्दिवलिवटेर्भः। (33)

एभ्यो मत्वर्थे भः स्यात्। तुन्दिभः। "दधाना वलिभं मध्यम्।" पामादित्वाद् वलिनः। वटिभो हस्ती।

१४०। अहंशुभमोर्युस्।

अहंशुभमित्यहङ्कारकल्याणार्थौ। अव्यये। ताभ्यां मत्वर्थे युस् स्यात्। "अहंयुनाथः क्षितिपः शुभंयुः"। उक्ता मत्वर्थीयाः। अतः परं स्वार्थिकाः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

पञ्चमाध्यायस्य द्वितीयः पादः॥ ५।२॥

समाप्तश्च धान्यपादः।

---

(33) तुण्डिरिति च केषाञ्चित् पाठः। तथाच माधवः "मूर्धन्योपधोऽय"मिति (माधवीयधातुवृत्तौ)

अथ

भाषावृत्तिः।

पञ्चमोऽध्यायः। तृतीयः पादः।

१। प्राग् दिशो विभक्तिः।

दिक्शब्देभ्य (५।३।२७) इत्यतः प्राग् ये तसिलादयस्ते विभक्तिसंज्ञकाः स्युः। प्रयोजनं त्यदाद्यत्वादि (७।२।१०२)। इह समर्थानां प्रथमादिति (४।१।८२) निवृत्तम्। वेति वर्त्तत एव। ततः पक्षे तसिलादयः स्युः कुतः कस्मादिति।

२। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः।

द्व्यादिरहितात् सर्वनाम्नः किंबहुभ्याञ्च तसिलादयो विधेयाः। कुतः। कुत्र। यतो यत्र। बहुशब्दः संख्यार्थो गृह्यते। बहुतो बहुत्र। वैपुल्यार्थात् तु बह्वोः कालात्। अद्व्यादेः किम्? द्वाभ्यां द्वयोः।

३। इदम इश्।

प्राग्दिशीये प्रत्यये इदम इशादिश्यते। इतः। इह।

४। एतेतौ रथोः।

इदम एतेतावादिश्येते क्रमेण रेफथकारयोः परतः। "भवन्तमेतर्हि मनस्विगर्हितम्"। "इत्थं प्रवादं युधि सम्प्रहारम्।"

५। एतदोऽश्।

प्राग्दिशीये प्रत्यय एतदोऽशादिश्यते। अतः। अत्र। योगविभागोऽत्र कर्त्तव्यः। तेन एतर्हि।

६। सर्वस्य सोऽन्यतरस्यां दि।

दाप्रत्यये सर्वस्य सो वा स्यात्। सदा सर्वदा वा।

७। पञ्चम्यास्तसिल्।

स्यात्। कुतः। सर्वतः। बहुतः। विश्वतः। अथ कोऽयं तसिल्? पञ्चम्यन्तात् प्रत्ययः। पञ्चम्यादेशत्वे हि ततस्त्यो यतस्त्य इति सुपो धात्विति (२।४।७१) सुब्लुक् स्यात्। यदा तदेत्यनुदात्तौ सुप्पिताविति (३।१।४) स्वरः। कुत इति घेर्ङितीति (७।३।१११) गुणः। तर्हीति सुपि चेति दीर्घः। कुत्रेत्यत्र घे (७।३।१११) रित्यत्वौ स्याताम्। ततस्तत्रेति त्यात्-त्विनौ स्याताम्। तदुक्तं भाष्ये तसिलादयो विभक्त्यादेशाश्चेत् सुब्लुक्स्वर-गुणदीर्घात्त्वौत्त्वत्यादादिविधिः प्रसज्येतेति।

८। तसेश्च।

तसेश्चेति स्वरार्थं सूत्रम्।

९। पर्य्यभिभ्यां च।

आभ्यां तसिल् स्यात्। परितः। अभितः।

१०। सप्तम्यास्त्रल्।

सप्तम्यन्तात् त्रल् स्यात्। यत्र। तत्र। बहुत्र।

११। इदमो हः।

इदमः सप्तम्यन्ताद्धः स्यात्। इह।

१२। किमोऽत्।

किमः सप्तम्यन्तादत् स्यात्। क्व। त्रलमपि केचिदिच्छन्ति कुत्रेति जयादित्यः।

१३। वा ह च च्छन्दसि।

छन्दः सूत्रम्।

१४। इतराभ्योऽपि दृश्यन्ते।

सर्वाभ्यो विभक्तिभ्यस्तसिलादयो विज्ञेयाः। दृशिग्रहणाद् भवदादियोगेऽ-ऽभिधानम्। सभवान्। ततोभवान्। तत्रभवान्। तंततस्तत्रदीर्घायुषं ब्रवीमि। तेनतत मृतत्रदेवानां प्रियेण ज्ञातमित्यादि।

१५ । सर्वैकान्यकिंयत्तदः काले दा ।

एभ्यः सप्तम्यन्तेभ्यः काले दा स्यात् । सदा सर्वदा । एकदा । अन्यदा । यदा । तदा । कदा । काले किम् ? सर्वत्र देशे । कालसामान्ये चायं दा । तेन कालविशेषे न भवति । यत्र तत्र दिवस इति । काले विधि रा बाल: (५।३।२२) ।

१६ । इदमोर्हिल् ।

सप्तम्यन्तादिदमो र्हिल् स्यात् । एतर्हि काले ।

१७ । अधुना ।

निपात्यते ।

१८ । दानीञ्च ।

सप्तम्यन्तादिदमो दानीञ्च स्यात् । इदानीम् ।

१९ । तदो दा च ।

तदो दा स्यात् । दानीञ्च । तस्मिन् काले तदा । तदानीम् ।

२० । तयोर्दार्हिलौ च च्छन्दसि ।

छन्दः सूत्रमेतत् ।

२१ । अनद्यतने र्हिलन्यतरस्याम् ।

अनद्यतने काले किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यो र्हिल् स्याद् वा । कर्हि कदा वा । यर्हि यदा वा । तर्हि तदा वा ।

२२ । सद्यःपरुत्परार्य्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ।

चतुर्दशैतेऽहनि वर्षे च निपात्यन्ते । समानेऽहनि सद्यः । पूर्वस्मिन् संवत्सरे परुत् । पूर्वतरे वर्षे परारि । अस्मिन् वर्षे ऐषमः । परस्मिन्नहनि परेद्यवि । अस्मिन्नहनि अद्य । पूर्वस्मिन्नहनि पूर्वेद्यु रित्यादि ।

(क) द्युश्चोभयात् । उभयेद्युः । उभयद्युः ।

२३ । प्रकारवचने थाल् ।

प्राग्दिशो विभक्तिभ्यः स्थाल् स्यात्। तेन प्रकारेण तथा। यथा। सर्वथा।

२४ । इदमस्थमुः ।

२५ । किमश्च ।

इदंकिमोः प्रकारे थमुः स्यात्। इत्थम्। कथम्। उक्ताः किंसर्वनामबहुभ्यः प्रत्ययविभक्तय: (34)। अतः परं स्वार्थिकाः।

२६ । था हेतौ च च्छन्दसि ।

छन्दः सूत्रम्।

२७ । दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।

दिग्वाचिभ्यः सप्तम्याद्यन्तेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिः स्यात्। पूर्वस्य दिशि देशे काले वोषितः पुरस्तादुषितः। पञ्चम्यन्तात्। पुरस्तादागतः। प्रथमान्तात्। पुरस्ताद् रम्या दिक्। अधस्ताद् रम्यो देशः। धाप्रत्ययं (५।३।४२) यावदस्तातिविषये विधिः।

२८। दक्षिणोत्तराभ्यामतसुच् ।

आभ्यामतसुच् स्यात्। दक्षिणतः। उत्तरतः।

२९। विभाषा परावराभ्याम् ।

आभ्यामतसुज् वा स्यात्। परतः परस्तात्। अवरतः। अवरस्तात्।

३०। अञ्चेर्लुक् ।

अञ्चत्यन्ताद् दिक्शब्दादस्ताते र्लुक् स्यात्। लुक् तद्धितलुकीति (१।२।४९) ङीपो लुक्। प्राग् वसति प्रागागतः। प्रागमणीयम्। एवं प्रत्यक्।

३१। उपर्युपरिष्टात् ।

ऊर्ध्वशब्दे एतौ निपात्येते अस्तात्यर्थे।

---

(34) प्रत्ययविभक्तय इत्यत्र विभक्तय इति पाठान्तरम्।

३२। पश्चात्।

अपरशब्दस्यातिप्रत्यये परे पश्चभावो निपात्यते। पश्चाद् वसत्यागतो-रमणीयं वा।

(1) दिक्पूर्वपदस्य च। दक्षिणपश्चात्। उत्तरपश्चात्।

(2) अर्धे च। पश्चभावो वक्तव्यः। पश्चार्धः। दक्षिणपश्चार्धः।

३३। पश्च पश्चा च च्छन्दसि।

छन्दः सूत्रम्।

३४। उत्तराधरदक्षिणादातिः।

एभ्य आति स्यात्। उत्तरात्। अधरात्। दक्षिणात्।

३५। एनबन्यतरस्यामदूरेऽपञ्चम्याः।

दिक्शब्दादेनब् वा स्याददूरश्चेदवधिमान्। अदूरे गम्ये इत्यर्थः। उत्तरेण उत्तराद्वा। दक्षिणेन दक्षिणाद् वा वसति रमणीयं वा। अदूरे किम्? उत्तरतो हिमवान्। अपञ्चम्याः किम्? ग्रामस्य दक्षिणतः पर्वतादागतः। अपञ्चम्या इत्यधिकारोऽयं प्रागसिप्रत्ययात् (५।३।३८)।

३६। दक्षिणादाच्।

दक्षिणाददूरे स्यादाच्। दक्षिणा वसति रम्यं वा।

३७। आहि च दूरे।

दूरे गम्ये दक्षिणादाहि च स्यात्। चकारादाच्। दक्षिणाहि दक्षिणा।

३८। उत्तराच्च।

उत्तरादाजाही स्याताम्। उत्तरा उत्तराहि वसति रम्यं वा।

"उत्तरा हि वसन् रामः समुद्राद् रक्षसां पुरीम्।
अवेक्षतचतोयस्य स्थितां दक्षिणतः कथम्॥"

अपञ्चम्या इति निवृत्तम्।

३९। पूर्वाधरावराणामसि पुरधवश्चैषाम्।

पुर् अध् अव् आदेशा एषामसिच स्यात्। पुरः अधः अवः वसत्यागतो रम्यं वा।

४०। अस्ताति च।

अस्तातौ च पूर्वादीनां पुरादयः स्युः। पुरस्तात्। अधस्तात्। अवस्तात्। कथं पुरत स्तर्हि ? निपातनमेतद्। (35)

४१। विभाषाऽवरस्य।

अवरस्यावादेशोऽस्तातौ स्याद्वा। अवरस्तात् अवस्ताद्वा वसत्यागतो रम्यं वा। उक्ता अतसुजर्था येयोगे षष्ठी भवेत्। एनपा द्वितीया। अञ्चूत्तर-पदाजाहिभिस्तु पञ्चमी भवेत्।

४२। संख्याया विधार्थे धा।

क्रियाप्रकारवृत्तेः संख्याया धा स्यात्। जातीयरोऽपवादः। पञ्चधा भुङ्क्ते। सप्तधा। विंशतिधा। एकधा। द्विधा। षोढा। कथमेकजातीयः ? द्रव्ये गुणे वा प्रकारवति भविष्यति।

४३। अधिकरणविचाले च।

द्रव्यविचालने च (36) संख्याया धा स्यात्। एकं द्विधा कुरु। पञ्चधा। षोढा। अनेकमेकधा कुरु।

४४। एकाद्धो ध्यमुञन्यतरस्याम्।

एकाद्धास्थाने ध्यमुञ् स्याद्वा। एकधा ऐकध्यं वा भुङ्क्ते।

---

(35) अत्र भट्टोजि :—"अथ कथं पश्यामि तावत इतः पुरतश्च पश्चादिति भवभूतिः ? नीरन्ध्रतरुरिव विलसति पुरत इति कश्चित्। स्यात् पुरः पुरतोऽग्रत इत्यमरः। पुरतः प्रथमे चाग्रे इति विश्वः ? चिन्त्यमेतदिति भाषावृत्तिः।"—इति मनोरमायाम् (P. 508). इयञ्च तेऽन्या पुरतो विडम्बनेति कालिदासश्च ? In fact पुरतः is a निपात। what is derived from पूर्व is पुरः वा पुरस्तात्। ज्ञानेन्द्र objects in his तत्त्वबोधिनी to the प्रामाणिकता of this word and पण्डितराज जगन्नाथ is furious against it, in his रसगङ्गाधर (2nd chap)। But 'इयन्त इति संख्यानं निपातानां न वर्तते। प्रयोजनवशादिति निपात्यन्ते पदे पदे ॥१॥" अत्र नागेश :—"अत्रं तु दक्षिणोत्तराभ्यामतसुजित्यत्र (५।३।२८) तसुचैव पुंवद्भावे सिद्धेऽतसुज्विधानमन्यत्रापीति ज्ञापनाय। तेन पश्चाच्चरणात् पुरस्तादिदिटसिद्धिः। वस्तुतस्तु पुर अग्रगमन इति चौरादिकात् क्विप्रभावे इगुपधलक्षणे के सार्वविभक्तिकस्तसिरिति बोध्यम्।" इति

(36) विचालः परिवर्तनम्। संख्यान्तरापादनमिति यावत्। एकस्यानेकीकरणमनेकस्य चैकीकरणं निष्कर्षः।

४५ । द्वित्र्योश्च धमुञ् ।

४६ । एधाच्च ।

द्वित्रिभ्यां धो धमुञ् स्याद्वा । एधाच्च । द्विधा द्वैधं द्वेधा वा । त्रिधा त्रैधं त्रेधा वा ।

(क) धमुञन्तात् स्वार्थे डः । "मते द्वैधानि संश्रय्य ।" त्रैधानि । तसिलादिरिधाजन्तोऽव्ययम् ।

४७ । याप्ये पाशप् ।

याप्यार्थात् पाशप् स्यात् । हीनो याज्ञिको याज्ञिकपाशः । याज्ञिक-पाशः ।

४८ । पूरणाद्भागे तीयादन् ।

४९ । प्रागेकादशभ्योऽच्छन्दसि ।

छान्दसे सूत्रे । भागेऽन् ।

५० । षष्ठाष्टमाभ्यां ञ च ।

आभ्यां भागेऽन् स्यात् । ञश्च । षष्ठो भागः षाष्ठो वा । अष्टमः आष्टमो वा भागः । ञकारेति नित् स्वरार्थ एव प्रसङ्गाभिधानः ।

५१ । मानपश्वङ्गयोः कन्लुकौ च ।

माने भागे षष्ठात् कन् स्यात् । षष्ठकः । पश्वङ्गभागेऽष्टमादनो ञस्य च वा लुक् । अष्टमः । चकाराञ् आनौ च बोधव्यौ । षष्ठः । षाष्ठः । अष्टमः । आष्टमः ।

५२ । एकादाकिनिच्चासहाये ।

असहायार्थादेकादाकिनिच् स्यात् । कन्लुकौ च । एकाकी । एकः । एककः ।

५३ । भूतपूर्वे चरट् ।

स्यात् । आढ्यो भूतः पूर्वमाढ्यचरः । कुमारचरी द्रष्टा ।

५४। षष्ठ्या रूप्य च।

षष्ठ्यन्ताद्रूप्यः स्यात्। चकाराच्चरट् च। ब्राह्मणस्य भूतः पूर्वं ब्राह्मणरूप्यो ग्रामः। ब्राह्मणचरः।

५५। अतिशायने तमबिष्ठनौ।

अतिशायनमतिप्रकर्षवन्तं करोति गुणिनमित्यतिशायनो गुणप्रकर्षः। तद्युक्तात् स्वार्थे तमबिष्ठनौ स्याताम्। अयमेषां शुक्लः शुक्लतमः शुक्रः। अयमेषां पटुः पटुतमः। पटिष्ठः। लघिष्ठः।

५६। तिङश्च।

सातिशायनात् तिङन्तात् तमप् स्यात्। सर्वे पचन्ति। अयं पचतितमाम्। जल्पतितमाम्।

५७। द्विवचनविभज्योपपदे तरबीयसुनौ।

द्वयोर्वचनं द्विवचनम्। तत्रोपपदे सातिशायनात् तिङश्च तरबीयसुनौ स्याताम्। अयमनयोराढ्यतरः। आढ्यीयान्। पटुतरः। पटीयान्। पचतितराम्। विभज्यो विभक्तव्यः। तदुपपदाच्च। पाश्चात्त्या गौड़ेभ्य आढ्यतराः। पटुतराः। पटीयांसः।

५८। अजादी गुणवचनादेव।

इष्ठन्नीयसुनौ गुणवचनादेव स्याताम्। पटिष्ठः पटीयान्। गुणवचनात् किम्? पाचकतरः। पाचकतमः। पचतितराम्। पचतितमाम्।

५९। तुश्छन्दसि।

छन्दः सूत्रम्।

६०। प्रशस्यस्य श्रः।

६१। ज्य च।

प्रशस्यशब्दस्य श्रादेशो ज्यादेशश्च स्यादजाद्योः परतः। श्रेष्ठः। श्रेयान्। ज्येष्ठः। ज्यायान्। ज्यादादीयसः (६।४।१६०) इत्यात्त्वम्। इह भाषायां

द्वितीयः प्रकर्षप्रत्ययो नेष्यते। तेन श्रेष्ठतरो ज्येष्ठतम इति न भवतीत्येके। भवतीति जयादित्यः। तेन युधिष्ठिरः श्रेष्ठतमः कुरूणामिति।

६२। वृद्धस्य च।

प्रशस्यवृद्धयोर्वृद्धस्य च ज्यः स्यात्। अयमेषां ज्येष्ठः। अयमनयोर्ज्यायान्। प्रियस्थिरेति (६।४।१५७) वचनाद् वर्षभावश्च। वर्षिष्ठः। वर्षीयान्।

६३। अन्तिकबाढयोर्नेदसाधौ।

अनयोरिमौ स्यातामिष्ठेयसोः परतः। नेदिष्ठम्। अन्तिकतमम्। नेदीयः। अन्तिकतरम्। अयमेषां बाढमधीते साधिष्ठमधीते। "साधीयो गुरुरभवद् भुजस्तरुण्याः।" बाढं भृशं नित्यं क्रियाविशेषणमिति प्रत्ययान्तोऽपि तथा स्यात्।

६४। युवाल्पयोः कनन्यतरस्याम्।

अनयोः कनादेशो वा स्यादिष्ठेयसोः परतः। अयमेषां कनिष्ठः। अयमनयोः कनीयान्। अतियुवाऽत्यल्पो वा। पक्षे यविष्ठः। यवीयान्। अल्पिष्ठः। अल्पीयान्।

६५। विन्मतोर्लुक्।

विनेर्मतुपश्च लुक् स्यादिष्ठेयसोः परतः। इमे स्रग्विणः। अयमेषां स्रजिष्ठः। अयमनयोः स्रजीयान्। एवमोजिष्ठः। ओजीयान्। इमे त्वग्वन्तः। अयमेषां त्वचिष्ठः। त्वचीयान्। एवं धर्मिष्ठः। धर्मीयान्। पापिष्ठः। पापीयान्। सर्वत्रागुणवाचिभ्योऽस्मादेव वचनादिष्ठेयसुनौ।

६६। प्रशंसायां रूपप्।

स्यात्। प्रशस्तश्छात्रश्छात्ररूपः। याज्ञिकरूपः। तिङश्चेत्येव (५।३।५६)। पचतिरूपम्। पचन्तिरूपम्। क्लीवत्वं लोकाश्रयत्वात्।

६७। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः।

ईषदसमाप्त्यर्थात् कल्पब्देश्यदेशीयरः स्युः। ईषदसमाप्तो भिक्षुर्भिक्षुकल्पः। पण्डितदेश्यः। बोधिसत्त्वदेशीयः। इन्द्रदेशीयो राजा। अष्टादश-

वर्षदेशीया कन्या । तिङश्च । पचतिकल्पम् । दीयतेकल्पम् । पचतिदेश्यम् । पचतिदेशीयम् । स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति गुड़कल्पा द्राक्षा । पयस्कल्पा यवागूः । पयस्कल्पं घृतम् । पयद्देशीयं घृतम् ।

६८ । विभाषा सुपो बहुच् पुरस्तात् तु ।

ईषदसमाप्त्यर्थात् सुबन्ताद् बहुच् प्रत्ययः पूर्वं वा स्यात् । बहुगुड़ा द्राक्षा । गुड़कल्पा । "लघुर्बहुतृणं नरः ।" तृणदेश्यः । सुपः किम् ? तिङो मा भूत् ।

६९ । प्रकारवचने जातीयर् ।

स्यात् । पटुप्रकारः पटुजातीयः । तज्जातीयः । तथाजातीयः । प्रकारमात्रे थालुक्तः । प्रकारवति तु जातीयरित्यनयोर्भेदः ।

७० । प्रागिवात् कः ।

इवे प्रतिकृतावित्यतः (५।३।९६) प्राक् कप्रत्ययो वाच्यः । तिङन्तादयं नेष्यते । अकजिष्यत एव ।

७१ । अव्ययसर्वनाम्नामकच् प्राक् टेः ।

७२ । कस्य च दः ।

अव्ययसर्वनाम्नां टेः प्रागकज् वाच्यः प्रागिवार्थे । यथासम्भवमल्पोऽन्त्यस्येति (१।१।५२) अव्ययककारस्य च दकारः । इह च सुबन्तस्य प्राक् टेरकजनोकारसकारभकारादाविति भाष्यम् । उच्चकैः । नीचकैः । धिक् धकित् । हिरुक् हिरकुत् । पृथकत् । सर्वके । विश्वके । त्वयका । मयका । त्वयकि । मयकि । अनोकारसकारभकारादावित्युक्तेरिह प्रातिपदिकस्य प्राक् टेरकच् । युवकयोः । आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिरस्मकाभिरिति । इह तिङश्चेति (५।३।५६) स्मर्यते । कुत्सितं जल्पति जल्पतकि । पचतकि । इह तु वचेर्लङि अवक् । अवकाक् । अनेनेक् । अनेनकेक् । कस्य च द इतीह नास्ति । ककारस्यासिद्धत्वात् ।

(क) तूष्णीमः कामः ।

मकारो देशविध्यर्थः । "तूष्णीकामासते विप्राः" ।

(ख) मौले को मष्टोपच ।

तूष्णीं मौनसूष्णीकः । (37)

७३ । अज्ञाते ।

अज्ञातविशेषत्वात् काकचौ स्याताम् । न ज्ञायते कस्यायमश्वः किंस्वभावो वाऽश्वकः । नवकः । अज्ञात उच्चैरीदृशस्तादृशो वा उच्चकैः । अज्ञातासौ कस्य कीदृशी वाऽसकौ । "पिबति च पाति च याऽसकौ रहस्याम्" । एवं सर्वके । विश्वके । पचतकि । कस्य च द इति (५।३।७२) । पृथकात् ।

७४ । कुत्सिते ।

अत्रार्थे काकचौ स्याताम् । कुत्सितोऽश्वोऽश्वकः । उच्चकैः । सर्वके । पचतकि । धिरकुत् ।

७५ । संज्ञायां कन् ।

कुत्सितोपाधिके नाम्नि कन् स्यात् । शूद्रकः । धारकः । पूर्णकः । व्याधकः ।

७६ । अनुकम्पायाम् ।

अत्र काकचौ स्याताम् । पुत्रकः । दुर्बलकः । पातकि । स्वपितकि । पचतकि । यातकि ।

७७ । नीतौ च तद्युक्तात् । (38)

नीतिगतावनुकम्पायुक्तात् काकचौ स्याताम् । हन्त ते धानकम् । हन्त तेऽश्वकः ।

७८ । बह्वचो मनुष्यनाम्नष्ठज् वा ।

७९ । घनिलचौ च ।

८० । प्राचामुपादेरडजुचौ च ।

अनुकम्पायां बह्वचो नाम्नष्ठज् वा स्यात् । अनुकम्पितो देवदत्तः देविकः

(37) तथाच भागवते श्लोकः—"कुर्वन्तोऽपि हि तूष्णीका राजन् मष्टोरचेतसः । वदन्तो मौनवन्तोऽपि न कुर्वन्ति च केचन ॥" इति सुविचारदृतः ।

(38) सामदानादिरुपायो नीतिः । सामदानभेददण्डा इत्युपायचतुष्टय मितमरः ।

देवदत्तिकः । पक्षे कः । देवदत्तकः । अजिनन्तो च । देवियः । देविलः । यज्ञिकः । उपादेस्तु कृताकः प्रागामङ्गलवुधो च । अनुकम्पित उपेन्द्रदत्तः । उपडः । उपकः । चकाराद् यथाप्राप्तञ्च । उपियः । उपिलः । उपिकः । उपेन्द्रदत्तकः । बह्वचः किम् ? दत्तकः । गुप्तकः ।

८१ । जातिनाम्नः कन् ।

अनुकम्पायां कन् स्यात् । व्याघ्रकः । सिंहकः कश्चित् ।

८२ । अजिनान्तस्योत्तरपदलोपश्च ।

अजिनान्तात् मनुष्यनाम्नोऽनुकम्पायां कन् स्यादुत्तरपदलोपश्च । व्याघ्राजिनो नामानुकम्पितः व्याघ्रकः । कृष्णकः ।

८३ । ठाजादावूर्ध्वं द्वितीयादचः ।

लोपइत्येव । ठकारेऽजादौ च परे द्वितीयादच उपरिभागस्य लोपः स्यात् । ठग्रहणं ठावस्थायां लोप उगन्तात् कादेशार्थम् (७।३।५१) । वायुदत्तकः । वायुकः । पितृकः । देविकः । देवियः । देविलः । इह देविकादीनां शब्दान्तराणामेव लोपधारिणान्वाख्यानम् । तत्र निदर्शनमेतद् द्वितीयादच इति । चतुर्थादपि भवति । बृहस्पतिदत्तकः । बृहस्पतिकः । अनजादौ च वा । देवदत्तको देवकः । पूर्व्वपदस्य च लोपः । दत्तकः । दत्तिकः । दत्तियः । अप्रत्ययेऽपि पूर्व्वोत्तरयोर्लोपो वाच्यः । देवदत्तो दत्तो देवो वेति । उवर्णान्तादिलचो लकारादेशश्च । वायुदत्तको वायुलः । भानुदत्तको भानुलः । तदुक्तम्—

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णान्न इलस्य च ॥१॥ इति (५।३।८३, वा) ।

सन्ध्यक्षरद्वितीयत्वे तदादे र्लोपवचनम् । उपेन्द्रदत्तकः । उपडः । उपकः । एकाच्पूर्वपदानामुत्तरपदलोपश्च । वागाशीर्वाचिकः । त्वगाशी त्वचिकः । द्वितीयादचः परलोपे हि यस्येति चेति (६।४।१४८) लोपस्य स्थानिवत्त्वाद् भत्वाभावेऽन्तर्वर्त्तिविभक्त्याश्रये पदत्वे च चोः कुः (८।२।३०) स्यात् । चतुष्ठाजादिलोपवचनम् । चकारस्तु ठाजादि-(५।३।८३) सूत्रेण द्वितीयादच एव लोपवचनम् । ततः पदत्वे जश्त्वम् । षडङ्गुलिदत्तः षडिकः ।

८४ । शेवलसुपरिविशालवरुणार्य्यमादीनां तृतीयात् ।

एषां तृतीयादच ऊर्द्धस्य लोपः स्यात् । अनुकम्पितः शेवलदत्तः शेवलिलः शेवलियः शेवलिकः । शेवलेन्द्रदत्तः शेवलिलः शेवलियः शेवलिकः ।

८५ । अल्पे ।

अल्पार्थे काकचौ स्याताम् । अल्पं घृतं घृतकम् । उच्चकैः । विश्वकेः । पचतकि ।

८६ । ह्रस्वे ।

अतार्थे काकचौ स्याताम् । ह्रस्वो दण्डो दण्डकः । स्तम्भकः ।

८७ । संज्ञायां कन् ।

ह्रस्वे नाम्नि कन् स्यात् । वेणुकः । वंशकः ।

८८ । कुटीशमीशुण्डाभ्यो रः ।

आभ्यो रः स्यात् । ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः करभस्य नाम । कुटी मृतशरीर मित्येके ।

८९ । कुत्वा डुपच् ।

ह्रस्वा कुतूः कुतुपः ।

९० । कासूगोणीभ्यां ष्टरच् ।

ह्रस्वा कासूः कासूतरी । गोणीतरी । षित्त्वान् ङीष् । कासूरस्त्रभेदः ।

९१ । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ।

एभ्योऽत्र ष्टरच् स्यात् । तनुर्वत्सो वत्सत्वेनासम्पूर्णो वत्सतरः । द्वितीयवयाः । उक्षतरः । तृतीयवयाः । "प्रतिवत्सं गोक्षतरः प्रतीच्छति ।" अश्वतरी खरजाता । ऋषभतरो मन्दः । इह शब्दप्रकृतिनिमित्तस्य तनुत्व मिष्टम् । यत्तु कार्श्येन तनु स्ततो न प्रत्ययः । तदुक्तं भाष्ये वत्सादिभ्यः कार्श्ये प्रतिषेध इति ।

९२ । किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ।

गुणक्रियासंज्ञाभिर्द्वयोरेकस्य निर्धारणे किंयत्तद्भ्यो डतरच् स्यात् ।

कतरो भवतोः पटुः। यतरः पटु स्ततर आयातु। एवं कतरकेण:। कतरः कारक इति।

९३। वा बहूनां जातिपरिप्रश्ने डतमच्।

बहूनामेकस्य निर्धारणे किमादे र्डतमच् स्यात्। कतमो भवतां कठः। यतमः। ततमः। वावचनमकजर्थम्। यकः। सकः। महाविभाषया वाक्यञ्च। को भवतां कठः। जातिपरिप्रश्ने किम्? को भवतां देवदत्तः।

९४। एकाच्च प्राचाम्।

एकात् तौ स्याताम्। एकतरो भवतो यातु। एकतमो भवतां शृणोतु। प्राचां ग्रहणं पूजार्थम्। वृत्तेर्विकल्पस्य महाविभाषया सिद्धेः।

९५। अवक्षेपणे कन्।

अत्र कन् स्यात्। व्याकरणकेनायं गर्वितः। गर्वोऽत्रावक्षिप्यत इत्यागमः। प्रागिवीयाः पूर्णाः।

९६। इवे प्रतिकृतौ।

इवार्थः सादृश्यम्। तद्विशेषणं प्रतिकृतिः। प्रतिकृतिलक्षणे इवार्थे कन् स्यात्। अश्वप्रतिकृतिरश्वकः। गर्दभकः। प्रतिकृतौ किम्? गौरिव गवयः। इवार्थे विधिः प्राक् पूगाञ् ञ्यात् (५।३।११२)। प्रतिकृतौ विधिः प्राग् वतेष्ठञः (५।१।१०१)।

९७। संज्ञायाञ्च।

९८। लुम् मनुष्ये।

९९। जीविकार्थे चापण्ये।

इवार्थे नाम्नि कन् स्यात्। अश्वकः। मनुष्ये वाच्ये कनो लुप्। चञ्चेव नरः। चञ्चा वध्रिका। जीविकार्थे कनो लुप्। जीविकार्थं ग्रामादिष्वादित्यादिप्रतिकृतिं गृहीत्वा भ्रमति स उच्यते आदित्यः। स्कन्दः। वासुदेवः। अपण्ये किम्? वासुदेवकान् विक्रीणीते।

१०० । देवपथादिभ्यश्च ।

कनो लुप् स्यात् । देवपथः । हंसपथः । काश्यपप्रतिकृतिः काश्यपः । आकृतिगणोऽयम् । उक्तः प्रत्ययः प्रतिकृतौ ।

१०१ । वस्तेर्ढञ् ।

इवार्थे वस्तेर्ढञ् स्यात् । वस्तिरिव वास्तेयः । वास्तेयी वियोगिनी ।

१०२ । शिलाया ढः ।

स्यात् । शिलेयं शिलेवास्याः शरीरम् । ढञपीत्येके । शैलेयं दधि ।

१०३ । शाखादिभ्यो यत् ।

शाखेव शाख्यः । मुख्यः । जघन्यः ।

१०४ । द्रव्यञ्च भव्ये ।

द्रुरिव सर्वाश्रयत्वाद् यति द्रव्यं निपात्यते भव्यश्चेत् । "द्रव्यमेव खलु सर्ववल्लभम्" ।

१०५ । कुशाग्राच्छः ।

कुशाग्रमिव कुशाग्रीया बुद्धिः ।

१०६ । समासाच्च तद्विषयात् ।

इवार्थविषयात् समासादपरस्मिन्निवार्थे छः स्यात् । काकतालीयम् । अजाकृपाणीयम् । अत्र भाष्यं—"द्वाविमाविवार्थौ । काकगमनमिव तालपतनमिव देवदत्तस्य दस्युसमागमः । काकतालम् । निपातनात् समासः । ततस्तालेन काकस्य वध इव देवदत्तस्य वधो दस्युभिः काकतालीयमिति ।"

१०७ । शर्करादिभ्योऽण् ।

शर्करेव शार्करम् । कापालम् ।

१०८ । अङ्गुल्यादिभ्यष्ठक् ।

अङ्गुलीवाङ्गुलिकः । भारुजिकः । भरुजो निःशाखवृक्षः ।

१०९। एकशालाया ठजन्यतरस्याम्।

अस्मात् ठज् वा स्यात्। एकशालेव एकशालिकः। पक्षे कन् एकशालकः। ठगित्यन्ये। ऐकशालिकः।

११०। कर्कलोहितादीकक्।

कर्क इव कार्कीको गौः। लौहितीकः स्फाटिकः।

१११। प्रत्नपूर्वविश्वेमात् थाल् छन्दसि।

छन्दः सूत्रम्। उक्ता इवार्थे प्रत्ययाः।

११२। पूगाञ् ञ्योऽग्रामणीपूर्वात्।

पूगः सङ्घविशेषः (39)। तद्वाचिभ्यः स्वार्थे ञ्यः स्यात्। लौहध्वज्यः। लौहध्वज्यौ। लोहध्वजाः। शैब्यः। शैब्यौ। शिबयः। अग्रामणीपूर्वात् किम्? स एषां ग्रामणीर्देवदत्तकाः।

११३। व्रातच्फञोरस्त्रियाम्।

व्रातवाचिनश्च्फञन्ताच्च स्वार्थे ञ्यः स्यात्। व्रैहिमत्यः। कौञ्जायन्यः। अस्त्रियां किम्? व्रीहिमती। कौञ्जायनी। जातेरिति (४।१।६३) ङीष्।

११४। आयुधजीविसंघाञ् ञ्यड् वाहीकेष्वब्राह्मण-राजन्यात्।

वाहीकेष्वायुधजीविनां संघाञ् ञ्यट् स्यात्। कौण्डीबृस्यः। क्षौद्रक्यः। क्षौद्रकी स्त्री। वाहीकेषु किम्? शबरः। अब्राह्मणराजन्यात् किम्? गोपालवा ब्राह्मणाः। शालङ्कायना राजन्याः।

११५। वृकाट् टेण्यण्।

वृकात् तथैव टेण्यण् स्यात्। वार्केण्यः। वार्केणी।

---

(39) वृत्तिर्न नियता येषां जातिश्च नात् पृथक् पृथक्। अर्थकामप्रधानास्ते संघाः पूग इति स्मृताः॥

११६। दामन्यादित्रिगर्त्तषष्ठाच्छः।

एभ्यश्छः स्यात्। दामनीयः। औलपीयः। त्रिगर्त्तवर्गः (40) षष्ठो येषामायुधजीविनां ते तथा। तेभ्यः। कौण्डोपरथीयः।

११७। पर्श्वादियौधेयादिभ्यामणञौ।

पर्शूप्रभृतेः शस्त्रजीविसंघादण् स्यात्। पार्शवः। आसुरः। यौधेयादेरञ्। यौधेयः। शौभ्रेयः। पर्शूरिति दीर्घान्तो व्याजित्यागमः।

११८। अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्।

आयुधजीविसंघादिति निवृत्तम्। अभिजिदादिभ्यो गोत्राणन्तेभ्यः स्वार्थे यञ् स्यात्। अभिजितोऽपत्यं पुमान् आभिजितः। ततो यञ्। आभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः। नेह। आभिजितः स्थालीपाकः।

११९। ञ्यादयस्तद्राजाः।

उक्ता ञ्यादयस्तद्राजा उच्यन्ते। ततो बहुषु लुक् (२।४।६२)। लोहध्वजाः। कौष्ठायनाः। क्षुद्रकाः। दामनयः। पर्शवः। आभिजिताः। हकाः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
पञ्चमाध्यायस्य तृतीयः पादः ॥५।३॥
समाप्तश्च विभक्तिपादः ॥

---

(40) त्रिगर्त्ताः षष्ठो येषां ते त्रिगर्त्तषष्ठा इत्युच्यन्ते। तेषु चेयं स्मृतिः।
आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी।
क्रौष्टकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः ॥ १ ॥ इति काशिकायाम्।

अथ

भाषावृत्तिः ।

पञ्चमोऽध्यायः । चतुर्थः पादः ।

१ । पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ।

पादशतशब्दान्तस्य संख्यादे वींप्साया द्योतको वुन् स्यादन्त्यलोपश्च । द्वौ द्वौ पादौ ददाति । तद्धितार्थे समासः (२।१।५१) । द्विपादिकां ददाति । द्विशतिकां ददाति । त्रिशतिकां दण्डितः । अन्यतोऽपीष्यते । द्विमोदकिकां ददाति ।

२ । दण्डव्यवसर्गयोश्च ।

अनयोश्च तथा स्यात् । अवीप्सार्थमिदं वचनम् । द्वौ पादौ दण्डितो व्यवसृजति वा द्विपदिकां दण्डितो व्यवसृजति वा । त्रिशतिकां दण्डितो व्यवसृजति वा । व्यवसर्गो दानम् ।

३ । स्थूलादिभ्यः प्रकारवचने कन् ।

स्थूलादेः प्रकारोक्तौ कन् स्यात् । जातीयरो बाधा । स्थूलप्रकारः स्थूलकः । यवकः । चञ्चकः ।

(क) चञ्चद्वृहतोश्च । चञ्चत्प्रकार चञ्चता गत्यैव सदृश चञ्चत्कः । बृहत्को मणिः ।

४ । अनत्यन्तगतौ क्तात् ।

अत्रार्थे क्तान्तात् कन् स्यात् । नात्यन्तं भिन्नं भिन्नकम् । छिन्नकम् ।

५ । न सामिवचने ।

अर्धवाचिन्युपपदे क्तान्तात् कन् न स्यात् । सामिकृतम् । सामिभुक्तम् । अर्धपीतम् । अर्धभुक्तम् । नेमकृतम् । खण्डकृतम् । नेमभिन्नम् । प्रति-

विधोऽयं स्वार्थिकस्य कनः। तस्य चास्तित्वे लिङ्गमिदमेव। तेन बहुतरक मित्यादि सिध्यतीति जयादित्यः।

६। बृहत्या आच्छादने।

अस्मात् कन् स्यात्। बृहतिका वस्त्रम्।

७। अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः।

एभ्यः स्वार्थे खः स्यात्। नित्यश्चायम्। एवमन्येऽपि नित्या भाष्ये परिगणिताः। यदुक्तं नित्यप्रत्ययास्तमबादयः प्राक् कनः। ञ्यादयः प्राग्वुनः। आम्वादयः प्राङ् मयटः। बृहती। जात्यन्ताः। समासान्ताश्चेति। अषडक्षीणं यद् द्वाभ्यां कृतम्। आशितङ्गवीनमरण्यं यत्राशिता गावः। निपातनान्मकारः। अलंकर्मीणः पाणिः। अलंपुरुषीणः। अलं पुरुषाय। तस्मै प्रभुः इत्यर्थः। अध्युत्तरपदात्। गुरुष्वधि गुर्व्वधीनः। देवाधीनः। राजाधीनः। इन मधिगतोऽधीन इत्यायत्तपर्य्यायोऽप्यस्ति। तस्यायं श्लोक-वार्त्तिके प्रयोगः। वाक्यं वक्त्र्यधीनं हीति। (१।१।५७, वा)। (41)

८। विभाषाञ्चेरदिक्स्त्रियाम्।

अञ्चत्यन्तात् खो वा स्यात्। प्राक् प्राचीनम्। तिर्य्यक् तिरश्चीनम्। प्रत्यक् प्रतीचीनम्। अदिक्स्त्रियां किम्? प्राची दिक्। दिग्ग्रहणं किम्? प्राचीना ब्राह्मणी।

९। जात्यन्ताच्छ बन्धुनि।

बन्धुनि द्रव्ये जात्यन्ताच्छः स्यात्। ब्राह्मणजातीयः। तज्जातीयः। बन्धुनि किम्? ब्राह्मणजातिरदुष्टा।

१०। स्थानान्ताद्विभाषा सस्थानेनेति चेत्।

स्थानान्ताच्छो वा स्यात् सस्थानेनेति चेत् स्थानान्तस्यार्थो गम्यते। समानं स्थानमस्य सस्थान स्तुल्यः। पितृस्थानः पितृस्थानीयो वा। राजस्थानः राजस्थानीयो वा। तत्तुल्य इत्यर्थः।

---

(41) भारवौ च—वशायत्तधीनं किमु निःस्पृहाणामिति। अधीनो निघ्न आयत्त इत्यमरश्च।

११। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ।

किम एदन्तात् तिङोऽव्ययाच्च यो घसंज्ञक स्तदन्तादामुः स्यात् । किन्तराम् । किन्तमाम् । क्रियाया गुणस्य वा प्रकर्षे घः । पूर्व्वाह्णेतराम् । पूर्वाह्णेतमाम् । अभाधारभूतः प्रकर्षः । याततराम् । वक्तितराम् । पततितराम् । पततितमाम् । गच्छतितमाम् । प्रातस्तराम् । नतराम् । नितराम् । सुतराम् । उच्चैस्तराम् । द्रव्यप्रकर्षे निषेधः । उच्चैस्तरः कश्चित् ।

१२। अमु च च्छन्दसि ।

छन्दः सूत्रमेकम् ।

१३। अनुगादिनष्ठक् ।

अस्माद् ठक् स्यात् । अनुगाद्येवानुगादिकः ।

१४। चाच: स्त्रियामञ् ।

स्त्रियां स्वार्थे णजन्तादञ् स्यात् । व्याक्रोशी । व्यावहासी । व्यावलेखी ।

(क) अभ्मीभ्रसाधारणाभ्यामञ् वक्तव्यः । विभाषा च ङीप् । आम्मीभ्री आग्नीध्रा वा । साधारणी साधारणा वा भूमिः ।

१५। अणिनुणः ।

इनुणन्तादण् स्यात् । सांकूटिनम् । सांराविणम् ।

१६। विसारिणो मत्स्ये ।

विसारिणोऽण् स्यात् । वैसारिणो मत्स्यः । मत्स्यादन्यत्र विसारी ।

१७। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ।

क्रियाणामावृत्तेर्गणिकायाः संख्यायाः कृत्वसुच् स्यात् । पञ्च वारान् पञ्चकृत्वो भुङ्क्ते । शतकृत्वः प्रोक्तवान् दिवसस्य । सहस्रकृत्वः ।

१८। द्वित्रिचतुर्भ्यः सुच् ।

एभ्यस्तयेव सुच् स्यात् । द्विरधीते । त्रिः प्रदक्षिणीकृत्य । त्रिः प्रदक्षिणं कुरुते । चतुर्भुङ्क्ते ।

१९ । एकस्य सकृच्च ।

एकस्य सुच् स्यात् सकृच्चादेशः । संयोगान्तलोपः (८।२।२३) । सकृद् ददाति ।

२० । विभाषा बहोर्धाऽविप्रकृष्टकाले ।

बहोः कृत्वसुज्विषये धा वा स्यात् । बहुधाह्नो भुङ्क्ते । पक्षे बहुकृत्वः । अविप्रकृष्टकाले किम् ? बहुकृत्वो मासस्य भुङ्क्ते ।

२१ । तत्प्रकृतवचने मयट् ।

स चासौ प्रकृतश्चेति तत्प्रकृतः । तद्वचने मयट् स्यात् । अन्नं प्रकृतं प्रस्तुतमन्नमयमिह । घृतमयमिह । अपर आह । अन्नं प्रकृतमस्मिन्नन्नमयो यज्ञः । अपूपमयं पर्व ।

२२ । समूहवच्च बहुषु ।

बहुषु प्रकृतेषूच्यमानेषु समूहवत् प्रत्ययाः स्युः । अपूपाः प्रकृता आपूपिकम् । इह च । आपूपिकं पर्व । चकारान्मयट् च । अपूपमयम् । अपूपमयी पात्री । वटकमयी । (42)

२३ । अनन्तावसथेतिहभेषजाञ्ञ्यः ।

एभ्यः स्वार्थे ञ्यः स्यात् । आनन्त्यम् । आवसथ्यम् । ऐतिह्यम् । भैषज्यम् । महाविभाषेह सम्बध्यते । आमादयः प्राङ् मयट इति स्मृतेः ।

२४ । देवतान्तात् तादर्थ्ये यत् ।

स्यात् । तस्मै इदम् तदर्थम् । तदर्थमेव तादर्थ्यम् । चातुर्वर्ण्यादिः । अग्निदेवत्यम् । पितृदेवत्यम् ।

२५ । पादार्घाभ्याञ्च ।

आभ्यां तादर्थ्ये यत् स्यात् । पाद्यं जलम् । अर्घ्यं पुष्पम् ।

२६ । अतिथेर्ञ्यः ।

अतिथ्यर्थमातिथ्यं नीवारादि ।

---

(42) वटक is roasted gram—छोलाभाजा or बुटभाजा इति भाषा ।

(क) नवसूरमर्तयविष्ठेभ्यः स्वार्थे यत् । नव्यम् । सूर्यः । मर्त्यः । यविष्ठ्यः । (43)

(ख) क्षेमाद् यः । क्षेम्यम् ।

(ग) नवस्य नू आदेशस्त्नप्तनप्खाश्च प्रत्ययाः । नूत्नम् । नूतनम् । नवीनम् ।

(घ) नश्च पुराणार्थात् प्रात् । प्रणम् । त्नबादयश्च । प्रत्नम् । प्रतनम् । प्रीणम् । (44)

(ङ) भागरूपनामभ्यो धेयः । एभ्यो धेयः स्यात् । रूपधेयम् । भागधेयम् (45) । नामधेयम् ।

२७ । देवात् तल् ।

स्वार्थे स्यात् । देव एव देवता ।

२८ । अवेः कः ।

स्यात् । अविकः ।

२९ । यावादिभ्यः कन् ।

एभ्यः स्वार्थे कन् स्यात् । यावकः । मणिकः । नान्तरीयकः । श्रेयस्कः । कन्दुकः ।

(1) पुत्रात् कृत्रिमे । पुत्रकः ।

(2) स्नाताद् वेदसमाप्तौ । स्नातकः ।

३० । लोहितान् मणौ ।

मण्यर्थे लोहितात् कन् स्यात् । लोहितको मणिः । "लोहितकनिर्मिता भुवः" । मणौ किम् ? लोहितः पर्वतः । लोहिता गौः ।

---

(43) This is a वार्त्तिक to 5. 4. 36. काशिकाकार gives it under 5. 4. 25.

(44) A वार्त्तिक to 5. 4. 30. काशिकाकार gives it in 5. 4. 25.

(45) भागधेयः करो बलिरिति दैवं दिष्टं भागधेयमिति च । काशिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते क्वचिदिति ।

३१ । वर्णे चानित्ये ।

अस्थिरे वर्णे लोहितात् कन् स्यात् । लोहितकः कोपेन । अनित्ये किम् ? लोहिता गौः ।

(क) लोहिताल्लिङ्गबाधनं वेति वक्तव्यम् । लोहितिका लोहिनिका वा मदेन ।

३२ । रक्ते ।

लाक्षादिना रक्ते लोहितात् कन् स्यात् । लोहितकः कम्बलः ।

३३ । कालाच्च ।

अनित्ये वर्णे रक्ते च कालात् कन् स्यात् । कालकं मुखं वैलक्ष्येण । कालकः पटः ।

३४ । विनयादिभ्यष्ठक् ।

एभ्यष्ठक् स्यात् । विनयो वैनयिकः । समयः सामयिकः । उपचार औपचारिकः । अत्ययः आत्ययिकः । "अग्निम्रियन् नात्ययिकं तमित्थ ।" अकस्मादिति दकारान्तः । आकस्मिकम् । मुक्ता मौक्तिकम् । एवं व्यवहारः । समूहः । विशेषः ।

(1) उपायाद् ह्रस्वश्च । "शिवमौपयिकं गरीयसाम्" ।

३५ । वाचो व्याहृतार्थायाम् ।

उक्तार्थाया वाचष्ठक् स्यात् । वाचिकं सन्देशवाक् ।

३६ । तद्युक्तात् कर्मणोऽण् ।

उक्तार्थवाग्युक्तात् कर्मणोऽण् स्यात् । सन्देशवाचा प्रतिपादितं कर्म कार्मणम् ।

३७ । ओषधेरजातौ ।

ओषधेरण् स्यात् । औषधं पिबति । अजातौ किम् ? "भवन्ति यत्रौषधयो रजन्याम्" । "ज्वलयतौषधिजेन कृशानुना ।"

३८ । प्रज्ञादिभ्यश्च ।

अण् स्यात् । प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । वणिगेव वाणिजः । मरुदेव

मारुतः। चोर एव चौरः। चौरी स्त्री। रक्षो राक्षसः। देवता दैवतम्। मनः मानसम्। मधु: माधवः। पिशाचः पैशाचम्। वयो वायसः। बन्धु-र्बान्धवः। विज्ञतं वैज्ञतम्। द्विता द्वैतम्। प्रतिभा प्रातिभम्। चण्डाल-श्चाण्डालः। चाकृतिगणोऽयम्।

३९। मृदस्तिकन्।

स्यात्। मृत्तिका। मृदेव।

४०। सस्नौ प्रशंसायाम्।

प्राशस्त्ये मृदः सस्नौ स्याताम्। रूपपो बाधा। मृत्स्ना मृत्स्ना।

४१। वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि।

इदं छन्दः सूत्रम्।

४२। बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्।

बह्वल्पार्थाच्छस् वा स्यात्। बहूनि बहुभिर्बहुभ्यो वा ददाति बहुशः। भूरिशः। अल्पशो ददाति। स्तोकशः। माङ्गलिक्यां प्रवृत्तावस्याभिधानम्। श्राद्धादौ मा भूदिति वृत्तिः। कारकात् किम्? बहूनां स्वामी। अन्यतर-स्यांग्रहणं स्पष्टार्थम्। महाविभाषया सिद्धेर्वृत्तिविकल्पस्य।

४३। संख्यैकवचनाच्च वीप्सायाम्।

आभ्यां वीप्सायां वा शस् स्यात्। संख्यायाः। द्वौ द्वौ ददाति द्विशः। पञ्चशो ददाति। एकार्थवचनात् परिमाणात्। पणं पणं ददाति पणशः। प्रस्थशः। पादशः। कारकादित्येव। द्वयो र्द्वयोः स्वामी। संख्यैकवचनात् किम्? घटं घटं ददाति। कुण्डं कुण्डं पिबति।

४४। प्रतियोगे पञ्चम्यास्तसिः।

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी तदन्तात् तसि र्वा स्यात्। यो नारायणतः प्रति नारायणात् प्रति वा। वाणिज चौरतः प्रति चौरात् प्रति वा।

(क) आद्यादिभ्यश्च।

आद्या प्रथमा। तदादिविभक्त्यन्तेभ्यश्च यथादर्शनं तसिर्वा स्यात्। कर्मगुण इत्यर्थे कर्मगुणतः। एवं स्वरयात् स्वरतः। आदौ आदितः। शरीरेण शरीरतः क्षमः। पृष्ठतः। शब्दतः। "दुष्टः शब्दः स्वरतो वर्णतो वा"।

४५। अपादाने चाहीयरुहोः।

अपादानवचनात् पञ्चम्यन्तात् तसि र्वा स्यात्। ग्रामत आयाति। चौरतो बिभेति। अहीरुहोः प्रतिषेधः। स्वार्थाद्धीयते। पर्वतादवरोहति। हीय इति निर्देशाज्जिहीते र्न निषेधः। उदयाचलत उज्जिहीते। कथं मन्त्रतो हीन इति। तृतीयान्तात् तसिः। (46)

४६। अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः।

अतिग्रहेऽचलने क्षेपे च तृतीयान्तात् तसिर्वा स्यात्। वृत्तेनातिगृह्यते। वृत्ततोऽतिगृह्यते। चरित्रतो न चलति। व्यवहारतो निन्दितः। अकर्त्तरि किम्? विप्रेण क्षिप्तम्।

४७। हीयमानपापयोगाच्च।

हीयमानपापाभ्यां युक्तादकर्त्तरि तृतीयान्तात् तसि र्वा स्यात्। वृत्तेन हीयते वृत्ततो हीयते वा। व्यवहारतो हीयते। वृत्ततः पापः।

४८। षष्ठ्या व्याश्रये।

षष्ठ्यन्ताद् विविधपक्षाश्रये तसिर्वा स्यात्। देवा अर्जुनतोऽभवन्। अर्जुनस्य पक्षे। आदित्याः कर्णतः। कर्णस्य पक्षे। व्याश्रये किम्? वृक्षस्य शाखा।

४९। रोगाच्चापनयने।

रोगात् षष्ठ्यन्तादपनयने तसि र्वा स्यात्। हिक्कातः कुरु चिकित्साम्। प्रवाहिकातः। अपनयने किम्? हिक्कायाः प्रकोपः।

५०। अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः।

अभूततद्भावगतौ सम्पद्यतेः कर्त्तरि च्विः स्यात् कृभ्वस्तियोगश्चेत्।

---

(46) एवं मन्त्रो हीनः स्वरतो वर्णतो वेति समाधेयम्।

अशुक्लः शुक्लः सम्पद्यते। तं करोति शुक्लीकरोति। महाविभाषया शुक्लं करोति। शुक्लीभवति। शुक्लीस्यात्। मृदूस्यात्। पटूभवति।

५१। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च।

एषां च्विः स्यादन्त्यलोपश्च। अरूकरोति। सुमनीकरोति। उच्चक्षू-स्यात् (47)। सुचेतीकृतः। “रहीभूतं दयाननम्।” “नीरजीकारित-क्ष्माम्।”

५२। विभाषा साति कार्त्स्न्ये।

च्विविषये कार्त्स्न्यगतौ साति र्वा स्यात्। काष्ठं भस्मसात् करोति भस्मीकरोति वा। “तस्मिन् कृशानुसाद् भूते”।

५३। अभिविधौ सम्पदा च।

अभिव्याप्तिगतौ च्व्यर्थे सातिर्वा स्यात् सम्पदा चानुप्रयोगः। उदकसात् सम्पद्यते लवणम्। उदकसाद् भवति। उदकीभवति वा।

५४। तदधीनवचने।

तदायत्तोक्तौ कृभ्वस्तिसम्पदां योगे सातिर्वा स्यात्। राजाधीनं करोति राजसात् करोति। स्त्रीसात् सम्पद्यते युवा।

५५। देये त्रा च।

दातव्येऽधीने त्रा स्यात् सातिश्च। देवत्रा करोति। देवसात् करोति। “विप्रसादकृत भूयसी र्भुवः। विप्रत्रा करोति। विप्रत्रा सम्पद्यते।

५६। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्।

एभ्यो द्वितीयार्थे सप्तम्यर्थे च कृञादिभिरन्यैश्च योगे त्रा स्यात्। साति-र्निवृत्तः। देवान् करोति देवत्रा करोति। देवत्रा गच्छति। देवे वसति देवत्रा वसति। बाहुल्याद् “बहुत्रा जीव बालक”। (48)

---

(47) “उच्चक्षूति कुरुध्व राक्षसकुलं तिष्ठन्ति किं मर्कटा इति कैकसवक्त्राविति” (भट्टिधरवचनम्)। उच्चक्षूतीति लटि प्रयोगः।

(48) बाधकेभ्य बालर्षीति पाठान्तरम्।

५७ । अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच् ।

कृते द्विर्वचने द्व्यजवरार्द्धादव्यक्तशब्दानुकरणात् कृभ्वस्तियोगे डाच् स्यात्। पटपटाकरोति। दमदमास्यात्। द्व्यजित्यनेकाजुपलक्षणम्। खरटखरटा करोति। अनितौ किम्? पटिति करोति।

५८ । कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ।

एभ्यः कृञो योगे कर्षणे डाच् स्यात्। द्वितीयं कर्षणं करोति द्वितीया करोति। तृतीयाकृतम्। शम्बाकृत्य बीजाकृतवान्। कृञो योगे विधिर्देश-सूत्राम्।

५९ । संख्यायाश्च गुणान्तायाः ।

कृषौ कृञो योगे गुणान्तसंख्याया डाच् स्यात्। त्रिगुणाकरोति क्षेत्रम्।

६० । समयाच्च यापनायाम् ।

यापनागतौ समयाच्च डाच् स्यात्। समयाकरोति। कालं यापयतीत्यर्थः। कालक्षेपं करोतीत्यर्थः। "समयाकुरुत मा वाग्भिः"।

६१ । सपत्त्रनिष्पत्त्रादतिव्यथने ।

आभ्यामतिपीडने डाच् स्यात्। सपत्त्राकरोति मृगं व्याधः। निष्पत्त्रा करोति। "धनुष्पाणेर्यातं दिवमपि सपत्त्राकृतममुम्"।

६२ । निष्कुलान्निष्कोषणे ।

अस्मादत्र डाच् स्यात्। निष्कुलाकुरुते दाड़िमम्।

६३ । सुखप्रियादानुलोम्ये ।

आभ्यामानुकूल्ये डाच् स्यात्। सुखाकरोति। प्रियाकरोति। आनुकूल्यं करोतीत्यर्थः। "सीतामूचे सुखाभव"। "प्रियाकर्त्तुं प्रियंवदा"।

६४ । दुःखात् प्रातिलोम्ये ।

डाच् स्यात्। दुःखाकरोति कुपुत्त्रः। "अदो दुःखाकरोति माम्"।

६५ । शूलात् पाके ।

अस्मात् कृञो योगे डाच् स्यात्। शूलाकृतं मांसम्। शूलाकरोति मांसम्।

६६ । सत्यादशपथे ।

सत्यात् डाच् स्यात् । सत्याकरोति भाण्डं वणिक् । मयैतद् ग्रहीतमिति सत्यङ्कारं ददाति । अशपथे किम् ? सत्यं करोति विप्रः । शपतीत्यर्थः ।

६७ । मद्रात् परिवापणे ।

मद्रात् माङ्गलिकमुण्डने डाच् स्यात् । मद्राकृतो बालः । मद्राकरोति बालम् ।

(क) भद्राच्चेति वक्तव्यम् । भद्राकरोति नापितः । अत्राविभाषा पूर्वा । कृत्वसुजर्थाच्च । असादिरव्ययम् ।

६८ । समासान्ताः ।

अतःपरं समासावयवः प्रत्ययो वाच्यः । अधिराजमुपराजम् । नाव्ययी-भावादित्यम् (२।४।८३) । द्विधुरी त्रिधुरी । द्विगोरिति (४।१।२१) ङीप् । वाक्त्वचिनी । द्वन्द्वोपतापगर्ह्यादिनिः (५।२।१२८) । धुरोऽर्द्धमर्द्धधुरा । तत्-पुरुषत्वात् परवल्लिङ्गता (२।४।२६) ।

६९ । न पूजनात् ।

पूजावचनात् परस्य समासान्तो न विधेयः । सुराजा । अतिराजा । सुगौः । अतिगौः । इह स्वतिग्रहणं कर्त्तव्यम् । अत्र मा भूत् परमगवः ।

(क) प्राग्बहुव्रीहिग्रहणञ्च । सुसक्थमतिसक्थः ।

७० । किमः क्षेपे ।

क्षेपे किमः परस्य समासान्तो न स्यात् । किंराजा यो न रक्षति । किं-सखा । द्रोहाचरणात् । किंगौः । अदोहवाहात् । क्षेपे किम् ? कस्य राजा किंराजः । किंगवः ।

७१ । नञस्तत्पुरुषात् ।

नञः समासान्तो न स्यात् । अराजा । असखा । अगौः । तत्पुरुषात् किम् ? अधुरं शकटम् ।

७२ । पथो विभाषा ।

नञ्निषेधः पथो वा स्यात् । अपथम् । अपन्था वा ।

७३ । बहुव्रीहौ संख्येये डजबहुगणात् ।

संख्येये यो बहुव्रीहिस्ततो डच् स्यात् । उपदशाः । आसन्नविंशाः । द्वित्राः । पञ्चषाः । एकद्वाः । लक्षकोटाः । अबहुगणात् किम् ? उपबहवः । उपगणाः ।

(क) संख्यान्तस्य तत्पुरुषस्याव्ययादेः । डच् स्यात् । निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि । निश्चत्वारिंशानि वर्षाणि । निर्गतास्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः । अव्ययादेः किम् ? गोत्रिंशत् । गोविंशतिः ।

७४ । ऋक्पूरब्धूःपथामानक्षे ।

समासमात्रे ऋगादेरकारः स्यात् । ऋचोऽर्द्धमर्द्धर्चः । अनृचो माणवकः । बह्वृचश्चरणविशेषः । पुर् । नान्दीपुरम् । लिङ्गस्य लोकाश्रयत्वान्नपुंसकता । द्विपुरी । त्रिपुरी । अप् । द्वीपम् । बह्वपानि तड़ागानि । कथं बह्वाम्पि ? समासान्तविधेरनित्यत्वादित्याहुः । धुर् । राजधुरा । महाधुरः । पथिन् । राजपथः । महापथः । अनक्षे किम् ? अक्षधूः स्यन्दनानाम् । दृढधूरक्षः ।

७५ । अच् प्रत्यन्ववपूर्वात् सामलोम्नः ।

प्रत्यनुपूर्वाभ्यां सामलोमभ्यामच् स्यात् । प्रतिसामम् । अनुसामम् । प्रतिलोमम् । अनुलोमम् । इह

कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः ।
गोदावर्य्याश्च नद्याश्च संख्याया उत्तरे यदि ॥१॥

इति जयादित्यः । कृष्णभूमम् । उदकभूमम् । पाण्डुभूमम् । पञ्चगोदावरम् । द्विनदम् । भूमेश्च संख्यायाः । दशभूमं सूत्रम् । द्विभूमः प्रासादः । अजिति योगविभागात् पद्मनाभः । ऊर्णनाभः । दीर्घरात्रम् । गणरात्रम् । वर्षारात्रमित्यादि ।

७६ । अक्ष्णोऽदर्शनात् ।

अदृष्ट्यर्थादक्षिशब्दादच् स्यात् । पुष्कराक्षम् । गवाक्षम् । (49)

(49) In the printed काशिका too गवाक्षम् is given as neuter. But भट्टोजि has it as गवाक्षः and says पुंस्त्वं लोकात् । So also the poet—"विलोलदृष्टिभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा

७७। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्-मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिव-सरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्ष-वृद्धोक्षोपशुनगोष्ठश्वाः।

पञ्चविंशतिरेतेऽच्प्रत्ययान्ता निपात्यन्ते। तत्राद्यास्त्रयो बहुव्रीहयः। तत एकादश द्वन्द्वाः। अहर्दिवमहन्यहनीत्यर्थः। साकल्येन रजः सरजसमभ्यव-हरति। अव्ययीभावे साधु। बहुव्रीहौ सरजसं पङ्कमित्यसाधु। ततस्तत्-पुरुषद्वयम्। निश्चितं श्रेयो निःश्रेयसम्। पुरुषस्यायुः पुरुषायुषम्। ततो द्विगुद्वयम्। ततो द्वन्द्वः। ततः कर्मधारयत्रयम्। शुनः समीपे उपशुनम्। गोष्ठे श्वेव गोष्ठश्वः।

(क) चतुरस्त्र्युपाभ्यामुपसंख्यानम्। त्रिचतुराः। उपचतुराः।

७८। ब्रह्महस्तिभ्यां वर्चसः।

आभ्यां वर्चसोऽच् स्यात्। ब्रह्मवर्चसम्। हस्तिवर्चसम्। "हेतुस्त्वद्-ब्रह्मवर्चसम्।"

(क) पल्यराजभ्याञ्च। पल्यवर्चसम्। राजवर्चसम्।

७९। अवसमन्धेभ्यस्तमसः।

एभ्यस्तमसोऽच् स्यात्। अवतमसम्। सन्तमसम्। अन्धतमसम्।

८०। श्वसो वसीयःश्रेयसः।

श्वःशब्दाद् वसीयःश्रेयोभ्यामच् स्यात्। श्वोवसीयसम्। श्वःश्रेयसं वो भूयात्।

८१। अन्ववतप्ताद्रहसः।

एभ्यो रहसोऽच् स्यात्। "अनुरहसमनाथि नायकेन"। अवरहसम्। तप्त-रहसम्।

ह्यामम्।,' नृसिंह clears the point thus "गौर्जन तस्यानाव मनान पश्चादि। कार्यमिदम्। वातात्मी ववस्य पुंसिकः"।

८२। प्रतेरुरसः सप्तमीस्थात् ।

प्रतिपूर्वात् सप्तम्यर्थवृत्तेरुरसोऽच् स्यात् । उरसि वृताः प्रत्युरसं वृताः । "न्यपतन् प्रत्युरसं प्रियाः प्रियाणाम्" । विभक्त्यर्थेऽव्ययीभावः ।

८३। अनुगवमायामे ।

इदमत्र निपात्यते । अनुगवं रथः । यस्य चायाम (२।१।१६) इति समासः ।

८४। द्विस्तावा त्रिस्तावा वेदिः ।

द्विस्तावा त्रिस्तावा स्याद् वेदिश्चेत् । अन्यत्र द्विस्तावती त्रिस्तावती रज्जुः ।

८५। उपसर्गादध्वनः ।

प्रादेरध्वनोऽच् स्यात् । प्रगतोऽध्वानं प्राध्वो रथः । निरध्वः ।

८६। तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ।

संख्याव्ययादेरङ्गुलिशब्दादच् स्यात् । द्वे अङ्गुली प्रमाणमस्येति तद्धितार्थे समासः (२।१।५१) । प्रमाणे लो द्विगोरिति (५।२।३७ वा) मात्रचो लुक् । द्व्यङ्गुलम् । त्र्यङ्गुलम् । अव्ययादेः । निर्गतमङ्गुलिभ्यो निरङ्गुलम् । अत्यङ्गुलम् । तत्पुरुषस्य किम् ? पञ्चाङ्गुलिर्हस्तः । तत्पुरुषे विधिरा द्वन्द्वात् (५।४।१०६) ।

८७। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ।

संख्याव्ययाभ्यामहरादिभ्यश्च रात्रेरच् स्यात् । पञ्चानां रात्रीणां समाहारः पञ्चरात्रम् । त्रिरात्रम् । द्विरात्रम् । अतिक्रान्तो रात्रिमतिरात्रः । नीरात्रः । अहर्ग्रहणं द्वन्द्वार्थम् । अहोरात्रः । सर्वरात्रः । संख्यातरात्रः । "पुण्यरात्रः प्रियागमे" । एते कर्मधारयाः । एकदेशात्—पूर्वं रात्रेः पूर्वरात्रः । अपररात्रः । अर्धरात्रः ।

८८। अह्नोऽह्न एतेभ्यः ।

एतेभ्य इति । संख्याव्ययाहरादिभ्यः । अहःशब्दस्याह्नादेशः स्यात्

समासान्तो परे। टचि—द्वयोरह्नोर्भवो द्व्यह्नः। त्र्यह्नः। कालाट् ठञो (४।३।११) द्विगोर्लुगनपत्ये (४।१।८८) इति लुक्। अत्यह्नः। निरह्नः। प्रादिसमासः। सर्वाह्णः। संख्याताह्नः। कर्मधारयौ। पूर्वाह्णः। अपराह्णः। पूर्वापरेति (२।२।१) समासः। सर्वत्र टच्।

८६। न संख्यादेः समाहारे।

संख्यादेरह्नः समाहृतावह्नादेशो न स्यात्। द्वे अहनी समाहृते द्व्यहः। त्र्यहः। सप्ताहः। दशाहः।

९०। उत्तमैकाभ्यां च।

आभ्यामह्नोऽह्नादेशो नास्ति। अहरादिरन्त्यमुत्तमं पुण्यशब्द इत्यर्थः। पुण्याहम्। एकाहः।

९१। राजाहःसखिभ्यष्टच्।

एभ्यस्तत्पुरुषे टच् स्यात्। महाराजः। देवराजः। द्व्यहः। उत्तमाहः। राजसखः। "भवन्ति गोमायुसखा न दन्तिनः।" लिङ्गविशिष्टाग्रहणान् महाराज्ञी।

९२। गोरतद्धितलुकि।

गोष्टच् स्यात्। पुङ्गवः। उत्तमगवः। पञ्चगवी (50)। स्त्रीगवी। राजगवी। पञ्चगवधनम्। दशगवधनम्। अतद्धितलुकि किम्? पञ्चगुः पटः। क्रीतार्थे (४।१।३७) ठञोऽध्यर्द्धेति (५।१।२८) लुक्।

९३। अग्राख्यायामुरसः।

श्रेष्ठाख्यायामुरसष्टच् स्यात्। हस्त्युरसम्। अश्वोरसम्। तत्प्रधानम्।

९४। अनोऽश्मायःसरसां जातिसंज्ञयोः।

एषां टच् स्यात्। जातौ—उपानसम्। अमृताश्मः। कालायसम्। मण्डूकसरसम्। संज्ञायाम्—महानसम्। पिण्डाश्मः। लोहितायसम्। कालसरसम्।

---

(50) मतान्तरे तु पञ्चगवम्। Vide our note on 2. 1. 23.

९५ । ग्रामकौटाभ्याञ्च तक्ष्णः ।

आभ्यां तक्ष्णष्टच् स्यात् । ग्रामतक्षः । कौटतक्षः ।

९६ । अतेः शुनः ।

टच् स्यात् । श्वानमतिक्रान्तोऽतिश्वः सेवकः । अतिश्वी मृगी ।

९७ । उपमानादप्राणिषु ।

उपमानाच्छुन ष्टच् स्यात् । फलकः श्वेव फलकश्वः । अप्राणिषु किम् ? वानरः श्वेव वानरश्वा । व्याघ्रादित्वात् (२।१।५६) समासः ।

९८ । उत्तरमृगपूर्वाच्च सक्थ्नः ।

एभ्यः सक्थ्न ष्टच् स्यात् । उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । चकारादुपमानाच्च । फलकसक्थम् ।

९९ । नावो द्विगोः ।

नावन्ताद् द्विगो ष्टच् स्यात् । द्विनावम् । पञ्चनावम् । दशनावप्रियः । अतद्धितलुकोत्येव । क्रीतार्थे ठञो लुक् । पञ्चनौर्गजः ।

१०० । अर्द्धाच्च ।

अर्द्धान्नावस्तत्पुरुषे टच् स्यात् । नावोऽर्द्धमर्द्धनावम् । अर्द्धनावीति तु न । लिङ्गस्य लोकाश्रयत्वात् परवल्लिङ्गताभावः ।

१०१ । खार्य्याः प्राचाम् ।

द्विगोरित्येव । खार्य्याष्टच् स्यात् प्राचां मतेन । अर्द्धाच्च । द्विखारम् । अर्द्धखारम् । अन्येषां द्विखारि । अर्द्धखारी ।

१०२ । द्वित्रिभ्यामञ्जलेः ।

आभ्यामञ्जलेष्टच् स्यात् । द्वयोरञ्जल्योः समाहारो द्व्यञ्जलम् । त्र्यञ्जलं वारि । द्विगोरित्येव । द्वयोरञ्जलिर्द्व्यञ्जलिः ।

१०३ । ब्रह्मसन्तान्नपुंसकाच्छन्दसि ।

छन्दः सूत्रम् ।

१०४। ब्रह्मणो जानपदाख्यायाम्।

जनपदे भवो जानपदः; तदेकदेशस्तस्मिन्। ब्रह्मणष्टच् स्यात्। सुराष्ट्रब्रह्मः। काशिब्रह्मः। अन्यत्र देवब्रह्मा नारदः।

१०५। कुमहद्भ्यामन्यतरस्याम्।

आभ्यां ब्रह्मणष्टज् वा स्यात्। कुब्रह्मः कुब्रह्मा वा। "परिषद्बलान् महाब्रह्मैः"। उक्ताः समासान्तास्तत्पुरुषे।

१०६। द्वन्द्वाच्चुदषहान्तात् समाहारे।

चवर्गदषहान्ताद् द्वन्द्वाट् टच् स्यात्। वाक्त्वचम्। उपाध्याय-शब्द प्राच्छम्। श्रीस्रजम्। दान्तात्—सम्पद्विपदम्। षान्तात्– वाक्त्विषम्। शीषप्रावृषम्। हान्तात्—छत्रोपानहम्। पिकमधुलिहम्। समाहारे किम्? प्रावृट्शरदौ। द्वन्द्वात् किम्? पञ्चानां वाचां समाहारः पञ्चवाक्।

१०७। अव्ययीभावे शरत्प्रभृतिभ्यः

एभ्योऽत्र टच् स्यात्। उपशरदम्। "अर्थोपशरदेऽपश्यत्"। एवं दिश् विपाश् दिव् दृश् चतुर्।

(1) जराया जरसश्च। उपजरसम्।

(क) प्रतिपरसमनुभ्योऽक्ष्णः। प्रत्यक्षम्। परोक्षमिति निपातनात् समासः। उक्षश्च। समक्षम्। अन्वक्षम्। अव्ययीभावे विधानमा बहुव्रीहेः।

१०८। अनश्च।

१०९। नपुंसकादन्यतरस्याम्।

अन्नन्ताट् टच् स्यात्। उपराजम्। प्रतिराजम्। उपदशम्। अध्यात्मम्। प्रत्यात्मम्। नपुंसकाद्वा। उपचर्ममुपचर्म वा। उपभस्ममुपभस्म वा। प्रत्यक्षः प्रत्यहं वा। यथार्थेऽव्ययीभावः

११०। नदीपौर्णमास्याग्रहायणीभ्यः।

आभ्यष्टज् वा स्यात्। उपनदमुपनदि वा। उपपौर्णमासमुपपौर्णमासि वा। "उपपौर्णमासि समये शशिनं ददर्श।" उपाग्रहायणमुपाग्रहायणि वा।

१११ । भवः ।

भयन्तात् टच् वा स्यात् । प्रतिसमिधम् प्रतिसमिद् वा । उपदृषदम् । उपदृषद् वा ।

११२ । गिरेश्च सेनकस्य ।

सेनकस्य मतेन गिरेष्टच् वा स्यात् । "अनुगिरमृतुभिर्वितायमानम्" । अनुगिरि वा । उपगिरम् । उपगिरि वा । उक्तोऽव्ययीभावे समासान्तः ।

११३ । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।

बहुव्रीहौ स्वाङ्गवाचिभ्यां सक्थ्यक्षिभ्यां षच् स्यात् । दीर्घसक्थः । षित्त्वात् ङीष् । दीर्घसक्थी । सहस्राक्षः । विशालाक्षः । आयताक्षी । स्वाङ्गात् किम् ? दीर्घसक्थि शकटम् । बहुव्रीहौ विधानमापादम् ।

११४ । अङ्गुलेर्दारुणि ।

अङ्गुलेः षच् स्याद् दार्वर्थे । द्व्यङ्गुलं दारु । पञ्चाङ्गुलम् । अङ्गुलितुल्यावयवयुक्तं धान्याद्युत्क्षेपणकाष्ठमिदमुच्यते ।

११५ । द्वित्रिभ्यां ष मूर्ध्नः ।

आभ्यां मूर्ध्नः षः स्यात् । द्विमूर्धः । त्रिमूर्धः । द्वित्रिभ्यां किम् ? "बहुमूर्ध्नो द्विमूर्धांश्च त्रिमूर्धांश्चाहतां मृधे ।"

११६ । अप् पूरणीप्रमाण्योः ।

पूरणप्रत्ययान्तात् स्त्रीलिङ्गात् प्रमाणीशब्दाच्चाप् स्याद् बहुव्रीहौ । कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमा रात्रयः । भार्याप्रमाणाः कुटुम्बिनः ।

(क) नेतुर्नक्षत्रपूर्वादुपसंख्यानम् । मृगो नेता यासां रात्रीणां ता मृगनेत्रा रात्रयः । पुष्यनेत्राः ।

११७ । अन्तर्बहिर्भ्यांश्च लोम्नः ।

आभ्यां लोम्नोऽप् स्यात् । अन्तर्लोमः प्रावारः । बहिर्लोमः कम्बलः ।

११८ । अञ् नासिकायाः संज्ञायां नसञ्चास्थूलात् ।

नासिकाया अच् स्यात् । नसचादेशं कुर्यात् । द्रुणसः । गोनसः ।

अस्थूलात् किम् ? स्थूलनासिको वराहः। संज्ञायां किम् ? तुङ्गनासिकः।

(क) खरखुराभ्यां च नस् वक्तव्यः। खरणाः। खुरणाः। अच्प्रत्ययोऽपीष्यते। खरणसः। खुरणसः।

११९। उपसर्गाच्च।

प्रादेर्नासिकाया अच् स्यात्। नसादेशश्च। "उन्नसं दधती वक्त्रम्।" "विनसा हतबान्धवा।" अनुनासिकशब्दस्तु निपातनात्।

(क) वे र्ग्रो वक्तव्यः। विग्रः। एतत्तु नैगममिति स्मृतिः।

१२०। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः।

एतेऽष्टावजन्ता निपात्यन्ते। शोभनं प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः। सुदिवः। "सुदिवेवारविन्दिनी।" शारेरिवास्य कुक्षिः शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या इव पादावस्यैणीपदः। अजपदः। प्रोष्ठपदः।

१२१। नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्।

एभ्यो हलिसक्थिभ्यामज् वा स्यात्। अविद्यमानो हलिरस्य अहलः। अहलिर्वा। असक्थः। असक्थिर्वा। एवं सुहलः। सुहलिर्वा। दुर्हलः। दुर्हलिर्वा। सुसक्थः सुसक्थिर्वा।

१२२। नित्यमसिच् प्रजामेधयोः।

नञादिभ्यः प्रजामेधयो रसिच् स्यात्। अप्रजाः। दुष्प्रजाः। सुप्रजाः। अमेधाः। दुर्मेधाः। सुमेधाः। "हन्त दुर्मेधसो हताः।" नित्यग्रहणादल्पमेधस इति जयादित्यः।

१२३। बहुप्रजाश्छन्दसि।

छन्दः सूत्रम्।

१२४। धर्मादनिच् केवलात्।

समासान्तो धर्मादनिच् स्यात्। प्रियधर्मा। कल्याणधर्मा। साक्षात्कृतो धर्मो यैस्ते साक्षात्कृतधर्माणो मुनय इति भाष्यप्रयोगः। केवलात् किम् ?

पदान्तरैश्च समस्तात्धर्मान् मा भूत् । कुलस्य धर्मः कुलधर्मः । ज्ञातः कुलधर्मोऽनेनेति ज्ञातकुलधर्मः । दर्शितस्वधर्म्मः । यदातु त्रिपदो बहुव्रीहिः परमः स्वो धर्मोऽस्य तदा केवल एव धर्मशब्द इति परमस्वधर्मेत्येव भवति । यथातु जयादित्यस्तथा नैतत् ।

१२५ । जम्भा सुहरिततृणसोमेभ्यः ।

स्वादिभ्यो जम्भशब्दस्यानिजन्तो जम्भा स्यात् । सुजम्भा । हरितजम्भा । तृणजम्भा । सोमजम्भा । जम्भो भोजनम् । दन्तभेदश्च ।

१२६ । दक्षिणेर्मा लुब्धयोगे ।

लुब्धयोगश्चेदयमत्र निपात्यते । व्याधव्रणितदक्षिणाङ्गो दक्षिणेर्मा कुरङ्गः । लुब्धयोगे किम् ? दक्षिणेर्मम् ।

१२७ । इच् कर्मव्यतीहारे ।

कर्मव्यतीहारे बहुव्रीहाविच् स्यात् । दण्डादण्डि । केशाकेशि । बाहूबाहवि । नखानखि । मुसलामुसलि । "जल्पाजल्पि प्रवादिनाम् ।"

१२८ । द्विदण्ड्यादिभ्यश्च ।

प्रथमार्थे पञ्चमी । द्विदण्ड्यादय इजन्ता निपात्यन्ते । द्वौ दण्डावस्मिन् द्विदण्डि प्रहरणम् । द्विमुसलि । उभयाञ्जलि । उभयाहस्ति । 'प्रहस्तेनोभयाहस्ति निष्पिष्टरथसारथीन्" । एकपदि । उभयपदि । उभयादन्ति । गणपाठात् तत्पुरुषेऽपि । निकुच्यकर्णि धावति । प्रोह्यपादि । मयूरव्यंसकादिः ।

१२९ । प्रसंभ्यां जानुनोर्ज्ञुः ।

प्राभ्यां जानुनोर्ज्ञुरादेशः स्यात् । प्रज्ञुः । संज्ञुः ।

१३० । ऊर्द्ध्वाद् विभाषा ।

ऊर्द्ध्वाज् जानुनोर्ज्ञुर्वा स्यात् । ऊर्द्ध्वज्ञुः । ऊर्द्ध्वजानुर्वा ।

१३१ । ऊधसोऽनङ् ।

ऊधसन्तस्य बहुव्रीहेरनङादिश्यते । कुण्डोध्नी । घटोध्नी । स्त्रियामेवाभिधानात् महोधाः पर्जन्यः । "गवां गणाः प्रस्नुतपीवरोधसः" ।

१३२। धनुषश्च।

अनङादिश्यते। शार्ङ्गधन्वा। गाण्डीवधन्वा। अधीतधन्वा। पुष्पधनुषं पुष्पायुधमिति चिन्त्यम्। अथवा समासान्तविधिरनित्यः।

१३३। वा संज्ञायाम्।

पुष्पधन्वा पुष्पधनुर्वा।

१३४। जायाया निङ्।

जायान्तस्य निङादिश्यते। वलि यलोपः (६।१।६६)। युवतिर्जायास्य युवजानिः। प्रियजानिः। कमलाजानिः।

१३५। गन्धस्येदुत्पूतिसुसुरभिभ्यः।

उदादेर्गन्धस्येत् स्यात्। उद्गतो गन्धोऽस्योद्गन्धिः। पूतिगन्धिः। सुगन्धिः। सुरभिगन्धिः। समवेत एवाभिधानान्नेह। सुगन्ध आपणिकः।

१३६। अल्पाख्यायाम्।

गन्धस्येत् स्यात्। अल्पः सूपोऽस्यां सूपगन्धिः स्थाली। दधिगन्धि भोजनम्। प्रेमगन्धि वचनम्।

१३७। उपमानाच्च।

गन्धस्येत् स्यात्। पद्मस्येव गन्धोऽस्य पद्मगन्धिः। कुमुदगन्धिः।

१३८। पादस्य लोपोऽहस्त्यादिभ्यः।

उपमानात् पादस्य समासान्तो लोपः स्यात्। व्याघ्रपात्। सिंहपात्। अहस्त्यादिभ्यः किम्? हस्तिपादः। श्रीपादः। ग(क)ण्डोलपादः।

१३९। कुम्भपदीषु च।

कुम्भपद्यादयः स्त्रियां कृतलोपा ङीबन्ता निपात्यन्ते। कुम्भपदी। शतपदी। एकोऽभिन्नः सर्वेषां पादोऽस्येति एकपदी मार्गः। गोधापदी। पादोऽन्यतरस्यामिति (४।१।८) ङीप्। पादः पत् (६।४।१३०)।

१४०। संख्यासुपूर्वस्य।

एतत्पूर्वस्य पादस्य लोपः स्यात्। द्विपात्। "सुपाद् द्विरदनासोरुः"।

१४१ । वयसि दन्तस्य दतृ ।

संख्यासुपूर्वस्य दन्तस्य दत्रादेशः स्यात् । द्विदन् वत्सः । षोडशदन् वयःस्थः । षोडन् गौः । सुदन् कुमारः । सुदती तरुणी । वयसि किम् ? द्विदन्तो गजः ।

१४२ । छन्दसि च ।

छन्दः सूत्रम् ।

१४३ । स्त्रियां संज्ञायाम् ।

स्त्रियां नाम्नि दन्तस्य दतृ स्यात् । सुदती । फालदती काचित् ।

१४४ । विभाषा श्यावारोकाभ्याम् ।

आभ्यां दन्तस्य दतृ स्याद्वा । श्यावदन् । श्यावदन्तो वा । अरोकदन् । अरोकदन्तो वा । अरोकोऽदीप्तिः ।

१४५ । अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ।

एभ्यो दन्तस्य दतृ स्याद्वा । अग्रान्तात् कुन्दकुड्मलाग्रदन् कुन्दकुड्मलाग्रदन्तो वा । एवं शुद्धदन् । शुद्धदन्तो वा विप्रः । चकारादहिमूषिकगर्दभशिखरिभ्यश्चेति जयादित्यः । अहिदन्तः । अहिदन् वा । शिखरदती (51) ।

१४६ । ककुदस्यावस्थायां लोपः ।

अवस्थायां ककुदस्यान्तस्य लोपः स्यात् । अजातककुद् वत्सः । स्थूलककुत् तरुणः । अवस्थायां किम् ? श्वेतककुदो वृषः ।

१४७ । त्रिककुत् पर्वते ।

अयमत्र निपात्यते ।

१४८ । उद्विभ्यां काकुदस्य ।

आभ्यां काकुदस्यान्त्यलोपः स्यात् । उद्गतं काकुदमस्य उत्काकुत् । विकाकुत् ।

---

(51) पक्वदाड़िमबीजाभं माणिक्यं शिखरं विदुरिति शृङ्गधरधृतम् । तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठीत्यत्र तु शिखरिणः कोटिमन्त इति मल्लिनाथः ।

१४६। पूर्वाद्विभाषा।

पूर्वात् काकुदस्याल्लोपः स्याद् वा। पूर्वं काकुदमस्य पूर्वकाकुत्। पूर्वकाकुदो वा।

१५०। सुहृद्दुर्हृदौ मित्रामित्रयोः।

अनयोरेतौ निपात्येते। सुहृन्मित्रम्। दुर्हृच्छत्रुः। मित्रामित्रयोः किम्? सुहृदयः साधुः। दुर्हृदयश्चौरः।

१५१। उरःप्रभृतिभ्यः कप्।

उरःप्रभृत्यन्ताद् बहुव्रीहेः कप् स्यात्। व्यूढमुरो यस्य व्यूढोरस्कः। प्रियसर्पिष्कः। प्रिययशस्कः।

(1) अर्थान्नञः। अनर्थकः।

इह गणे लक्ष्मीरनड्वान् पयो नौः पुमानिति प्रथमैकवचनान्ताः पठ्यन्ते। तेन द्विवचनबहुवचनान्ताच्छेषाद् विभाषेति (५।४।१५४) कप्। बहुलक्ष्मीर्बहुलक्ष्मीको वा। द्विपुमान् द्विपुंस्को वेति जयादित्यः। ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधान्नेह। "प्रवृद्धनखकोटिभिः घनतदूढोरसो राक्षसा" इति।

१५२। इनः स्त्रियाम्।

इनन्तात् स्त्रियां कप् स्यात्। बहुदण्डिका शाला। बहुवाग्मिका सभा।

१५३। नद्यृतश्च।

नद्यन्तादृदन्ताच्च कप् स्यात्। बहुस्त्रीको नृपः। बहुकुमारीको देशः। बहुधीवन्धूकः। बहुवीरबन्धूकः। बहुब्रह्मबन्धूकः। बहुदातृकः। बहुमातृकः। त्रन्वयाः कवयं नेष्यते। स्त्रीति स्त्राधिकारविहितस्य ग्रहणात्। तेन शेषाद् विभाषेति कप् (५।४।१५४) बहुतन्त्री बहुतन्त्रीकः। सुवधूः सुवधूक इत्यादि।

१५४। शेषाद्विभाषा।

यस्माद् बहुव्रीहेः समासान्तो न विहितमतः कप् वा स्यात्। बहुखट्वाकः। बहुखट्वकः। बहुखट्वा वा। बहुदण्डी राजा बहुदण्डिको वा। शेषात्

किम् ? प्रियपथः। प्रियधुरः। इन्होऽनुत (४।१।६६) इति दीर्घविधानसामर्थ्याद् व्यवस्थितविभाषया वा न कप्। तेन नित्यम् ब्रह्मबन्धूः।

१५५। न संज्ञायाम्।

नाम्नि बहुव्रीहे र्न कप् स्यात्। विश्वे देवा अस्य विश्वदेवः। विश्वयशाः कश्चित्।

१५६। ईयसश्च।

ईयसन्तान्नास्ति कप्। बहुश्रेयान्। शेषादिति (५।४।१५४) प्राप्ते। लिङ्गविशिष्ट। (प, ७२) ग्रहणात्। बहुश्रेयसी। बहुप्रेयसी। नद्यृतश्चेति। (५।४।१५३) प्राप्तः।

१५७। वन्दिते भ्रातुः।

स्तुत्यर्थाद् भ्रातु र्न कप् स्यात्। सुभ्राता लक्ष्मणः। प्रशस्तभ्राता। वन्दिते किम् ? चौरभ्रातृकः। पापभ्रातृकः।

१५८। ऋतश्छन्दसि।

छन्दः सूत्रम्।

१५९। नाड़ीतन्त्र्योः स्वाङ्गे।

नाड़ीतन्त्र्योर्न कप्। बहुनाड़िः कायः। बहुतन्त्री ग्रीवा। स्वाङ्गे किम्। बहुतन्त्रीका वीणा।

१६०। निष्प्रवाणिश्च।

निपात्यते। निर्गता प्रवाणी यस्मात् स निष्प्रवाणि रपनीतशलाको नवकर्पटः। पूर्णः प्रत्ययाधिकारः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
पञ्चमाध्यायस्य चतुर्थः पादः॥ ५।४॥
समाप्तः शतपादोऽध्यायश्च।

अथ

भाषावृत्तिः ।

षष्ठोऽध्यायः । प्रथमः पादः ।

१ । एकाचो द्वे प्रथमस्य ।

प्रथमस्यैकाचो द्वे भवत इत्यधिक्रियते प्राक् संप्रसारणात् (६।१।१३) । वक्ष्यति लिटि धातोरिति (६।१।८) । पपाच । जजागार ।

२ । अजादेर्द्वितीयस्य ।

अजादेर्धातोर्द्वितीयस्यैकाचो द्वे भवत इत्यधिक्रियते । वक्ष्यति सन्यङो रिति (६।१।९) । अटिटिषति । प्रतीषिषति ।

३ । न न्द्राः संयोगादयः ।

अजादीनां धातूनां संयोगादिभूता नदरा न द्विरुच्यन्ते । उन्दिदिषति । अड्डिडिषति । अर्चिचिषति ।

(क) वकारस्याप्ययं निषेधः । उव्जिजिषति ।

(ख) यकारपरस्य रेफस्य न प्रतिषेधः । अरार्य्यते । अर्त्तिर्यङि चेति (७।४।३०) गुणः ।

(ग) ईर्ष्यतेस्तृतीयस्य । ईर्ष्यतेस्तृतीयस्य द्वे भवतः । तृतीयस्यैकाच इत्येके । ईर्षिषिषति ।

(घ) व्यञ्जनस्येत्यपरे । ईर्ष्यियिषति । ईर्ष्या यि: सन् वा द्विरिति चान्द्रं सूत्रम् ।

(ङ) कण्ड्वादीनाञ्च । तृतीयस्यैकाचो द्वे भवतः । कण्डूयियिषति । असूयियिषति ।

(च) वा नामधातूनाम् । तृतीयस्यैकाचो द्वे स्याताम् । अश्वीयियिषति । अशिश्वीयिषति वा ।

(छ) यथेष्टमपरे नामधातूनाम् । पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति वा । पुपुतित्रीयियिषतीत्यनार्षम् ।

४ । पूर्वोऽभ्यासः ।

द्विरुक्तस्य पूर्वोऽभ्याससंज्ञः स्यात् । दित्सति । धित्सति । ईप्सति । ईर्त्सति । धिप्सति । धिप्सुः । अत्र लोपोऽभ्यासस्ये-(७।४।५८) त्यभ्यासकार्य्यम् ।

५ । उभे अभ्यस्तम् ।

उभे द्विरुक्ते अभ्यस्तसंज्ञे स्याताम् । अदभ्यस्तात् (७।१।४) । ददति । बिभ्रति । नाभ्यस्ताच्छतु (७।१।७८) रिति नुम्निषेधः । ददत् । बिभ्रत् । उभे किम् ? ईप्सति । ऐप्सन् ।

६ । जक्षित्यादयः षट् ।

जक्षिर्धातुः । तदादयश्चान्ये षडभ्यस्तसंज्ञकाः स्युः । जक्षति । जाग्रति । दरिद्रति । चकासति । शासति । दीधीवेव्यौ छान्दसौ ।

जक्षिजागृदरिद्राणां चकासेः शासोरेव च ।
दीधीवेव्योश्च समानां जक्षित्यादावुपग्रहः ॥१॥

७ । तुजादीनां दीर्घोऽभ्यासस्य ।

छान्दसम् ।

८ । लिटि धातोरनभ्यासस्य ।

लिटि परतो धातोरकृतद्विरुक्तेर्द्वे स्याताम् । पपाच । जजागार । इयेष । उवोष । प्रोर्णुनाव । इयाय । अनभ्यासस्येति किम् ? पिपचतुः । पिपचुः ।

९ । सन्यङोः ।

सन्नन्तस्य यङन्तस्य च धातोर्द्वे स्याताम् । पिपक्षति । यियक्षति । समीचिक्षिषते । इण् प्रतीषिषति । यङ् । पापच्यते । अटाट्यते ।

१० । श्लौ ।

श्लौ द्वे स्याताम् । जुहोति । बिभेति । इयर्त्ति । ददाति ।

११। चङि।

द्वे स्याताम्। अपीपचत्। अममाचत्। पाचेश्चङि चिलोपः (६।४।५१)। उपधाह्रस्वत्वम् (७।४।१)। द्विवक्तिरिति क्रमः।

१२। दाश्वान्साह्वान्मीढ्वांश्च।

छान्दसम्।

(क) चआदीनां के द्वे। चअर्थे कः। चक्रम्। चिक्लिदम्।

(ख) वा चरिचलिपतिवदीनां द्वित्वमच्याक्चाभ्यासस्य। एषां पचाद्यचि द्विवक्तिर्वा स्यात्। वा अभ्यासस्याक्चागमः। तेन च इनादिशेषो (७।४।६०) बाध्यते। चराचरः। चलाचलः। पतापतः। वदावदः। पचे चरः। चलः। पतः। वदः। इत्येवार्थः।

(ग) हन्तेर्घत्वञ्च। हन्तेरचि द्वे स्यातां घनादेशोऽभ्यासस्याक्चागमः। घनाघनः। हन्तेरर्थः। उक्तं द्विर्वचनम्।

१३। ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे।

पुत्रपत्यो रुत्तरपदयोः ष्यङः संप्रसारणं स्यात्। कारीषगन्धीपुत्रः। कारीषगन्धीपतिः। जातुकर्णीपतिः। ताम्रकर्णीपतिः। तत्पुरुषे किम्? कारीषगन्ध्यापति ग्रामः।

१४। बन्धुनि बहुव्रीहौ।

बन्धावुत्तरपदे बहुव्रीहौ ष्यङः संप्रसारणं स्यात्। कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः। कौमुदगन्धीबन्धुः। बन्धुनीति क्लीबनिर्देशो रूपापेक्षः।

(क) मातच्मातृकमातृषु। ष्यङः संप्रसारणं विभाषा बहुव्रीहौ। कारीषगन्ध्यामातः कारीषगन्धीमातः वा। कालेय्यामातृकः कालेयी-मातृकः वा। (1) वाराह्यामाता वाराहीमाता वा। वचनसामर्थ्यात्। मातु-र्मातजादेशः। समासान्ताभावश्च।

---

(1) वक्ष्यमाणेन ईकारः कर्मिनष्टः। नद्यापश्च (७।१।८२) नित्यत ङन् (७।१।८४)। स्त्रियां ल्युट् (७।१।७८)। काशिका।

१५ । वचिस्वपियजादीनां किति ।

एषां किति संप्रसारणं स्यात् । वचे ब्रूञश्च । उक्तम् । उक्तवान् । उच्यते । असंयोगाल्लिट् कित् (१।२।५) । ऊचतुरूचुः । ऊचे । सुप्तः । सुप्यते । सुप्तम् । यजादयो नव ।

यजो वपो वहश्चैव वेञ्व्येञौ ह्वयतिस्तथा ।
वद्वसौ श्वयति श्चैव यजादयो नव स्मृताः ॥ १ ॥

इष्टम् । उप्तम् । ऊढम् । संवीतम् । निवृतम् । आहूतम् । उदितम् । उषितम् । उच्छूनम् । कथं सम्बदितम् ? वद स्थैर्ये ।

१६ । ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।

एषां ङिति किति च संप्रसारणं स्यात् । गृह्णाति । गृह्यते । जिनाति । जीयते । लिट्यन्यतरस्यामिति (२।४।४०) वेञो वयिः । ऊयतुः । ऊयुः । विध्यति । विद्धम् । वश उष्टः । उशन्ति । उशितवान् । उशितः । व्यच विचितम् । विचति । वृश्चति । वृक्णम् । पृच्छति । पृष्टम् । प्रश्नस्तु निपातनात् । भृज्जति । बरीभृज्यते । भृष्टम् ।

१७ । लिट्यभ्यासस्योभयेषाम् ।

लिटि वच्यादीनां ग्रह्यादीनाञ्चाभ्यासस्य संप्रसारणं स्यात् । उवाच । उवचिथ । इयाज । इयजिथ । ग्रहिवृश्चतिभृज्जतीनामुरत्त्व-(७।४।६६) रपरत्व-(१।१।५१) हलादिशेषे (७।४।६०) नैं विशेषः । जग्राह । पप्रच्छ । बभ्रज्ज । जिज्यौ । जिज्यिथ । हलादिशेषादिद मिष्टम् । विव्याच । विव्याध ।

१८ । स्वापेश्चङि ।

स्वापेश्चङि सम्प्रसारणं स्यात् । असूषुपत् । असूषुपताम् । असूषुपन् ।

१९ । स्वपिस्यमिव्येञां यङि ।

एषां यङि संप्रसारणं स्यात् । सोषुप्यते । सेसिम्यते । व्येञः वेवीयते । यङि किम् ? स्वप्नक् ।

२० । न वशः ।

वशो यङि संप्रसारणं न स्यात् । वावश्यते ।

२१ । चायः कौ ।

चायते र्यङि कौः स्यात् । चेकीयते । दीर्घग्रहणं यङ्लुगर्थम् । चेकीतः ।

२२ । स्फायः स्फी निष्ठायाम् ।

स्फायतेर्निष्ठायां स्फीः स्यात् । स्फीतः स्फीतवान् । निष्ठायां विधानं यावन्निडयङ्लोपेति (६।१।२८) । निष्ठायां किम् ? स्फातिः ।

२३ । स्त्यः प्रपूर्वस्य ।

प्रपूर्वस्य स्त्यायतेः संप्रसारणं स्यात् । प्रस्तीतः प्रस्तीतवान् । प्रस्तीमः प्रस्तीमवान् । प्रपूर्वस्य किम् ? संस्त्यानः । संस्त्यानवान् । पूर्वग्रहणं किम् । इहापि यथा स्यात् । प्रसंस्तीतः । प्रसंस्तीतवान् ।

२४ । द्रवमूर्त्तिस्पर्शयोः श्यः ।

अनयो रर्थयोः श्यैङः संप्रसारणं स्यात् । द्रवस्य मूर्त्तिः काठिन्यम् । शीनं घृतम् । शीना वसा । स्पर्शे । शीतं वर्त्तते । तद्‌योगाच्छीतो वायुः ।

२५ । प्रतेश्च ।

प्रतेः श्यैङस्तत् स्यात् । प्रतिशीनो विप्रः । प्रतिशीनवान् ।

२६ । विभाषाऽभ्यवपूर्व्वस्य ।

अभ्यवपूर्वस्य श्यैङस्तद्वा स्यात् । अभिशीनम् । अभिश्यानम् । अवशीन-मवश्यानम् । अभ्यवपूर्वस्येति पूर्वग्रहणं किम् ? अभिसंशीनम् । अभि-संश्यानम् ।

२७ । शृतं पाके ।

श्रातेः केवलस्य ण्यन्तस्य च पाके शृभावो निपात्यते । शृतं क्षीरम् । शृतं हविः । पक्वं पाचितं वा । क्षीरहविषोरेवाभिधानमेतेह । श्राणा श्रपिता यवागूः ।

२८ । प्यायः पी ।

प्यायतेर्निष्ठायां पीः स्यात् । पीनं मुखम् । पीनो बाहुः । सोपसर्गस्या-नभिधानान्नेह । प्रप्यानः ।

(क) आङ्पूर्वस्यान्धूधसोः । आङि प्यायतेः पीः स्यात् । आपीनोऽन्धुः । आपीनमूधः । अन्धूधसोः किम् ? "आप्यानस्कन्धकण्ठांग्रम्" । उक्तं निष्ठायाम् ।

२९ । लिड्यङोश्च ।

लिटि यङि च प्यायः पीः स्यात् । आपिप्ये । आपिप्याते । आपिप्यिरे । यङि । आपेपीयते ।

३० । विभाषा श्वेः ।

श्वयतेर्लिटि यङि च संप्रसारणं वा स्यात् । शुशाव शिश्वाय । शुशुवतुः । शिश्वियतुः । धातोरसम्प्रसारणे लिट्यभ्यासस्येत्यपि (६।१।१७) नेष्यते । यङि । शोशूयते । शेश्वीयते । शेश्वीयमानः ।

३१ । णौ च संश्चङोः ।

संश्चङ्परे णौ श्वेः सम्प्रसारणं वा स्यात् । शुशावयिषति शिश्वाययिषति । चङि । अशूशवत् । अशिश्वयत् । इह कृते संप्रसारणे वृद्ध्यावादेशौ ।

३२ । ह्वः संप्रसारणम् ।

ह्वयतेः संश्चङ्परे णौ नित्यं संप्रसारणं स्यात् । जुहावयिषति । अजूहवत् ।

३३ । अभ्यस्तस्य च ।

अभ्यस्तनिमित्तस्य ह्वयतेः सम्प्रसारणं स्यात् । ततो द्विरुक्तिः । जुहाव । जोहूयते । जुहूषति । "समरायैव समाजुहूषमाणः ।"

इह च्छन्दः सूत्रत्रयम् । (2)

(२) तत्र—(३४) बहुलं छन्दसि । ३५ । चायः की । ३६ । अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः-श्रितमाशीराशीर्त्ताः ।

३७। न संप्रसारणे संप्रसारणम्।

संप्रसारणे परे पुनस्तन्नास्ति। विद्धम्। विचितम्। यूना यूने। समानाङ्गस्येति वक्तव्यम्। इह मा भूत्। उपेयुषेति। अत्र विभक्तौ वस्वन्तमङ्गम्। ङसौ वसिति।

३८। लिटि वयो यः।

लिटि वयो यकारस्य संप्रसारणं नास्ति। जयतुः। जयुः।

३९। वश्चास्यान्यतरस्यां किति।

वयो यकारस्य लिटि किति वकारो वा स्यात्। जवतुः। जयतुः वा। जवुः। जयुः वा। "स्वमूयुर्वसुधामूवुः।" किति किम्? उवाय। उवयिथ।

४०। वेञः।

वेञो लिटि किति यजादित्वादकिति च लिट्यभ्यासस्येति (६।१।१७) प्राप्तं संप्रसारणं नास्ति। ववौ। ववतुः। ववुः।

४१। ल्यपि च।

वेञो ल्यपि तन्नास्ति। प्रवाय। प्रतिवाय।

४२। ज्यश्च।

ज्यो ल्यपि तन्नास्ति। प्रज्याय।

४३। व्यश्च।

४४। विभाषा परेः।

व्येञो ल्यपि तन्नास्ति। प्रव्याय। परे र्वा। परिवीय। परिव्याय। उक्तं संप्रसारणम्।

४५। आदेच उपदेशेऽशिति।

एजन्तस्य धातोरुपदेशे आत्वं स्यात् अशिति न शिदादौ। (3) ग्लै ग्लानः। ग्लातुम्। सुग्लः। जग्ले। जग्लौ। ग्लाता। सुग्लानम्। मम्लौ मम्ले। सुम्लः। अशिति किम्? ग्लायति। धातोरित्येव। गोभ्याम्। उपदेशे किम्? चेता।

---

(3) एजन्तोपदेशस्य धातो राकारः स्यादिति क्वचित् पाठान्तरम्।

४६ । न व्यो लिटि ।

व्येञो लिट्यात्त्वं नास्ति । संविव्याय । संविव्ययिथ । परिविव्याय । किन्तु संप्रसारणे परपूर्वाभ्यां नास्ति विशेषः । संविव्यतुः । संविव्युः ।

४७ । स्फुरतिस्फुलत्योर्घञि ।

चञ्ञानयोरेचः स्थाने आत्त्वं स्यात् । विस्फारः । विस्फालः । पक्षे षत्वम् (८।३।७७) । विष्फारः । विष्फालः ।

४८ । क्रीङ्जीनां णौ ।

एषां णौ पर एव आत्त्वं स्यात् । क्रापयति । अध्यापयति । अध्यापकः । जापयति । अर्त्तिह्रीत्यादिना (७।३।३७) पुक् ।

४९ । सिध्यतेरपारलौकिके ।

षिधु संराद्धावित्येतस्य णावेच आत्त्वं स्यात् । अर्थं साधयति । ग्रामं साधयति । अपारलौकिके किम् ? तपस्तापसं सेधयति । ज्ञानविशेषं लम्भयतीत्यर्थः । पारलौकिकग्रहणं ज्ञानविशेषोपलक्षणार्थमिति स्मृतिः ।

५० । मीनातिमिनोतिदीङां ल्यपि च ।

मीञ् डुमिञ् दीङां ल्यप्येजविषये च उपदेशे आत्त्वं स्यात् । प्रमाय । प्रमातव्यम् । निमाय । निमातव्यम् । उपदाय । उपदातव्यम् । घञि । उपदायो वर्त्तते । युचि । ईषदुपादानम् ।

५१ । विभाषा लीयतेः ।

लीनातिलीयत्योः परस्मैपद्यात्मनेपदिनोरयं यका निर्देशः सामान्यग्रहणार्थः । आत्त्वं वा स्याल् लप्येज्विषये चानयोः । विलाय विलीय । विलातासि विलेतासि । विलातासे विलेतासे । व्यवस्थितविभाषया प्रलम्भनशालीनीकरणयोर्नित्यमात्त्वम् । शिशुमुल्लापयते । श्येनो वर्त्तिकामुल्लापयते ।

(क) मीमिलियां खलचोः प्रतिषेधः । ईषन्मयः । विलयः । ईषन्निमयः । निमयः । निलयः ।

५२। खिदेश्छन्दसि।

छान्दसम्।

५३। अपगुरो णमुलि।

अस्य णमुलि परत एच आत्त्वं स्याद्वा। अस्यपगारं युध्यन्ते। अस्यपगोरं वा। द्वितीयायाञ्चेति (३।४।५३) णमुल्। पल्लवगारं नृत्यन्ति पल्लवगोरं वा।

५४। चिस्फुरोर्णौ।

अनयोर्णाविच आत्त्वं स्याद्वा। चिञ आत्त्वपक्षे पुक्। चापयति। स्फारयति। पक्षे वृद्धिगुणौ। चाययति। स्फोरयति।

५५। प्रजने वीयतेः।

प्रजनार्थस्य वीधातोर्णाविच आत्त्वं स्याद्वा। पुरोवातो गाः प्रवापयति। पक्षे प्रवाययति। प्रथमगर्भं ग्राहयतीत्यर्थः। सूत्रे यका निर्देशोऽजेर्व्यीत्यस्यापि (२।४।५६) ग्रहणार्थ इत्याहुः।

५६। बिभेतेर्हेतुभये।

प्रयोजकाद् भये भियो णाविच आत्त्वं वा स्यात्। मुण्डो भापयते। मुण्डो भीषयते। हेतुभये किम्? अहिना भाययति। करणादत्र भयम्।

५७। नित्यं स्मयतेः।

स्मिङो णौ नित्यमात्त्वं स्यात्। जटिलो विस्मापयते। भीस्म्योर्हेतुभय इत्यात्मनेपदम् (१।३।६८)। हेतुभय इत्येव। करणाद् विस्मये मा भूत्। "रूपेण विस्माययति विलोकीम्।" उक्तमात्त्वम्।

५८। सृजिदृशोर्झल्यमकिति।

सृजिदृशोर्झलादावकित्यमागमः स्यात्। गुणापवादः। स्रष्टा। द्रष्टा। अस्राक्षीत्। अद्राक्षीत्। अमि कृते वृद्धिः। अकिति किम्? सृष्टः। दृष्टः। दृष्टिः। सिसृक्षति। दिदृक्षते। झलि किम्? ससर्जिथ। ददर्शिथ।

५९। अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्।

अनुदात्तस्य ऋदुपधस्य धातो झलादावकित्यमागमः स्याद्वा। तर्प्ता त्रप्ता

तर्पिता वा। दर्प्ता द्रप्ता दर्पिता वा। अनुदात्तस्य किम्? इह उदात्तोपदेशः। वर्ढा। वर्ढुम्।

६०। शीर्षं छन्दसि।

६१। ये च तद्धिते।

यादौ तद्धितेऽर्थान्तरतम्याच् शिरसः स्थाने शीर्षन् स्यात्। शिरसि भवः शीर्षण्यः स्वरः।

(क) वा केशेषु। शीर्षण्याः केशाः। शिरस्या वा।

६२। अचि शीर्षः।

अजादौ तद्धिते शिरसः शीर्षः स्यात्। अचिति (६।४।१४७) प्रकृतिभावो मा भूत्। हास्तिशीर्षिः पुत्रः। स्थौलशीर्षं वपुः। मृगशिरसा युक्ता मार्गशीर्षी तिथिः।

६३। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु।

पाददन्तनासिकामासहृदयनिशासृगयूषदोर्यकृच्छकृदुदकासन (4) इत्येतेषां स्थाने यथासंख्यं पदादय आदेशाः स्युः। इह पद्दन्नोमासित्यत्र सूत्रे छन्दसीत्यनुवर्त्तत इत्यागमः। दृश्यन्ते च पाददन्ताद्यर्थे पद्दादिप्रयोगाः। पन्नगासुहृत्कीर्तितस्य च। दतो धावति सुदती। हृदि विनिहितरूपः। (5) असृग्ग्रस्तं निशि स्नानम्। पीते यूष्णि निरामयः। यद्दोष्णां भाति विंशतिरित्यादि। तदिमे ऽपशब्दा ऽत्येके। शब्दान्तराणीत्यन्ये। छन्दसीति नानुवर्त्तत इत्यपरे। छान्दसा अपि क्वचिद् भाषायां प्रयुज्यन्ते इति परे।

(क) नस् नासिकाया यत् तसि क्षुद्रेष्ववर्णनगरयोः। एषु नासिकाया नस् स्यात्। नस्यम्। नस्या। नस्तः पतितः। नः क्षुद्रः। नेह। नासिक्यो वर्णः। नासिक्यं नगरम्।

---

(4) इदं प्रामादिक मिति भट्टोजिः। आसशब्दस्यैवासन्नादेशः।

(5) षड्धिकदशनाडीचक्रमध्ये स्थितात्मा हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः। अविचलित-मनोभिः साधकैर्मृग्यमाणः स जयति परिनद्धः शक्तिभिः शक्तिनाथ इति मालतीमाधवपद्यम्।

६४ । धात्वादेः षः सः ।

उपदेश इत्येव। धातोरादिषकारस्य दन्त्यः स्यात्। षह सहते। षिच सिञ्चति। आदेशप्रत्यययोरिति (८।३।५९) षत्वव्यवस्थार्थं षोपदेशा धातवः पठ्यन्ते। तदुक्तम् भाष्ये—"अज्दन्त्यपराः षादयः षोपदेशाः स्मिङ्-स्विदिस्वदिस्वञ्जिस्वपयश्च। सृपिसृजिस्तृस्त्यासेकृसृवर्जमिति।"

(क) सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधः। षोडीयति। ष्ठीव्यति। ष्वष्कते।

६५ । णो नः ।

धात्वादिणकारस्य नः स्यात्। णत्वव्यवस्थार्थं णोपदेशा धातवः पठ्यन्ते। तदुक्तम् भाष्ये—"सर्वे नादयो णोपदेशा नृतिनन्दिनर्दिनक्किनाटिनाथृनाधृ-नृवर्जमिति"। नयति। नमति। प्रणयति। प्रणमति। परिणयति। सुब्धातोरयं प्रतिषेधः। नकारीयति।

६६ । लोपो व्योर्वलि ।

वलि परे व्योर्लोपः स्यात्। तत्र वलोप इत्यस्यैव सम्भवति। दिव् दिदिवान्। दिदिवांसो। जीवेरदानुक्। जीरदानुः। प्रसङ्गप्रोषिप्रणादौ तु प्रतिषेधः। यलोपः। क्नूयी क्नूतः। क्नूतवान्। गोधेरः। पचेरन्। इहाप्युक्तलोपाद् वलि लोप इष्टः। कण्डूः। लोलूः। वलि किम्? भवेयुः।

६७ । वेरपृक्तस्य ।

अपृक्तसंज्ञकस्य वेर्लोपः स्यात्। क्विन्। घृतस्पृक्। क्विप्। ग्रामणीः। ण्विः। पादभाक्। अपृक्तस्य किम्? जागृविः।

६८ । हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ।

एभ्यः सुतिप्सिपामपृक्तस्य हलो लोपः स्यात्। हलन्तात् सुलोपः। राजा। तक्षा। ङ्याबन्ताभ्यां दीर्घाभ्याम्। कुमारी। बहुश्रेयसी नृपः। खट्वा। दीर्घाभ्यां किम्? निष्कौशाम्बिः। अतिखट्वः। हल्ङ्याब्भ्यः किम्? ग्रामणीः। तिप्सिपो र्हलन्तादेव लोपसम्भवः। भवा नागर्तस्य अङि तिपि अबिभर्भवान्। अजागर्भवान्। "अपरस्तत्र परः पुमानजागः।"

अभिनत्त्वम्। अच्छिनत्त्वम्। अपृक्तस्य किम्? जागर्त्ति। हलिति किम्? बिभेद।

६९। एङ्ह्रस्वात् सम्बुद्धेः।

एङो ह्रस्वाच्च सम्बुद्धे र्हलो लोपः स्यात्। हे अग्ने। हे वायो। हे पटो। ह्रस्वात्। हे नाथ। हे वृक्ष। हे नदि। हे वधु। हे वनेत्यत्रापि पूर्वत्वे (६।१।१०७) कृते मकारमात्रस्य लोपः।

७०। शेश्छन्दसि बहुलम्।

छान्दसम्।

७१। ह्रस्वस्य पिति कृति तुक्।

ह्रस्वान्तस्य धातोः पिति कृति तुगागमः स्यात्। अग्निचित्। प्रकृत्य। संकृत्य। ह्रस्वस्य किम्? ग्रामणीः। आहृय। नेह। ग्रामणि कुलम्। ह्रस्वस्य बहिरङ्गस्यासिद्धेः। पिति किम्? चितम्। स्तुतम्। कृति किम्? पटुतरः।

७२। संहितायाम्।

अनुदात्तं पदमित्यतः (६।१।१५७) प्रागयमधिकारः।

७३। छे च।

छे परे ह्रस्वस्य तुगागमः स्यात्। इच्छति। गच्छति। चिच्छेद। चिच्छिदतुः। दधिच्छत्रम्। संहितायामित्येव। दधि छत्रम्।

"संहितैकपदे नित्या नित्या धातूपसर्गयोः।
सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया" ॥ १ ॥ (6) इति स्मृतिः।

७४। आङ्माङोश्च।

आङ्माङोश्च छे परे तुक् स्यात्। पदान्ताद्वेत्यस्य (६।१।७६) बाधा। आच्छादयति। मा च्छेत्सीत्।

---

(6) नित्या समासे वाक्ये तु सा विवक्षामपेक्षत इत्येके।

७५। दीर्घात्।

दीर्घाच्छे तुक् स्यात्। ह्रीच्छति। म्लेच्छति। छो चाच्छायते। छुप चोच्छुप्यते।

७६। पदान्ताद्वा।

पदान्ताद् दीर्घाच्छे तुक् स्याद्वा। नदीच्छाया नदीछाया। वधूच्छाया वधूछाया। उक्तस्तुक्सन्धिः।

७७। इको यणचि।

इकः स्थानेऽचि परे यण् स्यात्। दध्यत्र। मध्वत्र। कर्त्रत्र। संहितायामित्येव। दधि अत्र। मधु अत्र। कर्तृ अत्र।

(क) इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्। (7) दधियत्र। भ्वादयः। अचीति वर्त्तते यावत् संप्रसारणाच्चेति (६।१।१०८)।

---

(7) This is given as a वार्त्तिक by पुरुषोत्तम। But it does not occur in the वार्त्तिकपाठ by कात्यायन। Corresponding to this, there is a वार्त्तिक in अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6. 4. 77) viz :—इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम् and the भाष्यकार illustrates it thus :--तन्वं पुषेम तनुवं पुषेम। विष्वं पश्य विषुवं पश्य। स्वर्गं लोकं सुवर्गं लोकम्। त्र्यम्बकं यजामहे त्रियम्बकं यजामहे। So, as it is distinctly Scriptural (Vedic), it does not support such usage as त्रियम्बकं संयमिनं ददर्श। Nor is यणा व्यवधानं व्याडिगालवयोः (or as it is given by पुरुषोत्तम इकां यण्भिर्व्यवधानं व्याडिगालवयोः) of sufficient authority. The injunctions of the Grammarians such as गालव, शाकटायन &c, who had flourished before पाणिनि, are to be considered now as repealed. Wherever the sage had found them worth retention, he had preserved them e.g. अङ् गार्ग्यगालवयोः (7. 3. 99), वा सुप्यापिशलेः (6. 1. 92), इ, शाकल्यस्य (6. 1. 130), &c. Their other Rules are to be rejected. This is asserted and maintained by almost all the Brahminical Grammarians of the पाणिनि school such as भर्तृहरि, कैयट, हरदत्त, माधव, भट्टोजि, नागेश and others. Says कैयट in 5.2.21—"नियतकालाश्च स्मृतयो व्यवस्थाहेतव इति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभागः।" माधव (ie. सायनाचार्य) in his धातुवृत्ति asserts.

सूत्रवार्त्तिकभाष्येषु नायं पक्षः समर्थितः।
विवक्षुर्वेति तैरेवं न वयं बहु मन्महे॥ १॥

७८ । एचोऽयवायावः ।

एदोदैदौत्स्थानेऽचि परे अय् अव् आय् आव् इत्येते स्युः । चयनम् । लवनम् । चायकः । लावकः । कायति । गवित्याह । अस्मायाचष्टे । असावत्र ।

७९ । वान्तो यि प्रत्यये ।

एचो यादौ प्रत्यये वान्त आदेशः स्यात् । गव्यम् । बाभ्रव्यम् । नाव्यम् । गामिच्छति गव्यति । वान्तः किम् ? यान्तो मा भूत् । रायमिच्छति रैयति । प्रत्यये किम् ? गोयानम् । गव्यूतिशब्दस्तु क्रोशयोजनवदव्युत्पन्न एव ।

८० । धातोस्तन्निमित्तस्यैव ।

यादौ प्रत्यये तद्धेतोरेव धात्वेचो वान्त आदेशः स्यात् । लव्यम् । पव्यम् । अवश्यलाव्यम् । तन्निमित्तस्य किम् ? लौयमानिः पुत्रः ।

भट्टोजि in his शब्दकौस्तुभ on 1. 1. 27 clears the point further "यत्तु कश्चिदाह चान्द्रवर्मव्याकरणे द्वयशब्दस्यापि सर्वनामताभ्युपगमात् तद्रीत्यायं प्रयोग इति (व्यथा द्वयेषामपि मेदिनीभृतामिति माघे) तदपि न । मुनित्रयमतेनेदानीं साध्वसाधुप्रविभागः । तस्यैवेदानीन्तनशिष्टै र्वेदाङ्गतया परिगृहीतत्वात् । इतरस्ते हि नियतकालाः स्मृतयो यथा कलौ पाराशरी स्मृतिः ।"—Again in his प्रौढमनोरमा on यङ्लुक्—"यत्तु प्राचोक्तं धातुग्रहणेन यङ् लुकि वेति केचिदिति नैतत् त्रिमुनिमतमित्युपेक्षितम्। अर्वाचीनमतानामिषेव गतिः। किं बहुना ? काशकृत्स्नादिमतानामिव मुनित्रयविरोधे इदानीमग्रहणमेव। एतच्च कैयटहरदत्तादिग्रन्थे स्पष्टम् । मुनित्रयमध्येऽपि यथोत्तरं प्रामाण्यमाश्रित्य भाष्यानुरोधेनैव व्यवस्थेति भर्तृहरिकैयटहरदत्तादिसकलसम्मतम्। अतोऽर्वाचीनं यत्किञ्चिद्वचनं पुरस्कृत्य मनो न खेदनीयम्।' The reason for such attempts to justify a word, so rigidly in accordance with *Panini's* Grammar, is that the words which cannot be defended by the tripartite Grammar of पाणिनि, कात्यायन and पतञ्जलि are incorrect and impure Sanskrit. As for the आर्ष applications, the sages were pious and independent. Their asceticism and transcendantal power kept them free from pollution for using such अपशब्द । भट्टोजि remarks—"असाधव एवैते (आर्षप्रयोगाः) । विशङ्कुयाज्ययाजनादिवत् तपोमाहात्म्यशालिनां मुनीनामसाधुप्रयोगोऽपि नातीव बाधते । अस्मदादीन् प्रति तु स्मृतिपुराणाध्ययनविधिबलादेव तदन्तर्गतसत्पाठो न बाधकः । तथाच स्वातन्त्र्येणेदृशं प्रयुञ्जाना अस्मदादयः प्रत्यवयन्त्येवेति नदीसंज्ञासूत्रे (१।४।३) भाष्यकैयटयोरपि स्थितमिदम् ।"—शब्दकौस्तुभ (1. 4. 8). As for the reading त्रियम्बकं संयमिनं ददर्श in the कुमारसम्भव, the ancient Bengal MSS. had it thus :—

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपात [स्त्रि]यम्बकं संयमिनं ददर्श ॥ १ ॥

८१ । क्षय्यजय्यौ शक्यार्थे ।

एतौ शक्यार्थे निपात्येते । क्षेतुं शक्यः क्षय्यः । जेतुं शक्यो जय्यः । शक्यादन्यत्र क्षेयः । जेयः ।

८२ । क्रय्यस्तदर्थे ।

विक्रयार्थं प्रसारिते द्रव्ये क्रय्यो निपात्यते । क्रेयमन्यत्र ।

८३ । भय्यप्रवय्ये च च्छन्दसि ।

छान्दसम् ।

८४ । एकः पूर्वपरयोः ।

पूर्वपरयो रेकादेशो वाच्यः । अधिकारोऽयम् । प्राक् ख्यत्यात् परस्येति (६।१।११२) । वक्ष्यत्याद् गुणः (६।१।८७) । द्वयोरेकादेशो भवति । खट्वेन्द्रः ।

८५ । अन्तादिवच्च ।

स एकादेशः पूर्वं प्रत्यन्तवत् परं प्रत्यादिवच्च विज्ञेयः । धीबन्धूः । धीबन्धूभ्याम् । पूर्वान्तवत्त्वे स्वादयः । ह्रचौ पटौ । परादिवत्त्वे सुबिति पदत्वम् (१।१।१४) । वर्णाश्रये नान्तादिवत् । खट्वाभिः । ऐस् न भवति ।

८६ । षत्वतुकोरसिद्धः ।

षत्वे तुकि च कर्त्तव्ये स एकादेशोऽसिद्धः स्यात् । कोऽसिचत् । योऽसिचत् । कोऽस्य । योऽस्य । एङः पदान्तदतीत्यस्यासिद्ध त्वाद् (६।१।१०९) इणः इति (८।३।५७) षत्वं न भवति । अधीत्य । प्रेत्य । ह्रस्वस्य तुग् भवति (६।१।७१) ।

(क) सम्प्रसारणङीट्सु प्रतिषेधो वक्तव्यः । षत्वं तुग्विकल्पश्च यथा स्यात् । शकं ह्वयति । शकहूषु । क्विपि संप्रसारणम् । ह्रत्तेच्छत्रम् । ह्रत्तेछत्रम् । ह्रट् । मपचेच्छत्रम् । मपचे छत्रम् ।

८७ । आद् गुणः ।

अवर्णान्तादचि द्वयोरेकादेशो गुणः स्यात् । तवेदम् । धनेन्द्रः । धनेशः । खट्वेयम् । खट्वेन्द्रः । खट्वेशः । खातोदकम् । गङ्गोदकम् । तवर्षिः । तवर्श्यः । खट्वर्श्यः । महर्षिः । तवल्कारः । खट्वल्कारः ।

८८ । वृद्धिरेचि ।

अवर्णान्तादेचि परे वृद्धिः स्यात् । तवैड़का । खट्वैड़का । तवैतिकायनः । गङ्गौघः । ममौपगवः ।

८६ । एत्येधत्यूट्सु ।

अवर्णान्तादेत्येधत्योरेचि ऊठि च परे वृद्धिः स्यात् । उपैति । उपैषि । प्रैति । प्रैधते । परैधते । धौतम् । धौतवान् । प्रष्ठौहः । एचीत्येव । उपेतः । उपेथः । अवेहि । अपेहि ।

(क) प्रादूहोढोढ्येषैष्येषु । प्रशब्दादूढादौ वृद्धिः स्यात् । प्रौढ़ः । प्रौढिः । प्रैषः । प्रैष्यः । इषे घञ्ण्यतौ ।

(ख) स्वादीरेरिणोः । वृद्धिः स्यात् । स्वैरम् । स्वैरी । स्वैरिणी बन्धकी ।

(ग) ऋते च तृतीयासमासे । वृद्धिःस्यात् । सुखार्त्तः । दुःखार्त्तः । क्षुधार्त्तः । कामार्त्तः ।

(घ) प्रवत्सरकम्बलवसनदशार्णानामृणे । वृद्धिः स्यात् । प्रार्णम् । वत्सरार्णम् । कम्बलार्णम् । वसनार्णम् । दशार्णम् । ऋणार्णम् । अक्षौहिणी-शब्दस्तु परिमाणविशेषस्य संज्ञा । अत्रादूहिन्यामिति व्युत्पत्तिमात्रम् । नान्वयः ।

६० । आटश्च ।

अचीत्येव । आटोऽचि वृद्धिः स्यात् । ऐक्षत । ऐक्षिष्ट । औक्षीत् । और्णावीत् । आर्ध्नोत् ।

६१ । उपसर्गादृति धातौ ।

अवर्णान्तात् प्रादेर् ऋकारादौ धातौ वृद्धिः स्यात् । प्रार्च्छति । उपार्च्छति । आर्त्तः ।

६२ । वा सुप्यापिशलेः ।

उपसर्गादृति सुब्धातौ वृद्धिर्वा स्यात् । उपार्षभीयति । उपर्षभीयति । ऋकारलृकारयोः सावर्ण्यात् । उपाल्कारीयति । उपल्कारीयति । आपिशलि-ग्रहणं पूजार्थम् ।

९३। औतोऽम्शसोः।

ओत आकारः स्यादमि शसि च परे। गां पश्य। गाः पश्य। द्यां पश्य। द्याःपश्य। सुपीत्येव। अचिनवम्। अकरवम्। ओतः किम्? ग्लावम्।

९४। एङि पररूपम्।

अवर्णान्तादुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात्। हसेर्बाधा। प्रेलयति। प्रोखयति। केचित्तु सुप्यापिशलेः(६।१।९२) रित्यनुवर्त्तयन्ति सुब्धातोर्विकल्पार्थम्। उपेडकीयति। उपैडकीयति।

(क) शकन्ध्वादिषु पररूपं वक्तव्यम्। शकन्धुः। कर्कन्धुः। कुलटा। सीमन्तः केशेषु। सीमान्तोऽन्यः। गन्धर्वः। (8) मर्त्तण्डः। समर्थनम्। हलीषा। लाङ्गलीषा। मनसो लोपश्च। मनीषा। केनोभ्यते कुम्भः। शुद्धोदनः।

(ख) ओत्वोष्ठयोः समासे वा। स्थूलोतुः स्थूलौतुः। बिम्बोष्ठी। बिम्बौष्ठी। समासे किम्? पश्यौष्ठम्।

(ग) एवे चानियोगे। इहएव इहेव। अद्येव। नियोगे तु। इहैव भव मा गाः। "अद्येव नाधिशयितो रुधिरार्द्रशय्याम्।"

९५। ओमाङोश्च।

अवर्णान्तादोम्याङि च परे पररूपमेकादेशः स्यात्। का ओमिति कोमिति। सोमित्यवोचत्। आ ऊढा ओढा। अद्योढा। कदोढा। आ इहि एहि। उपेहि। (9) अवेहि। वृद्धिरेचीत्यस्यापवादः (६।१।८८)। आ ऋच्छति अर्च्छति। उपार्च्छति। इह तु सवर्णदीर्घं (६।१।१०१) बाधते।

९६। उस्यपदान्तात्।

अपदान्तादवर्णादुसि परे पूर्वपरयोः पररूपमेकादेशः स्यात्। आद्गुणापवादः (६।१।८७)। भिन्द्या उस् भिन्द्युः। छिन्द्युः। अद्युः। अधुः। अपदान्तात् किम्? का उस्रा कोस्रा। कोषिता।

---

(8) अश्वमर्वतीति। अश्मनश्चार्थमर्दशनम्। "अद्दर्शनमशिवं शिवदूती चकार ह" इति देवीमाहात्म्ये। अश्वोः कतम इति सौवः।

(9) तादृशेह महाराज अत्र परमेश्वरोमिति आर्षः प्रयोगः।

(वा) उस्रोमाङ्ष्वाट: प्रतिषेध इति भाष्यम् । उस्रामैच्छत् । औस्रीयत् । ओमि औङ्कारीयत् । आङि । औढ़ीयत् ।

९७ । अतो गुणे ।

अपदान्तादतो गुणे पररूपं स्यात् । पचन्ति । पचे । यजे । अत:किम् । यान्ति । यात: पश्य । गुणे किम् ? अपचे । अपदान्तादित्येव । दण्डाग्रम् ।

९८ । अव्यक्तानुकरणस्यात इतौ ।

अस्फुटानुकरणस्याच्छब्दस्येतिशब्दे परे पररूपं स्यात् । पटदिति पटिति । दमदिति दमिति । (10) अव्यक्तानुकरणस्य किम् ? जगदिति । अत: किम् ? मरुदिति । इतौ किम् ? पटदत्र । श्रदिनि नास्ति । अनभिधानात् । कथं घटदिति गम्भीरै रम्बुदैर्नदितमिति ? दान्तमनुकरणम् ।

९९ । नाम्रेड़ितस्यान्त्यस्य तु वा ।

पूर्वो विधिराम्रेड़ितस्य न स्यात् । आम्रेड़ितस्य अव्यक्तानुकरणस्य योऽच्छब्द स्तस्येतौ पररूपं न स्यात् । अन्त्यस्य तु तकारस्य वा । पटत्पटदिति करोति पटत्पटेति करोति वा । नित्यवीप्सयो (८।१।४) रिति द्विरुक्तिः ।

१०० । नित्यमाम्रेड़िते डाचि ।

अव्यक्तस्य अच्छब्दस्यान्त्यस्य डाजन्ते आम्रेड़िते परे नित्यं पररूपं स्यात् । पटपटाकरोति । पटपटाकृत्य । दमदमाकृत्य । डाचि बहुलमिति (८।१।१२, वा) द्विरुक्तिः । ततष्टिलोप: ।

१०१ । अक: सवर्णे दीर्घ: ।

सवर्णेऽचि अको दीर्घ: स्यात् पूर्वपरयो: । दण्डाग्रम् । शैलाग्रम् । वनाग्रम् । तवास्यम् । लताग्रम् । योषास्यम् । महीन्द्र: । नदीहते । मधूष्णम् । मधूपमम् । वधूढ़ा । होतृश्य: । सवर्णे किम् ? दध्यत्र । अचीत्येव । कुमारी शेते ।

(वा) ऋति ॠ वा । ऋकारे सवर्णे परे ॠरित्ययं द्विमात्रो रेफभागद्वययुक्त आदेशो वा स्यात् । पितॄॠणम् पितृॠणम् । पक्षे एकरेफ एव दीर्घ: । पितॄणम् ।

---

(10) तड़िति तिसतुलां यान्यनिन्द्रा युगान्त इति सूर्यशतके ।

(ख) ऋति ऋर्वा। ऋकारे सवर्णे द्विलकारभागयुक्तो ऋकारो वा स्यात्। होतृऌकार: होतॄकार:। पक्षे ऋतो दीर्घस्याभावाद्ऋकारऌकारयो: सावर्ण्यादेकारेफ एव दीर्घ ॠकार:। होतॄकार:।

१०२। प्रथमयो: पूर्वसवर्ण:।

प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ: स्यात्। वृक्षा:। वृक्षान्। अग्नी। वायू। अग्नीन्। वायून्। बुद्धी:। अचीत्येव। वृक्ष:। अकइत्येव। गावौ।

१०३। तस्माच्छसो न: पुंसि।

अनन्तरदीर्घाच्छसोऽवयवस्य न: स्यात्। वृक्षान्। घटान्। माधवकान्। पर्वतान्। प्लक्षान्। अग्नीन्। गिरीन्। पटून्। पितॄन्। नॄन्। कर्तॄन्। तस्मात् किम्? गा: पश्य। पुंसि किम्? चञ्चा:। वध्रिका: पश्य। बुद्धी:। धेनू:। मातॄ:।

१०४। नादिचि।

अवर्णान्तादिजाद्यो: प्रथमयो: पूर्वसवर्णदीर्घो न कर्त्तव्य:। वृक्षौ। खट्वे। कुण्डे। आदिति किम्? अग्नी। इचि किम्? वृक्षा:।

१०५। दीर्घाज्जसि च।

दीर्घादिचि जसि च पूर्वसवर्णदीर्घो न स्यात्। नद्यौ। धीवन्ध्वौ। जसि। नद्य:। धीवन्ध्व:। खट्वा स्थिष्ठन्तीत्यक: सवर्णे दीर्घ: (६।१।१०१)।

१०६। वा छन्दसि।

छान्दसम्।

१०७। अमि पूर्व:।

अकोऽमि परे पूर्वरूपमेकादेश: स्यात्। वृक्षम्। खट्वाम्। अग्निम्। नदीम्। वायुम्। वधूम् पश्य।

१०८। सम्प्रसारणाच्च।

सम्प्रसारणादचि परे द्वयो: पूर्वरूप मेकादेश: स्यात्। इष्टम्। उप्तम्।

अढ़म् । आहृतम् । गृहीतम् । कथं शकन्ध्वर्थम् । जातौ पदार्थे कृतकत्वात् कार्य्यस्य ।

१०९ । एङः पदान्तादति ।

एङोऽति परे पूर्वरूपमेकादेशः स्यात् । अग्नेऽत्र । पटोऽत्र । वायोऽत्र । पदान्तात् किम् ? नयनम् । लवनम् । अति किम् ? पटविह । तपरः किम् ? वायवायाहि ।

११० । ङसिङसोश्च ।

एङो ङसिङसोरति परे पूर्वरूप मेकादेशः स्यात् । गिरेरागतम् । गिरेः स्वम् । गुरोरागतम् । गुरोः स्वम् ।

१११ । ऋत उत् ।

ऋकारान्तात् ङसिङसोरति परे पूर्वपरयोरेकादेश उत्वं स्यात् । होतुरागच्छति । पितुराज्ञा । उन्न एकादेशः ।

११२ । ख्यत्यात् परस्य ।

खितिशब्दौ ह्रस्वौ खीतीशब्दौ दीर्घौ वा कृतयणादेशौ ख्यत्यौ । ताभ्यां परस्य ङसिङसोरत उत्वं स्यात् । सख्युरायाति । सख्युःस्वम् । पत्युरागतम् । पत्युःस्वम् । क्यजन्तात् सखीयतेः क्विप् प्रत्ययः सखीः । सख्युः । पतीः पत्युः । कथं लून्युः पून्युः चाम्युः ? नत्वमत्वे पूर्वत्रासिद्धम् (८।२।१) ।

११३ । अतो रोरप्लुतादप्लुते ।

अतीत्येव । अतः परस्य रो रेफस्याति परे उकारः स्यात् । वृक्षोऽत्र । नभोऽत्र । आश्रयाद्रोरसिद्धत्वं नास्ति । अतः किम् ? अग्निरत्र । तपरः किम् ? वृक्षा अत्र । रोः किम् ? स्वरत्र । प्रातरत्र । अतीत्येव । वृक्षवृक्ष । पुनस्तपरः किम् । वृक्ष आश्रितः ।

११४ । हशि च ।

हशि परे अत उत्तरस्य रो रेफस्योत्वं स्यात् । विप्रो हसति । विप्रो याति । देवो वर्षति ।

११५। प्रकृत्यान्तःपादमव्यपरे।

प्रकृत्येत्यधिकारोऽयम्। शेषश्छान्दसः। इह च्छन्दःषट्सूत्री। (11)

१२२। सर्वत्र विभाषा गोः।

सर्वत्रेति छन्दोऽधिकारनिवृत्त्यर्थम्। मण्डूकप्लुत्या एङोऽतीति वर्त्तते। अति परे गोरेङ् प्रकृत्या स्याद्वा। गो अस्थि गोऽस्थि गवास्थि वा। गो अग्रम्। गोऽग्रम्। गवाग्रं वा।

१२३। अवङ् स्फोटायनस्य।

अतीति निवृत्तम्। अचीति वर्त्तते। गोरचि परे अवङ् वा स्यात्। गवाजिनम्। गवोष्ट्रम्। पक्षे गो अजिनम्। गोऽजिनम्। गवुष्ट्रम्। ग उष्ट्रम् (12)। व्यवस्थितविभाषया नित्यं गवाक्षः। विभाषानुवृत्तौ स्फोटायन-ग्रहणं पूजार्थम्।

१२४। इन्द्रे च नित्यम्।

गोरिन्द्रे नित्यमवङ् स्यात्। गवेन्द्रः।

१२५। प्लुतप्रगृह्या अचि।

प्लुत इति स्वरभागः। प्रगृह्यसंज्ञका अचि नित्यं प्रकृत्या स्युः। अग्नी अत्र। वायू इमौ। पचेते इमा। अत्र नित्यानुवृत्तिः किम्? इकोऽसवर्णे ह्रस्वो मा भूत् (६।१।१२७)।

१२६। आङोऽनुनासिकश्छन्दसि।

छान्दसम्।

१२७। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च।

पदान्तादित्येव। पदान्तस्येकोऽसवर्णेऽचि प्रकृतिभावो ह्रस्वश्च शाकल्यस्य

---

(11) ११६। अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। ११७। यजुष्युरः। ११८। आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे। ११९। अङ्ग इत्यादौ च। १२०। अनुदात्ते च कुधपरे। १२१। अवपथासि च।

(12) अत्र वकारात् परस्य पदान्तवकारस्य लोपः शाकल्यस्येति (८।३।१९) वैकल्पिको लोपः।

भवतः (13)। दधि अत्र। कुमारि अपि। नदि आयाति। वधु ऋतुः। पदान्तानुवृत्तिः किम्? कुमार्य्यौ कुमार्य्यः।

(क) सिन्नित्यसमासयोः शाकलप्रतिषेधः। ऋत्वियः। छन्दसि घस् (५।१।१०६)। नित्यसमासे। व्याकरणम्। कुमार्य्यर्थम्। (14)

१२८। ऋत्यकः।

ऋति परेऽकः शाकल्यस्य मतेन (15) प्रकृत्या स्युः। ह्रस्वश्च। स्थूल ऋश्यः। हिम ऋतावपि ता भृशस्विदः। उच्चारितरुचिरऋचाख्याननाना-ऋतुर्णाम्। खट्व ऋश्यः। होतृ ऋश्यः। अकः किम्? ह्रदे ऋश्यः ह्रदयृश्यः। उक्तः प्रकृतिभावः।

१२९। अप्लुतवदुपस्थिते।

१३०। ई३ चाक्रवर्मणस्य।

सूत्रद्वय छान्दसम्।

१३१। दिव उत्।

पदान्तग्रहणमनुवर्त्तते। दिवः पदान्तस्योत् स्यात्। विमलद्यु दिनम्। व्यपदेशिवद्भावात् पदान्तत्वे द्युकामः। द्युमनाः। द्युभ्याम्। द्युभिः। निरनुबन्धकस्य ग्रहणान्नेह। अक्षद्यूभ्याम्। अक्षद्यूभिः। पदान्तस्य किम्? दिवौ दिवः।

१३२। एततदोः सुलोपोऽकोरनञ्समासे हलि।

एततदोर्हलि सुलोपः स्यात्। एष दाता। स भोक्ता। अकोः किम्?

---

(13) शाकल्यग्रहणादयं प्रकृतिभावो वैकल्पिक एव। अतः पक्षे संहितायां दध्यत्र। कुमार्य्यपि। नद्यायाति। वध्वृतुः।

(14) वार्त्तिककारः केवलं नित्यसमास एव शाकलप्रतिषेधं कृतवान्। भाष्यकारस्तु समासमात्रे। तथाच भाष्यम्—"नित्यग्रहणेन नार्थः। सित्समासयोः शाकलं न भवतीत्येव। इदमपि सिद्धं भवति। वाप्यामश्वो वाप्यश्वः। नद्यामातिर्नद्याति"रिति। तेनात्र समासे संहिताया अभावकृतसंस्कृतिरेव। यथोत्तरं मुनीनां प्रामाण्यात्।

(15) अयं प्रकृतिभावः समासेऽपि स्यात्। यथा हिमऋतौ। उच्चारितरुचिरऋचाम्। वैकल्पिकश्च। अतः पक्षे स्थूलर्श्यः। हिमर्त्तौ। उच्चारितरुचिरर्चाम्। खट्वर्श्यः। होतॄर्श्यः होतृश्यो वा।

एकको दाता। सको भोक्ता। अनञ्समासे किम्? अनेषो ददाति। "प्रतीयते संप्रति सोऽप्यसः परैः"। हलि किम्? एषोऽत्र। इत्यत्सुःसूत्रद्वयम्।

१३३। स्यश्छन्दसि बहुलम्।

१३४। सोऽचि लोपे चेत् पादपूरणम्।

अत्र ऋक्पादपूरणं श्लोकपादपूरणञ्च गृह्यते। तेन

सैष दाशरथी रामः सैष राजा युधिष्ठिरः।
सैष कर्णो महात्यागी सैष भीमो महाबलः॥१॥

इति भाषायामपि स इत्यस्याचि सुलोप इत्येके।

१३५। सुट् कात् पूर्वः।

१३६। अड़भ्यासव्यवायेऽपि।

एतद्द्वयमधिक्रियते। टकारः सङ्सुट्सुलक्षामिति (८।३।७०) विशेषणार्थः।

१३७। सम्पर्य्युपेभ्यः करोतौ भूषणे।

एभ्यो भूषणार्थे करोतौ कात् पूर्वः सुट् स्यात्। संस्करोति। परिष्कारः। उपस्क्रियते। उपस्कारः। उपस्कर्त्तव्यः। अड़भ्यासव्यवायेऽपि। समस्कार्षीत्। सञ्चस्कार। भूषणे किम्? उपकरोति। यत्किञ्चिदमनित्याः सर्वे संस्काराः सर्वं संस्कृतमनित्यमिति कार्य्यपर्य्यायः संस्कृतशब्दः सोऽव्युत्पन्न एव।

१३८। समवाये च।

अथ तेभ्यः कृञि सुट् स्यात्। संस्कृतम्। परिष्कृतम्। उपस्कृतम्। समवेतमित्यर्थः।

१३९। उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु।

उपात् करोतावेषु सुट् स्यात्। प्रतियत्ने। एधो दकस्योपस्कुरुते। विकृतमेव वैकृतम्। उपस्कृतं भुङ्क्ते। गम्यमानार्थस्य वाक्यस्योपा-

दार्णं वाक्याध्याहारः । "उपस्कृतं जल्पति नित्य मेषः कथन्नु भो निर्विगुणः पदार्थम्" ।

१४० । किरतौ लवने ।

उपात् किरतौ कात् पूर्वः सुट् स्यात् । उपस्कीर्य्य लुनन्ति । लवने किम् ? उपकिरति पुष्पम् ।

१४१ । हिंसायां प्रतेश्च ।

प्रत्युपाभ्यां किरतौ हिंसायां सुट् स्यात् । प्रतिस्कीर्णः । उपस्कीर्णो विप्रः । "उरोविदारं प्रतिचस्करे नखैः" । उपस्कीर्णो दस्युः । हिंसापूर्वकं विक्षिप्त इत्यर्थः ।

१४२ । अपाच्चतुष्पाच्छकुनिष्वालेखने ।

किरतौ अपाच्चतुष्पाच्छकुनिषु यदालेखनं तत्र सुट् स्यात् । हर्षजीविका-कुलायकरणेष्वभिधानम् । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्षार्थी । अपस्किरते श्वा आश्रयार्थी । अन्यत्रापकिरति श्वा ओदन-पिण्डमाश्रितः ।

१४३ । कुस्तुम्बुरूणि जातिः ।

ससुट्कमिदं निपात्यते जातिश्चेत् । बहुवचनमतन्त्रम् । कुस्तुम्बुरु-र्धान्याकम् । कुस्तुम्बुरूणि तत्फलानि ।

१४४ । अपरस्पराः क्रियासातत्ये ।

अपरस्परा इति क्रियासातत्ये ससुट्कं निपात्यते । अपरस्पराः सार्था गच्छन्ति । अविच्छेदेन यान्तीत्यर्थः । सातत्ये किम् ? अपरपरा यान्ति । इह सातत्यशब्दप्रसङ्गादागतभाष्यवाक्यार्थं गृहीत्वा कस्यचिच्छ्लोकः ।

लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि ।
समो वा हिततयो र्मांसस्य पचि युड्घञोः ॥१॥ इति ।

अवश्यलाव्यम् । अवश्यस्तुत्यम् । संहितायामित्येव । अवश्यं वक्तव्य मिति भाष्ये व्यवस्थितम् । तुमुनः समस्य काममनसोरवश्यं लुम्पेत् । भोक्तु-कामः । भोक्तुमनाः । सम्यक् कामोऽस्य सकामः । समनाः । वा हित-

ततयोश्च। सम इत्येव। सहितम्। संहितम्। सततम्। सन्ततम्। "सततं निशामयन्त उत्सुकाः" व्यवस्थितविभाषया नित्यं सातत्यमिति श्रुतिरस्ति। मांसस्य पचि युड्घञोरिति। अन्त्यलोपो वा। मांस्पचनम्। मांसपचनम्। मांस्पाकः (16)। मांसपाकः। सूत्रार्थे केचिदनुस्वारस्य च लोप मिच्छन्ति। मास्पचनम्। मास्पाक इति। तत् तु तन्त्रभाष्यवाक्यस्या-भावात् सन्दिग्धमिति भागवृत्तिः।

१४५। गोष्पदं सेवितासेवितप्रमाणेषु।

सुट्षत्वाभ्यामिदं निपात्यते। गोभिः सेवितो गोष्पदो देशः। अविद्य-मानसेवितान्यगोष्पदान्यरण्यानि। प्रमाणे गोष्पदं क्षेत्रम्। गोष्पदपूरं वृष्टो देवः।

१४६। आस्पदं प्रतिष्ठायाम्।

सुटि निपात्यते। को नामास्पदं त्याजितः? प्रतिष्ठामित्यर्थः। अन्यत्रापदम्।

१४७। आश्चर्य्यमनित्ये।

अनित्यमागन्तुक मद्भुतम्। तत्राश्चर्य्यं स्यात्। आश्चर्य्यमबन्धन मन्तरीक्षाच्च पतति नक्षत्रचक्रम्। अद्भुते किम्। आचर्य्यं कर्म शोभनम्।

१४८। वर्चस्केऽवस्करः।

कुत्सितं वर्चो वर्चस्कम्। तत्रावस्करः स्यात्। अवकरोऽन्यत्र।

१४९। अपस्करो रथाङ्गम्।

अयमच निपात्यते।

१५०। विष्किरः शकुनि र्विकिरो वा।

वा सुटि विष्किरो विकिरश्च स्यात् शकुनिश्चेत्।

---

(16) मांस्पचनं मांस्पाक इत्यत्राऽयस्यादित्वेन (१।४।२०) भत्वात् संयोगान्तलोपो (८।२।२) न। मां-स्पच्या उखाया इति भाष्यकारप्रयोगमालोच्य।

१५१ । इक्ष्वाकुचन्द्रोत्तरपदे मन्त्रे ।

छन्दःसूत्रमेकम् ।

१५२ । प्रतिष्कशश्च कशेः ।

कशेः सौत्रात् पचाद्यचि सुटि षत्वं निपात्यते । प्रतिष्कशः पुरोयायी । कशेः किम् ? कशां प्रतिगतः प्रतिकशोऽश्वः ।

१५३ । प्रस्कण्वहरिश्चन्द्रावृषी ।

इमौ निपात्येते ऋषी चेत् ।

१५४ । मस्करमस्करिणौ वेणुपरिव्राजकयोः ।

मस्करो वेणुः स्यात् । मा कृषत कर्माणि शान्तिर्वः श्रेयसीति माकरण-शीलो मस्करी परिव्राजकः । अन्यत्र मकरो ग्राहः । मकरी समुद्रः ।

१५५ । कास्तीराजस्तुन्दे नगरे ।

इमे निपात्येते । कास्तीरं नाम नगरम् । अजस्तुन्दं नाम नगरम् ।

१५६ । कारस्करो वृक्षः ।

कारकरोऽन्यत्र ।

१५७ । पारस्करप्रभृतीनि च संज्ञायाम् ।

अमूनि नामानि यथापाठं साधूनि स्युः । पारस्करो देशः । रथस्या नदी । किष्किन्धः पर्वतः । किष्कुः । वनस्पतिः । "परःशताद्या स्ते येषां पराः संख्याःशतादिकात् ।"

(क) तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च । तस्करश्चोरः । बृहस्पति र्देवता ।

(ख) प्रायस्य चित्तिचित्तयोः । प्रायश्चित्तिः । प्रायश्चित्तम् । आकृति-गणोऽयम् । पूर्वे योगा अस्यैव प्रपञ्चाः । उक्तः सुट् । इदानीं स्वरसूत्राणि

यावदलुगुत्तर पद इति (६।३।१)। भाषायां तु स्वरलक्षणं न निबध्यते। स्वरस्य लोकाप्रचारदर्शनादित्युक्तम्। (17)

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

षष्ठाध्यायस्य प्रथमः पादः ॥६।१॥

समाप्तश्चैकाच्पादः ॥

---

(17) The aphorisms omitted here in the text are given below to have the सूत्रपाठ complete.

१५८। अनुदात्तं पदमेकवर्जम्। १५९। कर्षात्वतो घञोऽन्त उदात्तः। १६०। उञ्छादीनाञ्च।
१६१। अनुदात्तस्य च यत्रोदात्तलोपः। १६२। धातोः। १६३। चितः। १६४। तद्धितस्य।
१६५। कितः। १६६। तिसृभ्यो जसः। १६७। चतुरः शसि।
१६८। सावेकाचस्तृतीयादि र्विभक्तिः। १६९। अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे।
१७०। अञ्चेश्छन्दस्यसर्वनामस्थानम्। १७१। ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः।
१७२। अष्टनो दीर्घात्। १७३। शतुरनुमो नद्यजादी।
१७४। उदात्तयणो हल्पूर्वात्। १७५। नोङ्धात्वोः। १७६। ह्रस्वनुड्भ्यां मतुप्।
१७७। नामन्यतरस्याम्। १७८। ङ्याश्छन्दसि बहुलम्। १७९। षट्त्रिचतुर्भ्यो हलादिः।
१८०। झल्युपोत्तमम्। १८१। विभाषा भाषायाम्। १८२। न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः।
१८३। दिवो झल्। १८४। नृ चान्यतरस्याम्। १८५। तित् स्वरितम्।
१८६। तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः।
१८७। आदिः सिचोऽन्यतरस्याम्। १८८। स्वपादिर्हिंसामच्यनिटि। १८९। अभ्यस्तानामादिः।
१९०। अनुदात्ते च। १९१। सर्वस्य सुपि। १९२। भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति।
१९३। लिति। १९४। आदिर्णमुल्यन्यतरस्याम्। १९५। अचः कर्तृयकि।
१९६। थलि च सेटीडन्तो वा। १९७। ञ्नित्यादिर्नित्यम्।
१९८। आमन्त्रितस्य च। १९९। पथिमथोः सर्वनामस्थाने। २००। अन्तश्च तवै युगपत्।
२०१। क्षयो निवासे। २०२। जयः करणम्। २०३। वृषादीनाञ्च।
२०४। संज्ञायामुपमानम्। २०५। निष्ठा च द्व्यजनात्। २०६। शुष्कधृष्टौ।
२०७। आशितः कर्ता। २०८। रिक्ते विभाषा। २०९। जुष्टार्पिते च च्छन्दसि।
२१०। नित्यं मन्त्रे। २११। युष्मदस्मदोर्ङसि। २१२। ङयि च। २१३। यतोऽनावः।
२१४। ईडवन्दवृशंसदुहां ण्यतः। २१५। विभाषा वेण्विन्धानयोः। २१६। त्यागरागहासकुहश्वठक्रथानाम्।
२१७। उपोत्तमं रिति। २१८। चङ्यन्यतरस्याम्। २१९। मतोः पूर्वमात् संज्ञायां स्त्रियाम्।
२२०। अन्तोऽवत्याः। २२१। ईवत्याः। २२२। चौ। २२३। समासस्य। इति।

अथ

भाषावृत्तिः।

षष्ठोऽध्यायः। तृतीयः पादः।

१। अलुगुत्तरपदे। (18)

उत्तरपदेऽलुग् वाच्यः। अधिकारोऽयमा पादपरिसमाप्तेः।

---

(18) Though the द्वितीयपाद of the षष्ठाध्याय is totally omitted by the author, the Section is here transcribed for reference to any of its *Sutras*, if required.

षष्ठोऽध्यायः। द्वितीयः पादः।

१। बहुव्रीहौ प्रकृत्या पूर्वपदम्। २। तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः।

३। वर्णो वर्णेष्वनेते। ४। गाधलवणयोः प्रमाणे। ५। दायाद्यं दायादे। ६। प्रतिबन्धि चिरकृच्छ्रयोः।

७। पदेऽपदेशे। ८। निवाते वातत्राणे। ९। शारदेऽनार्तवे। १०। अध्वर्युकषाययोर्जातौ।

११। सदृशप्रतिरूपयोः सादृश्ये। १२। द्विगौ प्रमाणे। १३। गन्तव्यपण्यं वाणिजे।

१४। मात्रोपज्ञोपक्रमच्छाये नपुंसके। १५। सुखप्रिययोर्हिते। १६। प्रीतौ च। १७ स्वं स्वामिनि।

१८। पत्यावैश्वर्ये। १९। न भूवाक्चिद्दिधिषु। २०। वा भुवनम्।

२१। आशङ्काबाधनेदीयस्सु संभावने। २२। पूर्वे भूतपूर्वे।

२३। सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये। २४। विस्पष्टादीनि गुणवचनेषु।

२५। श्रज्यावमकन्पापवत्सु भावे कर्मधारये। २६। कुमारश्च। २७। आदिः प्रत्येनसि।

२८। पूगेष्वन्यतरस्याम्। २९। इगन्तकालकपालभगालशरावेषु द्विगौ। ३०। बह्वन्यतरस्याम्।

३१। दिष्टिवितस्त्योश्च। ३२। सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्।

३३। परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु। ३४। राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु।

३५। संख्या। ३६। आचार्योपसर्जनश्चान्तेवासी। ३७। कार्तकौजपादयश्च।

३८। महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु। ३९। क्षुल्लकश्च वैश्वदेवे।

४०। उष्ट्रः सादिवाम्योः। ४१। गौः सादसादिसारथिषु।

४२। कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलो दासीभाराणां च।

४३। चतुर्थी तदर्थे। ४४। अर्थे। ४५। क्ते च। ४६। कर्मधारयेऽनिष्ठा ४७। अहीने द्वितीया।

४८। तृतीया कर्मणि। ४९। गतिरनन्तरः। ५०। तादौ च निति कृत्यतौ

२। पञ्चम्याः स्तोकादिभ्यः।

स्तोकान्तिकदूरार्थकृच्छ्रेभ्यो ङसेरलुक् स्यात्। स्तोकान्मुक्तः। उत्तर-

---

५१। तवै चान्तश्च युगपत्। ५२। अनिगन्तोऽञ्चतौ वप्रत्यये। ५३। न्यधी च। ५४। ईषदन्यतरस्याम्।

५५। हिरण्यपरिमाणं धने। ५६। प्रथमोऽचिरोपसम्पत्तौ। ५७। कतरकतमौ कर्मधारये।

५८। आर्यो ब्राह्मणकुमारयोः। ५९। राजा च। ६०। षष्ठी प्रत्येनसि। ६१। क्ते नित्यार्थे।

६२। ग्रामः शिल्पिनि। ६३। राजा च प्रशंसायाम्। ६४। आदिरुदात्तः।

६५। सप्तमीहारिणौ धर्म्येऽहरणे। ६६। युक्ते च। ६७। विभाषाऽध्यक्षे। ६८। पापं च शिल्पिनि।

६९। गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे। ७०। अङ्गानि मैरेये। ७१। भक्ताख्यास्तदर्थेषु।

७२। गोबिडालसिंहसैन्धवेषूपमाने। ७३। अके जीविकार्थे। ७४। प्राचां क्रीडायाम्।

७५। अणि नियुक्ते। ७६। शिल्पिनि चाकृञः। ७७। संज्ञायां च। ७८। गोतन्तियवं पाले।

७९। णिनि। ८०। उपमानं शब्दार्थप्रकृतावेव। ८१। युक्तारोह्यादयश्च।

८२। दीर्घकाशतुषभ्राष्ट्रवटं जे। ८३। अन्त्यात् पूर्वं बह्वचः। ८४। ग्रामेऽनिवसन्तः।

८५। घोषादिषु च। ८६। छात्र्यादयः शालायाम्। ८७। प्रस्थेऽवृद्धमकर्क्यादीनाम्।

८८। मालादीनां च। ८९। अमहन्नवं नगरेऽनुदीचाम्। ९०। अर्मे चावर्णं द्व्यच्त्र्यच्।

९१। न भूताधिकसञ्जीवमद्राश्मकज्जलम्। ९२। अन्तः। ९३। सर्वं गुणकार्त्स्न्ये।

Here there is a वार्त्तिक viz :—(क) गुणात् तरेण समास स्वरलोपश्च Which the author had left out without explanation and illustration. As the entire section deals with accents (स्वर), he had fully omitted this पाद। शरणदेव too, like पुरुषोत्तम, omits this पाद in his दुर्घटवृत्ति for the same reason. अथेदं वार्त्तिकस्योदाहरणम्। अर्थस्तु सुबोध एव। सर्वेषां श्वेततरः सर्वश्वेतः। एवं सर्वमहान्। सर्वेषां शुक्लतरा सर्वशुक्ला। मानसे रमतां नित्यं सर्वशुक्ला सरस्वतीति दण्डी। सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना। स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मनेति कालिदासः। सर्वेषामुन्नततरेण सर्वोन्नतेन। सर्वेषामतिरिक्ततरः सर्वातिरिक्तः। सः सारो यस्य तेन।

९४। संज्ञायां गिरिनिकाययोः। ९५। कुमार्यां वयसि। ९६। उदकेऽकेवले।

९७। द्विगौ क्रतौ। ९८। सभायां नपुंसके। ९९। पुरे प्राचाम्। १००। अरिष्टगौडपूर्वे च।

१०१। न हास्तिनफलकमार्देयाः। १०२। कुसूलकूपकुम्भशालं बिले।

१०३। दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु। १०४। आचार्योपसर्जनश्चान्तेवासिनि।

१०५। उत्तरपदवृद्धौ सर्वं च। १०६। बहुव्रीहौ विश्वं संज्ञायाम्। १०७। उदराश्वेषुषु।

१०८। क्षेपे। १०९। नदी बन्धुनि। ११०। निष्ठोपसर्गपूर्वमन्यतरस्याम्। १११। उत्तरपदादिः।

११२। कर्णो वर्णलक्षणात्। ११३। संज्ञौपम्ययोश्च। ११४। कण्ठपृष्ठग्रीवाजङ्घं च।

११५। शृङ्गमवस्थायां च। ११६। नञो जरमरमित्रमृताः। ११७। सोर्मनसी अलोमोषसी।

११८। क्रत्वादयश्च। ११९। आद्युदात्तं द्व्यच्छन्दसि। १२०। वीरवीर्यौ च।

१२१। कूलतीरतूलमूलशालाक्षसममव्ययीभावे। १२२। कंसमन्थशूर्पपाय्यकाण्डं द्विगौ।

पद इत्येव। निष्क्रान्तः स्तोकान् निःस्तोकः। कथं ब्राह्मणाच्छंसी ऋत्विगिति? उपसंख्यानात्।

१२३। तत्पुरुषे शालायां नपुंसके। १२४। कन्था च। १२५। आदिश्चिहणादीनाम्।
१२६। चेलखेटकटुककाण्डं गर्हायाम्। १२७। चीरमुपमानम्। १२८। पललसूपशाकं मिश्रे।
१२९। कूलसूदस्थलकर्षाः संज्ञायाम्। १३०। अकर्मधारये राज्यम्। १३१। वर्ग्यादयश्च।
१३२। पुत्रः पुम्भ्यः। १३३। नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः। १३४। चूर्णादीन्यप्राणिषष्ठ्याः।
१३५। षट् च काण्डादीनि। १३६। कुण्डं वनम्। १३७। प्रकृत्या भगालम्।
१३८। शितेर्नित्याबह्वज्बहुव्रीहावभसत्। १३९। गतिकारकोपपदात् कृत्।
१४०। उभे वनस्पत्यादिषु युगपत्। १४१। देवताद्वन्द्वे च।
१४२। नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु। १४३। अन्तः। १४४। थाथघञ्क्ताजबित्रकाणाम्।
१४५। सूपमानात् क्तः। १४६। संज्ञायामनाचितादीनाम्। १४७। प्रवृद्धादीनां च।
१४८। कारकाद्दत्तश्रुतयोरेवाशिषि। १४९। इत्थम्भूतेन कृतमिति च। १५०। अनो भावकर्मवचनः।
१५१। मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः। १५२। सप्तम्याः पुण्यम्।
१५३। ऊनार्थकलहं तृतीयायाः। १५४। मिश्रं चानुपसर्गमसन्धौ।
१५५। नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः। १५६। ययतोश्चातदर्थे। १५७। अच्कावशक्तौ।
१५८। आक्रोशे च। १५९। संज्ञायाम्। १६०। कृत्योकेष्णुच्चार्वादयश्च।
१६१। विभाषा तृन्नन्नतीक्ष्णशुचिषु। १६२। बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने।
१६३। संख्यायाः स्तनः। १६४। विभाषा छन्दसि। १६५। संज्ञायां मित्राजिनयोः।
१६६। व्यवायिनोऽन्तरम्। १६७। मुखं स्वाङ्गम्।
१६८। नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः। १६९। निष्ठोपमानादन्यतरस्याम्।
१७०। जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः। १७१। वा जाते।
१७२। नञ्सुभ्याम्। १७३। कपि पूर्वम्। १७४। ह्रस्वान्तेऽन्त्यात् पूर्वम्। १७५। बहोर्नञ्वदुत्तरपदभूम्नि।
१७६। न गुणादयोऽवयवाः। १७७। उपसर्गात् स्वाङ्गं ध्रुवमपर्शु। १७८। वनं समासे।
१७९। अन्तः। १८०। अन्तश्च। १८१। न निविभ्याम्। १८२। परेरभितोभावि मण्डलम्।
१८३। प्रादस्वाङ्गं संज्ञायाम्। १८४। निरुदकादीनि च। १८५। अभेर्मुखम्। १८६। अपाच्च।
१८७। स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च। १८८। अधेरुपरिस्थम्।
१८९। अनोरप्रधानकनीयसी। १९०। पुरुषश्चान्वादिष्टः। १९१। अतेरकृत्पदे।
१९२। नेरनिधाने। १९३। प्रतेरंश्वादयस्तत्पुरुषे। १९४। उपाद् द्व्यजजिनमगौरादयः।
१९५। सोरवक्षेपणे। १९६। विभाषोत्पुच्छे। १९७। द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ।
१९८। सक्थं चाक्रान्तात्। १९९। परादिश्छन्दसि बहुलम्।

इति षष्ठाध्यायस्य द्वितीयः पादः ॥ ६।२ ॥ समासश्च बहुव्रीहिपादः।

३। ओजःसहोऽम्भस्तमसस्तृतीयायाः।

एभ्यस्तृतीयाया अलुक् स्यात्। ओजसाभूतः। तस्यापत्यमोजसाभूतिः। ओजसाकृतम्। सहसाकृतम्। अम्भसाख्यातम्। तमसावृतम्। उत्तरपदेऽलुग्विधानात् पूर्वपदभूतं यत्र तमस्तत्रालुक्। नतु यत्र तमोऽन्तं पूर्वपदम्। तेन "ततनैशतमोवृतमन्यत" इति (19)

(क) अञ्जस उपसंख्यानम्। अलुक् स्यात्। अञ्जसाकृतम्।

(ख) पुंसानुजो जनुषान्ध इति। उपसंख्यानात्। जनुरन्धः।

इह तमःशब्दं तप इति केचिदूचिरे। तथाच व्योषः—"तमोजसानिर्जितदेवराजं दृष्ट्वा रघस्यं तपसार्जितश्रि"मिति (20) "तपःकृशाःशान्तुरदकुम्भहस्ता" इति तु भट्टिः।

४। मनसः संज्ञायाम्।

नाम्नि मनसस्तृतीयाया अलुक् स्यात्। मनसागुप्ता काचित्। मनसादेवी।

५। आज्ञायिनि च।

अत्रोत्तरपदे मनसस्तस्या अलुक् स्यात्। मनसाज्ञायिनो योगिनः।

६। आत्मनश्च पूरणे।

आत्मनस्तस्या अलुक् स्यात् पूरणप्रत्ययान्ते परे। आत्मनापञ्चमः। आत्मनाषष्ठः। आत्मचतुर्थस्तु बहुव्रीहिः।

७। वैयाकरणाख्यायां चतुर्थ्याः।

८। परस्य च।

आत्मनः परस्य च चतुर्थ्या अलुक् स्याद् वैयाकरणी संज्ञा चेत्। आत्मनेभाषः। आत्मनेपदम्। परस्मैभाषः। परस्मैपदम्।

---

(19) कथं नवविध्यस्ति कुतस्तमोऽवृत इति रघुकाव्ये? वृतमिति भावे क्तः। ततस्तमसो वृतमिति षष्ठीसमासेऽयं आदित्वादच्।

(20) कश्चित्तु कृत्स्न एव श्लोकः पठ्यते।

"तमोजसानिर्जितदेवराजं दृष्ट्वा रघस्यं तपसार्जितश्रियम्।
जगाद राजा सहसातकोपश्चापानि चाऽर्थि सप्तायकानि" ॥१॥ इति।

(It is given fully in the Ms. No IV.) "नन्वत्र समासोऽसङ्गतः। न। अलुगधिकारादि"ति गोपीनाथः।

९ । हलदन्तात् सप्तम्याः संज्ञायाम् ।

हलन्तादन्ताच्च सप्तम्या अलुक् स्यात् । त्वचिसारः । युधिष्ठिरः । वनेकिंशुकाः ।

(क) अपो योनियन्मतिषु । अप्सुयोनिरग्निः । दिगादित्वाद् यत् । अप्सव्यः । अप्सुमतिः । संज्ञाया (२।१।४४) मिति समासः ।

(ख) हृद्द्युभ्यां ङेरलुग्वक्तव्यः । हृदिस्पृक् । दिविषदो देवाः । कथं दिवि कामोऽस्येति द्युकामः ? भाविबहुलवचनात् । (६।३।१४) (21)

१० । कारनाम्नि च प्राचां हलादौ ।

कारः पारिभाषिको नियमः । तन्नाम्नि प्राचां हलादौ परे सप्तम्या अलुक् स्यात् । हलेद्विपदिका । कूपेशाणः । हलदन्तादित्येव । नद्यां दोहनी नदीदोहनी । नियमः किम् ? अविकटे उरणः अविकटोरणः ।

११ । मध्याद् गुरौ ।

गुरौ परे मध्यात् सप्तम्या अलुक् स्यात् । मध्येगुरुः ।

(क) अन्ताच्च । अन्तेगुरुः ।

१२ । अमूर्धमस्तकात् स्वाङ्गादकामे ।

स्वाङ्गात् सप्तम्या अलुक् स्यात् । कण्ठेकालः । उरसिलोमा । उदरेमणिः । "मनुष्यकारोरसिवाणमाशु" । अमूर्धमस्तकात् किम् ? मूर्धशिखः । मस्तकशिखः । अकामे किम् ? मुखकामः । स्वाङ्गादिति किम् ? अक्ष-शौण्डः । हलदन्तादित्येव । अङ्गुलित्राणः ।

१३ । बन्धे च विभाषा ।

बन्धे परे सप्तम्या अलुक् स्याद्वा । हस्तेबन्धो हस्तबन्धो वा । चक्रेबन्धश्चक्र-बन्धो वा । हलदन्तादित्येव । गुप्तिबन्धः ।

---

(21) एवञ्च द्युषदां सुनीतमिति भट्टिः । मनःसु येन द्युषदां न्यधीयतेति माघश्च ।

१४ । तत्पुरुषे कृति बहुलम् ।

तत्पुरुषे ऽदन्त उत्तरपदे परे बहुलं सप्तम्या अलुक् स्यात् । वनेचरः । स्तम्बेरमः । पङ्केरुहः । हृदिस्थः । न च भवति । कायस्थः । कुरुस्थः । कुरुचरः । कचिद्वा । सरोजं सरसिजम् ।

१५ । प्रावृट्शरत्कालदिवां जे ।

एषां जे सप्तम्या अलुक् स्यात् । प्रावृषिजः । शरदिजः । कालेजः । दिविजः । एषां किम् ? ग्रीष्मजः ।

१६ । विभाषा वर्षक्षरशरवरात् ।

एभ्यो जे परे सप्तम्या अलुग्वा स्यात् । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । शरेजः । शरजः । वरेजः । वरजः ।

१७ । घकालतनेषु कालनाम्नः ।

घादिषु कालनाम्नः सप्तम्या अलुग्वा स्यात् । पूर्वाह्णेतराम् । पूर्वाह्णतरे गायति । पूर्वाह्णेकालतमम् । पूर्वाह्णकालतमम् । पूर्वाह्णेतने पूर्वाह्णतने गायति । हलदन्तादित्येव । रात्रितरायां जागर्ति ।

१८ । शयवासवासिष्वकालात् ।

शयादिष्वकालवाचिनः सप्तम्या अलुक् स्याद्वा । खेशयः खशयो वा । "एवन् वनेवासकृताद् भयात् तान्" । वनवासः । ग्रामेवासी ग्रामवासी वा । अकालात् किम् ? पूर्वाह्णशयः । हलदन्तादित्येव । भूमिशयः ।

१९ । नेन्सिद्धबध्नातिषु च ।

इन्नन्तसिद्धबध्नातिषु च सप्तम्या अलुग् नास्ति । स्थण्डिलशायी । सांकाश्यसिद्धः । चक्रबन्धः । कथं चक्रेबन्धः ? घअन्ते विभाषोक्ता ।

२० । स्थे च भाषायाम् ।

स्थे परे सप्तम्या अलुङ् नास्ति । समस्थः । कूटस्थः । कायस्थः । उदरस्थः । कथं हृदिस्थः । बाहुल्यात् । भाषायहणमेकहल्वावुपयुक्तम् ।

९ । हलदन्तात् सप्तम्याः संज्ञायाम् ।

हलन्तादन्ताच्च सप्तम्या अलुक् स्यात् । त्वचिसारः । युधिष्ठिरः । वनेकिंशुकाः ।

(क) अपो योनियन्मतिषु । अप्सुयोनिरग्निः । दिगादित्वाद् यत् । अप्सव्यः । अप्सुमतिः । संज्ञाया (२।१।४४) मिति समासः ।

(ख) हृद्द्युभ्यां ङेरलुग्वक्तव्यः । हृदिस्पृक् । दिविषदो देवाः । कथं दिवि कामोऽस्येति द्युकामः ? भाविबहुलवचनात् । (६।३।१४) (21)

१० । कारनाम्नि च प्राचां हलादौ ।

कारः पारिभाषिको नियमः । तन्नाम्नि प्राचां हलादौ परे सप्तम्या अलुक् स्यात् । हलेद्विपदिका । कूपेशाणः । हलदन्तादित्येव । नद्यां दोहनी नदीदोहनी । नियमः किम् ? अविकटे उरणः अविकटोरणः ।

११ । मध्याद् गुरौ ।

गुरौ परे मध्यात् सप्तम्या अलुक् स्यात् । मध्येगुरुः ।

(क) अन्ताच्च । अन्तेगुरुः ।

१२ । अमूर्धमस्तकात् स्वाङ्गादकामे ।

स्वाङ्गात् सप्तम्या अलुक् स्यात् । कण्ठेकालः । उरसिलोमा । उदरेमणिः । "अलुगकारोरसिवाणमाद्य" । अमूर्धमस्तकात् किम् ? मूर्धशिखः । मस्तकशिखः । अकामे किम् ? मुखकामः । स्वाङ्गादिति किम् ? अक्षशौण्डः । हलदन्तादित्येव । अङ्गुलित्राणः ।

१३ । बन्धे च विभाषा ।

बन्धे परे सप्तम्या अलुक् स्याद्वा । हस्तेबन्धो हस्तबन्धो वा । चक्रेबन्धश्चक्रबन्धो वा । हलदन्तादित्येव । गुप्तिबन्धः ।

---

(21) एवञ्च द्युषदां सुनीतमिति भट्टिः । मनःसु येन द्युषदां न्यधीयतेति माघश्च ।

१४। तत्पुरुषे कृति बहुलम्।

तत्पुरुषे कृदन्त उत्तरपदे परे बहुलं सप्तम्या अलुक् स्यात्। वनेचरः। स्तम्बेरमः। पङ्केरुहः। हृदिस्थः। न च भवति। कायस्थः। कुरुस्थः। कुरुचरः। क्वचिद्वा। सरोजं सरसिजम्।

१५। प्रावृट्शरत्कालदिवाञ्जे।

एषाञ्जे सप्तम्या अलुक् स्यात्। प्रावृषिजः। शरदिजः। कालेजः। दिविजः। एषां किम्? ग्रीष्मजः।

१६। विभाषा वर्षक्षरशरवरात्।

एभ्यो जे परे सप्तम्या अलुग्वा स्यात्। वर्षेजः। वर्षजः। क्षरेजः। क्षरजः। शरेजः। शरजः। वरेजः। वरजः।

१७। घकालतनेषु कालनाम्नः।

घादिषु कालनाम्नः सप्तम्या अलुग्वा स्यात्। पूर्वाह्णेतराम्। पूर्वाह्णतरे गायति। पूर्वाह्णेकालतमम्। पूर्वाह्णकालतमम्। पूर्वाह्णेतने पूर्वाह्णतने गायति। हलदन्तादित्येव। रात्रितरायां जागर्त्ति।

१८। शयवासवासिष्वकालात्।

शयादिष्वकालवाचिनः सप्तम्या अलुक् स्याद्वा। खेशयः खशयो वा। "रक्षन् वनेवासकृताद् भयात् तान्"। वनवासः। ग्रामेवासी ग्रामवासी वा। अकालात् किम्? पूर्वाह्णशयः। हलदन्तादित्येव। भूमिशयः।

१९। नेन्सिद्धबध्नातिषु च।

इन्नन्तसिद्धबध्नातिषु च सप्तम्या अलुग् नास्ति। स्थण्डिलशायी। साङ्काश्यसिद्धः। चक्रबन्धः। कथं चक्रेबन्धः? घञन्ते विभाषोक्ता।

२०। स्थे च भाषायाम्।

स्थे परे सप्तम्या अलुग् नास्ति। समस्थः। कूटस्थः। कायस्थः। उदरस्थः। कथं हृदिस्थः। बाहुल्यात्। भाषायग्रहणमेकवृत्तावुपयुक्तम्।

२१ । षष्ठ्या आक्रोशे ।

आक्रोशगतौ षष्ठ्या अलुक् स्यात् । चौरस्यकुलम् । मातुःसुतः । वृषल्याःपतिः । आक्रोशे किम् ? ब्राह्मणकुलम् ।

(क) वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु । षष्ठ्या अलुक् स्यात् । कैयं वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ।

(ख) आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च । षष्ठ्या अलुक् स्यात् । नड़ादिभ्यः फक् (४।१।९९) । आमुष्यायणः । मनोज्ञादित्वाद् वुञ् (५।१।१३३) । आमुष्यपुत्रिका । आमुष्यकुलिका ।

(ग) देवानां प्रिये । षष्ठ्या अलुक् स्यात् । देवानाम्प्रियः ।

(घ) शेपपुच्छलाङ्गूलेषु शुनः संज्ञायाम् । षष्ठ्या अलुक् स्यात् । शुनःशेपो नाम मुनिः । शुनःपुच्छः । शुनोलाङ्गूलः ।

(ङ) दिवोदासश्छान्दसः ।

२२ । पुत्रेऽन्यतरस्याम् ।

आक्रोशगतौ पुत्रे षष्ठ्या अलुक् स्याद्वा । दास्याःपुत्रो दासीपुत्रो वा ।

२३ । ऋतो विद्यायोनिसम्बन्धेभ्यः ।

ऋदन्ताद् विद्यायोनिसम्बन्धवाचिनोऽलुक् स्यात् षष्ठ्याः । पितुःपुत्रः । होतुरन्तेवासी । विद्यायोनिसम्बन्धोभयपदेष्वभिधानान्नेह । पितृधनम् ।

२४ । विभाषा स्वसृपत्योः ।

ऋदन्तादनयोः षष्ठ्या अलुक् स्याद्वा । मातुःष्वसा मातृष्वसा वा । पितुःष्वसा पितृष्वसा वा । दुहितुःपतिः । दुहितृपतिर्वा । उक्तोऽलुक् । उत्तरपदाधिकारः प्रागङ्गात् (६।४।१) ।

२५ । आनङ् ऋतो द्वन्द्वे ।

विद्यायोनिसम्बन्धानामृतां द्वन्द्वे आनङ् स्यात् । ङकारो रपरत्व-(१।१।५१) निषेधार्थः । होतापोतारौ । मातापितरौ । ऋतां द्वन्द्वे किम् ? पितृपितामहौ । कथं पितापुत्रौ मातापुत्रौ । पुत्र इत्यनुवृत्तेः (६।३।२२) ।

२६ । देवताद्वन्द्वे च ।

अत्र पूर्वपदस्यानङ् स्यात् । इन्द्रावरुणौ । सूर्याचन्द्रमसौ । पुनर्द्वन्द्व-ग्रहणाल् लोके वेदे सहचरितयोरेवाभिधानम् । नेह । मित्रवैश्रवणौ । कथं "रविचन्द्रावपि नोपलक्षितौ" इति ? तर्हि चिन्त्यम् ।

(क) वायोरुभयत्र प्रतिषेधः । वाय्वग्नी । अग्निवायू ।

२७ । ईदग्नेः सोमवरुणयोः ।

सोमे वरुणे चाग्नेरीत् स्यात् । अग्नीषोमौ । अग्नीवरुणौ । इदागमि-नापि सवर्णदीर्घत्वे सिद्ध ईद्वचनमन्यत्र भावार्थमाहुः । तेन कुशश्च लवश्च कुशीलवाविति वाल्मीकिप्रयोगः ।

२८ । इद् वृद्धौ ।

वृद्धिमत्युत्तरपदेऽग्नेरित् स्यात् । आग्निवारुणम् । आग्निमारुतं कर्म । देवताद्वन्द्वे चेत्युभयपदवृद्धिः (७।३।२१) ।

(क) न विष्णौ । अत्राग्नेरित्वं नास्ति । आग्नावैष्णवम् ।

२९ । दिवो द्यावा ।

देवताद्वन्द्वे दिवो द्यावा स्यात् । द्यावाभूमी । द्यावाधरण्यौ ।

३० । दिवसश्च पृथिव्याम् ।

पृथिव्यां दिवो दिवसादेशः स्याद् द्यावा च । सकारोच्चारणं पदान्ते रुत्वाद्य-भावार्थम् । दिवस्पृथिव्यौ । द्यावापृथिव्यौ ।

३१ । उषासोषसः ।

उषःशब्दस्योषासादेशः स्याद् देवताद्वन्द्वे । उषासासूर्य्यम् । उषासा-नक्तम् ।

३२ । मातरपितरावुदीचाम् ।

अन्येषां मातापितरौ । अदन्तत्वान्निपातनस्य मातरपितराभ्यामित्येके । मातरपितृभ्यामित्यन्ये ।

३३ । पितरामातरा च च्छन्दसि ।

छान्दसम् ।

३४ । स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।

अनूङः स्त्रीलिङ्गस्य पुंवद् रूपं स्यात् । पट्वीभार्य्यास्य पटुभार्य्यः । शोभनभार्य्यः । दीर्घजङ्घः । दीर्घजङ्घभार्य्यः । भाषितपुंस्कात् किम् ? खट्वाभार्य्यः । अनूङः किम् ? श्रीबन्धूभार्य्यः । समानाधिकरणे किम् ? कल्याण्या माता कल्याणीमाता । षष्ठीसमासः । स्त्रियामिति किम् ? कल्याणीप्रधाना इमे । अपूरणीति किम् ? कल्याणीपञ्चमा रात्रयः । इह चाप्पूरणीप्रमाण्यो- (५।४।११६) रिति समासान्तविधौ प्रधानपूरणीग्रहणात् पूरण्यर्थादन्यस्मिन् समासार्थे न भवति कल्याणपञ्चमीकः पक्ष इति । अप्रियादिषु किम् ? कल्याणीप्रियः । कल्याणीकान्तः । प्रिया । भक्ति । कान्ता । सुभगा । दुर्भगा । दुहिता । चपला । कथं दृढ़भक्तिः ? दृढ़ं भक्तिरस्येति पूर्वपदस्यास्त्रीत्वविवक्षितत्वात् । श्लिष्टप्रियो विमुक्तकान्त इत्यादयस्तु चिन्त्याः ।

३५ । तसिलादिष्वाकृत्वसुचः ।

तसिलादौ स्त्रियाः पुंवत् स्यात् । तत्र परिगणनम् । त्रल्तसौ । तरप्तमपौ । चरड्जातीयरौ । कल्पब्देश्यदेशीयरः । रूपप्पाशपौ । थमुथालौ । दार्हिलौ । तिल्थ्यनाविति । तस्यां तत्र । तस्याः ततः (22) । रम्यतरा । रम्यतमा । पटुतरा । पटुतमा । पटुचरी । पटुजातीया । मृदुजातीया । दर्शकल्पा । पटुकल्पा । मृदुकल्पा । पटुदेश्या । पटुदेशीया । पटुरूपा । दर्शरूपा । दर्शपाशा । कया प्रकृत्या कथम् । तया प्रकृत्या तथा । तस्यां वेलायां तदा । तर्हि । तिल् छान्दसः । अजथ्या ।

(क) शसि बह्वल्पार्थस्य । पुंवत् स्यात् । बह्वीभ्यो देहि बहुशः । अल्पशः ।

(ख) त्वतलोर्गुणवचनस्य (23) । पुंवत् स्यात् । पटुत्वम् । पटुता ।

---

(22) तत्र तत इति तूदाहरणदिङ्मात्रम् । सर्वनाम्नो वृत्तिमात्रे पुंस्त्वात् । बहुत्र बह्वतः बहुधेत्युदाहरणम् ।

(23) संज्ञा-जाति-छन्द-तद्धितान्त-समस्त-सर्वनाम-संख्याशब्दस्तु न गुणवचनः ।

मृदुता। गुणवचनस्य किम्? दण्डिनीत्वम्। काठीत्वम्। कथं व्यभिचारित्वं युक्तीनामिति? सामान्योपक्रमेण (24)। तन्वीत्वमिति तु चिन्त्यम्।

(ग) भस्याढे तद्धिते। भसंज्ञकस्य तद्धिते पुंवत् स्यात्। हस्तिनीनां समूहो हास्तिकम्। अढे किम्? श्येनेयः। रौहिणेयः।

(घ) ठक्छसोश्च। अनयोः परतः स्त्रियाः पुंवत् स्यात्। भवत्यास्छात्रा भावत्काः। भवदीयाः।

(ङ) सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्य इति तु दिक्सामान्यन्तराल इत्यत्र (२।२।२६) भाष्यम्। सर्वासां धनं सर्वधनम्। अन्यस्यास्तनयोऽन्यतनयः। "न मानिनी संसहतेऽन्यसङ्गमम्।" तस्या मुखं तन्मुखम्। भवतीप्रसादादिति तु चिन्त्यम्। (25)

३६। क्यङ्मानिनोश्च।

क्यङि मानिनि च स्त्रियाः पुंवत् स्यात्। एनी एतायते। दर्शनीयां मन्यते दर्शनीयमानी भार्य्यायाः।

३७। न कोपधायाः।

कोपधायाः स्त्रियाः पुंवन्न स्यात्। मद्रिकाभार्य्यः। पाचिकाभार्य्यः। दाण्डिकाग्रन्तिः। पाचिकाकल्पा। पाचिकायते। पाचिकामानिनी।

(क) कोपधप्रतिषेधे तद्धितवुग्रहणं कर्त्तव्यम्। इह मा भूत्। एकभार्य्यः। पाकभार्य्यः। पाककल्पा।

---

(24) सामान्ये नपुंसकमित्यनेनेत्यर्थः। इदन्तु काशिकाकैयटाद्युक्तं वार्त्तिकम्। वार्त्तिकपाठे तु नास्ति। "एकैकवर्णवर्त्तित्वाच्च" इति हि संहितासूत्रे (१।४।१०९) भाष्यकारप्रयोगः। तत्प्रामाण्यादस्य साधुत्वमुन्नेयम्।

(25) धर्म्माणि देवि सकलानि सदैव कर्म्माण्यशान्त्याहतः प्रतिदिनं सुकृती करोति।

स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१॥ इति देवीमाहात्म्ये।

आर्षोऽयं प्रयोगः। केचित्तु हे भवति ततः प्रसादादनुपदात् तवेति शेष इत्यन्वयं कुर्वन्तो भवतीति सम्बोधने ह्रस्वान्तं पठन्ति। एकोऽहं भवतीसुतक्षयकरो मातः शिरश्छेदकोऽस्य इति वेणीसंहारप्रयोगस्तु मातादिक एवेत्याहुः।

३८ । संख्यापूरण्योश्च ।

अनयोः स्त्रियाः पुंवन्न स्यात् । दत्ताभार्य्यः । "मन्दोदरीभार्य्यमतोऽत्र रेजे ।" दत्तामानिनी । पञ्चमीभार्य्यः । द्वितीयाकल्पा । पञ्चमीकल्पा ।

३९ । वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ।

वृद्धिहेतोस्तद्धितान्तायाः स्त्रियाः पुंवन्न स्यात् । औपगवीभार्य्यः । माथुरीभार्य्यः । माथुरीमानिनी । माथुरीकल्पा । वृद्धिहेतोः किम् ? मध्यमभार्य्यः । अरक्ते किम् ? काषायवृहतिकः । हारिद्रपताकः । अविकारे किम् ? लौहेषो रथः ।

४० । स्वाङ्गाच्चेतोऽमानिनि ।

स्वाङ्गात् परो य ईकारस्तदन्तस्य स्त्रियाः पुंवन्न स्यात् । दीर्घकेशीभार्य्यः । सुमुखीभार्य्यः । सुमुखीकल्पा । अमानिनि किम् ? सुकेशमानिनी । (26)

४१ । जातेश्च ।

जातेः स्त्रियाः पुंवन्न स्यात् । कुम्भकारीभार्य्यः । कठीकल्पा । कठीपाशा । बह्वृचीयते । औपसंख्यानिकस्य नेष्यते । हास्तिकम् । अमानिनीत्येव । कठमानिनी ।

४२ । पुंवत् कर्मधारयजातीयदेशीयेषु ।

कर्मधारयादौ भाषितपुंस्कादनूङः स्त्रियाः पुंवत् स्यात् । न प्रतिषेधः । महापञ्चमी । पुष्पषष्ठी । महाषष्ठी । प्रियदुहिता । मृगचपला । पाचकवृन्दारिका । कारकवृन्दारिका । काकवन्ध्या । कारकजातीया । कारकदेशीया । एवं दत्तवृन्दारिका । पञ्चमवृन्दारिका । माथुरवृन्दारिका । माथुरजातीया । माथुरदेशीया । सुकेशवृन्दारिका । कठदेशीया । स्त्रियामित्येव । कठीप्रकाण्डम् । मानिनीजनः ।

(क) कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः । कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । मृग्याः क्षीरं मृगक्षीरम् । काक्याः शावः काकशावः ।

(26) अत्र स्वाङ्गाच्चेत इत्येव सूत्रम् । अमानिनीति वक्तव्यमिति स्वल्पिन् वार्त्तिकमित्याहुः ।

(ख) पुंवद्भावाद् ध्रस्वत्वं खिद्घादिषु विप्रतिषेधेन। कालिम्मन्या। हरिणिम्मन्या। पट्वितरा। मृदितमा। उक्तः पुंवद्भावः।

४३। घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः।

घादिषु परतोऽनेकाचो ङ्यन्तस्य ह्रस्वः स्यात्। ब्राह्मणितरा। सुन्दरितमा। गौरिरूपा। भुजङ्गिकल्पा। वृषलिचेली। पट्विब्रुवा। नर्तकिगोत्रा। कुमारिमता। गौरिहता। उक्तपुंस्कादित्येव। बदरीतरा। ब्रूञः पचाद्यचि ब्रुवः। चेलड्ब्रुवगोत्रशब्दाः कुत्सनार्थाः।

४४। नद्याः शेषस्यान्यतरस्याम्।

घादिषु शेषनद्या ह्रस्वो वा स्यात्। कः शेषः ? अङी नदी ङीरेकाच्। श्रीवन्धुतरा श्रीवन्धूतरा वा। स्त्रीतरा स्त्रितरा वा।

(क) कृन्नद्याः प्रतिषेधः। लक्ष्मीतरा। तन्त्रीतरा।

४५। उगितश्च।

उगितो नद्या घादिषु ह्रस्वो वा स्यात्। श्रेयसीतरा श्रेयसितरा वा। विदुषीतमा विदुषितमा वा। "अग्निं दधानं महतीतमां तम्।" पुंवद्भावोऽप्यत्रेष्टः। श्रेयस्तरा। विद्वत्तमा। (27)

४६। आन्महतः समानाधिकरणजातीययोः।

तुल्याधिकरणे जातीये च परतो महत आदात्। महापञ्चमी। महाषष्ठी। महाराजः। महाभुजः। महाजातीयः।

(क) घासकरविशिष्टेषु पुंवच्च। महत्या घासः महाघासः। महत्याः करो महाकरः। महाविशिष्टः।

(ख) अष्टनः कपाले हविषि। अष्टाकपालं हविः।

(ग) गवि च युक्ते। अष्टागवं शकटम्। युक्ते किम् ? अष्टगवं विप्रस्य।

---

(27) अत्र भट्टोजिः—"इत्यादिषु विदुषीतरेत्युदाहृतम्। तच्चिन्त्यम्" इति। दीर्घान्तकीर्णविशिष्टानां रूपाणां भाष्ये ऽसमर्थनात्।

४७ । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ।

द्वि अष्टनित्येतयोः संख्यायामात्वं स्यात् । द्वादश । द्वाविंशतिः । द्वात्रिंशत् । अष्टादश अष्टाविंशतिः । अष्टात्रिंशत् । संख्यायामिति किम् । द्वैमातुरः । प्राक्शतादित्यभिधानान्नेह । द्विशतम् । अष्टसहस्रम् । अबहुव्रीह्यशीत्योः किम् ? द्विदशाः । द्विकाः । द्व्यशीतिः ।

४८ । त्रेस्त्रयः ।

त्रेस्त्रयसादेशः स्यात् । त्रयोदश । त्रयोविंशतिः । त्रयस्त्रिंशत् । संख्यायामित्येव । त्रैमातुरः । अबहुव्रीह्यशीत्योरित्येव । त्रिचतुराः । त्र्यशीतिः । प्राक्शतादित्येव । त्रिशतम् । त्रिसहस्रम् ।

४९ । विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ।

द्व्यष्टंस्त्रिशब्दानां यदुक्तं तच्चत्वारिंशदादौ वा स्यात् । एवं यावद् नवतिः । द्वाचत्वारिंशत् द्विचत्वारिंशद्वा । अष्टाचत्वारिंशत् । अष्टचत्वारिंशद्वा । त्रयश्चत्वारिंशत् त्रिचत्वारिंशद्वा। (28) द्वानवतिः । द्विनवतिर्वा । अष्टानवतिः । अष्टनवति र्वा । त्रयोनवतिः । त्रिनवतिर्वा । कथमेकादश ? कुसीददशैकादशादिति (४।४।३२) निपातनात् ।

५० । हृदयस्य हृल्लेखयदण्लासेषु ।

लेखादौ परे हृदयस्य हृत्स्यात् । हृल्लेखः चयव्याधिः । हृदयं लिखतीति कर्मण्यण् (३।२।१) । हृदयस्य प्रियं हृद्यम् । हृदयस्येदं हार्दम् । हृल्लासः ।

५१ । वा शोकष्यञ्रोगेषु ।

एषु हृदयस्य हृद्वा स्यात् । हृच्छोकः । हृदयशोको वा । सौहार्द्यं सौहृदय्यं वा । सौहृद्यमिति केचित् । हृद्रोगः । हृदयरोगो वा ।

५२ । पादस्य पदाज्यातिगोपहतेषु ।

आज्यादिषु पादस्य पदः स्यात् । पदाजिः । पदातिः । पदगः । "पदगैर्बहुभिः स्तुतम् ।" पदोपहतः ।

(28) एवं पञ्चाशत्षष्टिसप्ततिशब्देष्वपि।

५३। पद्यत्यतदर्थे।

पादस्य यति हलन्तः पत् स्यात्। पादौ विध्यन्ति पद्याः कण्टकाः। अतदर्थे किम्? पाद्यं जलम्।

(क) इके चरतौ। पादेन चरति पदिकः। पर्पादित्वात् ष्ठन्।

५४। हिमकाषिहतिषु च।

एषु पादस्य पत् स्यात्। पद्धिमम्। मानुषो नाम पत्काषी। पद्धतिः। चकारात् "पद्गा भरद्वाजमुनिं सशिष्यम्।"

५५। ऋचः शे।

शे ऋचः पादस्य पत् स्यात्। पच्छो गायत्रीं शंसन्ति। वीप्सायां शस्। ऋचः किम्? पादशः कार्षापणं ददाति।

५६। वा घोषमिश्रशब्देषु।

एषु पादस्य पद्वा स्यात्। पद्घोषः पादघोषो वा। पन्मिश्रः पादमिश्रो वा। पच्छब्दः पादशब्दो वा।

(क) निष्के च। पन्निष्कः पादनिष्को वा।

५७। उदकस्योदः संज्ञायाम्।

नाम्नि उदकस्योदः स्यात्। उदमेघो नाम।

(क) उत्तरपदस्य च। लोहितोदो नाम। क्षीरोदः। लवणोदः।

५८। पेषंवासवाहनधिषु च।

एषूदकस्योदः स्यात्। उदपेषं पिनष्टि। "सहस्रराशीवदवाससंततया।" उदवाहनः। उदधिः।

५९। एकहलादौ पूरयितव्येऽन्यतरस्याम्।

असंयुक्तहलादावुत्तरपदे उदकस्योदो वा स्यात्। उदकुम्भ उदककुम्भो वा। उदपात्रम्। उदकपात्रं वा। एकहलादौ किम्? उदकस्थानम्। पूरयितव्ये किम्? उदकगिरिः।

६० । मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ।

एषूदकस्योदो वा स्यात् । उदमन्थः । उदौदनः । उदसक्तुः । "हिमलवसदृशश्रमोदबिन्दून् ।" "भिन्दानो हृदयमसाहि नोदवज्रः ।" भार-हार-गाहाः कर्मसाधना घञन्ताश्च गृह्यन्ते । उदभारः । उदभारी स्त्री । उदहारी स्त्री । उदवीवधः । "रामाणामनवरतोदगाहभाजाम् ।" पक्षे उदकमन्थादयः । उत्तउदादेशः ।

६१ । इको ह्रस्वोऽङ्यो गालवस्य ।

इगन्तानां ह्रस्वो वा स्यात् । ग्रामणिपुत्रः । ग्रामणीपुत्रो वा । जम्बुलता जम्बूलता वा । धीबन्धूसुतः धीबन्धुसुतो वा । अङ्यः किम् ? गार्गीपुत्रः । व्यवस्थितविभाषया नेह । कारीषगन्धीपुत्रः ।

(क) इयङुवङ्भाविनामव्ययानाञ्च प्रतिषेधो वक्तव्यः । श्रीकुलम् । भ्रूकुलम् । शुक्लीभूतम् ।

(ख) भ्रूकुंसादीनामिष्यते । भ्रूकुंसः । भ्रुकुंसो वा । भ्रूकुटिः । भ्रुकुटि र्वा ।

(ग) अकारो वेत्येके । भ्रकुंसः । भ्रकुटिः ।

इह त्वलाबुकर्कन्धुदृम्फुफलमिति सर्वान्ते लोकस्योत्तरपदव्यवहारात् दृम्फ्वा एव ह्रस्वः प्राप्नोति । न पूर्वयोः । तत्र समासान्तरमाश्रेयम् । अलाबूश्च कर्कन्धूश्च ते । अलाबुकर्कन्ध्वौ । ते च दृम्फूश्च ते ऽलाबुकर्कन्धुदृम्फ्वः । राजदन्तादिः । तासां फलं तथेति ।

६२ । एक तद्धिते च ।

एकशब्दस्य (29) तद्धिते ह्रस्वः स्यात् । एकस्या आगतमेकरूप्यम् । एकमयम् । एकत्वम् । एकता । उत्तरपदे च । एकस्याः क्षीरमेकक्षीरम् ।

६३ । ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् ।

ङ्यावन्तस्य ह्रस्वः स्याद्बहुलम् । रेवतिपुत्रः । रोहिणिपुत्रः । कस्य-चित्ग्राम । शिलवहम् । शिलप्रस्थं नाम नगरम् । बाहुल्यान् नान्दीघोषः । असंज्ञायाच्च । कालशः । मन्दुरजः । सुसूक्ष्मजटकेशो व्रती ।

(29) स्त्रियामित्यनुवर्तते । तेन एकाशब्दस्येति फलितम् ।

६४। त्वे च।

त्वे चेति छन्दसि।

६५। इष्टकेषीकामालानां चिततूलभारिषु।

इष्टकादेश्चितादौ ह्रस्वः स्यात्। इष्टकचितम्। इषीकतूलम्। मालभारिणी। तदन्तस्यापि च। पक्वेष्टकचितम्। नवहाटकेष्टकचितम्। मुञ्जेषीकतूलम्। उत्पलमालभारिणी कन्या।

६६। खित्यनव्ययस्य।

अनव्ययस्य खिदन्ते परे ह्रस्वः स्यात्। कालिमिजयः। कालिम्मन्या। अनव्ययस्य किम्? "दिवामन्या रात्रिः कथमपि न पद्मैर्विकसितम्"। उक्तो ह्रस्वः।

६७। अरुर्द्विषदजन्तस्य मुम्।

एषां खिति मुम् स्यात्। अरुन्तुदः। द्विषन्तपः। द्विषमेजयः। (30) अजन्तानाम्। पण्डितम्मन्यः। सुभगम्मन्या। हरिम्मन्यः। मणिम्मन्या। कालिम्मन्या। विधुम्मन्यः। वधुम्मन्या। सुभ्रुम्मन्या। नलोपे राजम्मन्यः। सुराजम्भवम्। गुणिम्मन्यः। एषां किम्? विद्वन्मन्यः। श्रीमन्मन्यः।

६८। इच एकाचोऽम्प्रत्ययवच्च।

इजन्तस्य खिति एकाचोऽम् स्यात्। स चाम्प्रत्ययवत्। द्वितीयैकवचनवदित्यर्थः। स्त्रियम्मन्यः। श्रीम्मन्यः। भ्रुवम्मन्यः। नरम्मन्यः। गाम्मन्यः। नावम्मन्यः।

६९। वाचंयमपुरन्दरौ च।

इमौ निपात्येते।

---

(30) द्विषमेजय इत्यत्र मुमि द्विषम्त् एजय इति स्थिते संयोगान्तस्य लोपः (८।२।२३) इति तकारलोपः।

७० । कारे सत्यागदस्य ।

अनयोः कारे मुम् स्यात् । सत्यङ्कारः । अगदङ्कारो वैद्यः ।

(क) अस्तोश्च । अस्तुङ्कारः ।

(ख) धेनोर्भव्यायाम् । धेनुम्भव्या गौः ।

(ग) लोकस्य पृणे । लोकम्पृणश्चन्द्रमाः ।

(घ) भ्राष्ट्राग्न्योरिन्धे । भ्राष्ट्रमिन्धः । अग्निमिन्धः ।

(ङ) उष्ट्रभद्रयोः करणे । उष्ट्रंकरणम् । भद्रंकरणम् । एवं तिमिङ्गिल-दीपङ्करसर्वंन्ददादयोऽपि मुमिति योगविभागादूह्याः संज्ञाप्रकाराः ।

(च) सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड् वा । एभ्यो दुहितृशब्दस्य पुत्रड् वा स्यात् । सूतपुत्री सूतदुहिता वा । उग्रपुत्री । उग्रदुहिता वा । अन्यत्रापि दृश्यते । शैलपुत्री । "अभिवीक्ष्य विदर्भराजपुत्रीकुचकाश्मीरज-चिह्नमच्युतोर" इति माघः । केचिच्छार्ङ्गरवादिषु पुत्रशब्दं पठन्तीति वामनवृत्तिः । तेनेदं सिध्यति कृष्णदासस्य पुत्रीं तुभ्यमहं सम्प्रदद इति ।

७१ । श्येनतिलस्य पाते ञे ।

अनयोर्ञान्ते पाते परे मुम् स्यात् । श्यैनम्पाता मृगया । तैलम्पाता क्रिया ।

७२ । रात्रेः कृति विभाषा ।

रात्रेः कृदन्ते परे मुम् स्याद्वा । रात्रिचरो रात्रिञ्चरो वा । रात्र्यटो रात्रिमटो वा । खिति तु पूर्वेण नित्यमिष्यते । रात्रिम्मन्यमहः । उक्तो मुम् ।

७३ । नलोपो नञः ।

उत्तरपदे परे नञो नलोपः स्यात् । अभिक्षुः । अब्राह्मणः । अविप्रः । अश्रोत्यः । कथं नैककीर्त्तिः । नैकयशा इति ? (31) समासे सर्वान्तमुत्तर-पदम् । तच्चेह नास्ति ।

---

(31) एवञ्च "आददे नातिशीतोष्णो नभस्वानिव दक्षिणः" इत्यादि । मतान्तरे तु नञर्थस्य नशब्दस्य सुप्सुपेति समासः । तेनाधुनीत खगः स नैकधेत्यादि समाहितम् ।

(क) अवक्षेपे तिङ्युपसंख्यानम्। अपचसि। अकरोषि त्वं जाल्म। "शास्त्रकरमघटते नितराम्"।

७४। तस्मान्नुडचि।

लुप्तनकारान्नञोऽचि नुडागमः स्यात्। अनश्वः। अनुष्ट्रः। अनृषः।

७५। नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या।

एष्वेकादशसु नञ् प्रकृत्या स्यात्। न भ्राजते नभ्राट्। न पाति नपात्। शचन्तः। न वेति नवेदाः। असुचन्तः। नासत्याः साधवः। नमुच्यादयः संज्ञाशब्दा यथाकथञ्चिदुन्नेयाः।

७६। एकादिश्चैकस्य चादुक्।

एकादिर्नञ् प्रकृत्या स्यादेकस्य चादुगागमः। एकेन न विंशति एकान्नविंशतिः। एकान्नशतम्। ऊनार्थे चात्र नञ्।

७७। नगोऽप्राणिष्वन्यतरस्याम्।

नगो नञ् प्रकृत्या वा स्यात्। "शैलवृक्षौ नगावगौ"। अप्राणिषु किम्? अगो वृषलः शीतेन।

७८। सहस्य सः संज्ञायाम्।

सहस्य नाम्नि सः स्यात्। साश्वत्थम्। नाम्नि किम्? सहयुध्वा।

७९। ग्रन्थान्ताधिके च।

ग्रन्थान्ते ऽधिके च सहस्य सः स्यात्। सकलं ज्योतिषमधीते। कलान्तमित्यर्थः। समुहूर्त्तमधीते। ससंग्रहं व्याकरणमधीते। अन्तवचनेऽव्ययीभावः। अधिके। सद्रोणा खारी। द्रोणाधिकेत्यर्थः।

८०। द्वितीये चानुपाख्ये।

उपाख्यायत इत्युपाख्यः प्रत्यक्षः। ततोऽन्योऽनुपाख्यः। अनुमेयो द्वितीयः सम्बन्धी। तद्वाचिन्युपपदे सहस्य सः स्यात्। साग्निः कपोतः। सपिशाचिका वात्या। यद्दे कपोतपतनात् तस्य द्वितीयो भाव्यग्निरनुमीयते।

८१ । अव्ययीभावे चाकाले ।

अत्र सहस्य सः स्यात् । सचक्रं निधेहि । सधुरं व्रज । अकाले किम् ? सहापराह्णम् ।

८२ । वोपसर्जनस्य ।

सर्वोपसर्जनस्य समासस्योत्तरपदे सहस्य सो वा स्यात् । सपुत्रः सहपुत्रो वा । सपरिवारः सहपरिवारो वा ।

८३ । प्रकृत्याशिष्यगोवत्सहलेषु ।

आशिषि सह प्रकृत्या स्यात् । स्वस्ति ते सहपुत्राय । सहबन्धवे । अगोवत्सहलेषु किम् ? सगवे । सवत्साय । सहलाय । पक्षे सहगवे । सहवत्साय । सहहलाय ।

८४ । समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु ।

छान्दसम् ।

८५ । ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ।

एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात् । सज्योतिः । सजनपदः । सरात्रिः । सनाभिः । सनामा । सनाम्नी कन्या । सरूपः । सवयाः । सवचनः । सबन्धुः । इह समानस्येति योगविभागः । तेन सपक्षसधर्मसजातीयाः सिध्यन्तीति वामनवृत्तिः । अनार्षोऽयं योगविभागः । तथाह्यव्ययानामनेकार्थत्वात् सहशब्दार्थस्य सहशब्दस्यैते प्रयोगाः । कथं नाम समानपक्ष इत्यादयोऽपि भवन्तीति भागवृत्तिः (32) । चान्द्रास्तु नामादिषु सभावं विकल्पेन ब्रुवन्ति ।

८६ । चरणे ब्रह्मचारिणि ।

चाचारमतो ब्रह्मचारिणि परे समानस्य सः स्यात् । सब्रह्मचारी ।

---

(32) तथाहि—जनपत्नव्रतेऽस्ति मम कोऽपि समानधर्मेति भवभूतिप्रयोगः ।

८७। तीर्थे ये।

८८। विभाषोदरे।

यदन्ते तीर्थे समानस्य सः स्यात्। सतीर्थ्याः एकगुरवः। उदरे वा। समानोदर्य्यः सोदर्य्यो वा।

८९। दृग्दृशवतुषु।

एषु समानस्य सः स्यात्। सदृक्। सदृशः। सदृचसुच्छायन्यः। वतुग्रहण-मुत्तरार्थम्। उक्तः सभावः।

९०। इदम् किमोरीश्की।

इदम ईश् किमः कीः स्यात् तेषु परतः। ईदृक्। ईदृशः। इयान्। इयती। कीदृक्। कीदृशः। कियान्। कियती।

९१। आ सर्वनाम्नः।

तेषु सर्वनाम्न आकारः स्यात्। तादृक्। तादृशः। तावान्। एतावान्। एतादृशः। एतादृक्। यावान्। यादृक्। यादृशः। अन्यादृक्। अन्यादृशः। युष्मादृक्। युष्मादृशः। भवादृक्। भवादृशः। अमूदृक्। अमूदृशः। अस्मादृक्। अस्मादृशः।

९२। विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये।

विष्वग्देवयोः सर्वनाम्नश्च टेःस्थाने ऽद्रिः स्यादञ्चतौ वप्रत्यये। विष्व-गञ्चति विष्वद्र्यङ्। (33) विष्वद्र्यञ्चौ। देवद्र्यङ्। यद्र्यङ। तद्र्यङ्। कद्र्यङ्। कद्रीची। वप्रत्यये किम्। विष्वगञ्चनम्।

९३। समःसमि।

समोऽञ्चतौ समिरादिश्यते। सम्यङ्। सम्यञ्चौ। समीची।

९४। तिरसस्तिर्य्यलोपे।

तिरस स्तिरिरादिश्यते तस्मिन्नलोपे। तिर्य्यङ्। अलोपे किम्? लोपे मा भूत्। तिरश्चःपश्य। "लज्जा तिरश्चां यदि चेतसि स्यात्।"

---

(33) विश्वमञ्चतीति वाक्ये तु विश्वाङ्। विश्वाचौ। विश्वाच्। सवर्णदीर्घत्वं दुर्वारम्।

९५ । सहस्य सध्रिः ।

तस्मिन् सहस्य सध्रिः स्यात् । "सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत्" सध्र्यञ्चौ । "सध्रीचा वलयितपद्मनालसूत्रः ।" सध्रीची ।

९६ । सध मादस्थयोश्छन्दसि ।

छान्दसम् ।

९७ । द्व्यन्तरुपसर्गेभ्योऽप ईत् ।

एभ्यः परस्याप आदेरीत् स्यात् । द्वीपम् । अन्तरीपम् । प्रादेरनवर्णान्ताद-भिधानम् । समीपम् । नीपम् । नेह । प्रापम् । परापम् ।

९८ । ऊदनोर्देशे ।

अनोः परस्याप ऊत् स्यात् । अनूपो देशः । अन्वीपमन्यत्र ।

९९ । अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थित-तोत्सुकोतिकारकरागच्छेषु ।

अषष्ठ्यतृतीयास्थस्य अन्यस्य दुगागमः स्यादाशीरित्यादौ परे । अन्या आशीरन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः । अन्यद्रागः । अषष्ठ्यतृतीयास्थस्य किम् ? अन्यस्याशी रन्याशीः । अन्येनास्थितोऽन्यास्थितः । इहाविशेषेण दुक् कारकच्छयो-रिति भाष्यम् । अन्येनान्यस्य वा कारकः अन्यत्कारकः । अन्यस्मिन् भवम् । अन्यस्येदं वा अन्यदीयम् । गहादित्वाच्छः शैषिकः ।

१०० । अर्थे विभाषा ।

अर्थे परेऽन्यस्य दुग्वा स्यात् । अन्यदर्थः । अन्यार्थो वा ।

१०१ । कोः कत् तत्पुरुषेऽचि ।

तत्पुरुषेऽचि कोः स्थाने कत् स्यात् । कदन्नम् । कदश्वनम् । कदुष्ट्रम् । अचि किम् ? कुब्राह्मणः ।

(क) त्रावुपसंख्यानम् । कुत्सितास्त्रयः कत्त्रयः ।

"कतमस्तो न यो जिष्णुर्यथाढ्यो यन्नृनिसृष्टः ।
कामी यश्च जरत्नेते चन्द्रवंशेषु कत्रयः" ॥ १ ॥

१०२ । रथवदयोश्च ।

अनयोः कोः कत् स्यात् । कद्रथः । कद्वदः ।

१०३ । तृणे च जातौ ।

अत्र कोः कत् स्यात् । कत्तृणम् । जातौ किम् ? कुतृणानि ।

१०४ । का पथ्यक्षयोः ।

अनयोः कोः स्थाने काः स्यात् । कापथः । काक्षम् । "काक्षेणानादरे-क्षितः ।"

१०५ । ईषदर्थे ।

अत्र कोः काः स्यात् । कामधुरम् । कातन्नम् । काम्लम् ।

"देवाकानिनिकावादे वाहिकास्वस्वकाहि वा ।
काकारेभभरेकाकानिस्वभव्यव्यभस्वनि" ॥ १ ॥

१०६ । विभाषा पुरुषे ।

पुरुषे कोः का वा स्यात् । कापुरुषः कुपुरुषो वा ।

१०७ । कवञ्चोष्णे ।

उष्णे परे कोः काः कवं च वा स्यात् । कोष्णं कवोष्णं कदुष्णं वा ।

१०८ । पथि च च्छन्दसि ।

छान्दसम् ।

१०९ । पृषोदरादीनि यथोपदिष्टम् ।

पृषोदरप्रकाराणि साधूनि स्युः शिष्टैर्यथाप्रयुक्तानि । शिष्टलक्षणं तु भाष्यादवधार्य्यम् । (34) पृषदुदरमस्य पृषोदरः । वारिवाहको वलाहकः । भुवन्तः सीदन्त्यस्यां हसी । मह्यां रौति मयूरः । पूर्य्यन्ते गलन्ति च पुद्गला

(34) एवञ्च हि मूलस्थ भाष्ये शिष्टलक्षणमुक्तम् ।

देशः । तथ्यस्य भावस्तथता । रतेस्तननं रत्नम् । वाहितं पापमनेन ब्राह्मणः जितमेनोऽनेन जिनः । यशः कौति यक्षः । को जीर्य्यति कुञ्जरः । हिनस्तीति सिंहः । पक्षस्याविनक्षनम् । शवानां शयनं श्मशानम् । अहं मुखमस्य उदूखलम् । पिशिताशः पिशाचः । एवं षोडन् षोडशः षोढा षड्धा चेत्यादि ।

"वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्" ॥ १ ॥

११० । संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ।

संख्यादेः परस्याह्नस्याहन् वा ङौ स्यात् । द्व्यह्ने द्व्यहनि द्व्यह्णे वा । त्र्यह्ने त्र्यहनि त्र्यह्णि वा । व्यह्ने व्यहनि व्यह्णि वा । सायाह्णि सायाह्णे सायाहनि वा । ङौ किम् ? द्वयोरह्नोर्भवो द्व्यह्नः । तद्धितार्थे समासः (२।१।५१) । विगतमह्नो व्यह्नः । प्रादिसमासः । अह्नः सर्वैक टच् । अह्नः सायः सायाह्नः । एकदेशिसमासः ।

१११ । ढ्रलोपे पूर्वस्य दीर्घोऽणः ।

ढरयोर्लोपे पूर्वस्याणो दीर्घः स्यात् । लीढम् । गूढम् । नीरक्तम् । इन्दूराजते । पुनारमते । पुनारक्तम् । पुनारोढुम् । धातूरजः । पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्य दीर्घार्थम् । इह ढ्रलोप-(८।३।१३) सहचरितस्य रोरि-(८।३।१४) लोपस्य ग्रहणादनीयरो रलोपे न दीर्घः । दर्शनीयः पटः । दीर्घाधिकारो यावत् क्रमश्च (६।४।१८) श्चीति ।

११२ । सहिवहोरोदवर्णस्य ।

सहिवहोरवर्णस्योत्स्याड्ढलोपे । सोढा । सोढुम् । सोढव्यम् । वोढा । वोढुम् । वोढव्यम् । वर्णग्रहणं तपरतायामपि हृस्वो यथा स्यात् । वहेर्लुङि तसि उदवोढाम् । अवर्णस्य किम् ? ऊढः । ऊढवान् ।

११३ । साढ्यैसाढ्वासाढेति निगमे ।

११४ । संहितायाम् ।

छान्दसमेतद्द्वयम् । संहिताधिकारस्य छन्दस्येव प्रयोजनम् ।

११५। कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य।

कर्णे परे लक्षणवाचिनो दीर्घः स्यात्। दात्राकर्णः। स्रूचाकर्णः। अविष्टादीनां किम्? विष्टकर्णः। अष्टकर्णः। स्वस्तिककर्णः।

११६। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।

एषु क्विबन्तेषु परतो दीर्घः स्यात्। उपानत्। नीवृत्। प्रावृट्। मृगावित्। मर्मावित्। नीरुक्। ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च (३।२।५९)। तुराषाट्। तनि परीतत्। क्वौ किम्? परिणहनम्। गतिकारकपूर्वस्यापि ग्रहणमिष्यते। तिग्मरुचः। पटुरुचः। (35)

११७। वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम्।

कोटरादेर्वने किंशुलकादेर्गिरौ दीर्घः स्यात्। कोटरावणम्। मिश्रकावणम्। किंशुलकागिरिः।

११८। वले।

वले परे दीर्घः स्यात्। दन्तावलो हस्ती। कृषीवलः। अन्य इत्येव। भ्रातृवलः। संज्ञायामित्येव। पुत्रवलः।

११९। मतौ बह्वचोऽनजिरादीनाम्।

बह्वचां मतुपि दीर्घः स्यात्। वीरणावती। मशकावती। नद्यां मतुप् (४।२।८५)। बह्वचः किम्? व्रीहिमती। अनजिरादेः किम्? अजिरवती। मलयवती। संज्ञायामित्येव। वलयवती।

१२०। शरादीनाञ्च।

मतुपि दीर्घः स्यात्। शरावती। अहिवती। पद्मावती। नद्यां मतुप् (४।२।८५)। संज्ञायामित्येव। शरवती भूमिः। अहिमती।

---

(35) रुचः स्वत्वबोधिरुचं दधान इति रघुकाव्ये।

१२१ । इको वहेऽपीलोः ।

इगन्तस्य वहे दीर्घः स्यात् । ऋषीवहम् । कपीवहम् । अपीलोः किम् । पीलुवहम् ।

१२२ । उपसर्गस्य घञ्यमनुष्ये बहुलम् ।

प्रादेर्घञि दीर्घः स्यात् । वीमार्गः । अपामार्गः । बाहुल्यान्न च भवति । विहारः । निहारः । सादकारयोः कृत्रिमे । प्राकारः । प्रासादः । अन्यत्र प्रसादः । प्रकारः । वेशादिषु वा । प्रतिवेशः प्रतीवेशो वा । प्रतिकारः प्रतीकारो वा । क्वचिन्नैव । प्रसारः । प्रहारः । प्रवेशः । प्रसेवः । अमनुष्ये किम् ? निषादश्चण्डालः ।

१२३ । इकः काशे ।

प्रादेरिगन्तस्य काशे दीर्घः स्यात् । प्रतीकाशः । "आसन्नो भव नीकाशेः ।" अनूकाशः । इकः किम् ? प्रकाशः ।

१२४ । दस्ति ।

दः स्थाने यस्तकारस्तस्मिन्नुपसर्गस्य दीर्घः स्यात् । परीत्तम् । नीत्तम् । वीत्तम् । अभीत्तम् । सूत्तम् । इकः किम् ? प्रत्तम् ।

१२५ । अष्टनः संज्ञायाम् ।

अष्टनो न"ञि दीर्घः स्यात् । अष्टावक्रो मुनिः । अष्टापदं सुवर्णम् । संज्ञायां किम् ? "अष्टभार्य्योऽसि पुण्यकृत् ।"

१२६ । छन्दसि च ।

छान्दसम् ।

१२७ । चितेः कपि ।

दीर्घः स्यात् । एकचितीकः । द्विचितीकः ।

१२८ । विश्वस्य वसुराटोः ।

अस्यानयो दीर्घः स्यात् । विश्वावसुः । विश्वाराट् । राडिति निर्देशाद् विश्वराजौ ।

१२९। नरे संज्ञायाम्।

विश्वस्य दीर्घः स्यात्। विश्वानरो नाम मुनिः।

१३०। मित्रे चर्षौ।

मित्रे विश्वस्य दीर्घः स्यादृषिश्चेत्। विश्वामित्रः। इह मन्त्रे षट् सूत्राणि। (36)

१३७। अन्येषामपि दृश्यते।

दीर्घ इत्येव। दण्डादण्डि। बाहूबाहवि। यष्टीयष्टि। शुनः संज्ञायाम्। शुनो दंष्ट्रा श्वादंष्ट्रा। ततोऽण्। शौवादंष्ट्रः। इञ्। शौवादंष्ट्रिः। श्वाकर्णः। (37) पूर्वामुखः। उत्तरामुखः। दक्षिणामुखः। ऋषिगवेषणादिषु पूरुषो नारक इत्यादावप्ययं दीर्घ इति वामनवृत्तिः। अनेनोत्तरपदविधानादप्राप्तिरिति पूरुषादयो दीर्घोपदेशा एव संज्ञाशब्दा इति भागवृत्तिः।

१३८। चौ।

अञ्चतौ लुप्ताकारनकारे दीर्घः स्यात्। दधीचः पश्य। दधीचा। सध्रीचा। सध्रीचः। सध्रीची। मधूचा। मधूचः। विष्वद्रीचः। "विष्वद्रीचीर्विक्षिपन् सैन्यवीचीः।" "सध्रीचा वलयितपद्मनालसूत्रः।"

१३९। संप्रसारणस्य।

संप्रसारणान्तस्योत्तरपदे दीर्घः स्यात्। कारीषगन्धीपुत्रः। कौमुदगन्धीपुत्रः। कारीषगन्धीपतिः। कौमुदगन्धीपतिः। पूर्णं उत्तरपदाधिकारः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

षष्ठाध्यायस्य तृतीयः पादः ॥६।३॥

समासश्चालुक्पादः ॥

---

(36) १३१। मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ। १३२। ओषधेश्च विभक्तावप्रथमायाम्। १३३। ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्। १३४। इकः सुञि। १३५। द्व्यचोऽतस्तिङः। १३६। निपातस्य च।

(37) शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः। अभियुक्तोक्तिरियम्। श्वादन्तः। श्वावराहम्। श्वापुच्छम्। श्वापदः।

अथ

भाषावृत्तिः।

षष्ठोऽध्यायः। चतुर्थः पादः।

१। अङ्गस्य।

अधिकारोऽयम्। अङ्गस्य कार्यं वक्तव्यम् पञ्चपाद्याम्। (38)

२। हलः।

संप्रसारणान्तस्याङ्गस्य हलः परस्य दीर्घः स्यात्। संवीतम्। आहूतम्। अङ्गस्य किम्? निरुतम्। कथं तृतीयेति? निपातनात्।

३। नामि।

नामि परेऽङ्गस्य दीर्घः स्यात्। अग्नीनाम्। वायूनाम्। मातॄणाम्। भ्रातॄणाम्।

४। न तिसृचतसृ।

अनयोर्दीर्घो न स्यात्। तिसृणाम्। चतसृणाम्।

५। छन्दस्युभयथा।

छान्दसम्।

६। नृ च।

नृ चेति नामि दीर्घविकल्पः। भाषायामपीत्येके। नृणाम्। नॄणां वा। (39)

---

(38) षष्ठाध्यायस्य चतुर्थः पादः सप्तमाध्यायस्य चत्वारः पादाश्चेति पञ्चपादी। तत्र।

(39) अतएव चिन्ताजर्जरचेतसां बत नृणां का नाम शान्तिः कथेति भर्तृहरिशतके। नृणामेको गम्यस्त्वमसि पयसामर्णव इवेति महिम्नःस्तवे। दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जन इति कुमारे च।

७। नोपधायाः।

नान्तस्योपधाया नामि दीर्घः स्यात्। पञ्चानाम्। सप्तानाम्। दशानाम्। नामीत्येव। चर्मणाम्। चर्मणाम्।

८। सर्वनामस्थाने चासम्बुद्धौ।

शिः सुट् सर्वनामस्थानम्। तत्र परे नोपधाया दीर्घः स्यात्। राजा। राजानौ। राजानः। सीमा। सीमानौ। सीमानः। सामानि सन्ति पश्य वा। कुण्डानि। असम्बुद्धौ किम्? हे तक्षन्।

९। वा षपूर्वस्य निगमे।

छन्दःसूत्रमेकम्।

१०। सान्तमहतः संयोगस्य।

सान्तसंयोगस्य महतश्च नोपधायाः पूर्ववद्दीर्घः स्यात्। श्रेयान्। विद्वान्। श्रेयांसि। पयांसि। सर्पींषि। महान्। महान्ति। असम्बुद्धा-वित्येव। हे श्रेयन्।

११। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्।

अप्शब्दस्य तृन्तृजन्तानाञ्च स्वस्रादष्टकस्य चोपधायाः सर्वनामस्थाने दीर्घः स्यात्। आपः सन्ति। समासेऽपोऽनङ्गत्वान्न दीर्घः। "बह्वपानि तडागानि सारसाः समुपासते।" समासान्तविधेरनित्यत्वाद् बह्वाम्पीत्यपीति केचित्। तृन्। कर्त्तारः कटान्। तृच्। श्रोतारः शास्त्राणाम्। स्वसारौ। स्वसारः। एवं यावत् प्रशास्तारौ प्रशास्तारः। (40) असम्बुद्धावित्येव। हे कर्त्तः। हे स्वसः। हे नप्तः।

१२। इन्हन्पूषार्य्यम्णां शौ।

एषामुपधायाः शावेव दीर्घः स्यात्। नान्यत्र। बहुदण्डीनि। बहुवाग्-ग्मीनि। सुवृत्रहाणि। सुपूषाणि। बह्वर्य्यमाणि। शौ किम्? वृत्रहणौ।

---

(40) समर्थसूत्रे (२।१।१) उद्गातार इति भाष्यकारप्रयोगादुद्गातृशब्दस्यापि दीर्घः। उद्गातारौ। उद्गातारः।

दण्डिनौ । भ्रूणहनौ । पूषणौ । अर्य्यमणौ । "प्रोषितार्य्यमणं मेरोरन्धकारस्तटीमिव" । "तस्मिन् वृत्रहणि स्थितम् ।" वृत्रहायत इति नायमुपधाया दीर्घः ।

१३ । सौ च ।

तेषां सौ दीर्घः स्यात् । दण्डी । वृत्रहा । पूषा । अर्य्यमा । असम्बुद्धावित्येव ; हे अर्य्यमन् । हे पूषन् ।

१४ । अत्वसन्तस्य चाधातोः ।

अत्वन्तस्यासन्तस्य चोपधाया दीर्घः स्यात् सौ । अतु । भवान् । कृतवान् । गोमान् । अस् । सुयशाः । चन्द्रमाः । सुमेधाः । अधातोः किम् ? पिण्डं ग्रसते पिण्डग्रः । असम्बुद्धावित्येव । हे गोमन् । हे चन्द्रमः ।

१५ । अनुनासिकस्य क्विझलोः क्ङिति ।

अनुनासिकान्तस्य क्वौ झलादौ च क्ङित्युपधाया दीर्घः स्यात् । क्वौ । प्रतान् । प्रतानौ । प्रतान्भ्याम् । प्रदान् । प्रशान् । झलि । शान्तः । शान्तवान् । शान्त्वा । शान्तिः । यङ्लुकि शंशान्तः । क्ङिति किम् ? गन्ता । यन्ता ।

१६ । अजझनगमां सनि ।

अजन्तानां हनो गमश्च झलि सनि दीर्घः स्यात् । चिचीषति । चिकीर्षति । जिहीर्षति । जिघांसति । अधिजिगांसते शास्त्रम् । गमेरिङादेशस्य ग्रहणादेह । सञ्जिगंसते वत्सो मात्रा ।

१७ । तनोतेर्विभाषा ।

सनि तनोतेर्वा दीर्घः स्यात् । तितांसति तितंसति वा । झलीत्येव । तितनिषति ।

१८ । क्रमश्च क्त्वि ।

क्रमः क्त्वि वा दीर्घः स्यात् । क्रान्त्वा क्रान्त्वा वा । झलीत्येव । क्रमित्वा । वक्तौ दीर्घः ।

१६ । च्छ्वोः शूडनुनासिके च ।

सतुक्कस्य च्छस्य शो वस्य च ऊट् स्यादनुनासिके क्वौ झलि क्ङिति । विश्नः । प्रश्नः । पृष्टः । पृष्ट्वा । शब्दप्राट् । शब्दप्राशौ । इह क्ङितीति नानुवर्त्तते । क्विझलोरनुवृत्तिरपि वकारार्था । न च्छकारार्थेत्येके । तन्मतेन व्रश्चादिसूत्रेणैव (८।२।३७) झलि पदान्ते च च्छस्य षः । पृष्टः । पृष्ट्वा । शब्दप्राट् । शब्दप्राड्भ्याम् । अजादौ तु शब्दप्राच्छाविति । वस्योट् । सिवेरौणादिको नः । स्योनः । अक्षद्यूः । हिरण्यष्ठ्यूः । वस्त्रस्यूः । रत्नस्यूः । द्यूतम् । द्यूत्वा । ये तु क्ङितीति नानुवर्त्तयन्ति तेषां धावुदिवो र्यङ्लुकि पित्यक्ङित्यपि झलि वस्योट् । दाधौति । देद्योति । अन्येषां वलि लोपे (६।१।६६) दाधाति । देदेतीति ।

२० । ज्वरत्वरस्रिव्यविमवामुपधायाश्च ।

एषां वस्योपधायाश्चोट् स्यात् क्वौ झलि क्ङिति । जूः । जूरौ । जूर्णः । जूर्त्तिः । तूः । तूरौ । तूर्णः । तूर्त्तिः । स्रूः । स्रुवौ । स्रूतः । स्रूतिः । ऊः । उवौ । ऊतिः । मूः । मुवौ । मूतिः ।

२१ । राल्लोपः ।

रेफाच्छवयोर्लोपः स्यात् क्वौ झलि क्ङिति । मुर्छा । मूः । मुरौ । मूर्त्तिः । उर्वी । ऊः । ऊर्त्तिः । तुर्वी । तूः । तुरौ । तुरः । तूर्त्तिः ।

२२ । असिद्धवदत्रा भात् ।

आ भात् कार्य्याणि परस्परमसिद्धानि बोद्धव्यानि । एधि । शाधि । झलन्ताद्धिः । जहि । हिलोपो न भवति । अत्रेति किम् ? व्याश्रये (41) मा भूत् । अपामभ्य गतः । णौ कृतौ ल्यप्ययादेशेनासिद्धः । आ भात् किम् ? अभाजि रागः ।

(क) वुग्युटावुवङ्यणोः सिद्धौ वाच्यौ । बभूव । उपदिदीये ।

२३ । श्नान्नलोपः ।

श्नमः परस्य नकारस्य लोपः स्यात् । अनक्ति । भनक्ति । हिनस्ति ।

---

(41) व्याश्रवे भिन्नाश्रय इत्यर्थः ।

२४ । अनिदितां हल उपधायाः क्ङिति ।

क्ङिति हलन्तानामुपधाया नकारस्य लोपः स्यात् । स्रस्तम् । सनीस्रस्यते । अनिदितां किम् ? वदि । वन्द्यते । हलः किम् ? नीयते । उपधायाः किम् ? नह्यते । क्ङिति किम् ? स्रंसिता ।

(क) लङ्गिकम्प्योरुपतापशरीरविकारयोः । विलगितः । विकपितः ।

२५ । दंशसञ्जस्वञ्जां शपि ।

एषां शपि नलोपः स्यात् । दशति । प्रसजति । परिष्वजते ।

२६ । रञ्जेश्च ।

शपि नलोपः स्यात् । रजति । रजन्ति ।

(क) रञ्जेर्णौ मृगरमणे । रजयति मृगान् । रजिता मृगाः । (42) मृगरमणे किम् ? रञ्जयति वस्त्रम् । घिनुणि तु त्यजरजेति (३।२।१४२) निपातनान्नलोपः । रागी । इह तु रजको रजनं रजतं रज इत्यौणादिकानां कित्त्वोपगमादनिदितामित्येव (६।४।२४) नलोपः ।

२७ । घञि च भावकरणयोः ।

अनयोर्घञि रञ्जेर्नलोपः स्यात् । रागो वर्त्तते । रागः कुङ्कुमः । अनयोः किम् ? रङ्गः ।

२८ । स्यदो जवे ।

वेगे स्यदः स्यात् । स्यन्दोऽन्यत्र ।

२९ । अवोदैधोद्मप्रश्रथहिमश्रथाः ।

ओद्म मनिन्नन्तम् । अन्ये घञन्ता निपात्यन्ते । उन्दी अवोदः किञ्चिदार्द्रः । इन्धी एधः काष्ठम् । उन्दे र्मनिन् । ओद्म क्लिन्नम् । "प्रश्रथवद् भ्रमन्तमाजा"विति व्योषः । हिमं श्रथाति मुञ्चति हिमश्रथश्चन्द्रः । "निराकृतहिमश्रथा" इति लुट्सर्गे भट्टिप्रयोगः ।

---

(42) कलतया वचसः परिवादिनीस्वरजिता रजिता वशमाययुरिति माघः ।

३० । नाञ्चेः पूजायाम् ।

पूजार्थस्याञ्चतेर्नलोपो न स्यात् । अञ्चिता गुरवः । अञ्च्यते । पूजायामिति किम् ? उदक्तमुदकं कूपात् ।

३१ । क्त्वि स्कन्दिस्यन्दोः ।

अनयोः क्त्वि नलोपो न स्यात् । स्कन्त्वा । स्यन्त्वा । प्रस्कद्य । प्रस्यद्य ।

३२ । जान्तनशां विभाषा ।

जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि । रङ्क्त्वा रक्त्वा वा । भङ्क्त्वा भक्त्वा वा । नंष्ट्वा नष्ट्वा वा । (43)

३३ । भञ्जेश्च चिणि ।

चिणि भञ्जेर्नलोपो वा स्यात् । अभाजि अभञ्जि वा ।

३४ । शास इदङ्हलोः ।

शास उपधाया इत् स्यादङि हलादौ क्ङिति । अन्वशिषत् । शिष्टः । शिष्टवान् । शिष्यः । वयं शिष्मः । अङ्हलोः किम् ? "अनुशासतमित्यनाकुलम् ।" आङ्शासेर्नेष्यते । आशास्ते । कथं क्विपि आशीः ? शियाशीःप्रैषेष्विति (८।२।१०४) निपातनात् ।

३५ । शा हौ ।

शासस्थाने हौ परे शाः स्यात् । "शाधि नः करवाम किम् ।"

३६ । हन्तेर्जः ।

हौ हन्तेर्जः स्यात् । जहि शत्रून् । (44)

---

(43) रधादित्वान्नशेर्वेट्त्वम् । तेन क्त्वाप्रत्यये नशित्वेति च रूपम् ।

(44) अत्र हरदत्तः—"हन्तेः श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः । जङ्घहि जङ्घन्तु । अभ्यासाच्चेति (७।३।५५) कुत्वमपि नास्ति । तथाहि हन्तेरिति श्तिपः फलम् ॥" इति । न्यासकारस्तु "यद्यपि हो हन्ते (७।३।५४) रित्यतो हन्तेरित्यनुवर्त्य विहितं तथापि यङ्लुकि कुत्वं भवत्येव"त्याह । जङ्घहि । श्तिपा निषेधस्त्वनित्यः । गुणो यङ् लुकोरिति (७।४।८२) सामान्यापेक्षज्ञापकादिति भाव इति च भट्टोजिः । माधवमते तु नानुनासिकलोपः । जङ्घनीहि ।

३७ । अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।

झलि एषां क्ङित्यनुनासिको लुप्यते । यमिरमिनमिगमिहनिमन्यतयो ऽनुदात्तोपदेशाः । कितिं । यतम् । यत्वा । यतिः । ङिति हतः । हथः वनतेः क्तिन् वतिः । तनोत्यादेर्गणात् । सन्ततिः । ततम् । तत्वा । क्षणु क्षतम् । क्षत्वा । क्षतिः । ङिति अतत । अतथाः । झलि किम् ? गम्यते रम्यते । रमित्वा । क्ङिति किम् ? गन्ता ।

३८ । वा ल्यपि ।

तेषामनुनासिकलोपो ल्यपि वा स्यात् । "उद्यत्य खड्गमर्जुनः ।" उद्यम्य वा । आगम्य । आगत्य वा । विरम्य विरत्य वा । व्यवस्थितविभाषया नकारस्य लोपो नित्य एव । आहत्य । अवमत्य । प्रतत्य । कथं "चतुर्दिगीशानवमत्य मानिनी"ति ? तर्हि मन स्तम्भ इत्यस्य चौरादिकस्यानित्यण्यन्तत्वेऽस्तु ।

३९ । न क्तिचि दीर्घश्च ।

क्तिचि तेषां लोपोऽनुनासिकस्य क्विझलोरिति (६।४।१५) दीर्घश्च न स्यात् । यन्ति । रन्तिः । तन्तिः । अनुदात्तोपदेश इत्येव । कान्तिः । शान्तिः ।

४० । गमः क्वौ ।

क्वौ गमोऽनुनासिकलोपः स्यात् । अङ्गगत् । कलिङ्गगत् ।

(क) यमादीनामिति वक्तव्यम् । संयत् । आनत् । परीतत् । सुवत् ।

(ख) ऊङ् च गमादीनाम् । अग्रेगूः ।

४१ । विड्वनोरनुनासिकस्यात् ।

अनुनासिकस्यादिति द्वयमधिक्रियते । विड्वनौ छान्दसौ । अवावा । अवावरी (45) ।

---

(45) अवावरीति न्यासकारादिमतेन । मतान्तरे तु वनो न ह्रश इति वार्त्तिकादेव न ङीबरौ । अवावा ब्राह्मणी । चौरीत्यर्थः । ओण् अपनयन इत्यस्मात् वनिप् ।

४२ । जनसनखनां सञ्झलोः ।

एषामाकारः स्याज् झलादौ सनि क्ङिति च । सिषासति । सातः । तनादिभ्यस्तथासोः सिज्लुकि । असात । असाथाः । खातम् । जातम् । जातिः । झलीत्येव । जिजनिषति । चिखनिषति । सिसनिषति ।

४३ । ये विभाषा ।

यादौ क्ङिति तेषामाद्वा स्यात् । जायते जन्यते वा । जाजायते जञ्जन्यते वा । सायते सन्यते वा । सायात् सन्याद्वा । खायते खन्यते वा । चाखायते चङ्खन्यते वा ।

४४ । तनोतेर्यकि ।

तनोतेर्यक्याद्वा स्यात् । तायते तन्यते वा । यकि किम् ? तन्तन्यते ।

४५ । सनः क्तिचि लोपश्चास्यान्यतरस्याम् ।

सनोतेः क्तिचि लोपः स्याद्वा । आत्वं वा । सतिः सातिः सन्तिः वा ।

४६ । आर्धधातुके ।

अधिकारोऽयं यावन्न ल्यपीति (६।४।६९) ।

४७ । भ्रस्जो रोपधयो रमन्यतरस्याम् ।

भ्रस्जो रेफोपधयोर्निवर्तको रमागमो वा स्यादार्धधातुके । भ्रष्टा भर्ष्टा वा । भ्रज्जनं भर्ज्जनं वा । कथं भृष्टम् ? संप्रसारणस्य बलीयस्त्वात् ।

४८ । अतो लोपः ।

आर्धधातुके ह्रस्वाकारस्य लोपः स्यात् । चिकीर्षिता । धिनुतः । कृणुतः ।

(क) वृद्धिदीर्घाभ्यामतो लोपः पूर्वविप्रतिषेधेन । चिकीर्षकः । जिहीर्ष्यते । आर्धधातुक इत्येव । वृक्षत्वम् । वृक्षवान् ।

४९ । यस्य हलः ।

हलः परस्य यकारस्य लोपः स्यात् । बेभिदिता । चेच्छिदिता । यस्येति संघातग्रहणमेव । ईर्ष्यिता । हलः किम् ? लोलूयिता ।

५० । क्यस्य विभाषा ।

हलः परस्य क्यस्य वा लोपः स्यात् । समिधिता समिध्यिता वा समिधितुं समिध्यितुं वा । नमसितुं नमस्यितुं वा । नमसिता नमस्यिता वा

५१ । णेरनिटि ।

अनिड्यार्धधातुके णेर्लोपः स्यात् । पाक्तिः । याष्टिः ।

(क) इयङ्यण्गुणवृद्धिदीर्घेभ्योऽपि णिलोपः पूर्वविप्रतिषेधेन । अत तक्षत् । आटिटत् । कारणा । कारकः । कारणम् । कार्य्यते । अनिटि किम् ? कारयितव्यम् । इह गणयते र्यति गणेयम् । चिन्तयते रङि चिन्तियेति णिलोपोऽयं नास्ति । व्यवस्थितविभाषानुवर्त्तनादित्युक्तम् ।

५२ । निष्ठायां सेटि ।

सेटि निष्ठायां णिलोपः स्यात् । कारितम् । गणितम् । लक्षितम् । सेटीति किम् ? संज्ञपितः पशुः ।

५३ । जनिता मन्त्रे ।

५४ । शमिता यज्ञे ।

सूत्रद्वयं मन्त्रे ।

५५ । अयामन्ताल्वाय्येत्न्विष्णुषु ।

आमादिषु णेरयादेशः स्यात् । आम् । कामयामास । कारयामास । अन्तः । गण्डयन्तः । आलुः । स्पृहयालुः । आय्यः । स्पृहयाय्यः । इत्नुः । स्तनयित्नुः । इष्णुच् । पारयिष्णुश्छान्दसः ।

५६ । ल्यपि लघुपूर्वात् ।

लघुपूर्वात् ल्यपि णेरयादेशः स्यात् । प्रणमय्य गतः । प्रवेभिदय्य गतः । परिगणय्य । लघुपूर्वात् किम् ? प्रबोध्य । प्रयाप्य । प्रवाच्य ।

५७ । विभाषाऽऽपः ।

आप्नोते र्ण्यन्तस्य ल्यपि परस्यायादेशः स्याद्वा । प्राप्य प्रापय्य वा ।

५८। युप्लुवोर्दीर्घश्छन्दसि।

छन्दःसूत्रमेकम्।

५९। क्षियः।

क्षियो ल्यपि दीर्घः स्यात्। प्रक्षीय।

६०। निष्ठायामण्यदर्थे।

निष्ठायां क्षियो दीर्घः स्यात् कर्त्तरि। उपक्षीणः। अधिकरणे। इदमेषां क्षीणम्। ण्यदर्थौ भावकर्मणी। तत्र निषेधः। क्षितमस्य जातम्। भावे क्तः।

६१। वाऽऽक्रोशदैन्ययोः।

आक्रोशे दैन्ये च ञ्राचेऽनन्तरो विधिर्वा स्यात्। क्षीणायुः क्षितायुर्वा। दैन्ये। क्षीणो वराकः क्षितो वा। क्षीणकः क्षितको वा।

६२। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झन-ग्रहदृशां वा चिण्वदिट् च।

भावे कर्मणि च ये स्यादयस्तेष्वजन्तानां हनग्रहदृशाञ्च चिण्वत् कार्य्यं वा स्यात्। इट् च स्यादीनाम् भवति। भावे। शयिष्यते शायिष्यते वा। कर्मणि। दास्यते दायिष्यते वा गौः। सिचि। अदिषाताम्। अदायिषातां वा। सीयुट्। दासीष्ट दायिषीष्ट वा। तासि। दाता दायिता वा। धाता धायिता वा। एवं हन्तेः। हनिष्यते घानिष्यते वा। वधिषीष्ट घानिषीष्ट वा। ग्रहेः। ग्रहीष्यते ग्राहिष्यते वा। ग्रहीषीष्ट ग्राहिषीष्ट वा। दृशेः। द्रक्ष्यते दर्शिष्यते वा। दृक्षीष्ट दर्शिषीष्ट वा। द्रष्टा दर्शिता वा। इहाङ्गप्रकरणे चिण्वद्-भावेनाङ्गमेव कार्य्यमतिदिश्यते। तेन हनिष्यते घानिष्यते वा। अध्येष्यते अध्यायिष्यते वा। एष्यते आयिष्यते वा। हनिणिङां प्रकरणान्तरविहिता वध-गागङादेशा न भवन्ति।

६३। दीङो युडचि क्ङिति।

अजादौ क्ङिति दीङो युडागमः स्यात्। उपदिदीये। उपदिदीयिरे। क्ङिति किम्? उपदानम्।

६४। आतो लोप इटि च।

इडजादौ क्ङिति चातो लोपः स्यात्। पपिथ। तस्थिथ। पपतुः। पपुः। गोदः। सर्वदः। गोज्ञः। सर्वज्ञः।

६५। ईद् यति।

आकारान्तानामीत् स्याद् यति। देयम्। धेयम्। गेयम्। स्थेयम्। दीर्घोच्चारणमुत्तरार्थम्।

६६। घुमास्थागापाजहातिसां हलि।

हलादौ क्ङित्येषामीत् स्यात्। घु। दीयते। धीयते। देदीयते। मीयते। मेमीयते। गीयते। स्थीयते। अध्यगीष्ट। पीयते जलम्। हीयते। अध्यवसीयते। पाते रोहाङ्कस्य न भवति। पायते राज्ञा लोकः। उद्धायते सूर्येण प्रातः। कथं स्थः क चेति (३।२।७७) क्विपि संस्थाः? क्वावीत्त्वप्रतिषेध इति भाष्यम्। (46)

६७। एर्लिङि।

तेषां लिङि स्यादेत्। देयात्। धेयात्। मेयात्। स्थेयात्। गेयात्। सोमं पेयात्। हेयात्। अध्यवसेयात्। क्ङितीत्येव। दासीष्ट।

६८। वान्यस्य संयोगादेः।

तिष्ठतेरन्यस्य संयोगादेर्लिङि वा स्यादेत्। ग्लेयात्। ग्लायाद्वा। ध्येयात्। ध्यायाद्वा। अङ्गस्येत्येव। निर्यायात्। संयोगादिः किम्? पायाद्वः पुरुषोत्तमः।

६९। न ल्यपि।

ल्यपि घुमादीनामीत्त्वं न स्यात्। प्रदाय। विधाय। प्रस्थाय। प्रमाय। अनुमाय। उद्गाय। प्रहाय। विहाय। प्रपाय। अवसाय। उपमाय। कथमापीय प्रातरेवेति? पीङ् पाने। तेनोद्गीय खलेनेति तु चिन्त्यम्। (47)

---

(46) एवञ्च "वासवदत्तायां लक्ष्मव यमोदानन्दकर इति दामं दा इति ग्रेयसम्रति"रिति सृष्टिधरः।

(47) यत्र "चिन्ता च मयते (६।४।७०) रित्यन्यतरस्यामित्यतोऽन्यतरस्यामित्यस्य सिंहावलोकनन्यायादनुवृत्तेः" इति दुर्घटवृत्तौ शरणदेवस्य समाधानम्। एवञ्च सिंहावलोकनेन किं किं न कर्तुं शक्येत?

७० । मयतेरिदन्यतरस्याम् ।

मेङो ल्यपि वा स्यादित् । अपमित्य अपमाय वा । उक्तमार्धधातुके ।

७१ । लुङ्लङ्लृङ्क्ष्वडुदात्तः ।

एष्वङ्गस्याडागमः स्यात् । अकार्षीत् । अकरोत् । अकरिष्यत् । अगमिष्यत् । अपचत् ।

७२ । आडजादीनाम् ।

तेष्वजादीनामाट् स्यात् । ऐचिष्ट । ऐक्षत । ऐक्षिष्यत ।

७३ । छन्दस्यपि दृश्यते ।

छन्दः सूत्रमेकम् ।

७४ । न माङ्योगे ।

माङ्योगेऽडाटौ न स्याताम् । मा भवान् कार्षीत् । मास्म करोत् । मा भवानीहिष्ट । कथं मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समा इति । अडिता मागमदिनेनेति केचित् । तन्न । माङि लुङिति (३।३।१७५) कालसामान्ये लुङनुपपत्तेः । तस्माच्चिन्त्यमेतत् (48) ।

७५ । बहुलञ्छन्दस्यमाङ्योगेऽपि ।

७६ । इरयो रे ।

छन्दःसूत्रद्वयम् ।

७७ । अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ।

अजादावेषामिकारोकारयोरियङुवङौ स्याताम् । श्नुः । आप्नुवन्ति । धातोः । चिक्षियतुश्चिक्षियुः । श्रियः । नियः । लुवः । पुवः । भुवः । भ्रुवः । भ्रुवौ । भ्रुवः । अचि किम् ? आप्नुयात् । राध्नुयात् ।

(क) इयङुवङ्भ्यां गुणवृद्धी विप्रतिषेधेन । चयनम् । चायकः । लवनम् । लावकः ।

---

(48) आर्षोऽयं प्रयोगः । "न मामकमनुवर्त्तसे यतस्त्वं पक्षिणः शिष्य ।" इति ।

७८ । अभ्यासस्यासवर्णे ।

अभ्यासस्य यो रसवर्णेऽचि तौ स्याताम् । इयाय । इयर्त्ति । इयेष । उवोष । असवर्णे किम् ? ऊषुः ।

७९ । स्त्रियाः ।

स्त्रीशब्दस्याचि स्यादियङ् । स्त्रियौ । स्त्रियः । स्त्रीणामित्यत्र परत्वान्नुट् ।

८० । वाऽम्शसोः ।

स्त्रिया अमि शसि चेयङ् वा स्यात् । स्त्रियं पश्य । स्त्रीम् पश्य । स्त्रियः पश्य । स्त्रीः पश्य ।

८१ । इणो यण् ।

इणोऽचि यण् स्यात् । यन्ति । यन्तु । ईयुः । इयङादेशापवादोऽयं योगः । अयं यण् मध्येऽपवादत्वाद् गुणवृद्धिभ्यां परत्वाद् बाध्यते । अयनम् । आयकः । इयाय ।

८२ । एरनेकाचोऽसंयोगपूर्वस्य ।

इकारान्तस्यानेकाचोऽङ्गस्याचि यण् स्यात् । निन्यतुर्निन्युः । निन्यिरे । उन्न्यौ । प्रण्यौ । सेनान्यौ । सेनान्यः । ग्रामण्यौ । क्विबन्तस्य गतिकारक-पूर्वस्यैवेष्यते । ततो नेह । परमनियौ । परमनियः । गतिसाहचर्यात् कारकपूर्वस्यापि नित्यसमासेऽभ्युपगमादेव । अवधीऽधीर्यस्य तेन अवणधिया । (49) असंयोगपूर्वस्य किम् ? चिक्रियतुः । चिक्रियुः । यवक्रियौ । कथमुन्नयौ ? धातोरित्येव । तेन धात्ववयवसंयोगस्त्वग्राह्यः ।

८३ । ओः सुपि ।

उवर्णान्तस्याजादौ सुपि यण् स्यात् । धर्मस्वौ । धर्मस्वः । खलप्वौ । खलप्वः । "अमन्दत्वं पुनर्हन्तुम् ।" सुपि किम् ? लुलुवतुः । लुलुवुः ।

---

(49) भट्टोजि in his शब्दकौस्तुभ in 1.4.3, refers to पुरुषोत्तम on this point :—"गति-कारकपूर्वस्यैवेष्यत इत्यत्र हि गतिसाहचर्यात् कारकपूर्वस्यापि नित्यसमासस्य ग्रहणं गतिसमासस्य प्रतिपदोक्त एव गृह्यते । तेन दुर्धियः निर्धियौ इत्यादावनित्यसमासत्वान्न यणिति पुरुषोत्तममतम् ।" (P, 508)

अनेकाजित्येव। लुवौ। लुवः। असंयोगपूर्वस्येत्येव। कटप्रुवौ। कटप्रुवः। गतिकारकपूर्वस्येत्येव। परमलुवौ। परमलुवः। परमस्रुवौ।

८४। वर्षाभ्वश्च।

वर्षाभ्वोऽचि सुपि यण् स्यात्। वर्षाभ्वम्। वर्षाभ्वः। चकारात् दृन्भ्वौ। पुनर्भ्वौ। कारभ्वौ।

८५। न भूसुधियोः।

अनयोर्यण् नास्ति। प्रतिभुवौ। सुधियौ।

८६। छन्दस्युभयथा।

छन्दःसूत्रमेकम्।

८७। हुश्नुवोः सार्वधातुके।

अनयोरजादौ यण् स्यात्। जुह्वति। अ्नुः। चिन्वन्ति। सार्वधातुके किम्? जुहुवुः। असंयोगपूर्वस्येव। प्राप्नुवन्ति। हुश्नुवोः किम्? योयुवति। रोरुवति।

८८। भुवो वुग् लुङ्लिटोः।

लुङ्लिटोरचि भुवो वुक् स्यात्। बभूव। बभूवे। अभूवन्। अभूवम्। अतिबभूवे। अनुबभूवे।

८९। ऊदुपधाया गोहः।

गोह उपधाया ऊत् स्यात्। निगूहयति। निगूहकः। गोहः किम्? निजुगुहुः। अचीत्येव। निगोढुम्। विगोढुम्।

९०। दोषो णौ।

दुषेर्णावुपधाया ऊत् स्यात्। दूषयति। दूषकः। दूषणम्।

९१। वा चित्तविरागे।

अत्र पूर्वो विधिर्वा स्यात्। चित्तं दूषयति दोषयति वा।

९२ । मितां ह्रस्वः ।

णौ मित्संज्ञकानामुपधाया ह्रस्वः स्यात् । घटयति । व्यथयति गमयति । जनयति । वेत्येव । सा च व्यवस्थितविभाषा । तेन संक्रामयती त्यादि सिद्धमित्येके । (50)

९३ । चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ।

चिणि णमुलि च परे णौ मितामुपधाया दीर्घो वा स्यात् । अशामि । अशमि वा । शामं शामम् । शमं शमं वा । हेड़ृ वेष्टने । मित् । अहिड़ि । अहीड़ि वा ।

९४ । खचि ह्रस्वः ।

खचि णावुपधाया ह्रस्वः स्यात् । द्विषन्तपः । परन्तपः । पुरन्दरः ।

९५ । ह्लादो निष्ठायाम् ।

अस्योपधाया ह्रस्वः स्यात् । प्रह्लन्नः । प्रह्लन्नवान् । निष्ठायां किम् ? प्रह्लादयति । क्तिन्यपि । प्रह्लत्तिः ।

९६ । छादेर्घेऽद्व्युपसर्गस्य ।

घे परतश्छादेरुपधाया ह्रस्वः स्यात् । उरश्छदः । प्रच्छदः । वचन-सामर्थ्यादत्र णिलोपदर्शनं बाध्यते । अद्व्युपसर्गस्य किम् ? समुपच्छादः । द्विग्रहणमनेकोपलक्षणार्थम् । समुपातिच्छादः ।

९७ । इस्मंस्त्रन्क्विषु च ।

एषु च्छादेर्ह्रस्वः स्यात् । इस् । छदिः । मन् छद्म । त्रन् । छत्त्रम् । क्विप् । परिच्छत् ।

९८ । गमहनजनखनघसां लोपः क्ङित्यनङि ।

एषां क्ङित्युपधाया लोपः स्यात् । जग्मुः । सञ्जग्माते । घ्नन्ति । घ्नन् । जघ्नुः । जज्ञिरे । चख्नतुः । "जक्षुर्बिसम्" । "क्षुद्राश्च जक्षुर्हरिणान् मृगेन्द्राः" । अनङि किम् ? अगमत् । अघसत् । अचीत्येव । गम्यते । हन्यते ।

(50) मतान्तरे तु नेदम् । तथाच "प्रियसुहृदि विलीयते प्रियं संक्रमय्य वैरिव" इति रघौ ।

९९। तनिपत्योश्छन्दसि।

१००। घसिभसोर्हलि च।

छन्दःसूत्रद्वयम्।

१०१। हुझल्भ्यो हेर्धिः।

जुहोतेर्झलन्ताच्च हेर्धिः स्यात्। जुहुधि। "पूर्वमङ्ग जुहुधि त्वमेव वा"। भिन्धि। छिन्धि। हुझल्भ्योः किम्? लुनीहि। पुनीहि। भिन्तात्त्वमिति परत्वात् तातङ्। कथं रुदिहि? निर्दिश्यमानस्यैवादेशा भवन्तीति वचनात्? इह लिटा व्यवधानात्। कथन्तर्हि भिन्धकि? परत्वादग्रे धिभावः। ततोऽकच्।

१०२। श्रुशृणुपॄकृवृभ्यश्छन्दसि।

१०३। अङितश्च।

छन्दःसूत्रद्वयम्।

१०४। चिणो लुक्।

कङितीत्येव। चिणः परस्य कङितोर्लुक् स्यात्। अलावि। "अहारि सीता दशकन्धरेण"। कङितः किम्? अकारितराम्।

१०५। अतो हेः।

अदन्तात् परस्य हेर्लुक् स्यात्। पच। पठ। भव। अतः किम्? प्राप्नुहि। तपरः किम्? याहि।

१०६। उतश्च प्रत्ययादसंयोगपूर्वात्।

उत्प्रत्ययाद्धेर्लुक् स्यात्। चिनु। तनु। कुरु। प्रत्ययात् किम्? युहि। रुहि। असंयोगपूर्व्वात् किम्? अक्ष्णुहि। प्राप्नुहि। अर्णुहि। वर्णुहि।

१०७। लोपश्चास्यान्यतरस्यां म्वोः।

असंयोगपूर्वस्योत्प्रत्ययस्य म्वोः परयोर्वा लोपः स्यात्। चिन्वः। चिनुवो वा। चिन्मः। चिनुमो वा। लुकि लोपग्रहणमन्त्यलोपार्थम्। असंयोगपूर्वस्येत्येव। अक्ष्णुवः।

१०८ । नित्यं करोतेः ।

कञ उप्रत्ययस्य नित्यं लोपः स्यात् म्वोः । कुर्वः । कुर्वहे । कुर्मः कुर्महे ।

१०९ । ये च ।

ये परे कञ उप्रत्ययो लुप्यते । कुर्य्यात् । कुर्य्याताम् ।

११० । अत उत् सार्वधातुके ।

उप्रत्ययान्तस्य करोतेरत उत् स्यात् । कुरुतः । कुर्वन्ति । कुरु । कुर्वन् । कुर्वाणः । क्ङितीत्येव । करोति ।

१११ । श्नसोरल्लोपः ।

श्नसोरल्लोपः स्यात् सार्वधातुके क्ङिति । भिन्तः । भिन्दन्ति । भिन्द्यात् । भिन्द्युः । छिन्दन्ति । अस । स्तः । सन्ति । स्यात् । एधि । कथमस्यति ? असेरिह ग्रहणात् । निरनुबन्धकत्वात् । श्नसोरिति पररूपत्वं सौत्रत्वात् ।

११२ । श्नाभ्यस्तयोरातः ।

श्ना इत्यस्याभ्यस्तानाञ्चातो लोपः स्यात् सार्वधातुके क्ङिति । लुनन्ति । लुनते । लुनन् । पुनते । ददति । ददत् ।

११३ । ई हल्यघोः ।

श्नाभ्यस्तयोरातः ईः स्याद् हलादौ क्ङिति सार्वधातुके । लुनीते । मिमीते । जिहीते । अघोः किम् ? दत्ते । धत्ते ।

११४ । इद् दरिद्रस्य ।

दरिद्रातेरित् स्यात् तस्मिन् परतः । दरिद्रितः । दरिद्रिथः । हलीत्येव । दरिद्रति ।

(क) दरिद्रातेरार्धधातुके लोपः । सिद्धश्च प्रत्ययविधौ । दरिद्रः । पचाद्यच् । श्याद्व्धेति (३।११४१) णो न भवति ।

(ख) अद्यतन्यां (51) वा। अदरिद्रीत्। अदरिद्रासीत्। अदरिद्रि। अदरिद्रायि।

(ग) न दरिद्रायके लोपो दरिद्राणे च नेष्यते।
दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥१॥

११५। भियोऽन्यतरस्याम्।

हलि क्ङिति सार्वधातुके भिय इत्वा स्यात्। विभितः। विभीतो वा। "न तदा विभिमः स्वयम्"। विभीमो वा। "अन्योन्यतः पथि वताविभिताविभीतौ"।

११६। जहातेश्च।

जहातेरित्वा स्यात् पूर्ववत्। जहितः। जहीतो वा।

११७। आ च हौ।

हौ जहातेरा च इच्च वा स्यात्। जहाहि जहिहि जहीहि वा।

११८। लोपो यि।

यादौ क्ङिति जहातेर्लोपः स्यात्। जह्यात्। जह्युः। उक्तं सार्वधातुके।

११९। घ्वसोरेद्धावभ्यासलोपश्च।

हौ परतो घ्वसोरेत् स्यादभ्यासलोपश्च। धु। देहि। धेहि। अस। एधि।

१२०। अत एकहल्मध्येऽनादेशादेर् लिटि।

लिटि एकैक-(52) हल्मध्यगतस्यात एत्वं स्यादभ्यासलोपश्च। रेणतुः। रेणुः। रेमे। पेचे। अनादेशादेरङ्गस्य किम्? बभणतुः। बभणुः। वार्थं नेमतुः। नेमुः। सेहे? लिड्वादेशादिं वर्जयेत्। एकहल्मध्ये किम्? ततक्षतुः। ततक्षुः। तत्सरतुः। तत्सरुः। क्ङितीत्येव। अचकम्पथ। अतः किम्? ररासे।

---

(51) अद्यतनीति लुङः पूर्वाचार्याणां संज्ञा।

(52) एकश्च एकश्च एकौ असहायौ हलौ। तयोर्मध्यगतस्येति वृत्तिधरव्याख्या।

(क) नशिमन्थ्योरलिट्येत्त्वं क्वापि । अनेशम् । लुङि पुषादित्वाद् अङ् । मेनक्का आशिषि वुन् (३।१।१५०) । क्षिपकादिः । स चाकृतिगणः । तेन मेत्त्वम्

१२१ । थलि च सेटि ।

पूर्ववदत्र एत्वाभ्यासलोपौ स्याताम् । पेचिथ । शेकिथ । सेटि किम् पपक्थ । अतःपरं क्ङिति लिट्यभ्यासलोपस्थलि च सेटीत्यनुवर्त्तते ।

१२२ । तॄफलभजत्रपश्च ।

एषामतएत्वं स्यात् तस्मिन् । अभ्यासलोपश्च । तेरतुः । तेरुः । तेरिथ फेलतुः । फेलुः । फेलिथ । भेजतुः । भेजुः । भेजिथ । त्रेपे । त्रेपिरे तरतेर्गुणार्थं वचनम् । फलिभज्योरादेशार्थम् । त्रपेरनेकहल्मध्यार्थम् । चकाराच् श्रेथतुः । श्रेथुः । देभतुः । देभुः । दम्भेरपि पूर्वेणाप्राप्तिर्नलोपस्यासिद्धत्वात् ।

१२३ । राधो हिंसायाम् ।

राधेः स्यादेत्त्वमेकहल्मध्यस्थस्य । अपरेधतुः । अपरेधुः । अपरेधिथ । हिंसायां किम् ? आरराधुर्देवताम् ।

१२४ । वा जॄभ्रमुत्रसाम् ।

एषां लिटेऽत्त्वं स्याद्वा । जेरुः । जजरुः वा । जेरिथ जजरिथ वा । एवं भ्रेमुः । बभ्रमुर्वा । त्रेसतुः । तत्रसतुर्वा ।

१२५ । फणाञ्च सप्तानाम् ।

फणराजृभ्राजृभ्राशभ्लाशस्यमुस्वनामेत्त्वं स्याद्वा । फेणुः पफणुर्वा । फेणिथ पफणिथ वा । रेजे रराजे वा । भ्रेजे बभ्राजे वा । भ्रेजिरे बभ्राजिरे वा । भ्लेशे बभ्लाशे वा । भ्लेशिरे बभ्लाशिरे वा । स्येमतुः सस्यमतुर्वा । स्येमुः सस्यमुः वा । स्वेनतुः सस्वनतुर्वा । स्वेनुः सस्वनुः वा । क्ङितीत्येव । रराज । सप्तानां किम् ? दध्वनतुर्दध्वनुः ।

१२६ । न शसददवादिगुणानाम् ।

शसिदद्योर्दन्त्यौष्ठ्यवकारादीनां गुण इत्यभिनिर्वृत्तस्य च लिटेऽत्त्वं न स्यात् । विशशसतुः । विशशसुः । विशशसिथ । ददद । ददते । "ववमुः शोणितं

दैत्याः ।" (53) ववमिथ । गुवस्थ । विशशरतुः । विशशरुः । विशशरिथ । लुलविथ । रूपाभेदादादेशादित्वं न गृह्यत इति ज्ञापनार्थं शशिददिग्रहणम् । तेन पेचतुस्तेलुरित्यादावप्येत्वं सिध्यति । उक्तमेत्वम् ।

१२७। अर्वणस्त्रसावनञः ।

१२८। मघवा बहुलम् ।

इदच्छन्दःसूत्रद्वयम् । यदुक्तं भाष्ये-"अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् ।" इति । कथं "श्लथीकृतप्रग्रहमर्वतां व्रज"मिति माघः । "मघवद्व्यलज्ञानिदान" मिति व्योषः ? छान्दसानपि संज्ञाशब्दत्वात् कवयो भाषायां प्रयुञ्जते । यथा परिपन्थी । अध्वर्युः । दीधितिः । तुराषाट् । पृतनाषाडित्यादि ।

१२९। भस्य ।

अधिकारोऽयमा पादपरिसमाप्तेः ।

१३०। पादः पत् ।

पादन्तस्य पत् स्यात् । द्विपदः । द्विपदा । द्विपदे । द्विपदिका । वैयाघ्रपद्यः । भस्य किम् ? द्विपादं पश्य ।

१३१। वसोः संप्रसारणम् ।

स्यात् । क्वसुः । "उपेयुषामपि दिवम्" । जक्षुषाम् । वसुः । विदुषा । विदुषी स्त्री ।

१३२। वाह ऊठ् । (54)

छान्दसोऽयम् । वहेश्छन्दसि ण्विविधानात् (३।२।६४) ।

१३३। श्वयुवमघोनामतद्धिते । (55)

एषां संप्रसारणं स्यात् । शुना शुने । यूना यूने । मघोना मघोने ।

---

(53) कथं तर्हि "वेमुश्च केचिद्रुधिर" मिति ? आर्षोऽयं प्रयोगः ।

(54) ठकारान्तोऽयमादेशः । वाऽवसान इति (८।४।५६) चर्त्वम् ।

(55) काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नासि बाले किमु तत्र चित्रम् । अशेषवित् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाहेति कस्यचित् श्लोकः ।

कथं युवतीः पश्येति ? लिङ्गविशिष्टग्रहणं नेष्यते । अतद्धित इति किम् ? विकारेऽञ् । शौवं मांसम् ।

१३४ । अल्लोपोऽनः ।

भस्य अनन्तस्याल्लोपः स्यात् । राज्ञा । राज्ञे । राज्ञी । तक्ष्णः । तक्ष्णा । अज्ञा निर्दिष्टमाह्निकम् । इहाङ्गाधिकारोपगमाद् ह्यहयज्ञो ह्यहयज्वस्विरित्यत्र सत्यपि भत्वेऽङ्गत्वाभावादल्लोपो नास्ति ।

१३५ । षपूर्वहन्धृतराज्ञामणि ।

एषामल्लोपः स्यादणि । औक्ष्णः । ताक्ष्णः । भ्रौणघ्नः । वार्त्रघ्नः । धार्तराज्ञः । एभ्योऽन्यत्र सामनः । अणि किम् ? ताक्षण्यः ।

१३६ । विभाषा ङिश्योः ।

अनोऽकारलोपो ङिश्योर्वा स्यात् । राज्ञि राजनि वा । दध्नि दधनि वा । श्याम् । साम्नी सामनी वा । दाम्नी दामनी वा ।

१३७ । न संयोगाद् वमन्तात् ।

वमन्तात् संयोगात् परस्यानोऽल्लोपो न स्यात् । पर्वणा । पर्वणे । चर्मणि । वर्मणि । शर्मणा । शर्मणि । वर्मणा । कर्मणा । कर्मणि । सुपर्वणः । अथर्वणा । अथर्वणः ।

१३८ । अचः ।

लुप्तनकारस्याञ्चतेर्भस्याल्लोपः स्यात् । दधीचा । दधीचः । मधूचे । मधूचः । प्रतीची । प्रतीचम् । समीची । समीचीनम् ।

१३९ । उद ईत् ।

उदः परस्याच ईत् स्यात् । । उदीचः पश्य । उदीचा । उदीचाम् । उदीची । उदीचम् ।

१४० । आतो धातोः ।

भस्यातो धातोर्लोपः स्यात् । शंस्यः पश्य । शंस्या कृतम् । शंस्य इदं शांस्यम् । सोमपा । सोमपे । धातोः किम् ? खट्वाः पश्य । कथं क्त्वो ल्यप्

(७।१।३७)। ब्रमश्च ब्रौति (६।४।१८) ? निपातनात्। एकदेशानुकरणं वा यथा प्रागदीव्यतोऽण् (४।१।८२)। आत इति योगविभागादित्येके। अथवा आतोऽनाप इति वक्तव्यमस्ति।

१४१। मन्त्रेष्वाङ्यादेरात्मनः।

छान्दसम्।

१४२। ति विंशतेर्डिति।

विंशते र्डिति तिशब्दो लुप्यते। डुन्। विंशकोऽश्वः। द्वाविंशकः। डः। विंशं शतम्। डिति किम् ? विंशतिकोऽश्वः।

१४३। टेः।

डिति भस्य टेर्लोपः स्यात्। त्रिंशकः। एकादशः सर्गः। कथं कुमुद्वानिति ? डित्यभस्याप्यनुबन्धकरणसामर्थ्याट्टिलोपः।

१४४। नस्तद्धिते।

भस्य नान्तस्य तद्धिते टिलोपः स्यात्। आग्निशर्मिः। औडुलोमिः। वाह्वादित्वादिञ्।

(क) सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणाम्। एषां प्रकृतिभावापवादष्टिलोपः स्यात्। सब्रह्मचारिण इमे साब्रह्मचाराः। पैठसर्पाः। कलापिना प्रोक्तमधीयते कालापाः। कौथुमाः। तैतिलाः। जाजलाः। लाङ्गलाः। शैलालाः। शैखण्डाः। शौकरसद्माः। सौपर्वाः।

(ख) चर्मणः कोशे। चार्मः कोशः। चार्मणोऽन्यत्र।

(ग) अश्मनो विकारे। आश्मः प्रासादः। आश्मनः। तस्येदमित्यण् (४।३।१२०)।

(घ) शुनः सङ्कोचे। शौवः सङ्कोचः।

(ङ) अव्ययानाञ्च भमात्रे टिलोपः सायंप्रातिकाद्यर्थः। सायंप्रातिकः। पौनःपुनिकः। कालाट् ठञ् (४।३।११४)। सायंप्रातिकाद्यर्थ इति किम् ?

आरातीयः । वृद्धाच्छः (४।२।११४) । सन्धिवेलाद्यण् (४।३।१६) । आम्नतः आम्नतिकस्तु निपातनात् ।

१४५ । अह्नष्टखोरेव ।

टखोरेवाह्नष्टिलोपः स्यात् । द्वयोरह्नोः समाहारो द्व्यहः । त्र्यहः । अहनी भृतो भूतो भावी वा द्व्यहीनः । टखोः किम् ? अह्ना निर्वृत्तमाह्निकम्

१४६ । ओर्गुणः ।

उवर्णान्तस्य भस्य तद्धिते गुणः स्यात् । औपगवः । बाभ्रव्यः । संज्ञापूर्वकस्यानित्यत्वाद् "धाम स्वायम्भुवं ययुः ।"

१४७ । ढे लोपोऽकद्र्वाः ।

उवर्णान्तस्य ढे लोपः स्यात् । कामण्डलेयः । जाम्बेयः । अकद्र्वा किम् ? काद्रवेयः ।

१४८ । यस्येति च ।

इ अ यः । तदन्तस्य भस्य लोपः स्यादीति तद्धिते च परतः । सखी । गार्गी । दाक्षी । कुमारी । तद्धिते । बलिः । बालेया स्तण्डुलाः । दाक्षिः । चौडिः ।

(क) श्यां प्रतिषेधः । काण्डे । कुण्डे ।

(ख) ईयङुवङ्भ्यां लोपो विप्रतिषेधेन । वत्सप्रीर् गौः (56) । तस्यापत्यं वात्सप्रेयः । चतुष्पाद्भ्यो ढञ् (४।१।१३५) । लैखाभ्रेयः (57) । शुभ्रादिभ्यो ढक् (४।१।१२३) ।

१४९ । सूर्य्यतिष्यागस्त्यमत्स्यानां य उपधायाः ।

एषामुपधायकारो लुप्यते ।

(क) सूर्य्यस्य ङ्यां छे च । सौरी बलाका । सौरीया स्तण्डुलाः ।

(ख) तिष्यपुष्ययोर्नक्षत्राणि । तैषः । पौषः ।

(ग) आगस्त्यस्य ङ्यां च छे च । आगस्ती । ऋष्यणि (४।१।११४) ङीप् । आगस्तीयाः ।

(56) वत्सान् प्रीणातीति । क्विप् ।

(57) लेखे रेखे इव भ्रुवौ यस्याः सा लेखाभ्रूः तस्यापत्यमित्यर्थः ।

(घ) मत्स्यस्य ङ्यामेव । मत्सी । ङ्यां किम् ? मात्स्यो न्यायः प्रवर्त्तते । उपधायाः किम् ? मत्स्यचरी ।

(ङ) इष्टान्तिकस्य तसि कादिलोपो बहुलम् । अन्तिकतः । अन्तितः ।

(च) तमे तादेश्च । अन्तमः । अन्तिकतम इति भाषायामपीच्छन्ति । कादिलोपे अन्तितमः ।

१५० । हलस्तद्धितस्य ।

हलः परस्य तद्धितयकारस्य लोपः स्यादीति परतः । सौमी इष्टिः । आनुपूर्वी । वैदर्भी । औचिती । वार्क्षणी । गार्गी । वात्सी । हलः किम् ? कारिकेयी । तद्धितस्य किम् ? वैश्यी वैश्यस्य भार्य्या ।

१५१ । आपत्यस्य च तद्धितेऽनाति ।

आपत्ययकारस्य तद्धिते ऽनाकारादौ लोपः स्यात् । गार्गीयः । वात्सीयः । अमुष्ह गोत्राद् वुञ् । गार्गकम् । आपत्यस्य किम् ? माङ्काश्यकः । अनाति किम् ? गार्गायणः । यञिञोश्चेति (४।१।१०१) फक् । हल इत्येव । कारिकेयिः ।

१५२ । क्यच्व्योश्च ।

क्यच्व्योश्चापत्ययकारस्य लोपः स्यात् । वात्सीयति । वात्सायते । गार्गीभूतः । वात्सीभूतः । हल इत्येव । आत्रेयीयति । आपत्यस्य किम् ? साङ्काश्यीयति ।

१५३ । बिल्वकादिभ्यश्छस्य लुक् ।

एभ्यो नडादीनां कुक् चेति (४।२।९१) छप्रत्ययान्तेभ्यस्तद्धिते छमात्रस्य लुक् स्यात् । बिल्वा यस्यां सन्ति बिल्वकीया । बिल्वकीयायां भूमौ भवा बैल्वकाः । वैणुकाः ।

१५४ । तुरिष्ठेमेयःसु ।

इष्ठेमेयःस्वित्यधिक्रियते । तुरिति छन्दोभागः ।

१५५ । टेः ।

भस्य टेरिष्ठादिषु लोपः स्यात् । पटुः पटिष्ठः पटिमा पटीयान् ।

(क) णाविष्ठवत्कार्य्यं प्रातिपदिकस्य । पुंवद्भावरभावटिलोपयणादिपर-

लोपार्थं वचनम् । एनीमाचष्टे एतयति । प्रथयति । दृषद् दृषयति । दृ
दवयति । प्रादयोऽपीष्टाः । प्रियं स्थिरमाचष्टे प्रापयति स्थापयति ।

१५६ । स्थूलदूरयुवक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ।

तेषु स्थूलादिशब्दानां परो यणादिभागो लुप्यते पूर्वस्य च गुणः स्थविष्ठः स्थवीयान् । दविष्ठो दवीयान् । यविष्ठो यवीयान् । क्षिप्रे पृथ्वादी । क्षसिष्ठो क्षसिमा क्षसीयान् । क्षेपिष्ठः क्षेपिमा क्षेपीयान् । क्षोदिष्ठः क्षोदीयान् । पूर्वग्रहणं विस्पष्टार्थम् ।

१५७ । प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रपद्राघिवृन्दाः ।

तेषु प्रियादिशब्दस्य प्रादयो दशैव स्युः । प्रियोरुलघुगुरुबहुलदीर्घाः पृथ्वादयः । तेषामिवेमनिजुदाहार्य्यः । प्रेमा प्रेष्ठः प्रेयान् । एवं स्थेष्ठः । स्फेष्ठः । (58) वरिष्ठः । गरिष्ठः । त्रपिष्ठः । द्राघीयान् द्राघिमा द्राघिष्ठः । वृन्दिष्ठः । वृन्दीयान् । बंहिवर्षीकार उच्चारणार्थः । बंहिष्ठः । वर्षिष्ठः ।

१५८ । बहोर्लोपो भू च बहोः ।

१५९ । इष्ठस्य यिट् च ।

बहोरिष्ठादीनामादिलोपः स्याद् बहोश्च भूरादेशः । भूयान् । भूमा । "भूम्नां रसानां गहनाः प्रयोगाः ।" इष्ठस्य यिडागमश्च । भूयिष्ठः ।

१६० । ज्यादादीयसः ।

ज्यात्परस्येयस आत् स्यात् । ज्यायान् । ज्यायांसौ । आद्वचनं वैचित्र्यार्थम् । आदिलोपे कृते ह्यकृद्यकारे दीर्घोऽस्त्येव ।

१६१ । र ऋतो हलादेर्लघोः ।

हलादेर्लघोरस्य लघुर्य ऋकारस्तस्य रेफः स्यात् । प्रथिष्ठः प्रथिमा प्रथी-

(58) स्थिरं सूयव सूरि पीवमद ।

यान्। पृथुमृदुभृशकृशदृढपरिवृढानामेवाभिधानान्नेह। कृतमाचष्टे कृतयति। कृतिष्ठः। कृतिमा। मातयति। पितयति। भ्रातयति।

"पृथुं मृदुं भृशञ्चैव कृशञ्च दृढमेव च।
परिपूर्वं वृढञ्चैव षडेतान् रविधौ स्मरेत्" ॥ १ ॥

१६२। विभाषर्जोश्छन्दसि।

छान्दसम्।

१६३। प्रकृत्यैकाच्।

तेषु भसंज्ञकेकाजङ्गं प्रकृत्या स्यात्। स्रजिष्ठः स्रजीयान्। त्वचिष्ठः। त्वचीयान्। इष्ठेयसोर्विन्मतोर्लुक् (५।३।६५)। प्रेष्ठः प्रेमा। एकाजिति किम्? पटिष्ठः। इष्ठादिभ्योऽन्यत्र। भस्यापत्यमिः। भा देवतास्य भः।

(क) अके राजन्यमनुष्ययुवानः प्रकृत्या। राजन्यकम्। मानुष्यकम्। आपत्ययलोपो मा भूत्। यौवनिका। वुञ् मनोज्ञादित्वात्। न स्वचित (६।४।१४४) इति टिलोपो मा भूत्।

१६४। इनण्यनपत्ये।

अनपत्ये इनन्तमणि प्रकृत्या स्यात्। सांराविणम्। सांकूटिनम्। सांमार्जिनम्। स्रग्विण इदं स्राग्विणम्। अनपत्ये किम्? मेधाविनोऽपत्यं मैधावः पुत्रः।

१६५। गाथिविदथिकेशिगणिपणिनश्च।

अपत्यार्थोऽयमारम्भः। इमेऽपत्येऽप्यणि प्रकृत्याः स्युः। गाथिनः। वैदथिनः। कैशिनः। गाणिनः। पाणिनः।

१६६। संयोगादिश्च।

अपत्येऽपि संयोगादिरिन् प्रकृत्या स्यात्। शाङ्खिनः। वाज्रिणः। वाग्-ग्मिनः। माद्रिनः।

१६७। अन्।

अन्नन्तमण्मात्रे प्रकृत्या स्यात्। सामनः। सौत्वनः।

१६८ । ये चाभावकर्मणोः ।

यादौ तद्धितेऽन् प्रकृत्या स्यात् । सामन्यः । अध्वन्यः । शीर्षण्यः ब्रह्मण्यः । अभावकर्मणोः किम् ? राज्ञो भावः कर्म वा राज्यम् पुरोहितादिः (५।१।१२८) ।

१६९ । आत्माध्वानौ खे ।

एतौ खे प्रकृत्या स्याताम् । आत्मनीनम् । अध्वनीनम् । खे किम् ? अध्यात्मम् । प्रत्यात्मम् । प्राध्वम् ।

१७० । न मपूर्वोऽपत्येऽवर्म्मणः ।

अनीति वर्त्तते । अन्नित्येव । मकारपूर्वोऽन् न प्रकृत्या स्यात् । भाद्रसामः । सौषामः पुत्रः । अपत्ये किम् ? चार्मणो रथः । तेन परिवृतः (४।२।१०) । अवर्मणः किम् ? चाक्रवर्मणः । चाक्रवर्मणः पुत्रः ।

(क) वा हितनाम्नः । हैतनामः पुत्रः । हैतनामनो वा । उक्तः प्रकृतिभावः ।

१७१ । ब्राह्मोऽजातौ ।

अचि निपात्यते । ब्राह्मो दण्डः । ब्राह्मी ओषधिः । जातावपत्ये निषेध इत्यागमः । ब्रह्मणोऽपत्यं जातिर्ब्राह्मणः । अपत्यमात्रे तु ब्राह्मो नारद इत्याहुः ।

१७२ । कार्म्मस्ताच्छील्ये ।

कर्मशील: कार्मश्छत्रादिः । कार्मणमन्यत्र ।

१७३ । औक्षमनपत्ये ।

इदमत्र निपात्यते । औक्षं पदम् । अनपत्ये किम् ? औक्ष्णो वत्सः ।

१७४ । दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ।

एषामां प्रकृतिभावो द्वयोस्तत्वं लोपश्चतुर्णां निपात्यते । दण्डिन्हस्तिनो नड़ादौ । अथर्वन्ठुक्यादिः । जिह्माशिष् ढक्यादिः । वासिन् । इञादिति

(४।१।१५७) फिञ्। अमूषहन् धीवन्। भावि ञ्ञ्। धैवत्यञ्छान्दसमित्येके। नेत्यन्ये। सरय्वा अण् यलोपश्च सारव: (59)। इक्ष्वाकोरपत्यमुलोप:। ऐक्ष्वाक:। ऐक्ष्वाकौ। जनपदादञ् (४।१।१६८)। बहुत्वे लुक्। इक्ष्वाकव:। तेषामयमैक्ष्वाको वंश:। मित्रयो र्गृष्यादिढञ् (४।१।१४६)। यादिलोप: (७।३।२)। मैत्रेय:। हिरण्यस्य मयटि यलोप:। हिरण्मय:।

१७५। ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि।

छान्दसम्।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

षष्ठाध्यायस्य चतुर्थ: पाद: ॥६।४॥

समाप्तश्चाङ्गपाद: ॥

---

(59) अपां विहारि तव हारविभ्रमं करोतु नीरे पृषदुत्तमस्तरम्। अठोऽपीनीथवृषवीतटच्युटत्तर: सारवसारवोर्म्मिभ:॥ इति नैषधीये। दैविकायां सरय्वाञ्च भवे दाविकसारवाविल्यमर:।

अथ

भाषावृत्तिः ।

सप्तमोऽध्यायः । प्रथमः पादः ।

१ । युवोरनाकौ ।

युव्वोरनाकावादिश्येते । यु । नन्दनः । सायन्तनः । चिरन्तनः । वु । कारकः । हारकः । गार्गकम् । युव्वोरिहानुनासिकयणोः प्रत्यययोश्च ग्रहणान्नेह । ऊर्णायुः । कंयुः । शंयुः । युध्यते । वुस्यति । (1) युवोरिति सौत्रत्वाद् वलोपः ।

२ । आयन्नेयीनीयियः फढखछघां प्रत्ययादीनाम् ।

फढखछघामायन्नादयः स्युः । फादिष्वकार उच्चारणार्थः । हलन्तानामेव हलन्तादेशाः । फक् नाडायनः । ढः । वैनतेयः । खः । कुलीनः । छः । गार्गीयः । घः । क्षत्रियः । कियान् । इयान् । प्रत्ययः किम् ? फक्कति । ढौकते । आदिः किम् ? जानुदघ्नः । शेफमञ्जुमध्यपुच्छादय स्त्वौणादिकाः । खछघआदेरुच्चारणानन्तरमेवेत्संज्ञायां लोपादादेशाभावः ।

३ । झोऽन्तः ।

प्रत्ययझकारस्यान्तादेशः स्यात् । भवन्ति । कुर्वन्ति । झच् । जरन्तः । वेशन्तः ।

४ । अदभ्यस्तात् ।

अङ्गाद् अभ्यस्तात् परस्य झस्यात् स्यात् । ददति । दधति । जाग्रति । चकासति । शासति । बिभ्यति ।

---

(1) वुस उत्सर्गे इति दिवादिः परस्मैपदी ।

५ । आत्मनेपदेष्वनतः ।

अनकारात् तङि झस्यात् स्यात् । आसते । चिन्वते । भुञ्जते । लुनते । पुनते । व्यतिवाते । अनकारान्तात् किम् ? च्यवन्ते । प्लवन्ते ।

६ । शीङो रुट् ।

शीङः परस्य झादेशस्यातो रुडागमः स्यात् । शेरते । अशेरत ।

७ । वेत्तेर्विभाषा ।

वेत्ते र्झादेशस्यातो रुड् वा स्यात् । संविद्रते संविदते वा ।

८ । बहुलञ्छन्दसि ।

छान्दसम् ।

९ । अतो भिस ऐस् ।

अदन्ताद् भिस ऐस् स्यात् । वृक्षैः । वनैः । धनैः । दारैः । विप्रैः । तपरः किम् ? खट्वाभिः । मालाभिः ।

१० । बहुलञ्छन्दसि ।

छान्दसम् ।

११ । नेदमदसोरकोः ।

इदमदसो भिस ऐस् नास्ति । एभिः । अमीभिः । अकः किम् ? इमकैः । अमुकैः ।

१२ । टाङसिङसामिनात्स्याः ।

अदन्तादङ्गात् टादीनामिनादयः स्युः । वृक्षेण । वृक्षात् । वृक्षस्य ।

१३ । ङेर्य्यः ।

अदन्तान् ङे र्यः स्यात् । वृक्षाय । कलत्राय । विप्राय । वनाय । धनाय ।

१४ । सर्वनाम्नः स्मै ।

अदन्तात् सर्वनाम्नो ङेः स्मै स्यात् । सर्वस्मै । अस्मै । यस्मै । तस्मै । कस्मै । अत इत्येव । भवते ।

१५ । ङसिङ्योः स्मात्स्मिनौ ।

अदन्तात् सर्वनाम्नो ङसेः स्मात् ङेः स्मिन् स्यात् । सर्वस्मात् सर्वस्मिन् । यस्मात् यस्मिन् । तस्मात् तस्मिन् । कस्मात् कस्मिन् ।

१६ । पूर्वादिभ्यो नवभ्यो वा ।

पूर्वपरावरदक्षिणोत्तराधरापरस्वान्तरेभ्यस्तयोः स्मात्स्मिनौ वा स्याताम् पूर्वात् पूर्वस्मात् । पूर्वे पूर्वस्मिन् ।

१७ । जसः शी ।

अदन्तात् सर्वनाम्नो जसः शीः स्यात् । सर्वे । विश्वे । ये । ते । के ।

१८ । औङ आपः ।

अङ्गाद् आबन्तादौङः शीः स्यात् । खट्वे तिष्ठतः । खट्वे पश्य । ते पश्य । औङिति ओऔटोःसंज्ञा ।

१९ । नपुंसकाच्च ।

अङ्गात् नपुंसकादौङः शीः स्यात् । कुण्डे स्तः पश्य वा । शुचिनी । दधिनी । पटुनी । मधुनी । पयसी ।

२० । जश्शसोः शिः । (2)

नपुंसकाज् जश्शसोः शिः स्यात् । कुण्डानि पयांसि तिष्ठन्ति पश्य वा । यशांसि ।

२१ । अष्टाभ्य औश् ।

कृतात्त्वस्याष्टनो जश्शसोरौश् स्यात् । अष्टौ सन्ति पश्य वा । इहाङ्गाधिकारे तस्य तदुत्तरपदस्येति वचनात् परमाष्टौ । उत्तमाष्टौ । कृतात्त्वस्य किम् ? अष्ट सन्ति पश्य वा ।

---

(2) न्यासादौ क्वचित् जसिशसोः शिरिति पाठः । अत्रापि स एव केषुचित् पुस्तकेषु दृश्यते । कैयटादौ तु जस्शसोः शिरित्येव पाठः । मुद्रितकाशिकायामप्येवम् । नतु जसिशसोरिति । जसिरिति पूर्वाचार्य्याणां जसः संज्ञा ।

२२। षड्भ्यो लुक्।

षट्संज्ञकाज् जश्शसो लुक् स्यात्। पञ्च। षट्। सप्त। नव। दश। एकादश। कति सन्ति पश्य वा।

२३। स्वमोर्नपुंसकात्।

क्लीवात् स्वमो लुक् स्यात्। दधि। मधु। कर्तृ। कर्म तिष्ठति पश्य वा। इह तत्कुलमिति त्यदाद्य-(७।२।१०२) त्वात्लुगयं पूर्वविप्रतिषेधेन। नित्यत्वाद्वा।

२४। अतोऽम्।

अदन्तात् क्लीवात् स्वमोरम् स्यात्। वनमस्ति पश्य वा। धनमस्ति पश्य वा।

२५। अद्ड् डतरादिभ्यः पञ्चभ्यः। (3)

क्लीवाड् डतरादिपञ्चकात् स्वमोरद्डादिश्यते। कतरत्। कतमत्। अन्यत्। अन्यतरत्। इतरत् तिष्ठति पश्य वा।

(क) एकतराच्चेष्यते। एकतरमस्ति वा।

२६। नेतराच्छन्दसि।

छान्दसम्।

२७। युष्मदस्मद्भ्यां ङसोऽश्।

आभ्यां परस्य ङसोऽशादिश्यते। तव। मम। इह श्रुतेनाङ्गविशेषणात् तदन्तत्वेऽपि निर्दिश्यमानस्यादेशा भवन्तीति वचनात् अतितव। अतिमम। तथाऽतियुष्माकम्। अत्यस्माकम्। सुमकथ्ना विप्रेण। प्रियानड्वानित्यादि। इहतु बहुवना गिरयः सुवनौ शैलौ बहुत्रपुर्ग्रामः सुत्रपो विप्रस्येति अङ्गेनैव नपुंसकविशेषणाच्छिशोलुङ्नुम्विधयो न भवन्ति।

२८। ङेप्रथमयोरम्।

आभ्यां परस्य ङेः प्रथमद्वितीययोश्चाम् स्यात्। ङे। तुभ्यम्। मह्यं

(3) सर्वाद्यन्तर्गणे डतरडतमौ प्रत्ययौ। अन्य अन्यतर इतर इति शब्दाश्चय इति पञ्च।

दीयते । प्रथमयोः । त्वम् । अहम् । युवाम् । आवाम् । यूयं वयम् । त्वां माम् । युवाम् आवाम् ।

२६ । शसो न ।

आभ्यां परस्य शसो नः स्यात् । आदेः परस्य (१।१।५४) । संयोगान्तलोपः (८।२।२३) । युष्मान् नदीः पश्यामि । अस्मान् कुलानि पश्य ।

३० । भ्यसो भ्यम् ।

आभ्यां भ्यसो भ्यमादिश्यते । युष्मभ्यमस्मभ्यं देहि ।

३१ । पञ्चम्या अत् ।

आभ्यां पञ्चमीभ्यसो ऽत् स्यात् । युष्मद् भीतः । अस्मत् पतितः ।

३२ । एकवचनस्य च ।

पञ्चम्येकवचनस्यात् स्यात् । त्वद् गच्छति । मद् बिभेति ।

३३ । साम आकम् ।

युष्मदस्मद्भ्यां ससुट्कस्यामो निवर्त्तक आकम् स्यात् । युष्माकम् । अस्माकम् । प्रिययुष्माकम् । अत्यस्माकम् । प्रियास्माकम् ।

३४ । आत औ णलः ।

आदन्तात् परस्य णल औरादिश्यते । ददौ । जग्लौ । मम्लौ । तस्थौ । पपौ । औत्वमेकादेशो द्विरुक्तिरिति क्रमः ।

३५ । तुह्योस्तातङ् ङाशिष्यन्यतरस्याम् ।

तुहिशब्दयोराशिषि तातङ् वा स्यात् । जीवतु जीवताद्वा भवान् । जीव जीवताद्वा त्वम् । ङित्त्वाद् गुणवृद्ध्योरभावः । ब्रूतात् । मृष्टात् । अल्लोपः (६।४।१११) । भिन्तात् । स्तात् । इत्त्वम् (६।४।३४) शिष्टात् । ईत्वम् । लुनीतात् (६।४।११३) । उत्वम् (६।४।११०) । कुरुतात् ।

३६ । विदेः शतुर्वसुः ।

विदेःशतुर्वसुरादिश्यते वा । विद्वान् । विद्वांसौ । विद्वांसः । विदुषी स्त्री । पक्षे विदन् । विदन्तौ । विदन्तः । विदती स्त्री ।

३७। समासेऽनञ्पूर्वे क्त्वो ल्यप्।

अनञ्पूर्वे समासे क्त्वो ल्यप् स्यात्। प्रकृत्य। प्रस्थाय। विजित्य। प्रणीय। प्रदाय। उरीकृत्य। नानाकृत्य। पार्श्वतःकृत्य। अनञ्पूर्वे किम्? अकृत्वा। नञ्पर्युदासादनव्ययसमासेऽपि न भवति परमकृत्वा। उत्तमकृत्वा। अप्रकृत्येति पदसंस्कारपक्षे पश्चान्नञ्समासः। इह छन्दःसूत्राणि त्रयोदश। (4)

५०। आज्जसेरसुक्।

आदसुगिति द्वयमधिक्रियते। शेषश्छान्दसः।

५१। अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि।

अश्वादेरसुगागमः स्यात् क्यच्यप्रीतिश्चेत्। स चाश्ववृषयोर्मैथुनेच्छा चेत्। क्षीरलवणयोर्लालसा चेत्। अश्वस्यति वडवा। "लक्ष्मणं सा वृषस्यन्ती।" क्षीरस्यति बटुः। लवणस्यत्युष्ट्रः।

(क) सर्वप्रातिपदिकेभ्यो लालसायामसुग् वक्तव्यः। दध्यस्यति। मध्वस्यति।

(ख) सुगित्यपरे। दधिस्यति। मधुस्यति। "पतिस्यन्ती वराङ्गना।" लालसायां किम्? दधीयती।

५२। आमि सर्वनाम्नः सुट्।

अवर्णान्तात् सर्वनाम्नः परस्यामः सुट् स्यात्। सर्वेषाम्। विश्वेषाम्। येषाम्। तेषाम्। केषाम्। सर्वासाम्। यासाम्। तासाम्। कासाम्। आदित्येव। भवताम्। उभयीनाम्।

५३। त्रेस्त्रयः।

त्रेरामि त्रयः स्यात्। त्रयाणाम् (5)।

---

(4) तानि च यथा।

३८। क्त्वापि छन्दसि। ३९। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः। ४०। अमो मश्। ४१। लोपस्त आत्मनेपदेषु। ४२। ध्वमो ध्वात्। ४३। यजध्वैनमिति च। ४४। तस्य तात्। ४५। तप्तनप्तनथनाश्च। ४६। इदन्तो मसि। ४७। क्त्वो यक्। ४८। इष्ट्वीनमिति च। ४९। स्नात्व्यादयश्च। ५०।

(5) दुर्घटवृत्तिकार cites here "छन्दसि त्रीणामित्येव भवतीति भाषावृत्तिः"। But in none

५४ । ह्रस्वनद्यापो नुट् ।

ह्रस्वान्तान्नद्यन्तादाबन्ताच्चामो नुट् स्यात् । वृक्षाणाम् । विप्राणाम् । मालानाम् । खट्वानाम् । बहुराजानाम् । अग्नीनाम् । नदीनाम् । लक्ष्मीणाम् । वायूनाम् । बन्धूनाम् । वधूनाम् । कर्तॄणाम् । एभ्योऽन्यत्र ग्रामण्याम् । (6)

५५ । षट्चतुर्भ्यश्च ।

षट्संज्ञकेभ्यश्चतुरश्चामो नुट् स्यात् । षण्णाम् । सप्तानाम् । दशानाम् । चतुर्णाम् । इह ।

५६ । श्रीग्रामण्योश्छन्दसि ।

५७ । गोः पादान्ते ।

छन्दःसूत्रद्वयम् ।

५८ । इदितो नुम् धातोः ।

इदितो धातोर्नुम् आगमः स्यात् । नन्दति । वन्दते । कुण्डा । हुण्डा ।

५९ । शे मुचादीनाम् ।

शे परतो मुचादीनां नुमागमः स्यात् । मुञ्चति । सिञ्चति । लिम्पति । लुम्पति । निकृन्तति । विन्दति ।

(क) तृम्फादीनाञ्च तृम्फति । गुम्फति । नुमोऽत्र विधानसामर्थ्यान्न लोपः ।

६० । मस्जिनशोर्झलि ।

मस्जेर्नशेश्च झलि नुमागमः स्यात् । मङ्क्ता । नंष्टा । झलि किम् ? मज्जनम् । नशनम् ।

६१ । रधिजभोरचि ।

अनयोरचि नुमागमः स्यात् । रन्धनम् । रन्धकः । रन्धयति । जम्भनम् ।

---

of our MSS, it is to be found. For such passages as "तीर्णामपि समुद्राणां प्रलये-ऽपिरिवोत्थितः" he quotes the above and then says "छान्दसा अपि कचिद् भाषायां प्रयुज्यन्त इति भाष्यम् ।"

(6) कथं "सेनानीनामहं स्कन्द" इति ? आर्षोऽयं प्रयोगः ।

जम्भयति। जम्भकः। नित्यो नुम् वृद्धिं बाधते। अचि किम्? रद्धा। जभ्यम्।

६२। नेट्यलिटि रधेः।

रधेरिटि नुम् नास्ति। रधिता। रधितुम्। अलिटि किम्? ररन्धिव। ररन्धिम।

६३। रभेरशब्लिटोः।

६४। लभेश्च।

रभेर्लभेश्चाजादौ नुम् स्यात्। आरम्भयति। आरम्भकः। आरम्भणम्। आरम्भो। लम्भयति। लम्भनम्। लम्भकः। अशब्लिटोः किम्? आरभते। आरेभे। लभते। लेभे।

६५। आङो यि।

आङ्पूर्वस्य लभेर्यकारादौ नुम् स्यात्। आलम्भ्यः पशुः। आलभ्यत इत्यनिदितामिति (६।४।२४) नलोपः।

६६। उपात् प्रशंसायाम्।

उपलभेर्यकारादौ नुम् स्यात्। उपलम्भ्या विद्या। प्रशंसायां किम्? उपलभ्यं किञ्चिद् वृषलात्।

६७। उपसर्गात् खल्घञोः।

उपसृष्टस्यैव लभेः खलि घञि च नुम् स्यात्। खल्। सुप्रलम्भः। घञ्। विप्रलम्भः। उपसृष्टस्यैव किम्? ईषल्लभः। लाभो वर्त्तते। कथं राज्ञलम्भः? (7) तर्हि चिन्त्यम्। उपसृष्टस्यैवेति नियमात् खल्घञोरन्यत्रापि स्यात्। प्रलम्भनम्।

६८। न सुदुर्भ्यां केवलाभ्याम्।

आभ्यां लभेः खलि घञि च नुम् नास्ति। सुलभः। दुर्लभः। सुलाभः। दुर्लाभः। केवलाभ्यां किम्? अतिसुलम्भः। यदा सुः (१।४।९४) पूजाया-

(7) कात्यायनी तुष्टवुरिष्टलम्भादिति देवीमाहात्म्ये प्रयोगस्त्वार्षः।

मतिरतिक्रमणे चेति (१।४।९५) कर्मप्रवचनीयोऽतिर्नोपसर्गस्तदातिसुलभ-मित्यपि भवति ।

६९ । विभाषा चिण्णमुलोः ।

चिणि णमुलि च परे लभे र्वा नुम् स्यात् । अलाभि अलम्भि वा । लम्भं लम्भम् । लाभं लाभं वा । अनुपसर्गाद्विकल्पोऽयम् । उपसर्गे तु नित्यम् । प्रालम्भि । प्रलम्भम् ।

७० । उगिदचां सर्वनामस्थानेऽधातोः ।

उगितामञ्चतेश्च सर्वनामस्थाने नुम् स्यात् । भवान् भवन्तौ भवन्तः । श्रेयान् । विद्वान् । उपेयिवान् । पचन् । पठन् । अञ्चः । प्राङ् प्राञ्चौ प्राञ्चः । सर्वनामस्थाने किम् ? भवतः पश्य । भवता कृतम् । अधातोः किम् ? उखास्रत् । पर्णध्वत् ।

७१ । युजेरसमासे ।

युजः सर्वनामस्थाने नुम् स्यात् । युङ् । युञ्जौ । युञ्जः । असमासे किम् ? अश्वयुक् । अश्वयुजौ । अश्वयुजः ।

७२ । नपुंसकस्य झलचः ।

झलन्तस्याजन्तस्य च क्लीवस्य सर्वनामस्थाने नुम् स्यात् । उदश्वित्ति । पयांसि । कुण्डानि । वारीणि । मधूनि । झलचः किम् ? विमलदिवि । चत्वारि । अहानि । उगितोऽपि झलन्तस्य परत्वादयं नुम् । श्रेयांसि । कुर्वन्ति ।

(क) बहूर्जि प्रतिषेधः ।

(ख) अन्त्यात् पूर्वं नुममेके । रेफात् परो नुमित्येके । बहूर्ञ्जि विप्र-कुलानि बहूर्जि वा । बहोरन्यत्र अत्यूर्न्जि । सूर्न्जि । (४)

---

(४) अत्यूर्न्जि सूर्न्जि इत्यत्र नकाररेफजकाराणां संयोगान्न नकारस्य लुप्तम् ।

७३। इकोऽचि विभक्तौ।

अजन्तस्य इगन्तस्य क्लीवस्याजादौ विभक्तौ नुम् स्यात्। दधिनी। मधुनी। त्रपुणी। त्रपुणे। त्रपुणः। इकः किम्? कुण्डे द्वे।

७४। तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य।

उक्तपुंस्कं क्लीवमिगन्तं टादावचि गालवस्य मतेन पुंवत् स्यात्। ग्रामण्ये कुलाय। ग्रामण्यां कुले। अन्येषां न। ग्रामणिने। ग्रामणिनि। एवं शुचये शुचिने वा। पटवे पटुने वा।

७५। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः।

अस्थ्यादीनामनङादिश्यते टादावचि। अस्थ्ना। दध्ना। सक्थ्ना। अक्ष्णा। गुणानामपीष्यते। सुसक्थ्ना विप्रेण। अचि किम्? अस्थिभ्याम्। अक्षिभ्याम्।

७६। छन्दस्यपि दृश्यते।

७७। ई च द्विवचने।

छन्दःसूत्रद्वयम्।

७८। नाभ्यस्ताच्छतुः।

अभ्यस्तात् परस्य शतुरुगिदचामिति नुम् नास्ति। ददत्। ददती। शासत्। चकासत्। जाग्रत्।

७९। वा नपुंसकस्य।

उक्तो निषेधः क्लीवस्य वा स्यात्। ददति ददन्ति वा कुलानि। जाग्रति जाग्रन्ति वा।

८०। आच्छीनद्योर्नुम्।

अवर्णान्तात् परस्य शतुर्नुम् वा स्याच्छीनद्योः परतः। तुदन्ती तुदती वा। करिष्यती करिष्यन्ती वा। याती यान्ती वा विप्रकुले। नद्याम्। तुदती तुदन्ती वा। भाती भान्ती वा ब्राह्मणी। आदिति किम्? अदती। घ्नती। बिभ्रती। चिन्वती। रुन्धती। लुनती।

८१ । अप्श्यनोर्नित्यम् ।

अप्श्यनोरवर्णान्तात् परस्य शतुर्नित्यं नुम् स्यात् । पचन्ती । चोरयन्ती । दीव्यन्ती कुले स्त्री वा ।

८२ । सावनडुहः ।

नुम् स्यात् । अनड्वान् । हे अनड्वन् । सौ किम् ? अनड्वाहौ ।

८३ । दृक्स्ववस्स्वतवसाञ्छन्दसि ।

छान्दसम् ।

८४ । दिव औत् ।

सौ दिव औत् स्यात् । द्यौः । हे द्यौः । सौ किम् ? दिवं पश्य ।

८५ । पथिमथ्यृभुक्षामात् ।

एषामात्त्वं स्यात् सौ । पन्थाः । मन्थाः । ऋभुक्षाः । हे पन्थाः ।

८६ । इतोऽत् सर्वनामस्थाने ।

पथ्यादीनामितो ऽत् स्यात् सर्वनामस्थाने । पन्थाः । पन्थानौ । पन्थानः । मन्थाः । मन्थानौ । मन्थानः । ऋभुक्षाः । ऋभुक्षाणौ । ऋभुक्षाणः । ऋभुक्षाणम् । ऋभुक्षाणौ ।

८७ । थो न्थः ।

तेषां थो न्थः स्यात् सर्वनामस्थाने । तथैवोदाहृतम् ।

८८ । भस्य टेर्लोपः ।

तेषां भसंज्ञकानां टिलोपः स्यात् । पथः पश्य । पथा । पथे । मथः । मथा । ऋभुक्षः । ऋभुक्षा । ऋभुक्षि ।

८९ । पुंसोऽसुङ् ।

असुङ् स्यात् । पुमान् । पुमांसौ । पुमांसः । हे पुमन् । सर्वनामस्थान इत्येव । पुंसः । पुंसा । पुंसाम् ।

९० । गोतो णित् ।

गोसम्बन्धि सर्वनामस्थानं णित् स्यात् । गौः । गावौ । गावः । हे गौः । द्योश्च । द्यौः । द्यावौ । द्यावः । हे द्यौः ।

९१ । णलुत्तमो वा ।

उत्तमो णल् णिद्वा स्यात् । अहं किल चकर (9) चकार वा । चुकुटाहं चुकोट वा । अहं विविच विव्याच वा ।

९२ । सख्युरसम्बुद्धौ ।

सख्युः सर्वनामस्थानं णित् स्यात् । सखायौ सखायः । असम्बुद्धौ किम् ? हे सखे ।

९३ । अनङ् सौ ।

सख्युरनङ् स्यात् सौ । सखा । असम्बुद्धावित्येव । हे सखे ।

९४ । ऋदुशनस्पुरोदंशोऽनेहसाञ्च ।

ऋदन्तानामुशनसादेश्च सावनङ् स्यात् । कर्त्ता । हर्त्ता । भर्त्ता । माता । पिता । उशना । पुरोदंशा । अनेहा । सौ किम् ? कर्त्तारौ । अनेहसौ । असम्बुद्धावित्येव । हे कर्त्तः । हे अनेहः । सम्बोधने उशनस त्रैरूप्यमिच्छन्ति सान्तं नान्तमदन्तञ्चेति । हे उशनः । हे उशनन् । हे उशन । (10)

---

(9) "बहु जगद पुरस्तात् तस्य मत्ता किलाहं चकर च किल चाटु प्रौढयोषिद्वदस्य । विदितमिति सखीभ्यो रात्रिवृत्तं विचिन्त्य व्यपगतमदया ह्नि ह्रीयितं मुग्धवध्वा ॥ १ ॥" इति माघे ।

(10) तथाच श्लोकवार्त्तिकम्—

"सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥" १ ॥ इति ।

९५। तृज्वत् क्रोष्टुः।

क्रोष्टुशब्दस्य तृजन्तवत् स्यात्। क्रोष्टृशब्दवदित्यर्थः। क्रोष्टा क्रोष्टारौ क्रोष्टारः? सर्वनामस्थान इत्येव क्रोष्टून्। असम्बुद्धावित्येव। हे क्रोष्टो।

९६। स्त्रियाञ्च।

स्त्रियां क्रोष्टुशब्दः तृज्वत् क्रोष्टृवत् स्यात्। (11) क्रोष्ट्री। क्रोष्ट्रीभिः।

९७। विभाषा तृतीयादिष्वचि।

टादावचि क्रोष्टुस्तृज्वद्वा स्यात्। क्रोष्ट्रा क्रोष्टुना वा। क्रोष्टरि क्रोष्टौ वा। अचि किम्? क्रोष्टुभ्याम्। क्रोष्टुभिः।

(क) नुमचिरतृज्वद्भावेभ्यो नुम्नुटौ पूर्वप्रतिषेधेन। त्रपूणाम्। तिसृणाम्। क्रोष्टूनाम्।

९८। चतुरनडुहोरामुदात्तः।

अनयोराम् स्यात्। चत्वारः। चत्वारि। अनड्वान्। अनड्वाहौ। अनड्वाहम्। तदन्ताच्च। सुचत्वारः। सुचत्वाः। सुचत्वारौ। प्रियानड्वान्। प्रियानड्वाहौ। सर्वनामस्थान इत्येव। चतुरः पश्य।

(क) अनडुहः स्त्रियां वेति वक्तव्यम्। अनडुही अनड्वाही। गौरादिः।

९९। अम् सम्बुद्धौ।

सम्बुद्धौ तयोरम् स्यात्। हे प्रियचत्वः। हे अनड्वन्। हे प्रियानड्वन्।

१००। ॠत इद्धातोः।

ॠदन्तस्य धातोॠतः स्यादित्। किरति। गिरति। विस्तीर्णम्। चिकीर्षति। धातोः किम्? मातॄणाम्।

१०१। उपधायाश्च।

धातोरुपधाया ॠत इत् स्यात्। कीर्त्तयति। कीर्त्तनम्।

---

(11) तत ऋन्नेभ्यो ङीबिति (४।१।५) ङीपि क्रोष्ट्री।

१०२। उदोष्ठ्यपूर्वस्य।

ओष्ठ्यवर्णपूर्वस्य ऋत उत् स्यात्। पॄ पूर्त्तम्। पुपूर्षति। सम्पूर्षते। प्रावुवूर्षति। मुमूर्षते। "वुवूर्षति समाहृत आशां विवरिषुः प्रभोः।"

(क) इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन। आस्तरणम्। आस्तारकः। निपरणम्। निपारकः। कथम् उद्गिरणमिति ? निपातनात् साधु।

१०३। बहुलञ्छन्दसि।

छान्दसम्।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
सप्तमाध्यायस्य प्रथमः पादः ॥७।१॥
समाप्तश्च युपादः ॥

अथ

भाषावृत्तिः ।

सप्तमोऽध्यायः । द्वितीयः पादः ।

१ । सिचि वृद्धिः परस्मैपदेषु ।

इगन्तस्याङ्गस्य सिचि परे वृद्धिः स्यात् परस्मैपदेषु । अचैषीत् । अनैषीत् । अस्तावीत् । अलावीत् । अपावीत् । अकार्षीत् । अहार्षीत् । परस्मैपदेषु । किम् ? अच्योष्ट । अप्लोष्ट । परस्मैपदेषु विधिरितः सप्तसूत्र्याम् ।

२ । अतो ल्रान्तस्य ।

परस्मैपदे सिचि परतो ल्रान्तस्याङ्गस्यातो वृद्धिः स्यात् । अचालीत् । अज्वालीत् । अचारीत् । अचारिषुश्चन्द्रकान्ता मयायः । अचारीत् । कथमवधीत् । अतोऽनेकवर्णव्यवधानात् ।

३ । वदव्रजहलन्तस्याचः ।

एषामचो वृद्धिः स्यात् तस्मिन् । अवादीत् । अव्राजीत् । हलन्तानाम् । अपाक्षीत् । अभैत्सीत् । अरौत्सीत् । अताप्सीत् । अनेकवर्णव्यवधानेऽपीष्टम् । अराङ्क्षीत् । अभाङ्क्षीत् ।

४ । नेटि ।

इडादौ सिचि हलन्तानां वृद्धिर्नास्ति । अदेवीत् । असेवीत् । व्यरंसीत् । अमोषीत् ।

५ । ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ।

हमयान्तानां क्षणादेश्च सेटि सिचि वृद्धिर्नास्ति । अग्रहीत् । अवमीद्रक्तम् । अव्ययीत् । अक्षणीत् । अश्वसीत् । अजागरीत् । एतन्नोदाहरणं छन्दसि ।

अश्वयीत्। एदिताम्। अरगीत्। अलगीत्। ह्म्यन्तेत्येवावत् (११२।११)। अधावीत्।

६। ऊर्णोतेर्विभाषा।

इयं वृद्धिरूर्णो र्वा स्यात् तस्मिन्। प्रौर्णावीत्। प्रौर्णवीद्वा। ङित्त्वपक्षे उवङ्। प्रौर्णुवीत्।

७। अतो हलादेर्लघोः।

हलादेरङ्गस्य लघोरतो वृद्धिर्वा स्यात् सेटि सिचि। अराणीत् अरणीद्वा। अवासीत्। अवसीद्वा। अतानीत्। अतनीद्वा। कथमवादीत्। अज्वालीत्। अग्रहीत्? वदव्रजेत्यादिविधि-(७।२।३) निषेध-(७।२।५) वचनात्। कथमचकासीत्। अतोऽनेकवर्णव्यवधानात्। उक्ता वृद्धिः।

८। नेड् वशि कृति।

वशादौ कृतीडागमो नास्ति। वरमनादौ प्रयोजनम्। ईश्वरः। दीप्रः। भस्म। याच्ञा। कृति किम्? रुरुदिव। रुरुदिम।

६। तितुत्रतथसिसुसरकसेषु च।

एष्विण् नास्ति। क्तिन् दीप्तिः। क्तिच् तन्तिः। तुन् सक्तुः। ष्ट्रन् पत्रम्। तन् हस्तः। गर्तः। थन् कुष्ठः। काष्ठम्। कुषेः क्सः कुक्षिः। इषेः सुक् इक्षुः। अशेः क्सरम् अक्षरम्। शलेः कन्। शल्कः। वदेः सः वत्सः।

(क) अग्रहादीनामिति वक्तव्यम्। निगृहीतिः। निपठितिः। भक्षितिः।

१०। एकाच उपदेशेऽनुदात्तात्।

उपदेशे यो धातुरेकाजनुदात्तश्च तस्मादिण् नास्ति। तत्र सर्वेऽजन्ता अनिटः। दाता। दातुम्। दातव्यम्। नेता। चेता। स्तोता। कर्त्ता। हर्त्ता। अकार्षीत्। चिचीषति। निनीषति। सेटस्तु लिख्यन्ते।

ऊदन्तमूदन्तमदन्तमप्यथो यु-रु-क्ष्णु-शीङ्-स्नु-नु-क्षु-श्वि-डीङ्-श्रिञ्-वृङ्-वृञौ।
शीङं श्रियश्चैव तथा च डीङ्श्रियावित्येव सेटः प्रवदन्त्यजन्ततः॥१॥

अदन्तः। भविता। लविता। ऋदन्तः। तरिता। निगरिता। आस्तरिता। अदन्तस्तु हनो वध। आवधिषीष्ट। आवधिष्ट। अवधीत्। नविता। प्रस्नविता। क्ष्णविता। यविता। रुविता। प्रोर्णविता। रविता। निवरिता। प्रावरिता। श्रयिता। श्वयिता। उड्डयिता। आक्ष्णयिता। हलन्तास्तु सर्व एव सेटः। शक्तिता। कुषिता। अनिटोऽपि लिख्यन्ते। शकिरेकः कान्तः। शक्ता। एवं पचिवचिविचिरिचिसिचिमुचयः षट् चान्ताः। प्रच्छिरेकश्छान्तः।

"रञ्जिर्भञ्जिसृज्यजियजिभजयः सञ्जस्वञ्जौ सृजियुजिरुजयः।
मस्जभ्रस्जौ भुजिनिजिविजयो जान्तेष्वेते खलु परमनिटः" ॥२॥

"अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन् सदिं शदिं स्विद्यतिपद्यती खिदिम्।
तुदिं नुदिं विद्यतिविन्त इत्यपि प्रतीहि दान्तान् दश पञ्च चानिटः" ॥३॥

"रुधिः सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः।" (12)

सिध्यतिश्च धान्ताः। हनिमन्यती द्वौ नान्तौ।

"तपिं तिपिश्चापि मथो वपिं स्वपिं क्षिपिं लुपिं तृप्यतिदृप्यती सृपिम्।
स्वरेण नीचेन शपिच्छुपिक्षिपीन् प्रतीहि पान्तान् पठितांस्त्रयोदश" ॥४॥

रभलभयभास्त्रयो भान्ताः। यमिरमिनमिगमयश्चत्वारो मान्ताः।

"दिशिं दृशिं दंशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशतिमष्टमं विशिम्।
लिशिं च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान्" ॥५॥

"शिषिः पिषिः शुष्यतिपुष्यती त्विषिर्विषिः श्लिषिस्तुष्यतिदुष्यती द्विषिः"। (13) कृषिकर्षती द्वादश षान्ताः। घसिर्वसिर् निवासे चेति द्वौ सान्तौ।

"दिहिं दुहिं मेहतिरोहती वहिं नहिस्तु षष्ठो दहतिस्तथा लिहिं" (14) रिति हान्ता षष्टौ।

---

(12) श्लोकांशोऽयं व्याघ्रभूतिकारिकात उद्धृतः। अपरांशश्चायम्—

"इमे तु धान्ता दश येऽनिटो मतास्ततः परं सिध्यतिरेव नेतरे॥"

(13) "इमान् दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान् कृषिकर्षती तथा॥"

इति श्लोकस्य शेषांशः।

(14) "इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्तिताः॥" इति शेषांशः। व्याघ्रभूतिविरचिता अनिट्कारिका एकादश। तासामेव काश्चित् पूर्वाः कारिकाश्चात्रोद्धृताः। अदन्तमृदन्तमिति श्लोकस्तु न व्याघ्रभूतेः।

११। श्र्युकः क्किति।

श्रिञ उगन्तानाञ्च क्कितीण् नास्ति। श्रितम्। श्रित्वा। युतं युत्वा। प्रस्नुतः। प्रभूतः। लूनः। लूनवान्। लूत्वा। तीर्णम्। "तीर्त्वा स्फुरन्मकरदारुणमम्बुराशिम्"। पूर्त्तम्। पूर्त्त्वा। क्किति किम्? श्रयिता। लविता। एकाच इत्येव। जागरितः।

(क) वाच्य ऊर्णोर्नुवद्भावः। ऊर्णुत्वा। (15)

१२। सनि ग्रहगुहोश्च।

ग्रहगुहोरुगन्तानाञ्च सनीण् नास्ति। जिघृक्षति। जुघुक्षति। रुरूषति। लुलूषति। पूञ् पुपूषति।

१३। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि।

क्रादीनामेव लिटीण् नास्ति। नान्येषाम्। चकृव। चकृम। चकृषे। चकृढ्वे। ससृव। ससृम। बभृव। बभृम। ववृव। ववृम। ववृवहे। ववृमहे। तुष्टुव। तुष्टुम। दुद्रुव। दुद्रुम। सुस्रुव। सुस्रुम। शुश्रुव। शुश्रुम। नियमः किम्? बिभिदिव। बिभिदिम। लुलुविव। लुलुविम। सेदिवान्। ऊषिवान्। थल्यप्ययं निषेधः। चकर्थ। तुष्टोथ। दुद्रोथ। कथं ववरिथ? ववर्थेति (७।२।६४) निगमे निपातनात्।

(क) क्रोऽसुट्कस्येति वक्तव्यम्। सञ्चस्करिथ। सञ्चस्करिव। सञ्चस्करिम।

१४। श्वीदितो निष्ठायाम्।

श्वेरीदिताञ्च निष्ठायामिण् नास्ति। शूनः। शूनवान्। उद्विग्नः। उद्विग्नवान्। लग्नः। दीप्तः। डीङोऽपीड्भावं व्याचक्षते। उड्डीनः। उड्डीनवान्। निष्ठानुवृत्तिः प्राग् इड्विधेः (७।२।३५)।

---

(15) "वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्" ॥ १ ॥

इति वार्त्तिकम् (१।१।२२, वा)। प्रोर्णोनूयते। प्रोर्णुनाव। प्रोर्णुनविथ। प्रोर्णुतः। प्रोर्णुतवान्। प्रोर्णुत्वा इति।

१५ । यस्य विभाषा ।

यस्य धातो र्विभाषेट् क्वचिदुक्तस्तस्य निष्ठायामिण् नास्ति । धूञूदितो वा (७।२।४४) । धूतम् । गूढ़म् । उदितो वा (७।२।५६) । वृत्तम् । वृत्तवान् । दृढ़ः । क्लतीवृतीनृतीनामीदित्त्वं यस्य विभाषेति प्रतिषेधस्यानित्यता ज्ञापनार्थम् । तेन धावुधातोर्गताविट् । धावितो धावितवान् । (16) पतेश्च । पतितः । पतितवान् । इह विभाषा गमहनविदविशामित्यत्र (७।२।६८) विशिना तौदादिकेन साहचर्य्याच् शविकरणस्य विदेर्ग्रहणाल्लुग्विकरणस्य विदेर्विदितो विदितवान् । (17) एकाच इत्येव । संज्ञपितः । दरिद्रितः ।

१६ । आदितश्च ।

१७ । विभाषा भावादिकर्म्मणोः ।

आदितो धातोर्निष्ठायामिण् नास्ति । मिन्नः । क्ष्विण्णः । चकाराट्टाञ्चम्तः । वान्तः । (18) भावारम्भयोस्तु वा । मिन्नं मेदितं वानेन । प्रमिन्नः प्रमेदितो वायम् ।

(क) निष्ठायां कर्म्मणि शकेरिड् वेति सोनागाः । शक्तः शकितो वा घटः कर्त्तुम् ।

१८ । क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढ़ानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ।

क्षुब्धादीनि मन्थादौ निपात्यन्ते । क्षुब्धो मन्थः विलोड़नदण्ड इत्यर्थः । स्वान्तं मनः । ध्वान्तं तमः । लग्नं सक्तम् । म्लिष्टमविस्पष्टम् । विरिब्ध

---

(16) अन्यत्र धौतम् । पदं तुषारस्रुतिधौतरक्तमिति कुमारकाव्ये ।

(17) "वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।

विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेः" ॥ १ ॥ इति ।

(18) तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिरिति मेघदूते । सुष्टं प्रतियाह्यता स्वमर्थमिति शाकुन्तले । (अपिच सेव्यरेणुमुषितार्कदीधितिरिति रघुकाव्ये । न विश्वसेदविश्वस्त इति नीतौ । पुष्पेषुणा भुवमभूमिषुवर्षजन्म दुग्धारमन्मथलभञ्जितमास्थितस्तोम् । प्रङ्गारसर्गरसिकद्वाणकोदरि त्वं दोषाधिपान् नयनयोर्नय गोचरत्वम् ॥ १॥ इति नैषधे ।

उदात्तादिस्वरः। फाण्टः अनायासः पुरुषोऽन्यो वा। "फाण्टाश्रिमास्त्र-पाणयः"। बाढ़ बाढ़ं भृशम्। अन्यत्र क्षुभितं (19) स्वनितं ध्वनितं लगितं म्लेच्छितं विरेभितं फणितं वाहितम्।

१९। धृषिशसी वैयात्ये।

आभ्यां प्रागल्भ्ये निष्ठायामिण् नास्ति। धृष्टः। विशस्तः। वैयात्ये किम्? धर्षितः। विशसितः।

२०। दृढ़ः स्थूलबलयोः।

स्थूले बलवति च दृंहेर्दृढ़ो निपात्यते।

२१। प्रभौ परिवृढ़ः।

अतायं निपात्यते।

२२। कृच्छ्रगहनयोः कषः।

दुःखे गहने च कषेरिण् नास्ति। कष्टोऽग्निः। कष्टं वनम्।

२३। घुषिरविशब्दने।

घुषेर्निष्ठायामिण् नास्ति। घुष्टा रज्जुः। "शस्त्रघुष्टकरान् कपीन्।" उद्घुष्टोऽयमर्थः। "उद्घुष्टं परपुष्टया"। अविशब्दने किम्? अवघुषितं वाक्यमाह। अशास्त्रीयमित्यर्थः।

२४। अर्द्देः सन्निविभ्यः।

एभ्योऽर्द्देर्निष्ठायामिण् नास्ति। समर्णः। न्यर्णः। व्यर्णः पीड़ित इत्यर्थः।

२५। अभेश्चाविदूर्य्ये।

नैकट्ये अभिपूर्वादर्द्देर्निष्ठायामिण् नास्ति। अभ्यर्णा सेना।

२६। णेरध्ययने वृत्तम्।

ण्यन्ताद्वृतेरध्ययने वृत्तं स्यात्। वृत्तं पारायणं तेन। वर्त्तितमन्यत्र।

---

(19) मिथ्यापवादक्षुभितेन भर्त्सिते कालिदासः।

२७ । वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।

एभ्यत्वात् दमादेरमी सप्त वा निपात्यन्ते । पक्षे दमितः । शमितः । पूरितः । दासितः । स्पाशितः । छादितः । ज्ञपितः ।

२८ । रुष्यमत्वरसंघुषास्वनाम् ।

एषामिड् वा स्यात् । रुष्टो रुषितो वा । अभ्यान्तोऽभ्यमितो वा । तूर्णः त्वरितो वा । संघुष्टं संघुषितं वा वाक्यम् । आस्वान्तो मृदङ्गः । आस्वनितो वा ।

२९ । हृषेर्लोमसु ।

हृष तुष्टावित्यतो लोमकर्तृकादिड् वा स्यात् । हृष्टं हृषितं वा केशैः । हृष्टं हृषितं वा लोमभिः । "भयसंहृष्टलोमानः" । लोमसु किम् ? हृषितो विप्रः ।

(क) विस्मितप्रतिघातयोश्च । इड् वा स्यात् । हृष्टो हृषितो वा । विस्मितः प्रतिहतो वेत्यर्थः ।

३० । अपचितश्च ।

अपचायतेर्वा चिभावो निपात्यते । अपचितः । अपचायितो वा ।

(क) क्तिनि नित्यं चिभावो वक्तव्यः । "विहितापचितिर्महीभुजा ।"

इह च्छन्दःसूत्राणि चत्वारि । (20)

३५ । आर्द्धधातुकस्येड् वलादेः ।

वलादेरार्धधातुकस्येडागमः स्यात् । भविता । लविता । लवितुम् । लविष्यति । अलविष्यत् । लुलविथ । लविषीष्ट । वलादेः किम् ? लव्यम् । लवनीयम् । आर्धधातुकस्य विधिरा रुदादेः (७।२।७६) । वलादेर्विधान मा सलोपात् (७।२।७९) ।

लिटस्थवमसेध्वानां स्यसीयुट्तास्सिचां सनः ।
तुमुंस्तव्यनिष्ठानां वलादेरिड् विधीयते ॥ १ ॥

---

(20) ३१ । हु ह्वरेश्छन्दसि । ३२ । अपरिह्वृताश्च । ३३ । सोमे ह्वरितः । ३४ । ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरुत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च ।

३६ । स्नुक्रमोरनात्मनेपदनिमित्ते ।

स्नुक्रमिभ्यामिट् स्यात् । स्नविता । क्रमिता । स्नवितुम् । क्रमितुम् । यत्रात्मनेपदनिमित्ते स्नुक्रमी तत्रायं निषेधः । यथा भावे प्रस्नोषीष्ट । प्रक्रंसीष्ट ।

(क) क्रमिः कर्त्तर्य्यात्मनेपदविषयात् इति प्रतिषेधः । प्रोपाभ्यां समर्था-भ्याम् (१।३।४२) । प्रक्रन्ता । उपक्रन्ता । तद्विषयात् किम् ? निष्क्रमिता । क्रमेः किम् ? व्यतिप्रस्नविता । प्रस्नविता गौः स्वयमेव ।

३७ । ग्रहोऽलिटि दीर्घः ।

ग्रहेरिटो दीर्घः स्यात् । ग्रहीता । ग्रहीतुम् । ग्रहीतव्यम् । अलिटि किम् ? जगृहिव । जगृहिम । चिण्वदिटोऽपि दीर्घो न भवति । अप्रकृतत्वात् । ग्राहिष्यते । यङ्लुगन्तात्र न भवति । ग्रहेर्विहितस्येटो विधानात् । जरीगृहिता ।

३८ । वृतो वा ।

अस्मादिटो वा दीर्घः स्यात् । वृङ्वृञो । वरितुम् । वरीतुं वा । वरिता वरीता वा । आस्तरितुम् आस्तरीतुं वा । जरित्वा जरीत्वा वा । अलिटी-त्येव । तेरिथ । आतस्तरिथ । वृत इति किम् ? करिष्यति ।

३९ । न लिङि ।

वृतो लिङि दीर्घो न स्यात् । प्रावरिषीष्ट । तरिषीष्ट ।

४० । सिचि च परस्मैपदेषु ।

वृतः सिचि दीर्घो नास्ति । प्रावारिष्टाम् आस्तारिष्टाम् । परस्मैपदेषु किम् ? आवरीष्ट । आवरिष्ट वा । अतरीष्ट । अतरिष्ट वा ।

४१ । इट् सनि वा ।

वृतः सनीड् वा स्यात् । "प्रावुवूर्षुः समाक्रम आज्ञां-विवरिषोः प्रभोः" । प्राविवरीषुर्वा । ऋतः । "तितीर्षुं दुस्तरं मोहादुडुपेनास्मि सागरम्" । तितरिषुः । तितरीषुर्वा । नाचणिकत्वात्र । चिकीर्षति ।

४२ । लिङ्सिचोरात्मनेपदेषु ।

वृतो लिङ्सिचो रिड् वा स्यात् । वृषीष्ट वरिषीष्ट वरीषीष्ट वा । आस्तीर्षीष्ट आस्तरिषीष्ट आस्तरीषीष्ट वा । सिचि । अवृत अवरिष्ट अवरीष्ट वा । आस्तीर्ष्ट आस्तरिष्ट आस्तरीष्ट वा । आत्मनेपदेषु किम् ? आस्तारिष्टाम् । आस्तारिषुः । प्रावारिष्टाम् । नित्यमिट् ।

४३ । ऋतश्च संयोगादेः ।

ऋदन्तात् संयोगादे लिङ्सिचोरिड् वा स्यादात्मनेपदेषु । ध्वृषीष्ट ध्वरिषीष्ट वा । स्तृषीष्ट स्तरिषीष्ट वा । स्मृषीष्ट स्मरीषीष्ट वा । सिचि । अस्मृषाताम् । अस्मरिषातां वा । अध्वृषाताम् । अध्वरिषातां वा । लाक्षणिकत्वान्नेह । संस्कृषीष्ट । समस्कृत ।

४४ । स्वरतिसूतिसूयतिधूञूदितो वा ।

एभ्य इड् वा स्यात् । स्वर्तुम् । स्वरितुं वा । सूतिसूयत्योः । सोतुम् । सवितुं वा । धोतुम् । धवितुं वा । ऊदितः । गाढुम । गाहितुं वा । गोप्तुम् । गोपितुं वा । मार्ष्टुम् । मार्जितुं वा । पुरस्तात् प्रतिषेधकाण्डस्य सर्वापवादत्वात् । सूत्वा । धूत्वा । स्तृत्वा ।

४५ । रधादिभ्यश्च ।

रधादिभ्योऽष्टभ्य (21) इड् वा स्यात् । रधितुम् । रद्धुं वा । नशितुम । नंष्टुं वा । तर्पितुम् । तर्प्तुं वा । क्रादिनियमान्नित्यम् (७।२।१३) । ररन्धिव । ररन्धिम ।

४६ । निरः कुषः ।

निष्कुष इड् वा स्यात् । निष्कोषितुम् । निष्कोष्टुं वा ।

४७ । इण् निष्ठायाम् ।

निरःकुषेर्निष्ठाया मिट् स्यात् । निष्कुषितः । निष्कुषितवान् । (22)

---

(21) रधिर्नशिस्तृपिर्दृपिर्द्रुहिर्मुहिः ष्णिहिः ।
ष्णुहिश्चेति भवन्त्येते दैवादिका रधादयः ॥ १ ॥

(22) चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुरिति भट्टिः ।

४८। तीषसहलुभरुषरिषः।

तकारादावेभ्य इड् वा स्यात्। एष्टा। एषिता वा। सोढा सहिता वा। लोब्धा लोभिता वा। रोष्टा रोषिता वा। रेष्टा रेषिता वा। तीति किम्? एषिष्यति। इष गतावित्यस्य नेष्यते। प्रेषिता। प्रेषितुम्। नित्यमिट्।

४९। सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्।

एषां सनीड् वा स्यात्। इवन्तस्य। दुद्यूषुः। दिदेविषुर्वा। ऋधु। ईर्त्सि-मीर्त्सुः। अर्दिधिषुर्वा। भ्रस्ज। बिभ्रक्षति बिभ्रज्जिषति बिभर्क्षति वा। दम्भु धीप्सति धिप्सति दिदम्भिषति वा। धिप्सुः। धीप्सुः। दिदम्भिषुर्वा। उच्छिश्रीषति। उच्छिश्रियिषति वा। सुस्वूर्षति सिस्वरिषति वा। युयूषति यियविषति वा। प्रोर्णुनूषति प्रोर्णुनविषति वा। भर भौवादिकः। बुभूर्षति बिभरिषति वा। ज्ञीप्सति जिज्ञपयिषति वा। सिषासति सिसनिषति वा।

(क) तनिपतिदरिद्राणामुपसंख्यानम्। तितांसति तितंसति तितनिषति वा। पित्सति पिपतिषति वा। दिदरिद्रासति दिदरिद्रिषति वा।

५०। क्लिशः क्त्वानिष्ठयोः।

५१। पूङश्च।

क्लिशिपूङोः क्त्वानिष्ठयो रिड् वा स्यात्। क्लिष्ट्वा क्लिशित्वा वा। क्लिष्टः क्लिशितो वा। पूत्वा पवित्वा वा पूतः पवितो वा।

५२। वसतिक्षुधोरिट्।

वसेः क्षुधेश्च क्त्वानिष्ठयो रिट् स्यात्। उषित्वा। उषितः। उषितवान्। क्षुधित्वा। क्षुधितः। क्षुधितवान्।

५३। अञ्चेः पूजायाम्।

अञ्चेस्तयो रिट् स्यात्। अञ्चित्वा। अञ्चितः। पूजायां किम्? उदक्त-मुदकं कूपात्।

५४। लुभो विमोहने।

व्याकुलीकरणे लुभस्तयोरिट् स्यात्। लोभित्वा। लुभितः। विमोहने किम्? लुब्धो वृषलः।

५५। जॄव्रश्च्योः क्त्वि।

आभ्यामिट् स्यात्। जरित्वा जरीत्वा वा। व्रश्चित्वा। सानुबन्धकस्य तु जृषे जीर्त्वा।

५६। उदितो वा।

उदितः क्त्वीड् वा स्यात्। दान्त्वा दमित्वा वा। शान्त्वा शमित्वा वा। वृत्त्वा वर्त्तित्वा वा। स्यूत्वा सेवित्वा वा। रत्वा रमित्वा वा। स्रस्त्वा स्रंसित्वा। वा। उवुन्दिर् वुन्त्वा वुन्दित्वा वा। शिष्ट्वा शासित्वा वा।

५७। सेऽसिचि कृतचृतच्छृदतृदनृतः।

सकारादौ कृतिचृतिच्छृदितृदिनृतीनामिड् वा स्यात्। कर्त्स्यति कर्त्तिष्यति वा। चर्त्स्यति चर्त्तिष्यति वा। एवं यावत् नर्त्स्यति नर्त्तिष्यति वा। असिचि किम्? अकर्त्तीत्। अनर्त्तीत्।

५८। गमेरिट् परस्मैपदेषु।

सकारादौ गमेरिट् स्यात्। गमिष्यति। जिगमिषति। आदेशोऽपि गमिष्यति। अधिजिगमिषिता व्याकरणस्य। परस्मैपदग्रहणमात्मनेपद-निषेधार्थम्। सञ्जिगंसते। अधिजिगांसते शास्त्रम्।

५९। न वृद्भ्यश्चतुर्भ्यः।

वृतुवृधुशृधुस्यन्दूभ्यः सकारादाविण् नास्ति। वर्त्स्यति। वर्त्स्यन्। विवृत्सति। विवृत्सितुम्। परस्मैपदेष्वित्येव। वर्त्तिष्यते। वर्त्तिषीष्ट।

६०। तासि च कॢपः।

तासि सादौ च कॢपेरिण् नास्ति। कल्प्तासि। कल्प्स्यति। चिकॢप्सति। पूर्ववत् तङि। कल्पितासे कल्प्तासे वा। कल्प्स्यते कल्पिष्यते वा।

६१। अचस्तास्वत् थल्यनिटो नित्यम्।

तासौ नित्यानिटामजन्तानां धातूनां तासाविव थलीण् नास्ति। क्रादि-नियमात् (७।२।१३) प्राप्तिः। पाता पपाथ। याता ययाथ। नेता निनेथ।

जेता जिगेथ। होता जुहोथ। अजन्तानां किम्? भेत्ता बिभेदिथ। नित्यानिटः किम्? धूञ् धोता धविता। दुधविथ। तासौ किम्? लूत्वा। लुलविथ। किति तु नित्यानिड्यम्।

६२। उपदेशेऽत्वतः।

पाठे अकारवतो धातोरिण्नास्ति पूर्ववत्। शशक्थ। पपक्थ। इयष्ठ। तपरः किम्? रराधिथ। उपदेशे किम्? चकर्षिथ। ननु कथं पपिथ ययिथ शेकिथ पेचिथ? आह।

६३। ऋतो भारद्वाजस्य।

भारद्वाजस्य मतेन ऋदन्तादेवायं प्रतिषेधः। सस्मर्थ। दध्वर्थ। अन्येभ्यस्तु स्यादेव। पपिथ। ययिथ। निनयिथ। शेकिथ। कथं तुष्टोथ दुद्रोथ? पुरस्तान्निषेधकाण्डस्य प्रणयनात् प्रतिषेधस्य बलीयस्त्वात् क्रादि-(७।२।१३) नियमात्।

६४। बभूथाततन्थजगृभ्मववर्थेति निगमे।

छान्दसम्।

६५। विभाषा सृजिदृशोः।

अनयोस्थलीड् वा स्यात्। सस्रष्ठ ससर्जिथ वा। दद्रष्ठ ददर्शिथ वा।

६६। इड्त्त्यर्तिव्ययतीनाम्।

एषां थलीट् स्यात्। आदिथ। आरिथ। संविव्ययिथ।

६७। वस्वेकाजाद्घसाम्।

६८। विभाषा गमहनविदविशाम्।

६९। सनिंससनिवांसम्।

इह वस्वेकाजाद्घसामित्यादिसूत्रत्रयं छान्दसमाहुः। वसोश्छान्दसत्वात्। दृश्यन्ते च शिष्टप्रयोगाः। पपिवान्। तस्थिवान्। "गवि तस्थिवांसम्"। "पदमातस्थुषा त्वया।" अचिवान्। जपिवान्। पेचिवान्। ददृशिवानित्यादि।

चन्द्रगोमी च भाषासूत्रकारः क्वसोरिडागमार्थं सूत्रितवान्। वस्वेकाजाद्घसाम्। वा गमहनविदविशाम्। दृशेश्च। एषामिति किम्? बभूवान्। गमादेर्वा। जग्मिवान्। जगन्वानिति।

७०। ऋद्धनोः स्ये।

ऋदन्तानां हन्तेश्च स्ये परे स्यादिट्। करिष्यति। अकरिष्यत्। हनिष्यति अहनिष्यत्।

७१। अञ्जेः सिचि।

इट् स्यात्। आञ्जीत्। आञ्जिष्टाम्। सिचि किम्। अङ्क्ता। अञ्जिता।

७२। स्तुसुधूञ्भ्यः परस्मैपदेषु।

एभ्यः सिचीट् स्यात्। अस्तावीत्। असावीत्। अधावीत्। तङि तु। अस्तोष्ट। असोष्ट। अधोष्ट अधविष्ट वा।

७३। यमरमनमातां सक् च।

एषां सिचीट् स्यात् सक् चागमः। अयंसीत्। व्यरंसीत्। अनंसीत्। आदन्तानाम्। अगासीत्। अयासीत्। अपासीत्। अम्नासीत्। अयासिष्टाम्। अम्नासिष्टाम्। इडादरिद्रासीदित्येके। एकाच इत्यधिकाराददरिद्रीदित्यपरे। परस्मैपदेष्वित्येव। अरंस्त। आयंस्त।

७४। स्मिपूङ्रञ्ज्वशां सनि।

स्मिङ् पूङ् ऋ अञ्ज्वशां सनीट् स्यात्। सिस्मयिषते सिस्मयिषमाणः। पिपविषते पिपविषमाणः। अरिरिषति। अञ्जिजिषति। अशिशिषते।

७५। किरश्च पञ्चभ्यः।

कॄगॄदृङ्धृङ्प्रच्छां सनीट् स्यात्। चिकरिषति। जिगरिषति। दिदरिषते। दिधरिषते। पिपृच्छिषति। पिपृच्छिषुः। वृतो (७।२।३८) वेत्यस्येटो दीर्घो नेष्यतीति वामनवृत्तिः। अस्तीति भागवृत्तिः। उक्तमार्धधातुके।

७६ । रुदादिभ्यः सार्वधातुके ।

रुदादिपञ्चकात् सार्वधातुके इट् स्यात् । रोदिति । स्वपिति । "श्वसिति जनकपुत्री" । प्राणिति । जक्षिति । वलादेरित्येव । रुदन्ति ।

७७ । ईशः से ।

ईशेर्धातोः से इत्यस्य इट् स्यात् । ईशिषे । ईशिष्व ।

७८ । ईडजनो र्ध्वे च ।

आभ्यां सेध्वयोरिट् स्यात् । ईडिषे ईडिध्वे । ईडिष्व । ईडिध्वम् । जने-श्छन्दसि श्लुनि लोपे जनिषे । जनिध्वे । ईश इत्येव । ईशिध्वे । ईशिध्वम् । उक्त इट् ।

७९ । लिङः सलोपोऽनन्त्यस्य ।

लिङोऽनन्त्यस्य सस्य लोपः स्यात् । कुर्य्यात् । कुर्य्याताम् । कुर्य्युः । कुर्वीत । कुर्वीयाताम् । कुर्वीरन् । अनन्त्यस्य किम् ? कुर्य्याः । सार्वधातुक इत्येव । क्रियास्ताम् । कृषीष्ट । क्रियासुः ।

८० । अतो येयः ।

अदन्तादङ्गात् परस्य याश्रब्दस्य इयादेशः स्यात् । अकार उच्चारणार्थः । भवेत् । पचेत् । पठेयुः । अतः किम् ? चिनुयात् । भिन्द्यात् । तपरः किम् ? यायात् । पायात् ।

८१ । आतो ङितः ।

अदन्तादङ्गात् परस्य ङितामाकारस्येयादेशः स्यात् । पचेते । पचेथे । अपचेताम् । अचीकरेताम् । ङितः किम् ? पचावहै । पचामहै । अत इत्येव । भिन्दाते । मिमाते । व्यतिवाते । ब्रुवाते ।

८२ । आने मुक् ।

आने परे मुक् स्यात् । पचमानः । यजमानः । करिष्यमाणः । अत इत्येव । कुर्वाणः ।

८३ । ईदासः ।

आसः परस्यानस्य ईत् स्यात् । आसीनः । उदासीनः ।

८४ । अष्टन आ विभक्तौ ।

अष्टन आत्वं स्यात् । अष्टौ । अष्टाभ्यः । अष्टाभिः । अष्टासु । तदन्तविधिरत्रेष्यते । परमाष्टौ उत्तमाष्टौ । पक्षे नेष्यते । अष्टनो दीर्घादिति । (६।१।१७२) ज्ञापकात् । अष्ट । अष्टभिः । अष्टसु । अप्राधान्ये नेष्यते । प्रियाष्टा । प्रियाष्टानौ । प्रियाष्टानः । विभक्तौ विधानमा हृद्देः (७।२।११४) । अष्टन इति सौत्रत्वादल्लोपाभावः ।

८५ । रायो हलि ।

रैशब्दस्य हलादावात्त्वं स्यात् । राः । सुराः । राभ्याम् । राभिः । रासु । हलि किम् ? रायौ । रायः । विभक्तावित्येव । रैत्वम् । रैता ।

८६ । युष्मदस्मदोरनादेशे ।

विभक्तौ अनयोरात्वं स्यात् । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु । अनादेशे किम् ? युष्मद् गच्छति । अस्मद् बिभेति ।

८७ । द्वितीयायाञ्च ।

अत्र तयोरात्वं स्यात् । त्वाम् । माम् । युवाम् । आवाम् । युष्मान् । अस्मान् ।

८८ । प्रथमायाश्च द्विवचने भाषायाम् ।

अत्र च तयोरात्वं स्यात् । युवाम् । आवाम् ।

८९ । योऽचि ।

तयोरजादौ विभक्तौ यः स्यात् । त्वया । मया । त्वयि । मयि । युवयोः । आवयोः । अनादेश इत्येव । त्वद् गच्छति । मद् बिभेति ।

९० । शेषे लोपः ।

शेषे विभक्तौ तयोरन्त्यलोपः स्यात् । टिलोप इत्यन्ये । त्वम् । अहम् ।

यूयम्। वयम्। तुभ्यम्। मह्यम्। युष्मभ्यम्। अस्मभ्यं देहि। त्वत्। मत्। युष्माकम्। अस्माकम्। युष्मत्। अस्मत्। तव। मम।

"पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि।
यान्यद्विवचनान्यत्र शेषे लोपो विधीयते ॥१॥"

९१। मपर्य्यन्तस्य।

अधिकारोऽयम्।

९२। युवावौ द्विवचने।

द्व्यर्थयोर्युष्मदस्मदोर्युवावौ स्याताम्। युवाम्। आवाम्। युवाभ्याम्। आवाभ्याम्। मपर्य्यन्तस्येत्येव। युवकाभ्याम्। आवकाभ्याम्। युवकाम्। आवकाम्।

९३। यूयवयौ जसि।

स्याताम्। यूयम्। वयम्।

९४। त्वाहौ सौ।

स्याताम्। त्वम्। अहम्।

९५। तुभ्यमह्यौ ङयि।

स्याताम्। तुभ्यम्। मह्यं दीयते।

९६। तवममौ ङसि।

स्याताम्। तव। मम धनम्।

९७। त्वमावेकवचने।

एकार्थस्य वचने वाचके ये युष्मदस्मदी तयोस्त्वमौ स्याताम्। त्वाम्। माम्। त्वया। मया। त्वयि। मयि। इत्यातिक्रान्तप्रयोगा ग्रन्थविस्तरभयादुपेक्षिताः (23)।

---

(23) त्वामतिक्रान्तः अतित्वम्। युवामतिक्रान्तः अति युवाम। युष्मानतिक्रान्तः अतियुष्मान्। एवमस्मदम्। अत्यावाम्। अत्यस्मान् इत्यादिप्रयोगा अतिक्रान्तप्रयोगाः।

९८ । प्रत्ययोत्तरपदयोश्च ।

प्रत्यये उत्तरपदे चैकार्थयोर्युष्मदस्मदो त्वमौ स्याताम् । त्वदीयः । मदीयः । त्वत्तरः । मत्तरः । क्यचि । त्वद्यति । मद्यति । क्यङ् । त्वद्यते । मद्यते । उत्तरपदे । त्वद्वनम् । मद्वनम् । त्वत्पुत्रः । मत्पुत्रः । एकवचने इत्येव । युष्माकमिदं युष्मदीयम् । युवयोः पुत्रः युष्मत्पुत्रः । आवयोः पुत्रः अस्मत्पुत्रः ।

९९ । त्रिचतुरोः स्त्रियां तिसृचतसृ ।

विभक्तौ स्त्रीलिङ्गयोरनयोस्तिसृचतसृ इत्येतौ स्याताम् । तिस्रः स्त्रियः । चतस्रस्ताः । स्त्रीलिङ्गयोः किम् ? त्रयः । त्रीणि । चत्वारः । चत्वारि । प्रियास्त्रय स्त्रीणि वा यस्याः सा प्रियत्रिः । प्रियत्री । प्रियत्रयः । प्रियचत्वाः । प्रियचत्वारौ ब्राह्मण्यौ ।

१०० । अचि र ऋतः ।

अजादौ विभक्तौ तिसृचतस्रो रेफः स्यात् । तिस्रः । चतस्रः । अचि किम् ? तिसृभिः । चतसृभिः । तिसृषु । चतसृषु ।

१०१ । जराया जरसन्यतरस्याम् ।

अजादौ विभक्तौ परतो जराया जरस् वा स्यात् । जरया जरसा वा । जरायै जरसे वा । अचि किम ? जराभिः ।

१०२ । त्यदादीनामः ।

द्विपर्यन्तास्त्यदादयः । तेषामकारः स्याद् विभक्तौ । त्यच्छन्दश्छान्दसः । सः । परमसः । असौ । तौ । ते । इमौ । इमे । अप्राधान्ये नेष्यते । अतितदौ अतितदः ।

१०३ । किमः कः ।

किमः साकच्कस्यापि कः स्यात् । कः । कौ । के ।

१०४। कु तिहोः।

तकारहकारादौ विभक्तौ किमः कुः स्यात्। कुतः। कुत्र। कुह-श्चान्दसः। (24)

१०५। क्वाति।

अति विभक्तौ किमः क्वः स्यात्। क्व तिष्ठति।

१०६। तदोः सः सावनन्त्ययोः।

त्यदादीनां तदोः स्थाने सः स्यात् सौ परे। सः। एषः। असौ। अनन्त्ययोः किम्? अन्त्यस्य मा भूत्। हे स। सा। सम्बुद्धिलोपटापौ न स्याताम्।

१०७। अदस औ सुलोपश्च।

अदसः सावौकारः स्यात् सोश्च लोपः। असौ पुमान्। असौ स्त्री च। हे असौ।

(क) औत्वप्रतिषेधः साकच्काद्वा सकारात् परस्योत्वञ्च। असुकः। असकौ वा। अदस औनङिति सूत्रं न कृतम्। सम्बुद्धौ नकारश्रुतिभयात्।

१०८। इदमो मः।

इदमः सौ मकारः स्यात्। अत्वापवादः। अयम्। इयम्।

१०९। दश्च।

विभक्तौ इदमो दस्य मः स्यात्। इमौ। इमे। इमम्। इमाम्। इमान्। इमाः।

११०। यः सौ।

इदमो दस्य यः स्यात् सौ। इयं स्त्री।

१११। इदोऽय् पुंसि।

सौ पुंसि इदम इद्रूपस्यायादेशः स्यात्। अयं पुमान्।

---

(24) कुहेत्यपि छान्दसमित्येके।

११२। अनाप्यकः।

अककारस्य इदम इद्रूपस्यानादेशः स्यादापि प्रत्याहारे परे। अनेन। अनयोः। अकः किम्? इमकेन। इमकयोः।

११३। हलि लोपः।

हलि विभक्तौ प्रकृतस्यानोऽन्त्यलोपः स्यात्। इद्रूपस्य लोप इत्येके। आभ्याम्। एभिः। एभ्यः। एषु। उक्तं विभक्तौ।

११४। मृजेर्वृद्धिः।

मृजेरङ्गस्येको वृद्धिः स्यात्। मार्ष्टा। मार्ष्टुम्। मार्ष्टि। परिमार्ष्टि।

११५। अचो ञ्णिति।

अचोऽङ्गस्य ञ्णिति वृद्धिः स्यात्। कारः। उपकारः। कारयति। नरमाचष्टे नारयति। गौः। सखायौ।

११६। अत उपधायाः।

उपधाया अतो ञ्णिति वृद्धिः स्यात्। पाकः। पाचयति। अतः किम्? भेदयति। उपधायाः किम्? चकासयति।

११७। तद्धितेष्वचामादेः।

११८। किति च।

तद्धिते ञ्णिति किति चाङ्गस्याचामादेरचो वृद्धिः स्यात्। गार्ग्यः। औपगवः। किति। नाड़ायनः। इह त्वाद्यः पारिषद इत्यन्तोपधावृद्धिभ्यामादिवृद्धिरिष्यते।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ॥७।२॥

समाप्तश्च सिचिपादः॥

अथ

भाषावृत्तिः ।

सप्तमोऽध्यायः । तृतीयः पादः ।

१ । देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ।

तद्धिते ञ्णिति किति चाङ्गस्य देविकादीनामादेरचो वृद्धिप्रसङ्गे आत् स्यात् । देविकायां भवं दाविकमुदकम् । दाविकाकूलाः शालयः । शिंशपाया विकारः शांशपो दण्डः । दित्यवाट् छान्दसः । दीर्घसत्रे भवं दार्घसत्रम् । श्रेयसि भवं श्रायसम् । "स श्रायसेन प्रमदेन युक्तः ।"

२ । केकयमित्रयुप्रलयानां यादेरियः ।

तस्मिन् एषां यादेर्भागस्य वृद्धिसहचरित इयादेशः स्यात् । केकयस्यापत्यं कैकेयः । जनपदशब्दात्क्षत्रियादञ्(४।१।१६८) । कैकेयी (25) । मित्रयोर्भावः । गोत्रचरणा-द्वुञ् (४।२।१२६) । मैत्रेयिका । प्रलयादागतं प्रालेयं (26) हिमम् ।

३ । न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ।

पदान्ताभ्यां यकारवकाराभ्यां परा वृद्धिर्न भवति । पूर्वौ तु ताभ्यामैच् । व्याकरणमधीते वेत्ति वा वैयाकरणः । स्वश्वस्यापत्यं सौवश्वः ।

४ । द्वारादीनाञ्च ।

एषां य्वाभ्यां परा वृद्धिर्नास्ति । पूर्वौ तु ताभ्यामैच् । द्वारि नियुक्तो दौवारिकः । श्वन इदं शौवनम् । श्वो भविता शौवस्तिकः । स्वरमधिकृत्य कृतो ग्रन्थः सौवरः । अपदान्तार्थोऽयमारम्भः ।

५ । न्यग्रोधस्य च केवलस्य ।

अस्य च तथा स्यात् । नैयग्रोधश्चमसः । केवलस्य किम् ? न्यग्रोधमूले भवा न्याग्रोधमूलाः शालयः ।

---

(25) कैकेयि कामाः फलितास्तवेति रघुकाव्ये ।

(26) प्रालेयाद्रेरुपतटमतिक्रम्येति प्रालेयास्रं कमलवदनादिति च मेघदूते ।

६ । न कर्मव्यतीहारे ।

कर्मव्यतीहारे यदुक्तं तन्नास्ति । व्याक्रोशी । व्यावहासी ।

७ । स्वागतादीनाञ्च ।

एषां यदुक्तं तन्नास्ति । स्वागतमाह स्वागतिकः । व्यवहारेण चरति व्यावहारिकः । व्यडस्यापत्यं व्याडिः । एवं स्वार्थिकः । स्वाभाविकः । स्वातन्त्र्यम् । स्वास्थ्यम् (27) । स्वाजन्यम् । स्वापतेयम् । द्वारादौ स्वशब्दपाठात् तदादिविज्ञानाच्चेह प्राप्तिः ।

८ । श्वादेरिञि ।

यत् श्वादेरङ्गस्य द्वारादित्वात् प्राप्तमिञि तन्नास्ति । श्वादंष्ट्रिः । इञीतीकाद्युपलक्षणम् । श्वगणेन चरति श्वागणिकः ।

९ । पदान्तस्यान्यतरस्याम् ।

पदशब्दान्तस्य द्वारादिकार्य्यं वा स्यात् । श्वापदम् । शौवापदं वा ।

१० । उत्तरपदस्य च ।

अधिकारोऽयम् । उत्तरपदवृद्धिर्वाच्या हनस्तात् (७।३।३२) प्राक् । लक्षणमप्येतत् । गुरुलाघवम् (28) । पितृपैतामहम् ।

११ । अवयवादृतोः ।

तस्मिन् अवयवात् परस्य ऋतुवाचिनो वृद्धिः स्यात् । पूर्वं वर्षाणां पूर्ववर्षाः । तत्र भवः पूर्ववार्षिकः । अपरहैमनः । अवयवात् किम् ? पूर्वासु वर्षासु भवः पौर्ववर्षिकः ।

---

(27) अचत् स्वाध्यमतीवाप निर्मलस्वाभवन्नभ इति । य इत्यमस्वाध्यमर्हार्हवं दिव इति च ।

(28) वस्तुतस्तु गुरुलाघवमित्यत्र परिमाणान्तस्यासंज्ञाशाणयो(७।३।१७)रित्यनेनैवोत्तरपदवृद्धिः । लघुशब्दस्य परिमाणवाचित्वात् । तथाच सर्वथा संख्याया इत्यस्यानुवृत्तिर्मन्तव्या । काशिकादावुत्तमनैमित्तिकः परमनैमित्तिक इत्यादिषूत्तरपदवृद्धेरनेनैव समर्थनात् । भट्टोजिप्रभृतयोऽप्येवम् । पितृपैतामहादयस्तु षष्ठीसमासादिभिः सिद्धा इत्येके ।

१२ । सुसर्वार्द्धाज्जनपदस्य ।

एभ्यो जनपदस्य वृद्धिः स्यात् तस्मिन् । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्द्धपाञ्चालकः । अवृद्धादपीति (४।२।१२५) वुञ् ।

१३ । दिशोऽमद्राणाम् ।

दिशःपरस्य जनपदस्य वृद्धिः स्यात् । पूर्वपाञ्चालकः अपरपाञ्चालकः । अमद्राणां किम् ? पौर्वमद्रः । मद्रेभ्योऽञ् (४।२।१०८) ।

१४ । प्राचां ग्रामनगराणाम् ।

दिशः परेषां प्राग्देशे ग्रामनगराणामुत्तरपदवृद्धिःस्यात् । पूर्वेषुकामशमा गजाः । नगरे पूर्वकान्यकुब्जकोऽश्वः ।

१५ । संख्यायाः संवत्सरसंख्यस्य च ।

संख्यायाः परस्य संवत्सरस्य संख्यायाश्च वृद्धिः स्यात् । द्विसांवत्सरिकः । त्रिसांवत्सरिकः । द्विषाष्टिकः । द्विसाप्ततिकः । त्रिसाप्ततिकः । अधीष्ट-भृतादौ (५।१।८०) तद्धितः ।

१६ । वर्षस्याभविष्यति ।

संख्यायाः परस्य वर्षस्याभाविनि तद्धिते वृद्धिः स्यात् । द्वे वर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः । षड्वार्षिकः । अभविष्यति किम् ? द्वे वर्षे भावि द्वैवर्षिकं भक्तम् । त्रैवर्षिकं धान्यम् ।

१७ । परिमाणान्तस्यासंज्ञाशाणयोः ।

संख्यायाः परस्य परिमाणान्तस्याङ्गस्य वृद्धिःस्यात् तस्मिन् । क्रीतार्थे ठञ् । द्विनैष्किकम् । असंज्ञाशाणयोः किम् ? पञ्च लोहित्यः परिमाणमस्येति ठकि भस्याढे तद्धिते पुंवत् । पाञ्चलोहितिकम् । क्रीतार्थे शाणादेति (५।१।३५) द्वित्रिपूर्वादण् च (५।१ ३६) । द्वैशाणम् ।

१८ । जे प्रोष्ठपदानाम् ।

जे जातार्थे तद्धिते प्रोष्ठपदानामुत्तरपदवृद्धिः स्यात् तस्मिन् । सन्धिवेले-त्यण् (४।३।१६) । प्रोष्ठपादो बालकः । अर्थग्रहणाद् भद्रपादः । जे किम् ? भवार्थे मा भूत् । प्रौष्ठपदो मेघः ।

१९। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च।

हृदाद्यन्तेऽङ्गे उभयपदवृद्धिः स्यात् तस्मिन्। सौहार्दम्। ब्राह्मणादित्वात् ष्यञ्। सौहार्द्यम्। सौभाग्यम्। सौभागिनेयः। दौर्भागिणेयः। सौरसैन्धवं पयः। हृदिति प्रतिपदोक्तस्य ग्रहणान्नेह हृदयादेशस्येति सौहृदमित्येके। (29)

२०। अनुशतिकादीनाञ्च।

एषाञ्चोभयपदवृद्धिः स्यात्। तस्येद (४।३।१२०) मित्यण्। आनुशातिकम्। तत्र च दीयते (५।१।९६)। आनुसांवत्सरिकम्। तस्यापत्यम् (४।१।९२)। पारस्त्रैणेयः। एवमिहलोकपरलोकसर्वलोकसर्वभूम्यनुहोडपुष्करसदधिदेवाधिभूतचतुर्वेदाभिगमप्रयोगाः।

२१। देवताद्वन्द्वे च।

अत्र चोभयपदवृद्धिः स्यात्। सौर्य्याचान्द्रमसम्। आग्निमारुतम्। सूक्तहविषोरेवाभिधानान्नेह। ब्राह्मविशाखम्।

२२। नेन्द्रस्य परस्य।

देवताद्वन्द्वे परस्येन्द्रस्य वृद्धिर्नास्ति। सौमेन्द्रश्चरुः।

२३। दीर्घाच्च वरुणस्य।

दीर्घात् परस्य वरुणस्य वृद्धिर्नास्ति। ऐन्द्रावरुणं कर्म। दीर्घात् किम्? आग्निवारुणम्।

२४। प्राचां नगरान्ते।

प्राग्देशे नगरान्तेऽङ्गे उभयपदवृद्धिः स्यात्। पौण्ड्रनागरः। सौह्मनागरः।

---

(29) विनिकीर्थ्य यथाभिमतसौहृदमिति कुमारकाव्ये। भावस्थिराणि जननान्तरसौहृदानीति शाकुन्तले। अत्र स्वान्तं हृन्मानसं मन इति न हृच्छब्दस्य ग्रहणम्। नापि हृदयादेशस्य। तर्हि सुहृद्दुर्हृदौ मित्रामित्रयोरित्यतः (५।४।१५०) सुहृच्छब्दादपि अर्थवद्ग्रहणे नानर्थकस्येति निरर्थकस्य हृच्छब्दस्याग्रहणात् तस्य वृद्धिरिति रचितसिद्धान्तः। तथाचास्य सूत्रस्य व्याख्यायां तत्त्वप्रदीपे—"केचिदर्थवद्ग्रहणपरिभाषया निपातितसुहृच्छब्दस्य योऽवयवो हृच्छब्दस्तदन्तस्योत्तरपदवृद्धिर्न भवतीति व्याचक्षते। समुदायो हि तत्र मित्रवचनः। अवयवस्तु निरर्थक एव।" इति। एवञ्च काव्यालङ्कारसूत्रवृत्तौ वामनसूत्रमपि हृद्भगादिवत् निष्प्रयोजनम्।

२५ । जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ।

जङ्गलाद्यन्तस्योत्तरपदवृद्धिर्वा स्यात् । कौरुजाङ्गलः कौरुजङ्गलो वा । वैश्वधेनवो वैश्वधैनवो वा । सौवर्णवालजः सौवर्णवलजो वा ।

२६ । अर्द्धात् परिमाणस्य पूर्वस्य तु वा ।

अर्धात् परस्य परिमाणस्य वृद्धिः स्यात् । पूर्वस्य तु वा । अर्धद्रौणिकमार्ध-द्रौणिकं वा । क्रीतार्थे ठञ् ।

२७ । नातः परस्य ।

अर्धात् परस्य परिमाणस्यातो वृद्धिर्नास्ति पूर्वस्य तु वा । अर्धप्रस्थिकम् । आर्धप्रस्थिकं वा ।

२८ । प्रवाहणस्य ढे ।

उत्तरपदस्य अस्य शुभ्रादिढकि वृद्धिः स्यात् पूर्वस्य तु वा । प्रावाहणेयः । प्रवाहणेयो वा । प्रवाहणेयीभार्य्य इति वृद्धिनिमित्तत्वात् पुंवद्भावनिषेधः ।

२९ । तत्प्रत्ययस्य च ।

ढप्रत्ययान्तस्य प्रवाहणस्य तथा स्यात् । प्रावाहणेयिः पुत्रः । प्रवाह-णेयिर्वा ।

३० । नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ।

नञः परेषामेषामुत्तरपदवृद्धिः स्यात् पूर्वस्य तु वा । अशौचमाशौचं वा । अनैश्वर्य्यमानैश्वर्य्यं वा । अक्षेत्रज्ञमाक्षेत्रज्ञं वा । अकौशलमाकौशलं वा । अनैपुणमानैपुणं वा । अक्षेत्रज्ञानीश्वरौ तत्पुरुषावेव ब्राह्मणादी ।

३१ । यथातथयथापुरयोः पर्य्यायेण ।

नञः परयोरनयोः पर्य्यायेण वृद्धिः स्यात् । आयथातथ्यम् । अयाथातथ्यं वा । आयथापुर्य्यं । अयाथापुर्य्यं वा । ब्राह्मणादित्वात् ष्यञ् । किति तद्धिते वृद्धिरचामादे(७।२।११७)रिति निवृत्तम् । ञ्णिति अनुवृत्तिमात्र । अत्र उत्तरपदाधिकारः ।

३२। हनस्तोऽचिण्णलोः।

हनस्तकारादेशः स्यात् ञ्णिति। घातः घातयति घातकः। अचिण्णलोः किम्? अघानि। जघान। कथं वार्त्रघ्नः? धातोः कार्य्यमुच्यमानं धातोः प्रत्यय एव स्यात्।

३३। आतो युक् चिण्कृतोः।

आदन्तस्य धातोर्युक् स्यात् चिणि कृति ञ्णिति च। अदायि। दायः। दायकः। कृति किम्? ददौ।

३४। नोदात्तोपदेशस्य मान्तस्यानाचमेः।

मान्तस्य चिणि कृति ञ्णि वृद्धिर्न स्यात्। अशमि। शमः। शमकः। अदमि। दमः। दमकः। अक्षमि। क्षमः। क्षमकः। बहुक्षमः। अतमि। तमः। तमकः। अश्रमि। श्रमः (30)। श्रमकः। क्रमः। (31) उदात्तोपदेशस्य किम्? अयामि। यामः। यामकः। एवं रमिगमिनमयः। अनाचमेरित्याचमिकमिवमीनामिति बोद्धव्यम्। आचामि। आचामः। आचामकः। अकामि। कामः। वामः। कथमुद्यमोपरमौ? गणे निपातनात्। (32)

३५। जनिवध्योश्च।

अनयोश्चिणि कृति ञ्णिति च वृद्धिर्नास्ति। अजनि। जनः। जनकः। अवधि। वधः। वधकः। उक्तं ञ्णिति।

(30) वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषस इति मेघदूते। विश्रमार्थमुपगूढ मनन्तमिति माघः। व्यतरच्छ्रमाय विश्रममिति नैषधे। अविश्रमं यावदिदं शरीरमिति। विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुरित्यादौ तु विश्रान्तिशब्दस्यैव पाठेन समाधानम्।

(31) कथं "हरे यदक्रामि पदैकमेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः। त्रपा हरीणामिति नम्रिताननैर्न्यवर्त्ति तैरर्द्धनभःकृतक्रमै"रिति नैषधीये? चिन्त्यमिति नारायणः। व्यवस्थितविभाषाश्रयणाद् धुर्य्यान् विश्रामयेतिवत् समाधेयमिति केचित्।

(32) शमु उपशमे यम उपरमे इति धातुपाठे। धात्वर्थनिर्देशस्तु तत्र भीमसेनादिकृतः। नत्वार्षः। अत उद्यमोपरमयोः साधुत्वमनुसन्धेयम्।

३६। अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ।

अर्त्तेरादन्तानाञ्च णौ पुगागमः स्यात्। अर्पयति। ह्रेपयति। व्लेपयति। रेपयति। क्नोपयति। क्ष्मापयति। आताम्। दापयति। धापयति। म्लापयति। अदीदपत्। लाक्षणिकस्यापि ग्रहणात्। अध्यापयति। अध्यापकः।

३७। शाच्छासाह्वाव्यावेपां युक्।

एषां णौ युक् स्यात्। निशाययति। अधिच्छाययति। अवसाययति। ह्वाययति। संविव्याययति। वेञ् वाययति। पा पाने पै शोषे शोषणे। पाययति।

(क) पातेर्लुग् वक्तव्यः। पालयति।

(ख) धूञ्प्रीञोर्नुग् वक्तव्यः। धूनयति। प्रीणयति। कथं धावयति प्राययतीति? धात्वन्तरयोः।

३८। वो विधूनने जुक्।

वाधातोर्णौ जुक् स्यात्। पक्षो वाजयति। विधूनने किम्? आवापयति केशान्। पै शोषे शोषणे।

३९। लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने।

लीति लीलीङोर्लेति लातेश्च ग्रहणम्। आभ्यां णौ नुग्लुकौ वा स्यातां द्रवीकरणे। ली। घृतं विलीनयति विलाययति वा। ला। घृतं विलालयति विलापयति वा। स्नेहविपातने किम्? जटां विलापयति। जटाभिरालापयते।

४०। भियो हेतुभये षुक्।

भियो णौ षुग् वा स्यात्। मुण्डो भीषयते। आत्वे कृते लुक्पुकौ नेष्टौ। घृतं विलापयति। मुण्डो भापयते। हेतुभये किम्? कुञ्चिका भाययति। "ग्रैर्भीषमभाययत्।" षुगात्मनेपदं चात्र न भवति।

४१। स्फायो वः।

णौ वः स्यात्। स्फावयति।

४२ । शदेरगतौ तः ।

णौ तः स्यात् । फलानि शातयति । अगतौ किम् ? तुरगाञ् शादयति । गाः शादयति ।

४३ । रुहः पोऽन्यतरस्याम् ।

णौ रुहः पो वा स्यात् । रोपयति रोहयति वा ।

४४ । प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ।

प्रत्ययस्थककारात् पूर्वस्यात इकारादेशः स्यादापि परे । ण्वुल् । कारिका । पाचिका । प्रागिवात् कः (५।३।७०) । मुण्डिका । जटिलिका । असुपः किम् ? प्रत्ययलक्षणेन सुबन्तात् परो य आप् तस्मिन् परे मा भूत् । बहु-परिव्राजका पुरी । अतः किम् ? गोका । नौका । तपरः किम् ? राका । धाका । आपि किम् ? कारकः । पाचकः । प्रत्ययस्थात् किम् ? शक्रा ।

(क) मामकनरकयोरुपसंख्यानं कर्त्तव्यम् । ममेयं मामिका । नरान् कायतीति नरिका ।

(ख) त्यक्त्यपोश्च । दाक्षिणात्यिका । अमात्यिका ।

४५ । न यासयोः ।

यत्तदोरित्त्वमिदं नास्ति । अकच् । यका । सका । यकाम् । "तकां देवपुरीमरौत्सीत् ।" यकाभ्याम् । तकाभ्याम् ।

(क) आशिषि चोपसंख्यानम् । वुन् । नन्दका । जीवका ।

(ख) उत्तरपदलोपे च । देवका देवदत्तिका ।

(ग) क्षिपकादीनाञ्च । क्षिपका । ध्रुवका । उपत्यका । अधित्यका ।

(घ) तारका ज्योतिषि । अन्यत्र तारिका स्त्री ।

(ङ) वर्णका तान्तवे । अन्यत्र वर्णिका ।

(च) वर्त्तका शकुनौ प्राचाम् । अन्यत्र वर्त्तिका स्त्री ।

(छ) अष्टका पितृदेवत्ये कालविशेषे च । क्षिपकादिराकृतिगणोऽयम् ।

(ज) सूतकापुत्रकावृन्दारकाणां वा । सूतका सूतिका वा । पुत्रका पुत्रिका वा । वृन्दारका वृन्दारिका वा ।

४६ । उदीचामातः स्थाने यकपूर्वायाः ।

यकारककारपूर्वस्यातः स्थाने योऽकारस्तस्योदीचां मतेनेत्त्वं न स्यात् । इभ्यका । इभ्यिका वा । चत्रियका चत्रियिका वा । ककारपूर्वस्य । चटकका चटकिका वा । यकपूर्वायाः किम् ? अश्विका । आत इति स्त्रीविषयस्य ग्रहणान्नेह । शकशकायतेः क्विप् । शकाशकाः । ततः कः । शकशकिका । शुभंयिका ।

(क) यकपूर्वत्वे धात्वन्तयकारककारयोः प्रतिषेधः । सुनयिका । सुशोकिका । सुशयिका । सुपाकिका ।

४७ । भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ।

भस्त्रादीनां सुद्वानां नञ्पूर्वाणामन्यपूर्वाणामप्युदीचामित्त्वं नास्ति । भस्त्रका भस्त्रिका वा । अभस्त्रका अभस्त्रिका वा । बहुभस्त्रका बहुभस्त्रिका वा । एषका एषिका वा । द्वका द्विका वा । स्वका स्विका वा । अज्ञका अज्ञिका वा । अजका अजिका वा । स्वका स्विका वा । बहुस्वका बहुस्विका वा । एषाद्वे नञ्पूर्वे न प्रयुज्येते ।

४८ । अभाषितपुंस्काच्च ।

अभाषितपुंस्कादातः स्थाने योऽकारस्तस्योदीचामित्त्वं नास्ति । खट्वका खट्विका वा । मालका मालिका वा ।

४९ । आदाचार्य्याणाम् ।

आकारःस्यादाचार्य्याणां मतेन । खट्वाका । मालाका ।

५० । ठस्येकः ।

अङ्गस्य ठस्य इकः स्यात् । ठक् । आक्षिकः । ठञ् । लावणिकः ।

५१ । इसुसुक्तान्तात् कः ।

एभ्यष्ठस्य कः स्यात् । इकापवादः । सार्पिष्कः । धानुष्कः । उगन्तात् । ओर्देशे ठञ् (४।२।११९) । नैषादकर्षुकः । शाबलत्कः । मातृकः । पैतृकः ।

(क) दोष उपसंख्यानम् । दोर्भ्यां तरतीति दौष्कः ।

५२। चजोः कु घिण्ण्यतोः।

घिति ण्यति चजोः कवर्गः स्यात्। पाकः। भोगः। पाक्यम्। भोग्यम्।

५३। न्यङ्क्वादीनाञ्च।

एषां कुत्वं स्यात्। न्यङ्कुः। मद्गुः। भृगुः। तक्रम्। वक्रम्। पचाद्यचि व्यतिषङ्गः। निदाघः। मेघः। कर्म्मण्यण् (३।२।१)। श्वपाकः। मांसपाकः।

५४। हो हन्ते र्ञ्णिन्नेषु।

ञ्णिति नकारे च हन्ते र्हकारस्य कुत्वं स्यात्। घातः। घातयति। घातकः। नकारे। घ्नन्ति। वृत्रघ्ना। वृत्रघ्नोऽपत्यं वार्त्रघ्नः।

५५। अभ्यासाच्च।

हन्तेः कुत्वं स्यात्। जिघांसुः। जङ्घन्यते। अहं अघन।

५६। हेरचङि।

हिनोतेस्तथा स्यात्। प्रजिघाय। प्रजिघीषति। प्रजेघीयते। अचङि किम्? प्राजीहयत्।

५७। सन्लिटोर्जेः।

५८। विभाषा चेः।

सन्नि लिटि च जेः कुत्वं स्यात्। जिगीषति। जिगाय। चिनोतेर्वा। चिचीषति चिकीषति वा। चिचिकाय चिचिचाय वा।

५९। न क्वादेः।

उक्तं कुत्वं कवर्गादेर्नास्ति (33)। कूजः। कूज्यम्। संकोचः। खर्जः। गर्जः। नेति योगविभागादेव। रोमाञ्चः। अमोघ्यम्। (34)

---

(33) अत्र क्षाम्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनादिति वार्त्तिकम्। अतो निष्ठायामनिट्त्वेन कुजः कूज्यमित्यादौ न कुत्वम्। युचुम्बुचप्रभृतीनां तु वार्त्तिककारमते कुत्वमेव। तेषां निष्ठायामनिट्त्वात्। सूत्रकारमते तु न क्वादेरित्यनेनात्र न कुत्वम्। एवञ्च मतद्वैधे यथोत्तरं मुनीनां प्रामाण्यमित्याहुः।

(34) अमोघ्यानम्बमोघ एवं प्रमाथादाय भाषस इति गीतायाम्। अमोघमस्त्रं यदि मन्यते भवानिति रघुवंशे। अत्र तु आवश्यक (७।३।६५) इत्यावश्यकेऽर्थे कुत्वाभाव इत्येके।

६० । अजिव्रज्योश्च ।

अनयोः कुत्वं न स्यात् । समाजः । परिव्राज्यम् । चकाराद् वाजः पजः ।

६१ । भुजन्युब्जौ पाण्युपतापयोः ।

एतावनयोर्निपात्यते । भुज्यतेऽनेनेति भुजः पाणिः । न्युब्जतेऽनेनेति न्युब्जो रोगः । अन्यत्र भोगः । समुद्गः ।

६२ । प्रयाजानुयाजौ यज्ञाङ्गे ।

इमौ यज्ञाङ्गे निपात्येते । अन्यत्र प्रयागः । अनुयागः ।

६३ । वञ्चेर्गतौ ।

कुत्वं नास्ति । वञ्च्यं वञ्चन्ति । गन्तव्यं यान्तीत्यर्थः । गतौ किम् ? वङ्क्यं काष्ठम् ।

६४ । ओक उचः के ।

उचेर्घञि ओके सिद्धे कप्रत्यये निपातनमिदं स्वरार्थम् ।

६५ । ण्य आवश्यके ।

ण्ये कुत्वं नास्ति । अवश्यपाच्यम् । आवश्यके किम् ? पाक्यम् ।

६६ । यजयाचरुचप्रवचर्चश्च ।

एभ्यश्च ण्ये कुत्वं नास्ति । याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यो नाम ग्रन्थः । अर्च्यम् । ऋचेरस्मादेव वचनान्न क्यप् ।

(क) त्यजेरुपसंख्यानम् । त्याज्यम् ।

६७ । वचोऽशब्दसंज्ञायाम् ।

वचेर् ण्यति कुत्वं नास्ति । वाच्यम् । अशब्दसंज्ञायां किम् ? वाक्यम् ।

६८ । प्रयोज्यनियोज्यौ शक्यार्थे ।

एतौ शक्यार्थे निपात्येते । प्रयोक्तुं शक्यः प्रयोज्यः । नियोक्तुं शक्यो नियोज्यः । अन्यत्र प्रयोग्यः । नियोग्यः ।

६९ । भोज्यं भक्ष्ये ।

निपात्यते । भोज्य ओदनः । भक्ष्ये किम्? भोग्या स्त्री ।

७० । घोर्लोपो लेटि वा ।

छान्दसम् ।

७१ । ओतः श्यनि ।

ओदन्तस्य श्यनि लोपः स्यात् । दो द्यति । षो स्यति । अवस्यति ।

७२ । क्सस्याचि ।

क्सस्याजादावन्त्यलोपः स्यात् । अधुक्षाताम् । अधुक्षि ।

७३ । लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ।

एषां क्सस्य सर्वस्यैव लुग् वा स्यात् दन्त्यवर्णादौ तङि । अदुग्ध । अधुक्षत । अदुग्धाः अधुक्षथाः । अधुग्ध्वम् अधुक्षध्वम् । दन्त्योष्ठ्योऽपि वकारो दन्त्यग्रहणेन गृह्यते । वहेरझलादित्वाद् ढादेशत्वं नास्ति । अदुह्वहि अधुक्षावहि ।

७४ । शमामष्टानां दीर्घः श्यनि ।

शमादीनामष्टानां श्यनि दीर्घः स्यात् । शाम्यति । ताम्यति । दाम्यति । श्राम्यति । भ्राम्यति । क्षाम्यति । क्लाम्यति । माद्यति । श्यनि किम्? भ्रमति । वा भ्राशेति (३।१।७०) श्यन् वा ।

७५ । ष्ठिवुक्लम्याचमां शिति ।

शिति एषां दीर्घः स्यात् । निष्ठीवति । आचामति । क्लामति ।

७६ । क्रमः परस्मैपदेषु ।

शिति दीर्घः स्यात् । क्रामति । उत्क्रामन् । नेह । क्रमते बुद्धिः ।

७७ । इषुगमियमां छः ।

एषां शिति छः स्यात् । इच्छति । गच्छति । यच्छति । प्रायच्छत् । उकारनिर्देशान्नेह । इष्यति । इष्णाति ।

७८ । पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिब-जिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ।

पाघ्रादीनामेकादशानां शिति पिबादयः स्युः । पिबति । पिबेत् । जिघ्रति । धमति । तिष्ठति । मनति । यच्छति । पश्यति । ऋच्छति । सर्त्तेर्वेगितायां गतौ धौ । धावति । अन्यत्र । अभिसरति । शीयते । सीदति । अर्त्तिसर्त्तीति सौत्रत्वाद् विकरणाभावः ।

७९ । ज्ञाजनोर्जा ।

शिति ज्ञाजनोर्जाः स्यात् । जानाति । जायते ।

८० । प्वादीनां ह्रस्वः ।

एषां शिति ह्रस्वः स्यात् । पुनाति । लुनाति । स्तृणाति ।

८१ । मीनातेर्निगमे ।

छान्दसम् ।

८२ । मिदेर्गुणः ।

शिति मिदेरङ्गस्येको गुणः स्यात् । मेद्यति । मेद्यतः । मेद्यन्ति । शितीत्येव । मिद्यते ।

८३ । जुसि च ।

अङ्गस्येको जुसि गुणः स्यात् । अबिभयुः । अजागरुः । ऐयरुः । जुसाश्रयं ङित्त्वापवादोऽयं गुणो यासुटो ङित्त्वेन बाध्यते । चिनुयुः । भूयुः । सुनुयुः ।

८४ । सार्वधातुकार्द्धधातुकयोः ।

अनयोरिगन्तस्याङ्गस्य गुणः स्यात् । जयति । नयति । चिनोति । भवति । करोति । करवाव । करवाम । विधुरिवाचरति विधवति । क्विप् । सवितरति । रातयति । आर्धधातुके । जेतुम् । नेतुम् । भवितुम् । कर्त्तुम् । तरितुम् । विधवितुम् । सवितरितुम् । अनयोः किम् ? अग्निकाम्यति । भूकाम्यति । (35)

---

(35) चयिता तद्विटपाश्रिता भवेति कुमारका अप्रयोगे तु नयतस्मात् मन करोतीति णिचि नययतेः मः ।

८५ । जाग्रोऽविचिण्णल्ङित्सु ।

वृद्धेर्गुणप्रतिषेधस्य च विषये जागर्त्तेर्गुणः स्यात् । जागरयति । जागरकः । जागरितः । जागरितवान् । रिङोऽपि पूर्वविप्रतिषेधाद् गुण इत्यागमः । जागर्य्यते त्वया । अविचिण्णल्ङित्सु किम् ? विन् । जागृविः । चिण् । अजागारि । णल् । जजागार । ङित् । जागृतः । जागृथः । कथमजागरुः । अहं जजागर ? जाग्र इति सूत्रप्राप्तिर्निषिध्यते । इह तु पूर्वसूत्राभ्यां गुणः ।

८६ । पुगन्तलघूपधस्य च ।

पुगन्तानां लघूपधानां च सार्वधातुकार्धधातुकयोर्गुणः स्यात् । क्नोपयति । क्ष्मापयति । क्षेपणम् । वर्द्धते । वर्त्तते । वर्त्तनम् । भेदयति । भेत्ता । भेदनम् । छेत्ता । कथं बिभित्सति । हलन्ताच्चेति (१।२।२०) कित्त्वात् । कथं लिखनं लिखिष्यति ? संज्ञापूर्वकत्वेन गुणस्यानित्यत्वात् ।· (36)

८७ । नाभ्यस्तस्याचि पिति सार्वधातुके ।

अभ्यस्तस्य गुणो न स्यादजादौ पिति सार्व्वधातुके । नेनिजानि । अनेनिजम् । अचि किम् ? नेनेक्ति । लङ् । अनेनेक् । लघूपधस्येत्येव । "जुहवानि चानले ।" सार्वधातुके विधानं यावत् स्नपि चेति (७।३।१०२) ।

८८ । भूसुवो स्तिङि ।

गुणो नास्ति । अभूत् । अभूः । सुवै । सुवावहै । सुवामहै ।

८९ । उतो वृद्धिर्लुकि हलि ।

उकारान्तस्य वृद्धिः स्याल्लुकि सति हलादौ पिति परे । यौति । रौति । स्तौति । स्तौमि । हलि किम् ? स्तवानि ।

---

(36) एवञ्च न दृष्टेः प्रेयसि प्रियं मिलन इति चेतो दहति न इत्यमरुशतके । तमोमध्यस्थान्तः परिमिलनमप्राप्य हरित मिति रत्नावली । व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीर मिति गीतगोविन्दे प्रयोगः । नहि मिल-श्लेषणे लिख अक्षरविन्यास इति कुटादौ । तत्पुरुषाश्रयणेनानयोः कुटादित्वमित्यपि हेयम् । अपाच्चतुष्पाच्छकुनिष्वालेखन इति (६।१।१४२) निर्देशात् । अन्ये तु मिलनशब्दस्थाने मिलितमिति भावे क्तान्तं पठन्ति । कथं विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे इति जयदेवः ? निरङ्कुशाः कवयः । अत्र गुणस्य प्राप्त्या गुणाभावाप्राप्त्या निकृन्तनमिति हि ल्युटि स्यात् । उणादिषु वाऽयं शब्दो द्रष्टव्यः ।

९०। ऊर्णोतेर्विभाषा।

ऊर्णोतेरीड् वा स्यात्। प्रोर्णौति। प्रोर्णोति। हलीत्येव। प्रोर्णवानि।

९१। गुणोऽपृक्ते।

ऊर्णोरपृक्ते गुणः स्यात्। इडेर्बाधा। प्रोर्णोत्। प्रोर्णोः।

९२। तृणह इम्।

तृहेः श्नमि तृणह इत्यस्य इमागमः स्याद् हलि पिति सार्वधातुके। तृणेढि। तृणेक्षि। "तृणेढु रामः सह लक्ष्मणेन।" अतृणेट्। हलीत्येव। तृणहानि।

९३। ब्रुव ईट।

ब्रुवो हलि पिति ईट् स्यात्। ब्रवीति। ब्रवीतु। अब्रवीत्। हलि किम्? ब्रवाणि।

९४। यङो वा।

हलादेः पितः सार्वधातुकस्य यङोऽभावाद् यङ्लुगन्तादीड् वा स्यात्। बोभवीति बोभोति वा। लालपीति लालप्ति वा। वावदीति। यङ्लुक् छान्दस इति भागवृत्तिः। नेत्यन्ये। चन्द्रगोमी भाषासूत्रकारो यङो वेति सूत्रितवान्।

९५। तुरुस्तुशम्यमः सार्वधातुके।

तुरुस्तुशम्यमइतिच्छान्दसम्। (37)।

९६। अस्तिसिचोऽपृक्ते।

अपृक्तस्य आभ्यामीट् स्यात्। आसीत्। आसीः। सिच्। अकार्षीत्। अकार्षीः। अपृक्ते किम्? अस्ति। अकार्षीम्।

(क) आडिभुवोरीटि स्थानिवद्भावप्रतिषेधः। आत्थ। अभूत्।

(37) इदं सूत्रं छान्दसमित्यन्ये। अयञ्च सूत्रार्थः। तुरुस्तुशम्यम इत्येभ्यः परस्य सार्वधातुकस्य हलादेः तिङ ईड् वा स्यात्। तेन रौति रवीति वा। स्तौति स्तवीति वा। पुंस्त्वमविवक्षितम्। हलादेः किम्? रुवन्ति। तिङः किम्? शाम्यति। सार्वधातुके किम्? रुयात्। आशिषि लिङ्। लिङ्यादौ न रुयात् रुवीयात्। सार्वधातुक (७।३।८७) इत्यनुवर्तमाने पुनः सार्वधातुकग्रहणमपिदर्थम्। रुवीतः रुवन्। स्तुतः स्तुवीतः। स्तुते स्तुवीते। तुधातुः सौत्रो गतिवृद्धिहिंसासु। तौति तवीति वा। शम्यमोश्छान्दसः प्रयोगः। पुरुषोत्तमेन तु रौति स्तौति तौतीनां शब्दानां वृद्धिर्णिति इत्यादि (७।२।११५) इत्यनेन अपिच्चेत्युक्तम्, सम्पूर्ण छान्दसत्वमुक्तम्।

९७ । बहुलञ्छन्दसि ।

छान्दसम् ।

९८ । रुदश्च पञ्चभ्यः ।

एभ्योऽपृक्तस्य ईट् स्यात् । रुद इति सुब्व्यत्यये (३।१।८५) भ्यसो ङसिः । अरोदीत् । अश्वसीत् । अस्वपीत् । प्राणीत् । अजक्षीत् ।

९९ । अड् गार्ग्यगालवयोः ।

अनयोर्मतेनैभ्योऽट् स्यात् । अरोदत् । अश्वसत् । अस्वपत् ।

१०० । अदः सर्वेषाम् ।

अदोऽपृक्ते सर्वेषामट् स्यात् । आदत् । आदः ।

१०१ । अतो दीर्घो यञि ।

अदन्तस्य यञादौ सार्वधातुके दीर्घः स्यात् । पचामि । पच्यामि । अतः किम् ? चिनुमः । यञि किम् ? पचति । उक्तं सार्वधातुके ।

१०२ । सुपि च ।

यञादौ अतः सुपि दीर्घः स्यात् । वृक्षाय । वृक्षाभ्याम् । यञोत्येव । वृक्षस्य ।

१०३ । बहुवचने झल्येत् ।

अदन्तस्य झलादौ बहुवचने एत्वं स्यात् । वृक्षेभ्यः । वृक्षेषु । सर्वेषाम् । सुपीत्येव । पचध्वम् ।

१०४ । ओसि च ।

अकारादन्तस्य एत् स्यात् । वृक्षयोः । वनयोः ।

१०५ । आङि चापः ।

आप एत्वं स्यादोसि चाङि परे । खट्वया । खट्वयोः । कथमतिखट्वेन ? स्याब्ग्रहणेन दीर्घग्रहणमिति स्थानिवत्त्वनिषेधादित्येके । आ आप इति प्रश्लेषेण दीर्घग्रहणमिति भाष्यम् । आङिति तृतीयैकवचनस्य नाम ।

१०६। संबुद्धौ च।

आप एत्वं स्यात्। हे खट्वे।

१०७। अम्बार्थनद्योर्ह्रस्वः।

अम्बार्थानां नद्याश्च सम्बुद्धौ ह्रस्वः स्यात्। हे अम्ब। हे अक्क। हे कुमारि। हे धीबन्धु। हे वधु।

(क) डलकवतीनां प्रतिषेधः। हे अम्बाडे। हे अम्बाले। हे अम्बिके।

(ख) मातॄणां मातच् पुत्रार्थमर्हते। सम्बुद्धौ मातुर्मातच् पुत्रायार्हते। नद्यृतश्चेति (५।४।१५३) कपोऽपवादः। हे गार्गीमातः। हे वात्सीमातः। ह्रस्वोऽभिधीयते।

१०८। ह्रस्वस्य गुणः।

सम्बुद्धौ ह्रस्वस्य गुणः स्यात्। हे अग्ने। हे निष्कौशाम्बे। हे विष्णो। हे वायो। हे बन्धो। कथं हे कर्तृ कुल ? नद्यपेक्षस्य ह्रस्वस्य ग्रहणात्।

१०९। जसि च।

अङ्गस्य ह्रस्वस्य जसि गुणः स्यात्। मतयः। बन्धवः।

११०। ऋतो ङिसर्वनामस्थानयोः।

अङ्गस्य ऋदन्तस्य गुणः स्यात्। ङौ। मातरि। कर्तरि। सर्वनामस्थाने। मातरौ। मातरः। कर्तारः। हे कर्तरित्यत्र सम्बुद्धिलोपात् परत्वेन गुणे कृते रात्सस्येति (८।२।२४) सलोपः। कथं कर्तृणि कुलानि ? नुमः पूर्वविप्रतिषेधेनेष्टत्वात्।

१११। घेर्ङिति।

घिसंज्ञको ङिति गुणः स्यात्। अग्नये। वायवे। पटवे। धेनवे। सुपीत्येव। पट्वी।

११२। आण्नद्याः।

नद्याः परस्य ङितः स्यादाट्। कुमार्य्यै। कुमार्य्याः। धेन्वाः। धेन्वाम्। वध्वाः। वध्वाम्।

११३ । याडापः ।

आबन्तात् ङितो याट् स्यात् । खट्वायै । खट्वायाः । मालायाः । मालायाः ।

११४ । सर्वनाम्नः स्याड्ढ्रस्वश्च ।

आबन्तात् सर्वनाम्नो ङितः स्याडागमः स्यात् । आबन्तस्य ह्रस्वश्च । सर्वस्यै । एतस्यै । विश्वस्यै । विश्वस्याः । यस्याः । तस्याः । ऐस्यातौ चात्र न प्राप्नुतः । स्याटा व्यवधानान् ङेङस्योरसर्व्वनाम्नः परत्वात् ।

११५ । विभाषा द्वितीयातृतीयाभ्याम् ।

ङित आभ्यां स्याड् वा स्यात् । द्वितीयस्यै द्वितीयायै वा । तृतीयस्यै तृतीयायै वा ।

११६ । ङेराम् नद्याम्नीभ्यः ।

एभ्यो ङेरामादिश्यते । नदी । कुमार्य्याम् । वध्वाम् । धेन्वाम् । ङिति ह्रस्वश्चेति (१।४।६) नदीपक्षे कृत्याम् । धेन्वाम् । आप् । खट्वायाम् । बहु-राजायाम् । नी । सेनान्याम् । दिनप्रण्याम् ।

११७ । इदुद्भ्याम् ।

११८ । औत् ।

११९ । अच्च घेः ।

इदुद्भ्यां ङेरौत् स्यात् । सख्यौ । पत्यौ । अच्च घेः । अग्नौ । कृतौ । भूमौ । धेनौ ।

१२० । आङो नाऽस्त्रियाम् ।

घे रुत्तरस्य तृतीयैकवचनस्य नाः स्यात् । अग्निना । हरिणा । वायुना । बन्धुना । अमुना । अस्त्रियां किम् ? मत्या । सूत्या । धेन्वा ।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
सप्तमाध्यायस्य तृतीयः पादः ॥ ७।३ ॥
समाप्तश्च देविकापादः ॥

अथ

भाषावृत्तिः ।

सप्तमोऽध्यायः । चतुर्थः पादः ।

१ । णौ चङ्युपधाया ह्रस्वः ।

चङ्परे णावङ्गस्योपधाया ह्रस्वः स्यात् । अचीकरत् । अपीपचत् । मा भवानटिटत् । अत्र ह्रस्वत्वे कृते द्विरुक्तिरिष्टा । उपधायाः किम् ? अच-काङ्क्षत् । अववाञ्छत् ।

२ । नाग्लोपिशास्वृदिताम् ।

उपधाया एषां णौ चङि ह्रस्वो नास्ति । अग्लोपिनाम् । मालामाख्यत् अममालत् । भोगिनमाख्यत् अबुभोगत् । क्ष्माभृतमाख्यत् अचक्ष्माभृतत् । शासेः । अशशासत् । ऋदिताम् । बाधृ अबबाधत् । याचृ अययाचत् । ढौकृ । अडुढौकत् ।

३ । भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ।

एषां णौ चङि ह्रस्वो वा स्यात् । अबभ्राजत् । अबिभ्रजद्वा । अबभासत् । अबीभसद्वा । अबभाषत् । अबीभषद्वा । न्यमीमिलत् । न्यमिमीलद्वा । न्यमिमीलदब्जनयनं नलिनी । सवितैवोदमीमिलत् । अदीदिपत् । अदि-दीपद्वा । अजीजिवत् । अजिजीवद्वा । अपीपिडत् । अपिपीडद्वा ।

(क) काण्यादीनाञ्च । अचकाणत् । अचीकणद्वा । काणरणबणभणः कणादयः ।

४ । लोपः पिबतेरीच्चाभ्यासस्य ।

णौ चङि पिबतेरुपधाया लोपः स्यादीच्चाभ्यासस्य । अपीप्यत् । "तं मुहूर्त्तमधमूर्त्तमपीप्यन्" ।

५ । तिष्ठतेरित् ।

चङ्युपधाया तिष्ठतेरित् स्यात् । अतिष्ठिपत् ।

६ । जिघ्रतेर्वा ।

चङि उपधाया इद्वा स्यात् । अजिघ्रिपत् । अजिघ्रपत् ।

७ । उर्ऋत् ।

चङि ऋवर्णस्योपधाया ऋद्वा स्यात् । इररारामपवादः । अचकीर्त्तत् अचीकृतद्वा । अववर्त्तत् । अवीवृतद्वा । अममार्जत् । अमीमृजद्वा ।

८ । नित्यञ्छन्दसि ।

छन्दः सूत्रमेकम् ।

९ । दयतेर्दिगि लिटि ।

देङो लिटि दिग्यादेशः स्यात् । अवदिग्येऽम्बरं नादः । द्वित्वन्निरत्र नेष्यते ।

१० । ऋतश्च संयोगादेर्गुणः ।

ऋदन्तस्य संयोगादेर्गुणः स्याल्लिटि निषेधविषये । सस्मरतुः । सस्मरुः । सस्मारेति पूर्वविप्रतिषेधेन गुणाद्वृद्धिरिष्टा । संयोगादेः किम् ? चक्रतुश्चक्रुः ।

(क) संयोगोपधग्रहणं कर्त्तव्यम् । सञ्चस्करतुः । सञ्चस्करुः ।

११ । ऋच्छत्यॄताम् ।

ऋच्छति ऋऋतां लिटि गुणः स्यात् । आनर्च्छतुः । आनर्च्छुः । आरतुः । आरुः । ऋताम् । निचकरतुः । निचकरुः । निजगरतुः । निजगरुः । तेरतुः । तेरुः ।

१२ । शॄदॄप्रां ह्रस्वो वा ।

एषां पूर्वेण गुणे प्राप्ते लिटि ह्रस्वो वा स्यात् । विशशरतुः । विशश्रतुः । विददरतुः । विदद्रतुर्वा । पपरतुः । पप्रतुर्वा ।

१३ । केऽणः ।

कप्रत्ययेऽणो ह्रस्वः स्यात् । ज्ञका । कुमारिका । वधुका । नैषादकर्षुकः । ग्रामणिका । अणः किम् ? गोका । नौका ।

१४। न कपि।

कपि ह्रस्वो नास्ति। बहुकुमारीकः।

१५। आपोऽन्यतरस्याम्।

आबन्तस्य कपि ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालको वा।

१६। ऋदृशोऽङि गुणः।

अनयोरङि गुणः स्यात्, असरत्। आरत्। अदर्शत्। अजरत्। जरा।

१७। अस्यतेस्थुक्।

अस्यतेरङि थुगागमः स्यात्। निरास्थत्।

१८। श्वयतेरः।

श्वयतेरः स्यादङि। अश्वत्। अश्वताम्। अश्वन्।

१९। पतःपुम्।

अङि पतेः पुमागमः स्यात्। अपप्तत्। अपप्तताम्।

२०। वचउम्।

वचेरुमागमः स्यादङि। अवोचत्। अवोचत। "यदवोचस्तदवैमि केनवम्।"

२१। शीङः सार्वधातुके गुणः।

शीङोऽत्र गुणः स्यात्। शेते। शयाते। शेरते।

२२। अयङ् यि क्ङिति।

यकारादौ क्ङिति शीङोऽयङ् स्यात्। शय्यते। संशय्य। शय्या।

२३। उपसर्गाद्ध्रस्व ऊहतेः।

सोपसर्गस्योहतेर् ह्रस्वः स्याद् यादौ क्ङिति। अभ्युह्यते। समुह्यते। अण इत्येव। आऊह्यते ओह्यते। प्रोह्यते। समोह्यते।

२४। एतेर्लिङि।

उपसर्गादाशीर्लिङि यादौ क्ङिति एते ह्रस्वः स्यात्। उदियात्। समियात्। अण इत्येव। आइयात् एयात्। समेयात्। एतेः किम्। प्रचीयात्। सचीयात्।

२५। अकृत्सार्वधातुकयोर्दीर्घः।

अकृद्यकारेऽसार्वधातुकयकारे चाणो दीर्घः स्यात्। श्येनायते। कण्डूयते। सुखूयते। असार्वधातुकयकारे चीयात्। चीयासुः। निषेधः किम? विचित्य। प्रचित्य। चिनुयुः।

२६। च्वौ च।

च्वौ ह्रस्वो दीर्घः स्यात्। शुचीभवति। पटूकरोति।

२७। रीङ् ऋतः।

च्वौ अकृद्यकारेऽसार्वधातुकयकारे च ऋतां रीङादिश्यते। मात्रीभवति। चेक्रीयते। मात्रीयते। पित्रयम्। तपरः किम्? चेकीर्य्यते। निजेगिल्यते।

२८। रिङ् शयग्लिङ्क्षु।

एषु ऋतां रिङादिश्यते। शः। आद्रियते। यक्। क्रियते। आशीर्लिङि क्रियात्। "क्रियादघानां मघवा विघातम्।" योत्येव। कृषीष्ट। असार्वधातुकइत्येव। विभृयात्।

२९। गुणोऽर्त्तिसंयोगाद्योः।

अर्त्तेः संयोगादेश्च ऋतो यकि लिङि च गुणः स्यात्। अर्य्यते। स्मर्य्यते। ध्वर्य्यते। कथं संस्क्रियते? कात्पूर्वग्रहणेन (६।१।१३५) सुटोऽभक्तत्वज्ञापनादपरादित्वेनाङ्गस्यासंयोगादित्वात्। लिङि। अर्य्यात्। स्मर्य्यात्। ध्वर्य्यात्। यीत्येव। स्मृषीष्ट। असार्वधातुकइत्येव। ऋयृयात्।

३०। यङि च।

यङि चार्त्तिसंयोगाद्योर्गुणः स्यात्। अरार्य्यते दिशःकोर्त्तिः। सास्मर्य्यते। दाध्वर्य्यते।

(क) हन्तेर् हिंसायां घ्नीभावो वक्तव्यः। जेघ्नीयते। हिंसायां किम्? जङ्घन्यते।

३१। ई घ्राध्मोः।

यङि घ्राध्मोरीकारः स्यात्। जेघ्रीयते। देध्मीयते।

३२। अस्य च्वौ।

अवर्णान्तस्य च्वावीकारः स्यात्। शुक्लीभवति। मालीभवति। अनव्यय-स्येत्यभिधानाद् दिवाभूता रात्रिः। दोषाभूतमहः।

३३। क्यचि च।

अवर्णान्तस्य क्यचीकारः स्यात्। पुत्रीयति। भार्य्यीयति।

३४। अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु।

एषु निपात्यन्ते अमी क्यचि। अशनायति बुभुक्षुः। उदन्यति पिपासितः। धनायति गृध्नुः। अन्यत्र। अशनीयति। उदकीयति। धनीयति। इह छन्दःपञ्चसूत्री। (38)

४०। द्यतिस्यतिमास्थामित्ति किति।

एषामित् स्यात् तादौ किति। दो दितम्। षो अवसितम्। मा मितम्। स्था स्थितम्। स्थित्वा। स्थितिः।

४१। शाच्छोरन्यतरस्याम्।

तादौ किति शाच्छोरिद्वा स्यात्। शो निशितं निशातं वा। छो छितं छातं वा। व्यवस्थितविभाषया नित्यं संशितव्रतः।

४२। दधातेर्हिः।

तादौ किति धाञो हिः स्यात्। अभिहितम्। अभिहितवान्। हित्वा। विहितम्। अवहितम्। दधातेः किम्? धेट् धीतम्। धीत्वा।

४३। जहातेश्च क्त्वि।

हिः स्यात्। हित्वा। ओहाङस्तु हात्वा। क्त्वि किम्? हीनः। इह

४४। विभाषाच्छन्दसि।

४५। सुधितवसुधितनेमधितधिष्वधिषीय च।

सूत्रद्वयं छान्दसम्।

---

(38) ३५। न च्छन्दस्यपुत्रस्य। ३६। दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति। ३७। अश्वाघस्यात्। ३८। देवसुम्नयोर्यजुषि काठके। ३९। कव्यध्वरपृतनस्यर्चि लोपः।

४६ । दो दद् घोः ।

तादौ किति दास्थाने दत् स्यात् । दत्तः । दत्त्वा दत्तिः । दत्तवान् । कथं प्रदाय ? बहिरङ्गो ल्यबन्तरङ्गान् विधीन् बाधत इत्युक्तम् । घोः किम् ? दाप् । दातं धान्यम् । दैप् । अवदातं वस्त्रम् ।

४७ । अच उपसर्गात् तः ।

अजन्तादुपसर्गात् परस्य तादौ किति दाशब्दाकारस्य तकारादेशः स्यात् दाशब्दस्यैव द्वितकारादेश इत्यन्ये । प्रत्तम् । परीत्तम् । नीत्तम् । वीत्तम् । सूत्तम् । अचः किम् ? निर्दत्तम् । प्रादेः किम् ?

अवदत्तं निदत्तञ्च प्रदत्तञ्चादिकर्मणि ।
सुदत्त मनुदत्तञ्च विदत्तमिति चेष्यते ॥१॥

उपसर्गप्रतिरूपका इमे निपाताः । इह घोरित्त्वं दितं निर्दित-मित्यादौ चरितार्थमनेन बाध्यते । अवत्तो मारः । (39)

४८ । अपो भिः ।

अपस्तकारादेशः स्याद् भादौ । अद्भिः । अद्भ्यः । भि किम् ? अप्सु ।

४९ । सः स्यार्द्धधातुके ।

सकारादार्धधातुके सस्य तः स्यात् । वत्स्यति । विवत्सति । अध्यवात्सीत् । जिघत्सा । सि किम् ? प्रवासः । घासः ।

५० । तासस्त्योर्लोपः ।

तासेरस्तेश्च सलोपः स्यात् सादौ प्रत्यये । कर्त्तासि त्वम् । व्यतिसे । कर्त्तासे । असि ।

५१ । रि च ।

रेफादौ तासस्त्योः सलोपः स्यात् । कर्त्तारौ । कर्त्तारः ।

---

(39) "मारस्य उत्पातोऽवत्तः भयाख्यात् खण्डितं इति सृष्टिधरः ।

५२। ह एति।

एकारे तासस्त्योः हः स्यात्। कर्त्ताहे। व्यतिहे। (40)

५३। यीवर्णयोर्दीधीवेव्योः।

दीधीवेव्यो छान्दसौ।

५४। सनि मीमाघुरभलभशकपतपदामच इस्।

सनि एषामचः स्थाने इसादिश्यते। मीञो डुमिञश्च सनि ज्ञप्तदीर्घस्य ग्रहणम्। मित्सति। माङ् मित्सते। मेङ् अपमित्सते। घु दित्सा। धित्सा। दित्सुः। धित्सुः। रभ आरिप्सते। आरिप्समानः। लभ आलिप्सते। आलिप्समानः। शक शिक्षते। पत पित्सति। पद प्रपित्सते। सीत्येव। पिपतिषति। सनि किम्? दास्यति।

(क) राधो हिंसायामच इस्। प्रतिरित्सति। हिंसायां किम्? आरिरात्सति।

५५। आप्ज्ञप्यृधामीत्।

आप्ज्ञप्यृधामच स्थाने ईत् स्यात् सनि। ईप्सति। ज्ञीप्सति नायं कित्। ईर्त्सति। सीत्येव। जिज्ञपयिषति। अर्दिधिषति।

५६। दम्भ इच्च।

दम्भेरिच्च ईत् स्यादीच सनि। धिप्सति। धीप्सति। सोत्येव दिदम्भिषति।

५७। मुचोऽकर्मकस्य गुणो वा।

मुचः सनि गुणो वा स्यात्। मोक्षते वत्सः स्वयमेव मुमुक्षते वा। अकर्मकस्य किम्? मुमुक्षति वत्सं गोपः। मुमुक्षति वत्सं देवदत्तः।

---

(40) लिटि उत्तमैकवचने कर्त्तरि कर्मणि,—प्रथमैकवचने कर्त्तृकर्मभावेषु वा कथं भवितव्यम्? मत्तोऽहं त्वां प्रेक्षामाहे, त्वयाहं प्रेक्षामाहे सुप्त इति, चन्द्रं प्रेक्षामाहे बालः, बालेन वा चन्द्रः प्रेक्षामाहे, भवद्भिरेधामाहे इति तु भवत्येवेति केचित्। अन्ये तु तामिमाङ्घ्रयान्तामेवं एकारः सम्भवति उत्तमैकवचने तत्रैवाकेरपीति ब्रुवन्तः एभि हकारो न भवति। प्रेक्षामासे एधामासे इत्येव भवतीति समर्थयन्ते। अपरे पुनरुत्तमैकवचने सार्वधातुके चेत्येव हकार इति वदन्ति। नान्यत्र। तेन मत्तोऽहं त्वां प्रेक्षामासे त्वयाहं प्रेक्षामासे सुप्तो बालः चन्द्रं प्रेक्षामासे, बालेन वा चन्द्रः प्रेक्षामासे भवद्भिरेधामासे इत्येव भवति। ननु हकारः। अत्र भट्टोजिः—"अस्तेस्तु भावकर्मणोर्लिङि एशि इटि च रूपे विप्रतिपद्यन्ते। तथाहि उभयत्रापि ह एतीति हादेशे कृते एधामाहे ईक्षामाहे इति केचित्। तामिमाङ्घ्रयादित्येव हत्वमित्यन्ये। माङ्घ्रयां दीप सार्वधातुक एव एति हत्वम्। न तु आर्धधातुकेऽपि। एधामासे ईक्षामासे इत्येव रूपमित्यपरे।" इति।

५८। अत्र लोपोऽभ्यासस्य ।

अत्र सनीत्यधिकारेऽभ्यासस्य लोपः स्यात् । तथैवोदाहृतम् । अभ्यासस्य विधानमा पादपरिसमाप्तेः ।

५९। ह्रस्वः ।

अभ्यासस्य ह्रस्वः स्यात् । डुढौकिषते । तुत्रौकिषते ।

६०। हलादिः शेषः ।

अभ्यासस्यादिर्हल् शिष्यते । अनादिर्हल् लुप्यते । पपाच । चकार । बभार । जहार । जग्लौ । आर । आट । आश ।

६१। शर्पूर्वाः खयः ।

शपूर्वाः खयो हलः शिष्यन्ते । चुश्चोतिषति । तिष्ठासति । पिस्पन्दिषते ।

(वा) खर् पूर्वाः खय इति वक्तव्यम् । उचिच्छिषति ।

६२। कुहोश्चुः ।

कवर्गहकारयोश्चवर्गः स्यात् । चक्रे । चखान । जग्लौ । जघास । जघान । जुहुवे । जुहाव । जहाति ।

६३। न कवतेर्यङि ।

भौवादिकस्य कुङो यङि चुत्वं नास्ति । कोकूयते खरः । "अकोकूयिष्ट तत्सैन्यम् ।" इह

६४। कृषेश्छन्दसि ।

६५। दाधर्त्तिदर्धर्त्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदत्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति ।

छान्दसं सूत्रद्वयम् ।

६६। उरत् ।

ऋवर्णान्तस्याभ्यासस्याकारः स्यात् । ववृधे । चकार ।

६७। दुरतिस्वाप्योः संप्रसारणम्।

अनयो र्यस्य इक् स्यात्। विदिद्युते। विदिद्योतिषते। स्वापिर्ण्यन्तः। सुस्वापयिषति।

६८। व्यथो लिटि।

लिटि व्यथः संप्रसारणं स्यात्। विव्यथे। लिटि किम्? वाव्यथ्यते।

६९। दीर्घं इणः किति।

इणो दीर्घः स्याल्लिटि किति। ईयतुः। ईयुः। किति किम्? इयाय। इययिथ।

७०। अत आदेः।

अभ्यासस्यादेरतो लिटि दीर्घं स्यात्। आट। आटतुः। आटुः।

७१। तस्मान्नुड् द्विहलः।

दीर्घीभूतात् परस्य द्विहलोऽङ्गस्य नुट् स्याल्लिटि परे। आनञ्ज। आनञ्जतुः। आनर्च्छ। आनर्च्छतुः। द्विहलः किम्? आट। आटतुः। कथमानृधतुः? साहचर्य्यात्। द्विहल इत्यनेकहल उपलक्षणम्। तेनानर्च्छेति तुकि कृते गुणे च त्रिहलोऽपीष्यते।

७२। अश्नोतेश्च।

लिटि दीर्घात् परस्य अस्य च नुट् स्यात्। आनशे। व्यानशे दिशः कीर्त्तिः। आनशाते।

७३। भवतेरः।

भुवोऽभ्यासस्य लिट्यकारः स्यात्। बभूव। अनुबभूवे।

७४। ससूवेति निगमे।

अयञ्छन्दःसूत्रमेकम्।

७५। निजां त्रयाणां गुणः श्लौ।

णिजिर्विजिर्विषां श्लौ गुणः स्यात्। नेनेक्ति। वेवेक्ति। वेवेष्टि।

७६ । भृञामित् ।

भृञ्मोङ्माङामित् स्यात् श्लौ । बिभर्त्ति । बिजिहीते । मिमीते । मिमान: ।

७७ । अर्त्तिपिपर्त्योश्च ।

अनयो: श्लावित् स्यात् । इयर्त्ति । पिपर्त्ति ।

७८ । बहुलञ्छन्दसि ।

छान्दसम् ।

७९ । सन्यतः ।

सन्यभ्यासस्यादन्तस्य स्यादित् । पिपक्षति । पिपासति । जगदाख्यातुमिच्छति जिजगयिषति । अत: किम् ? लुलूषति । सुस्रूषते । सनि किम् ? पपाच ।

८० । ओ: पुयण्ज्यपरे ।

सन्यभ्यासस्य उवर्णान्तस्य पवर्गे यणि जकारे चावर्णपरे स्यादित् । पूङ् पिपविषते । भू बिभावयिषति । यण् यियावयिषति । रु रिरावयिषति । लू लिलावयिषति । जकारे जिजावयिषति । जु सौत्रो धातु: । इह णौ कृतं स्थानिवद्भवतीति पूर्वरूपेण द्विरुक्ति: । अपरे किम् ? बुभूषति ।

८१ । स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ।

एषामवर्णपरे यणि सनि स्यादिद्वा । सिस्रावयिषति सुस्रावयिषति वा । एवं शृणोत्यादौ । अपर इत्येव । सुस्रूषति जलम् ।

८२ । गुणो यङ्लुको: ।

यङि यङ्लुकि चाभ्यासस्य गुण: स्यात् । लोलूयते । लोलवीति । लोलुव: । बोभूयते । बोभवीति । बोभूति । बोभुव: । यङ्लुकोर्विधानं यावत् सम्प्रसुनीति (७।४।८३) ।

८३ । दीर्घोऽकित: ।

अकितोऽभ्यासस्य दीर्घ: स्यात् । पापच्यते । पापचीति । पापच्यते ।

पापठीति। पापठः। यङ्कित किम् ? यंयम्यते। रंरम्यते। अन्यत्र लुकीव दीर्घो बाधिष्यते। तद्वर्जित इत्येतज् ज्ञापयति अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्त इति।

८४। नीग् वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्।

एषामष्टानामभ्यासस्य नीक् स्यात्। वनीवच्यते। वनीवञ्चः। सनीस्रस्यते। दनीध्वस्यते। बनीभ्रस्यते। चनीकस्यते। पनीपत्यते। पनीपद्यते। पनीपदीति। चनीस्कद्यते। चनीस्कन्दीति।

८५। नुगतोऽनुनासिकान्तस्य।

अनुनासिकान्तस्याभ्यासस्य नुक् स्यात्।

(क) पदान्तवच्चेति वक्तव्यम्। नुगनुस्वारोपलक्षणार्थम्। यमिरम्योरभ्यपि यथा स्यात्। यंयम्यते यंयमीति। जङ्गम्यते जङ्गमीति जङ्गमः। एवं चमुतमुदमुप्रभृतयः। वा पदान्तस्येति (८।४।५९) परसवर्णः। तपरकरणं भूतपूर्वदीर्घस्य निवृत्त्यर्थम्। भाम क्रोधे बाभाम्यते।

८६। जपजभदहदशभञ्जपशाञ्च।

एषां नुक् स्यात्। जञ्जप्यते जञ्जपीति। एवं यावत् पंपश्यते पंपशीति। दशेति नलोपनिपातनं यङ्लुगर्थम्। दंदशः। पशिः सौत्रो धातुः।

८७। चरफलोश्च।

नुक् स्यात्। चञ्चूर्यते चञ्चुरः। पंफुल्यते। पंफुलः।

८८। उत्परस्यातः।

चरफलयोरभ्यासात् परस्यात उत् स्यात्। तथैवोदाहृतम्।

८९। ति च।

तादौ चरफलयोरत उत् स्यात्। चूर्तिः। प्रफुल्तम् पुष्पम्।

९०। रीगृदुपधस्य च।

ऋदुपधस्याभ्यासस्यातो रीक् स्यात्। नरीनृत्यते। नरीनृतः। दरीदृश्यते दरीदृशः।

(ख) रीगृत्वत इति वक्तव्यम्। वरीवृश्च्यते। परीपृच्छ्यते। जरी-
जृम्भ्यते। जरीजृम्भः।

९१। रुग्रिकौ च लुकि।

ऋदुपधस्य यङ्लुकि रुग्रिग्रीकः स्युः। नर्नर्त्ति नरिनर्त्ति नरीनर्त्ति।

९२। ऋतश्च। (41)

ऋदन्तस्य यङ्लुकि रुग्रिग्रीकः स्युः। चर्कर्त्ति। चरिकर्त्ति। चरीकर्त्ति। चर्कः। चरिकः। चरीकः। तपरः किम्? किरतेश्चाकर्त्ति। चाकिरः। जागर्त्ति। जागिरः। (42)

९३। सन्वल्लघुनि चङ्परेऽनग्लोपे।

लघुनि धात्वक्षरे परे योऽभ्यासस्तस्य सन्वत् कार्य्यं स्याच्चङ्परे णौ। अपीपचत्। अचीकरत्। लघुनि किम्? अररक्षत्। अजजागरत्। अनग्लोपे किम्? अचकथत्। मालामाख्यदममालत्। अददृपत्? इह कथं पटुमाख्यदपीपटदिति? णिचि टिलोपात् परत्वेन वृद्धौ कृतायां सत्यपरलोपोऽनग्लोप एवेति सन्वद्भावादित्त्वमित्येके। अनग्लोप इत्यगिति प्रत्याहारोपादानसामर्थ्यादकृतायामेव वृद्धौ टिलोपोऽग्लोप एवेति सन्वद्भावनिषेधादपपटदित्यपरे।

---

(41) अत्रेदमाभाणकं—

"किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत्।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः॥ १॥"

इति। किरतिमिति ऋकारान्तोपलक्षणम्। चर्करीतं यङ्लुगित्यर्थः। पचतीति लट उपलक्षणम्। यः खलु ऋकारान्तान् धातून् यङ्लुगन्तान् लटि नयेत् नीतिपूर्वकं कुर्यात् यथाशास्त्रं प्रयोक्तुं शक्नुयादिति यावत्। तमहं प्राप्तिज्ञं रुग्रिगादीनां विषयविभागेन यः प्रयोगः तज्ज्ञं तत्र दक्षं मन्ये। तेन संग्रहः साधुशब्दसंग्रहः प्रारब्धः। स हि शब्दानुशासनशास्त्रविदित्यर्थः। अन्ये त्वत्र प्राप्तिज्ञमिति सूत्रकाराभिप्रायज्ञमिति यावत्। संग्रहः संग्रहग्रन्थ इत्यर्थ इत्याहुः। संग्रहकारो दाक्षायण एवादौ यङ्लुगन्तयोर् ऋकारान्तॠकारान्तयोर्लटि पृथगूपाणि चर्कर्त्ति चर्करीति चरिकर्त्ति चरिकरीति पचे चाकर्त्तीत्यादीनि सूत्रकारमताविचारेण प्रदर्शित-वानिति तेषामाशयः। शोभना खलु दाक्षायणस्य संग्रहस्य कृतिरिति भाष्यकारस्योदाहरणम्। संग्रहकारो व्याडिराचार्य इति वदन्ति।

(42) गॄ शब्दस्य यङ्लुगिदं रूपमिदम्। जागृ जागरणे इत्यस्य यङेव नास्ति। अनेकाच्त्वात्।

९४। दीर्घो लघोः।

पूर्वसूत्रविषये लघोरभ्यासस्य दीर्घः स्यात्। अपीपचत्। अचीकरत्। अलीलवत्। अचूचुरत्। लघोः किम्? अचिक्षणत्। अचिक्षणत्। लघुनी-त्येव। अररक्षत्।

९५। अत् स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्।

एषामेषामभ्यासस्य चङ्परे णावत् स्यात्। असस्मरत्। अददरत्। अतत्वरत्। अपप्रथत्। अमम्रदत्। अतस्तरत्। अपस्पशत्। तपरकरणं दीर्घनिरासार्थम्। अददरत्।

९६। विभाषा वेष्टिचेष्ट्योः।

णौ चङ्परे अनयोरद्वा स्यात्। अववेष्टत्। अविवेष्टद्वा। अचचेष्टत् अचिचेष्टद्वा।

९७। ई च गणः।

चङ् परे गण ईः स्यादश्च। अजगणत्। अजीगणद्वा। अङ्गाधिकारोऽभ्यासाधिकारश्च पूर्णः।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ

सप्तमाध्यायस्य चतुर्थः पादः ॥७।४॥

समाप्तश्च षोपादः ॥

अथ

भाषावृत्तिः ।

अष्टमोऽध्यायः । प्रथमः पादः ।

१ । सर्वस्य द्वे ।

अधिकारोऽयम् । सर्वस्य द्विरुक्तिर्वाच्या ।

२ । तस्य परमाम्रेडितम् ।

द्विरुक्तस्य यत् परं तदाम्रेडितमुच्यते । यथा कानाम्रेडिते (८।३।१२) । कांस्कान् भोजयति ।

३ । अनुदात्तञ्च ।

छान्दसम् ।

४ । नित्यवीप्सयोः ।

नित्येऽर्थे वीप्सायाञ्च यःशब्दो वर्त्तते तस्य सर्वस्य द्वे स्याताम् । आभीक्ष्ण्यं नित्यता । सा च तिङव्ययकृत्सु । पचति पचति । प्रपचति प्रपचति । भुक्त्वा भुक्त्वा याति । नदीमवस्कन्दमवस्कन्दमुपसर्पति । भोजं भोजं व्रजति । लुनीहि लुनीहीत्येवायं लुनाति । युगपद्व्याप्तुमिच्छा वीप्सा । साच सुप्सु । गृहे गृहेऽश्वाः । नदीं नदीमवस्कन्दमुपसर्पति । ग्रामो ग्रामो रमणीयः । इहाढ्यतरमाढ्यतरमानयेति जातप्रकर्षप्रत्ययस्य द्विरुक्तिरिष्यते । तिङश्चेत्य-तसु (५।३।५६) परत्वात् द्विरुक्तिरेव प्राक् । ततः प्रकर्षप्रत्यय इत्येके । पचतिपचतितरामिति । इह क्वचिद् वृत्तावुक्तार्थत्वाद् द्विरुक्ति र्निवर्त्तते । द्वौ द्वौ पदौ ददाति द्विपदिकां ददाति । द्वौ द्वौ देहि द्विशो देहि । सप्त सप्त पर्णान्यस्य सप्तपर्णः । कुलं कुलमटति कुलटा । क्वचिदुक्तार्थस्यापि प्रयोगः एकैकशो देहि । अन्योन्यसहाया इति ।

५। परेर्वर्जने।

असमाव द्वे स्याताम्।

(वा) असमासे वेति वक्तव्यम्। परि परि त्रिगर्त्तेभ्यः वृष्टो देवः। परि त्रिगर्त्तेभ्यः वा। समासे न स्यात्। परित्रिगर्त्तम्। वर्जने किम्? वृक्षं परि सिञ्चति। त्रिगर्त्तान् परिषिञ्चति।

६। प्रसमुपोदः पादपूरणे।

इति छान्दसं सूत्रम्।

७। उपर्य्यध्यधसः सामीप्ये।

एषामेव द्वे स्याताम्। उपर्य्युपरि ग्रामम्। अध्यधि कुलम्। अधोऽधो ग्रामम्। (1) सामीप्ये किम्? सर्व्वस्योपरि चन्द्रमाः।

८। वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु।

असूयादौ यद्वाक्यं तदादेरामन्त्रितस्य द्वे स्याताम्। भीम भीमरिक्तं तवाभिजात्यम्। सम्मतौ। अर्जुनार्जुन शोभनः खल्वसि। एवं कोपादौ। स्वरितमाम्रेड़ित इति (८।२।८५) श्रुतौ नोदाक्रियते। भाषायामप्रचारात्।

९। एकं बहुव्रीहिवत्।

एकमित्येतद् द्विरुक्तं बहुव्रीहिवत् स्यात्। सुब्लुक् पुंवत् कार्य्यं स्यात्। एकैकः। एकैकशो विनिघ्नन्ति विषयाः। एकैकमक्षरं जपति। एकैकया-हुत्या जुहोति।

१०। आबाधे च।

पीड़ायां द्वे स्यातां बहुव्रीहिवच्च। गतगता। नष्टनष्टा।

११। कर्मधारयवदुत्तरेषु।

उत्तरसूत्रेषु कर्मधारयवत् कार्य्यं स्यात्।

---

(1) नयानधोऽधो व्रजतः पयोधरानिति माघः।

१२। प्रकारे गुणवचनस्य।

साहश्ये गुणवचनस्य द्वे स्याताम्। पटुपटुः। "मन्दमन्दमुदितः प्रययौ खम्।" पटुपट्वी। पण्डितपण्डिता। कर्मधारयत्वात् प्रतिषेधविषयेऽपि पुंवत्। कालककालिका। इदञ्च द्विर्वचनं गुणविशिष्टद्रव्ययोरेव गुणमात्रवृत्तेर्नेष्यते। शुक्लशुक्लः पटः। शुक्लशुक्लमस्य रूपम्। एवं वचनग्रहणाधिक्यात् क्रियाशब्दस्यापि भवति। "वसन्ते भीतभीतेन कोकिलेन वने रुतम्।" (2) "भीतभीत इव शीतमयूखः।" इतरेतरान्योन्यपरस्पराः कर्मव्यतीहारे स्त्रीत्व-क्लीवत्वविषया निपातनात् साधवः स्युः (3)। तेभ्यः स्त्रीनपुंसकयोः सुप आम् वेति स्मृतिः। इतरेतरां स्त्रियौ क्षत्रियकुले वा स्पर्धेते इतरेतरं वा। इतरेतरां स्त्रीभ्यां स्त्रीभिर्वा स्पर्द्ध्यते इतरेतरेण वा। एवमन्योन्यामन्योन्यस्य वा (4)। परस्परां परस्परस्मिन् वा। तथैवमन्योन्यामन्योन्यं वा। परस्पराम् परस्परं वा। अन्योन्यामन्योन्यस्य वा। परस्परां परस्परस्मिन् वेति नपुंसकेऽपि। पुंसि तु इतरेतरं राजानौ युध्येते। अन्योन्यमसूयतः।

(क) आनुपूर्व्ये द्वे। मूले मूले स्थूला दन्ताः। ज्येष्ठं ज्येष्ठं प्रवेशय।

---

(2) "अन्तर्जलगताः पद्माः श्रोतुकामा इवोत्थिताः" इत्यपरार्द्धः स्मृतिधरधृतः।

(3) वस्तुतस्त्विमानि वार्त्तिकानि—"(क) कर्म्मव्यतीहारे सर्व्वनाम्नः। (ख) समासवच्च बहुलम्। (ग) यदा न समासवत् प्रथमैकवचनं तदा पूर्व्वपदस्य। (घ) स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावः।" इति। इतरेतरम्। उत्तरोत्तरम्। बहुलग्रहणादन्यपरयोर्न समासवद्भावः। अन्योन्यम्। परस्परम्। अन्यत्र च। यां यां प्रियः प्रैक्षत कातराक्षीं सा सा ह्रिया नम्रमुखी बभूवेति माघः। सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा। नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपाल इति कालिदासश्च।

(4) अत्र स्त्रीनपुंसकयोरपि सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पुंस्त्वम्। अतएव न टाप्। नाप्यद्डादेशः। आमभावपक्षे यथायोगं सर्वाणि वचनानि। तथाच भट्टोजिः—"अत्र केचित् द्वितीयादीनामेवेदं स्वादिविधानम्। अतएवोत्तरदलेऽपि द्वितीयादय एव नतु प्रथमा। तत्राप्येकवचनमेव नतु वचनान्तरमिति दुर्गपरिशिष्टकण्ठाभरणादिग्रन्थप्राचीनग्रन्थेषु स्पष्टम्। एतच्च सर्वमपाणिनीयम्। भाष्यादावदृष्टत्वात्। तथा प्राचीनमतं कवयोऽपि नानुरुन्धन्ते। अन्योन्येषां पुष्करैरामृशन्त इति माघः। चितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैरिति भारविपद्ये प्रथमान्तेनैव विग्रह" इति। परस्परां विस्मयवन्ति लक्ष्मीमिति भट्टिः। व्यर्थीकृतं पत्ररथेन तेन तथावसाय व्यवसायमस्याः। परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यतालमिति नैषधीये।

(ख) आधिक्ये च द्वे। अहो दर्शनीयाऽहो दर्शनीया। मध्यं रोचते मध्यं रोचते। दृश्यताया रुचेश्चाधिक्यं द्विर्वचनात् प्रतीयते।

(ग) चापले द्वे यावद्बोधम्। अहिरहिरहि बुध्यस्व बुध्यस्व बुध्यस्व।

(घ) डाचि बहुलं द्वे। पटपटाकरोति। बहुलं किम्? मद्राकरोति।

(ङ) पूर्वप्रथमयोरतिशये। पूर्वं पूर्वं पुष्प्यन्ति। प्रथमं प्रथमं भुक्तम्। प्रथमं प्रथमं पठन्ते। आतिशायिकोऽपीष्टः। पूर्वतरं पूर्वतरं पुष्प्यन्ति।

१३। अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्।

अकृच्छ्रार्थयोरनयो र्द्वे वा स्याताम्। प्रियप्रियेण सुखसुखेन ददाति प्रियेण सुखेन वा। अकृच्छ्रे किम्? प्रियः पुत्रः। सुखो रथः।

१४। यथास्वे यथायथम्।

अत्रेदं निपात्यते। "यथायथं ताः सहिता नभश्चरैः।" यथास्वीयमित्यर्थः।

१५। द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु।

एषु षट्सु द्वन्द्वं निपात्यते। द्वौ द्वौ भूत्वा द्वन्द्वं रहस्यं मन्त्रयन्ते। एवं यावदभिव्यक्तौ। द्वन्द्वं रामलक्ष्मणौ। द्वौ साहचर्येणाभिव्यक्तावित्यर्थः। इह योगविभागात् सुखदुःखयो र्द्वन्द्वं चार्थे द्वन्द्व (२।२।२९) इति द्रष्टव्यं।

१६। पदस्य।

अधिकारोऽयं प्रागपदान्तस्य मूर्धन्यात् (८।३।५५)। वक्ष्यति संयोगान्तस्य लोपः (८।२।२३)। पठन्। पचन्। नलोपः (८।२।७)। राजभ्याम्। मो नो धातोः (८।२।६४)। प्रशान्। पदस्य किम्? पचन्तौ। राजानौ। प्रशामौ।

१७। पदात्।

अधिकारोऽयं यावत् कुत्सने च सुप्यगोत्रादौ (८।१।६९)। वक्ष्यति बहुवचनस्य वस्नसौ (८।१।२१)। पातु वः। पातु नः। पदात् किम्? युष्मान् पातु। अस्मान् धिनोतु।

१८ । अनुदात्तं सर्वमपादादौ ।

अनुदात्तमिति च्छान्दसम् । भाषायां स्वरस्याप्रचारात् । अपदादावित्येवमा पादपरिसमाप्तेरधिक्रियते । वक्ष्यति बहुवचनस्य वस्नसौ (८।१।२१) । ग्रामो वः । पुत्रो नः । अपादादौ किम् ? श्लोकपादादौ मा भूत् ।

युष्माकं पालकः शम्भुरस्माकं देशको जिनः ।

(क) समानवाक्ये युष्मदस्मदोरादेशा वक्तव्याः । वाक्यभेदे मा भूवन् । ओदनं पच । तव भविष्यति । मम भविष्यति । किं पुनर्वाक्यम् ? आख्यातं साव्ययं सकारकं सविशेषणं वाक्यं यथा साव्ययम् । उच्चैः पठति । सकारकम् । ग्रामं याति । सविशेषणम् । मृदु पचति । (5)

१९ । आमन्त्रितस्य च ।

इति स्वरसूत्रम् ।

२० । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ।

द्विवचनान्तयोः षष्ठ्याद्यन्तयोर्युष्मदस्मदोर्वान्नावौ इत्येतावादेशौ स्याताम् । ग्रामो वाम् । देशो नौ । ग्रामो वां दीयते । देशो नौ दीयते । शिवो वां रक्षतु । बुद्धो नौ पातु । स्थग्रहणं किम् । अश्रूयमाणविभक्तेर् मा भूदिति । स युष्मत्पुत्रः । अस्मत्पुत्रोऽयम् ।

२१ । बहुवचनस्य वस्नसौ ।

षष्ठ्यादिबहुवचनान्तयोस्तयो र्वस्नसौ स्याताम् । ग्रामो वः । पुत्रो नः । इत्यादि ।

२२ । तेमयावेकवचनस्य ।

षष्ठ्याद्येकवचनान्तयो स्तयोस्तेमे स्याताम् । धनं ते । ग्रामस्ते । पुत्रो मे । इत्यादि ।

२३ । त्वामौ द्वितीयायाः ।

द्वितीयैकवचनान्तयो स्तयो स्त्वामौ स्याताम् । अहं त्वा पश्यामि । त्वं मा पश्य ।

---

(5) एकतिङ् वाक्यमिति कात्यायनः । तथाच समर्थसूत्रे (२।१।१) वार्त्तिकानि—"(क) आख्यातं साव्ययकारकविशेषणं वाक्यम् । (ख) आख्यातं सविशेषणम् । (ग) एकतिङ् ।" इति ।

२४। न चवाहाहैवयुक्ते।

च वा ह अह एव एतैः पञ्चभिर्योगे वान्नावादयो न स्युः। ग्रामस्तव च स्वम्। ग्रामो मम च स्वम्। युक्तग्रहणमिह साक्षाद् योगार्थम्। युक्तयुक्ते मा भूत्। ग्रामश्च ते स्वमिति।

२५। पश्यार्थैश्चानालोचने।

दर्शनार्थैर्योगे वान्नावादयो न स्युः। विप्रस्तव ग्रामं समीक्ष्यागतः। विप्रो मम ग्रामं संदृश्य गतः। अनालोचने किम्? चक्षुर्ज्ञाने मा भूत्। विप्रस्त्वा पश्यति। विप्रो मा पश्यति।

२६। सपूर्वायाः प्रथमाया विभाषा।

सपूर्वपदात् प्रथमान्तात् परयोस्तयोर्वान्नावादयो वा स्युः। ग्रामे कम्बलस्ते स्वम्। तव वा। एवं सर्वत्रोन्नेयम्।

(क) इह सर्व एवामी वान्नावादयोऽनन्वादेशे विभाषा वाच्याः। ग्रामस्ते तव वा। ग्रामो मे मम वा। ग्रामस्ते दीयते तुभ्यं वा। शिवस्त्वा रक्षतु त्वां वा। जिष्णुर्मा रक्षतु मां वा। एवं पातु वः। पातु न इत्यादि वेदितव्यम्। अनन्वादेशे किम्? अथो ते ग्रामः। अथो मे ग्रामः। न तर्हि वक्तव्यम्। सपूर्वायाः प्रथमाया विभाषेति वाच्यमन्वादेशार्थम्। अथो ग्रामे कम्बलस्ते स्वम्। पक्षे तव स्वम्। पदादिति निवृत्तम्। इह तिङो गोत्रादीनीत्यत आरभ्य (८।१।२७) पञ्चचत्वारिंशत् स्वरसूत्राणि। (6)

---

(6) तानि च यथा—

२७। तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः। २८। तिङ्ङतिङः। २९। न लुट्।
३०। निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्। ३१। नह प्रत्यारम्भे। ३२। सत्यं प्रश्ने।
३३। अङ्गाप्रातिलोम्ये। ३४। हि च। ३५। छन्दस्यनेकमपि साकाङ्क्षम्।
३६। यावद्यथाभ्याम्। ३७। पूजायां नानन्तरम्। ३८। उपसर्गव्यपेतं च।
३९। तुपश्यपश्यताहैः पूजायाम्। ४०। अहो च। ४१। शेषे विभाषा।
४२। पुरा च परीप्सायाम्। ४३। नन्वित्यनुज्ञैषणायाम्। ४४। किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्
४५। लोपे विभाषा। ४६। एहिमन्ये प्रहासे लृट्। ४७। जात्वपूर्वम्।
४८। किंवृत्तं च चिदुत्तरम्। ४९। आहो उताहो चानन्तरम्। ५०। शेषे विभाषा।
५१। गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्। ५२। लोट् च।

७२। आमन्त्रितं पूर्वमविद्यमानवत्।

आमन्त्रितान्तं पूर्वमविद्यमानवत् स्यात्। तेन पदादुच्यमाना वान्नावादयो न स्युः। विप्र तव स्वम्। विप्र मम स्वम्। विप्रौ युवयोः स्वम्। विप्रा युष्माकं स्वम्। इत्यादि। एवं द्वितीयाचतुर्थ्योरपि। आमन्त्रितमिति किम्? कम्बलस्ते स्वम्।

७३। नामन्त्रिते समानाधिकरणे सामान्यवचनम्।

आमन्त्रितान्ते तुल्याधिकरणे परे पूर्वमामन्त्रितं सामान्यवचनमपि नाविद्यमानवत् स्यात्। ततो वान्नावादयः स्युरेव। छात्रौ गुणिनौ वां स्वम्। छात्र गुणिन् ते स्वम्। सामान्यवचनं किम्? देवदत्त जटिल तव स्वम्।

७४। विभाषितं विशेषवचने बहुवचनम्।

विशेषवचने तुल्याधिकरणे आमन्त्रिते परतो बहुवचनान्तमविद्यमानवद्वा स्यात्। छात्रा वैयाकरणा युष्माकं स्वम्। पक्षे वः स्वमित्यादि।

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
अष्टमाध्यायस्य प्रथमः पादः ॥ ८।१ ॥
समाप्तश्च सर्वपादः।

५३। विभाषितं सोपसर्गमनुत्तमम्। ५४। हन्त च। ५५। आम एकान्तरमामन्त्रितमनन्तिके।
५६। यद्धितुपरं छन्दसि। ५७। चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः। ५८। चादिषु च।
५९। चवायोगे प्रथमा। ६०। हेति क्षियायाम्। ६१। अहेति विनियोगे च।
६२। चाहलोप एवेत्यवधारणम्। ६३। चादिलोपे विभाषा। ६४। वैवावेति च छन्दसि।
६५। एकान्याभ्यां समर्थाभ्याम्। ६६। यद्वृत्तान्नित्यम्।
६७। पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः। ६८। सगतिरपि तिङ्।
६९। कुत्सने च सुप्यगोत्रादौ। ७०। गतिर्गतौ। ७१। तिङि चोदात्तवति।

अथ

भाषावृत्तिः ।

अष्टमोऽध्यायः । द्वितीयः पादः ।

१ । पूर्वत्रासिद्धम् ।

अधिकारोऽयम् । सपादसप्ताध्यायीविधौ कर्त्तव्ये वक्ष्यमाण त्रिपादी-विधिरसिद्धः स्यात् । त्रिपाद्याञ्च परः परो विधिरसिद्धः स्यात् पूर्वत्र कर्त्तव्ये । अस्मा उद्धर । द्वा आनय । व्योर्लोपस्यासिद्धत्वान्न सन्धिः । अमुष्य । अमुष्मै । अमुष्मात् । उत्वस्यासिद्धत्वात् स्यादयः स्युः ।

२ । नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।

एष्वेव नलोपोऽसिद्धः स्यात् । सुब्विधौ । राजभ्याम् । राजभिः । राजसु । सुपि दीर्घत्वादि न भवति । स्वरो नोदाक्रियते । संज्ञाविधौ । पञ्च ब्राह्मण्यः । षट् संज्ञा भवति । ततो ङीबभावः । तुग्विधौ । वृत्रहभ्याम् । वृत्रहभिः । पिति कृति तुग् न भवति । कृति किम् ? वृत्रहच्छत्रम् । छे चेति (६।१।७३) तुग् भवत्येव । एष्वेवेति नियमः किम् ? राजीयति । राजायते । राजाश्वः । राजेन्द्रः ।

३ । न मु ने ।

मुभावो नाभावे कर्त्तव्ये नासिद्धः स्यात् । अमुना ।

(क) सिज्लोप एकादेशे सिद्धः । अलावीत् ।

(ख) निष्ठादेशः षत्वप्रत्ययविधीड्विधिषु सिद्धः । वृक्णः । झलीति (८।२।२६) षत्वं न भवति । क्षीबिकः । नौद्व्यचष्ठन्निति (४।४।७) ठन्प्रत्ययो भवति । क्षीबः । तमाश्रयस्य लोपपक्षे इट् न भवति ।

(ग) श्चुत्वं धुटि सिद्धम् । रट् श्च्योतति । ङः सि धुडिति (८।३।२९) न भवति ।

(घ) अभ्यासजश्त्वचर्त्वमेत्वतुकोः सिद्धम् । बभणतुः । दधि चिच्छित्सति । छिदेः सनि रूपम् ।

(ङ) द्विर्वचने परसवर्णत्वं सिद्धम् । सयँय्यन्ता । सवँव्वत्सरः । इह स्वरसूत्रत्रयम् । (7)

७ । नलोपः प्रातिपदिकान्तस्य ।

पदस्य प्रातिपदिकस्यान्तो नकारो लुप्यते । राजा । राजभ्याम् । राजपुत्रः । राजत्वम् । राजतमः ।

(क) अह्नो नलोपप्रतिषेधः । अहोभ्याम् । अहरत्र । अहन् (८।२।६८) रोऽसुपीति (८।२।६९) नरेफयोरसिद्धत्वान्नलोपः प्राप्नोति ।

८ । न ङिसम्बुद्ध्योः ।

अनयोरत्र नलोपो नास्ति । ङौ । राजनीवाचरति राजन्यति गुरौ । अधिकरणाच्चेति (३।१।१०, वा) क्यच् । सम्बुद्धौ । हे राजन् । कथं चर्मणि तिला अस्येति चर्मतिलः । ङावुत्तरपदे प्रतिषेधो वक्तव्यमिति भाष्यात् ।

(क) वा नपुंसकानामिति वक्तव्यम् । हे चर्मन् हे चर्म वा । हे दण्डिन् हे दण्डि वा ।

९ । मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।

मकारान्तादवर्णान्तात् मकारोपधादवर्णोपधाच्च मतोरादेर्वः स्यात् । किंवान् । वृक्षवान् । खट्वावान् । उपधायाश्च । लक्ष्मीवान् । पयस्वान् । यशस्वान् । भास्वान् । कंवान् शंवान् इत्युभयथापि सिध्यति । मादुपधायाः किम् ? मतिमान् । सर्पिष्मान् । आयुष्मान् । अयवादिभ्यः किम् ? यवमान् । यव भूमि कृमि ऊर्मि ककुद् गरुत् । आकृतिगणोऽयम् ।

१० । झयः ।

झयः परस्य मतोर्वकारः स्यात् । अग्निचित्वान् । मरुत्वान् ।

---

(7) ४ । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । ५ । एकादेश उदात्तेनोदात्तः । ६ । स्वरितो वाऽनुदात्ते पदादौ ।

११ । संज्ञायाम् ।

नाम्नि मतोर्वः स्यात् । अहीवती नदी । मणीवती । शरावती । नद्यां मतुप् (४।२।८५) । शरादीनाञ्चेति (६।२।१४०) दीर्घः ।

१२ । आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ।

एते ग्रामप्राण्यङ्गरथचक्रऋषिशैलनदीनां नाम्नि निपात्यन्ते । अन्यत्रा-सनवान् । अस्थिमान् । चक्रवान् । कक्ष्यावान् । लवणवान् (8) । चर्मवती ।

१३ । उदन्वानुदधौ च ।

अयमुदधौ च स्यात् । अन्यत्रोदकवान् । चकारादन्यत्रापि यथाभिधानम् । उदन्वान्नाम मुनिः ।

१४ । राजन्वान् सौराज्ये ।

"सुराज्ञि देशे राजन्वान् स्यात् (9) । ततोऽन्यत्र राजवान् ।" इत्र

१५ । छन्दसीरः ।

१६ । अनो नुट् ।

१७ । नाद्‌घस्य ।

छन्दः सूत्रत्रयम् ।

१८ । कृपो रो लः ।

कृपो रेफस्य लः स्यात् । कल्प्ता । लुटि च कृप इति (१।३।९३) निपातनादृकारस्यापि लृकारः । क्लृप्तः । चलीक्लृप्यते । चक्लृपे । चिक्लृप्सते । कथं कृपा ? कृपेः संप्रसारणञ्चेति भिदादिपाठेन लाक्षणिकत्वान्न लत्वम् । कृपाकृपणकृपीटकर्पटादयस्तूणादौ । बाहुलकात् ।

(क) बालमूललघ्वलमङ्गुलीनां वा लो रः । बारः बालः वा । मूलं मूरं वा । लघुः रघुः वा । अरम् अलं वा । अङ्गुलिरङ्गुरिः वा ।

---

(8) इमा लवणाकर इति केचित् । तथाप्रमत्यन्तार्थंवाभोदाहरणं भोजः—"आरूढवान् कश्चन पादुकाभ्यां वारि स्थितो गायति मङ्गलानि । तं ब्राह्मणो पृच्छति पुत्रकामा राजन् रमायां लवणस्य कोऽर्थः ॥१॥ इति सरस्वतीकण्ठाभरणे । लवणस्य कोऽर्थ इति पाठान्तरम् ।

(9) राजन्वतीमाहुरनेन भूमिमिति रघुकाव्ये ।

(ख). कपिरकादीनां वा रस्य लः। कपिलका कपिरका वा। रोम लोम वा। पांशुरं पांशुलं वा। कर्म कल्म वा। भीरुःभीलुर्वा।

(ग) रलयोरैकत्वस्मरणमित्येके।

(घ) डलयोरित्यन्ये। विरोचनं विलोचनं वा। व्रीडा व्रीला वा। विडालः विरालः विलालो वा। चूड़ा चूला वा। वड़भी वलभी वेत्यादि। सर्वोऽयं वर्णविकारप्रपञ्चः।

१९। उपसर्गस्यायतौ।

अयतावुपसर्गरेफस्य लः स्यात्। प्लायते। पलायते। पल्ययते। प्रतेरन-भिधानात् प्रत्ययते।

२०। ग्रो यङि।

गिरतेर्यङि लत्वं स्यात्। निजेगिल्यते। यङि किम्? निगीर्य्यते।

२१। अचि विभाषा।

गिरतेरचि लत्वं वा स्यात्। गिरति गिलति वा। निगरणं निगलनं वा। व्यवस्थितविभाषया प्राण्यङ्गे नित्यं गल एव। विषे तु गर एव। धातोः कार्य्यमुच्यमानं धातुप्रत्यय एव स्यात्। नेह। गिरौ गिरः।

२२। परेश्च घाङ्कयोः।

घेऽङ्के च परेर्लत्वं वा स्यात्। परिघः पलिघो वा। पर्य्यङ्कः पल्यङ्को वा।

(क) योगे चेति वक्तव्यम्। परियोगः पलियोगो वा।

२३। संयोगान्तस्य लोपः।

पदस्य संयोगान्तस्य लोपः स्यात्। गोमान्। श्रेयान्। भवन्। पचन्। कृतवान्। इह दध्यत्र मध्वत्र काक्यर्थं वास्यर्थमिति संयोगान्तस्य लोपिति (८।२।२९) संयोगादेश्च लोपो न भवति। संहितानिमित्तस्य यण्लोप-बहिरङ्गस्यासिद्धेः।

२४। रात् सस्य।

रेफात् परस्य संयोगान्तस्य सकारस्यैव लोपः स्यात्। पितुः। मातुः।

हे पितः। कटचिकीः। भारजिहीः (10)। नाम्यस्य। ऊर्जः क्विप् ऊर्क्। मृजेर्लङि न्यमार्ट्। सकारयोर्लोपो न भवति।

२५। धि च।

धकारे सलोपः स्यात्। असहिध्वम्। अयाचिध्वम्। अपविध्वम्। अलविध्वम्। इह धिसकारे सिचो लोपश्चकारीति प्रयोजनमित्येके। (11) सामान्येनेति सर्वेषाम्। चकाधि। वसेरासेश्च निवध्वमाध्वम्। पदस्येत्येव। पयो धावति पयोधिस्तु व्यवस्थितविभाषानुवृत्तेः (12)। अतः परं तु सिचो लोपएवेष्यत इत्याहुः।

२६। झलो झलि।

झल्परस्य सिचो लोपः स्याज्झलि। अभित्त। अभित्थाः। अबुद्ध। अबुद्धाः। झलि किम्? अभित्साताम्।

२७। ह्रस्वादङ्गात्।

ह्रस्वात् परस्य सिचो लोपः स्यात्। अकृत। अकृथाः। अदित। अदिथाः। अङ्गात् किम्? अलविष्ट। झलीत्येव। अकृषाताम्। सिचोऽन्यस्य नेष्यते। हिष्टराम्। हिष्टमाम्। तिष्टमाम्।

२८। इट ईटि।

इटः परस्य सिचो लोपः स्यादीटि परतः। अदेवीत्। अकोषीत्। अमथीत्।

२९। स्कोः संयोगाद्योरन्ते च।

झलि पदान्ते च यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। मस्जो मग्नः। साधुमक्। तक्षू तष्टव्यम्। तष्टः। काष्ठतट्। पदस्येत्येव। पृथक् स्नाता।

---

(10) क्रीञः सन्। ततः क्विप्। चिकीः। कटस्य चिकीरिति षष्ठीसमासः। एवं हरतेः सन्। ततः क्विप्। जिहीः। षत्वस्यासिद्धत्वात् सलोपः। पूर्ववत् षष्ठीसमासः।

(11) अयमेतत्सूत्रस्थश्लोकवार्त्तिकार्थः। श्लोकवार्त्तिकानि च बहूनि वार्त्तिकपाठाद् भाष्यकारेणाभ्यधायिषि।

(12) इदं चिन्त्यम्। षादौ प्रत्यये परत एव सलोपः। नहि धात्वादिषकारपरे।

३० । चोः कुः ।

झलि पदान्ते च चवर्गस्य कवर्गः स्यात् । वक्ता । वक्तुम् । वक्तव्यम् । वाक् । लङि अवक् । वजो वग्धः । छजेश्चक्षुष्क् । कथमाष्कीत् । परस-वर्णासिद्धेः । कथं तर्हि । ओपधस्य क्रुघेः क्विनि क्रुङ् क्रुञ्चौ क्रुञ्चः । युजि क्रुञ्चश्चेति (१।२।५९) निपातनात् ।

३१ । हो ढः ।

झलि पदान्ते च हस्य ढः स्यात् । सोढ़ा । लेढ़ा । मधुलिट् । अलेट् ।

३२ । दादेर्धातोर्घः ।

धातुपाठे दादेर्हस्य घः स्यात् तस्मिन् परतः । दोग्धा । गोधुक् । लङि अधोक् । दग्धा । ग्रामधक् । ढत्वे घत्वमिदं सिद्धम् । अपवादसामर्थ्यात् ।

३३ । वा द्रुहमुहष्णुहष्णिहाम् ।

एषां हस्य घो वा स्यात् । द्रोग्धा द्रोढ़ा वा । मित्रध्रुग् मित्रध्रुट् वा । मोग्धा मोढ़ा । स्नोग्धा स्नोढ़ा वा । स्निक् स्निट् वा । स्नेग्धा स्नेढ़ा वा ।

३४ । नहो धः ।

नहो हस्य धः स्यात् तस्मिन् परतः । नद्धम् । नद्धुम् । नद्धा । नद्धव्यः । उपानत् ।

३५ । आहस्थः ।

आहो हकारस्य थः स्याज्झलि । आत्थ । झलि किम् ? आहतुः । आहुः ।

३६ । व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ।

एषामन्त्यस्य षः स्याज् झलि पदान्ते च । व्रष्टा । मूलवृट् । भ्रष्टा । भर्ष्टा । धान्यभृट् । स्रष्टा । रज्जुसृट् । मार्ष्टा कंसमृट् । यष्टा । यष्टुम् । देवेट् । राष्टम् । सम्राट् । भ्राष्टम् । विभ्राट् । प्रष्टा । शब्दप्राट् । प्रवेष्टुम् । विट् ।

३७। एकाचो बशो भष् झषन्तस्य स्ध्वोः।

धातोरवयवो य एकाज् झषन्तस्तस्य बशां बगडदां स्थाने भषो भघढधो वर्गचतुर्थाः स्युः से ध्वे पदान्ते च। बुध भोत्स्यते। अभुद्ध्वम्। गुह घोक्ष्यते अघूढ्वम्। वर्णघुट्। दुह धोक्ष्यते अधुग्ध्वम्। गोधुक्। धात्ववयवाश्रयणं किम्? अभ्यासे कृते यथा स्यात्। अधोक् अधुग्ध्वम्। तथा गर्दभयतेर्डुण्डुभयतेश्च क्विप्। गर्धप्। डुण्ढुप्। (13) तुण्डिभयतेश्च तुण्ढिप्। एकाचः किम्? दामलिट्।

३८। दधस्तथोश्च।

दध इति कृतद्विर्वचनस्य दधातेर्बशो भष् स्यात् तथोः परतः स्ध्वोश्च। धत्तः। धत्थः। धत्से। धद्ध्वे। "पिधत्तं पाणिभिर्दृशः।" झषन्तस्येत्येव। दधाति। दधासि।

३९। झलां जशोऽन्ते।

पदान्ते झलामन्तरतमा जशः स्युः। वागत्र। एकाजत्र। श्वलिडत्र। अग्निचिदत्र। त्रिष्टुबत्र। वाग्भ्याम्। अच्युग्गमनम्। श्वलिड्भ्याम्। भवद्भ्याम्। अन्ते किम्? झलि मा भूत्। वस्ता। इह संयोगान्तलोपे जश्त्वमसिद्धम्। श्रेयान्। जश्त्वे सोरुत्वं सिद्धम्। पयः। यशः। कुत एतत्? अपवादत्वात्।

४०। झषस्तथोर्धोऽधः।

झषः परयोस्तथोर्धः स्यात्। लब्धा। लब्धुम्। लब्धव्यम्। अलब्ध। अलब्धाः। अबुद्ध। अबुद्धाः। बोद्धा। लेढा। अलीढ। अलीढाः। दोग्धा। अदुग्ध। अदुग्धाः। अधः किम्? धाञो मा भूत्। धत्तः। धत्थः।

४१। षढोः कः सि।

षकारढकारयोः कः स्यात् सकारे परतः। पिष्लृ पेक्ष्यति। लिह लेक्ष्यते। लिलिक्षति। सीति किम्? पिनष्टि। लेढि।

---

(13) तुण्डिभयतेश्च क्विप्। गर्धप्। तुण्डिर्वेति पाठान्तरम्। एतदेव वृत्तिकारैश्च व्याख्यातम्।

४२ । रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।

रदाभ्यां परस्य निष्ठातकारस्य नकारः स्यात् पूर्वस्य च दस्य नः । आस्तीर्णम् । अवगूर्णवान् । भिन्नं भिन्नवान् । छिन्नः छिन्नवान् । रदाभ्यां किम् ? कृतः कृतवान् । तइति किम् ? चरितम् । इह कृतस्यापत्यं कार्त्तिः । आ ऋत आर्त्त इति नत्वं नास्ति । वृद्धेर्बहिरङ्गाया असिद्धत्वात् । यथा नृमत इदं नार्मतमिति मतोर्वत्वं नास्ति ।

४३ । संयोगादिरातो धातोर्यण्वतः ।

संयोगादिरादन्तो यो धातुर्यण्युक्तस्तस्य निष्ठातकारस्य नः स्यात् । निद्राणः । निद्राणवान् । स्त्यानः । ग्लानः । म्लानः । संयोगादेः किम् ? यातः । धातोः किम् ? निर्यातः । आतः किम् ? च्युतः । यण्वतः किम् ? स्नातः । निष्णातः । आम्नातः ।

४४ । ल्वादिभ्यः ।

ल्वादेर्निष्ठातो नः स्यात् । लूनः । धूनः । जीनः । जीनवान् ।

(क) ऋकारल्वादिभ्यः क्तिन् निष्ठावत् । कीर्णिः । शीर्णिः । गीर्णिः । लूनिः । धूनिः ।

(ख) दुग्वोर्दीर्घश्च । दूनः । गूनः ।

(ग) पूञो विनाशे । पूना यवाः । विनाशे किम् ? पूतं धान्यम् ।

(घ) सिनोतेर्ग्रासकर्मकर्तृकस्य । सिनो ग्रासः स्वयमेव । नेह । सितो विप्रेण ग्रासः । षिञ् बन्धने ।

४५ । ओदितश्च ।

ओदितो निष्ठातो नत्वं स्यात् । ओलजी लग्नः । ओविजी उद्विग्नः । ओप्यायी पीनः । पीनवान् । स्वादय ओदितः । सूनः । दीनः । दीनवान् । उड्डीनः । उड्डीनवान् ।

४६ । क्षियो दीर्घात् ।

निष्ठातो नः स्यात् । क्षीणः क्षीणवान् । दीर्घात् किम् । क्षितमस्य आतम् ।

४७। श्योऽस्पर्शे।

श्यैङो निष्ठातो नः स्यात्। शीनं। घृतम्। शीना वसा। अस्पर्शे किम्? शीतो वायुः।

४८। अञ्चोऽनपादाने।

अञ्चो निष्ठातो नः स्यात्। समक्नौ शकुनेः पादौ। पक्षे समक्तः। सम्बद्धत्वर्थः। अनपादाने किम्? उदक्तमुदकं कूपात्। कथं व्यक्तमिति? अञ्जधातोः।

४९। दिवोऽविजिगीषायाम्।

दिवो निष्ठातो नत्वं स्यात्। "आद्यूनः स्यादौदरिकः"। अविजिगीषायां किम्? द्यूतं क्रीडन्ति।

५०। निर्वाणोऽवाते।

स्यात्। निर्वाणोऽग्निः। निर्वाणं मुनीनाम्। वाते त्वभिधेये निर्वातो वातः।

५१। शुषः कः।

शुषो निष्ठातस्य कः स्यात्। शुष्कः। शुष्कवान्।

५२। पचो वः।

स्यात्। पक्वः। पक्ववान्।

५३। क्षायो मः।

क्षायो मकारः स्यात्। क्षै क्षामः। क्षामवान्।

५४। प्रस्त्योऽन्यतरस्याम्।

प्रस्त्यायतेर्निष्ठातो मो वा स्यात्। प्रस्तीतः प्रस्तीमो वा। प्रस्तीतवान् प्रस्तीमवान् वा। स्त्यः प्रपूर्वस्येति (६।१।२३) संप्रसारणम्।

५५। अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः।

एते निपात्यन्ते। अनुपसर्गात् किम्? ञिफला विशरणे। प्रफुल्लं पद्मम्। क्षीबृ मदे। प्रक्षीबितः। प्रकृशितः। परिकृश इति प्रादिसमासः। कथं

प्रोल्लाघितः । क्तान्ते रूपनिर्देशात् फलितवान् । क्षीबितवान् । कृशितवान् । उल्लाघितवानित्येके । फुल्लवान् क्षीबवान् कृशवान् उल्लाघवानित्यपरे । फुल्तवान् इत्यन्ये ।

(क) उत्फुल्लसंफुल्लयोरुपसंख्यानम् ।

५६ । नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ।

एभ्यो निष्ठातो नत्वं वा स्यात् । नुन्नं नुत्तं वा । विदेर्विचारणार्थस्य विन्नः वित्तो वा । उन्दी समुन्नं समुत्तो वा । त्राणः त्रातो वा । घ्राणः घ्रातो वा । ह्रीणः ह्रीतो वा ।

५७ । न ध्याख्यापृमूर्छिमदाम् ।

एषां प्राप्तं नत्वं न स्यात् । ध्यातः । ख्यातः । पूर्त्तः । मूर्त्तः । मत्तः । पूरीधातोस्तु पूर्णः ।

५८ । वित्तो भोगप्रत्यययोः ।

विन्दतेर्धनप्रसिद्ध्योर्वित्तः स्यात् । वित्तमस्यास्ति । वित्तः पाण्डित्येन । अन्यत्र विन्नः ।

५९ । भित्तं शकलम् ।

भित्तं खण्डं स्यात् । अन्यत्र भिन्नम् ।

६० । ऋणमाधमर्ण्ये ।

इदमत्र निपात्यते । ऋणं गृह्णाति । अन्यत्र ऋतं सत्यं वदेत् ।

६१ । नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि च्छन्दसि ।

छान्दसम् । उक्ता निष्ठादेशाः ।

६२ । क्विन्प्रत्ययस्य कुः ।

क्विन्प्रत्ययो यस्माद् विहितस्तस्य कुत्वं स्यात् । घृतस्पृक् । व्रश्चादिना (८।२।३६) षत्वं कृत्वा जश्त्वेन (८।२।३९) डकारे कृते कुत्वं गकारः । तस्य वावसाने इति (८।४।५६) चर्त्वम् । अन्ये तु कुत्वेन महाप्राणत्वाच्छस्य खः । ततो जश्त्वं (८।२।३९) गकारः । तस्य चर्त्वमित्याहुः । एवमृत्विक् ।

दधृक्। सम्यङ्। प्राङ्। न्यङ्। कुङ्। कुङ्भ्याम्। क्विन्प्रत्ययस्य किम्? देवेट्। रज्जुसृट्। रज्जुसृड्भ्याम्। पदस्येत्येव, घृतस्पृशौ। इह क्विन् प्रत्ययो यस्माद् दृष्ट (14) इति विग्रहादन्यप्रत्ययान्तस्यापि पदान्ते क्वचित् कुत्वम्। तेन क्विपि दृग्भ्यां दृग्भिरित्याहुः।

६३। नशेर्वा।

नशेः पदान्तस्य कुत्वं वा स्यात्। भावे सम्पदादित्वात् क्विपि नक् नड् वा।

६४। मो नो धातोः।

पदस्य मान्तस्य धातोर्नः स्यात्। प्रशान् (15)। प्रतान्। धातोः किम्? इदम्। पदस्येत्येव। प्रशामौ। प्रतामौ।

६५। म्वोश्च।

मवयोः परयोर्धातोर्मस्य नः स्यात्। मकारे छान्दसमुदाहरणम्। वकारे त्वसौ जगन्वान्। येषां तु च्छन्दसि क्वसुरिति मतं तेषां छन्दःसूत्रमेतत्। (16)

६६। ससजुषो रुः।

सान्तस्य पदस्य सजुषश्च रुः स्यात्। अग्निरत्र। वायुरत्र। जुषेः क्विप्। सह जुषा वर्त्तत इति सजूस्तापसः।

---

(14) विहित इति पाठान्तरम्। अत्र क्विन् प्रत्ययो यस्मादिति क्विन्प्रत्यय इति बहुव्रीहिरित्याहुः। धातुरिति तत्रान्यपदार्थः। तथाचोक्तम्—

"क्विनः कुरिति निर्दिष्टे यत् प्रत्ययग्रहणं कृतम्।
क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते ॥१॥"

इति। कथं तर्हि रज्जुसृडिति? सृजिदृशो (६।१।५८) रिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगात्। एतच्च विश्वसृड् विधिरित्येव पठितव्यम्। विश्वसृगिति त्वपाणिनीयम्।

(15) स्त्रियामपि प्रशान् प्रतानिति। ऋन्नेभ्यो ङीबिति (४।१।५) न ङीप्। नकारस्यासिद्धत्वात्।

(16) चचन्वहे चचन्महे चचण्महे चर्मिमहे इति चमतेः, चचमिव चचन् चर्मिम चचण्मेति चाम्यतेश्च लिटि रूपाणि नेदं केवलं छान्दसमित्याहुः। इदमपि नास्ति। कदितां लिटि न वेट्त्वम्। क्रादिनियमा-(७।२।१३)दित्यन्ये।

६७ । अवयाःश्वेतवाःपुरोडाश्च ।

इति छन्दःसूत्रम् ।

६८ । अहन् ।

अहन्नित्येतस्य पदस्य रुः स्यात् । अहोभ्याम् । अहःसु । हे दीर्घाहो निदाघ । दीर्घाहा निदाघ इति रुत्वस्यासिद्धत्वात् सर्वनामस्थान इति (६।४।८) दीर्घः ।

(क) रूपरात्रिरथन्तरेषूपसंख्यानम् । अहोरूपम् । गतमहो रात्रिरागता । एकदेशविकृतस्यानन्यत्वात् । अहोरात्रः । अहोरथन्तरम् । रोऽसुपीति (८.२।६९) प्राप्ते रुत्वमिदमुत्वार्थम् ।

६९ । रोऽसुपि ।

अह्नो नकारस्यासुपि परे रेफः स्यात् । अहरत्र । अहरिह । अहर्ददाति । अहर्भागः । अहर्मूलम् । अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणनिषेधादसुप्परता । असुपि किम् ? दीर्घाहा निदाघः । हे दीर्घाहः । अत्र लोपोऽयम् । न लुक् ।

(क) अहरादीनां पत्यादिषूभयथा । रुर्वा रेफो वा । अहः पतिः । अह≍पतिः । अहर्पतिः वा ' स्वःपतिः स्व≍पतिः स्वर्पतिः वा । कस्कादिपाठात् (८।३।४८) गीष्पतिः । (17) गी≍पतिः । गीर्पतिः वा । उषसि बुध्यते उषर्बुधः । व्यवस्थितविभाषया नित्यं रेफेण विसर्गं उत्वञ्च बाध्यते । इह

७० । अम्नरूधरवरित्युभयथा छन्दसि ।

७१ । भुवश्च महाव्याहृतेः ।

छन्दः सूत्रद्वयम् ।

७२ । वसुस्रंसुध्वंस्वनडुहां दः ।

एषां पदानां दः स्यात् । रुत्वढत्वयोर्बाधा । विद्वद्भ्याम् । उखास्रत् ।

---

(17) माधवभट्टोजिप्रभृतीनां मते न गास्य कस्कादित्वम् । भाष्ये गीर्पतिः । गी≍पतिः । गीः पतिरिति रेफोपध्मानीयविसर्जनीयानामेवोदाहरणात् । वस्तुतस्तु गीष्पतिरित्यपाणिनीयम् । भाष्यविरोधात् ।

पर्यध्वात्। उपसेदिवद्भ्याम्। पर्यध्वद्भ्याम्। पर्यध्वद्भिः। अनडुद्भ्याम्। अनडुद्भिः। स इत्येव। विद्वान्। पदस्येत्येव। विद्वांसौ।

७३। तिप्यनस्तेः।

तिपि सकारान्तस्य पदस्य दः स्यात्। अचकाद् भवान् अन्वशाद् भवान्। स इत्येव। अजागर्भवान्। तिपि किम्? चकास्तेः क्विप्। सुचकास्तीति सुचकाः। पदस्येत्येव। चकास्ति। अनस्तेरितिच्छन्दोभागः।

७४। सिपि धातो रुर्वा।

सिपि सान्तस्य पदस्य रुर्वा दकारो वा स्यात्। अचकास्त्वम्। अचकात् त्वं वा। अन्वशात् त्वम्। अन्वशास्त्वं वा। पदस्येत्येव। चकास्सि। शास्सि।

७५। दश्च।

सिपि दान्तस्य पदस्य रुर्वा दकारो वा स्यात्। अभिनस्त्वम। अभिनत् त्वं वा। पदस्येत्येव। भिनत्सि।

७६। र्वोरुपधाया दीर्घ इकः।

रेफवकारान्तस्य धातोरुपधाया इको दीर्घः स्यात्। गीः। गीर्भ्याम्। आशीः। पूः। धूः। वक्ष्यमाणसुखार्थम्। उपधाया इति किम्? अविभर्भवान्। धातोः किम्? अग्निः। पदस्येत्येव। गिरौ। गिरः।

७७। हलि च।

हलि रेफवकारान्तस्य धातोस्तथा स्यात्। विस्तीर्णम्। दीव्यति। प्रतिदीव्ना। धातोरित्येव। दिवमिच्छति दिव्यति। अपदान्तार्थोऽयं योगः।

७८। उपधायाञ्च।

धातोरुपधाभूतौ यौ रेफवकारौ हल्परौ तयोरुपधाया इको दीर्घः स्यात्। मूर्च्छति। मूर्च्छिता। कथं चतुर इच्छति चतुर्यतीति? नहि व्याख्यातमेतद् भाष्ये अप्सुयतीति वर्त्तते। तस्येह षष्ठ्या विपरिणम्यते। ततो सुब्धातोर्न भवति। गीर्भ्यां गीर्भिरित्यत्र च सुप्यपि परतो भवत्येव।

इह तु रीधातोर्लिटि रिय्यतुः रिय्युरिति यणादेशस्य स्थानिवत्त्वेऽहल्परत्वान्न भवति ।

७९ । न भकुर्छुराम् ।

एषामुक्तो दीर्घो नास्ति । भस्य । धुर्य्यः । कुर् । कुर्य्यात् । छुर च्छेदने । आशिषि छुर्य्यात् । कथं प्रतिदीव्ना ? हलि रेफवकारान्तस्य भस्येत्याश्रयणात् ।

८० । अदसोऽसेर्दादु दो मः ।

अःसेर्यस्य सोऽयमसिः । सकारे इकार उच्चारणार्थः । असेः कृतात्वस्यादसो दात् परस्यान्तरतम उवर्णः स्यात् । दस्य च मः । अमुम् । अमू । अमून् । अमुना । असेः किम् ? त्यदाद्यत्वाभावे मा भूत् । अदः कुलम् । अद इच्छति अदस्यति । अदोऽस्यतीति—

"अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् । (18)
केचिदन्त्यसदेशस्य नेत्येके सेर्हि दृश्यते ॥१॥"

अमुमुयङ् । अमुमुयञ्चौ । केचिदन्त्यसदेशस्य । अदमुयङ् । यत्र सकारस्य त्यदाद्यत्वं (७।२।१०२) तत्रेदं मुत्वं दृश्यते । नेत्येकेऽसेर्हि दृश्यते । अदद्र्यङ् । इह समासान्तर्वर्त्तिन्या विभक्तेर्लुकि न लुमताङ्गस्येति (१।१।६३) प्रतिषेधात् त्यदाद्यत्वाभावः । (19) दादिति किम् ? अलोऽन्त्यस्य (१।१।५२) मा भूत् । अमुया । अमुयोः ।

८१ । एत ईद्बहुवचने ।

बह्वर्थस्यादसो दात्परस्य एत ईत् स्यात् । दस्य च मः । अमी ।

---

(18) केचिदिच्छन्ति लत्ववदिति । यथा चलीक्लृप्यत इत्यत्र धातावभ्यासे चोभयत्र लत्वं तथामुमुयङित्यत्रापि मुत्वद्वयम् ।

(19) अत्र "अदसः केचिदिच्छन्ति केचिदिच्छन्ति नादसः । उभयोः केचिदिच्छन्ति केचिदिच्छन्ति नोभयोः ॥ १ ॥" इति क्वचिदधिकः पाठः । केचिदिच्छन्ति नादस इति मते त्वमुद्र्यङिति स्यात् । स चापाणिनीयत्वेनापभ्रंश एव । भाष्यवार्त्तिकविरोधात् ।

अमीभिः। अमीषाम्। अमीषु। बहुवचने किम्? अमू कुले। इह वाक्यस्य टेरित्यादीनि स्वरसूत्राणि सप्तविंशतिः। (20)

१०८। तयोर्य्वावचि संहितायाम्।

संहितायामित्याऽऽध्यायपरिसमाप्तेरधिक्रियते।

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया ॥१॥

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तौ
अष्टमाध्यायस्य द्वितीयः पादः ॥८।२॥
समाप्तश्च सुसिद्धपादः॥

---

(20) यथा—
८२। वाक्यस्य टेः प्लुत उदात्तः। ८३। प्रत्यभिवादेऽशूद्रे। ८४। दूराद्धूते च।
८५। हैहेप्रयोगे हैहयोः। ८६। गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्। ८७। ओमभ्यादाने।
८८। ये यज्ञकर्मणि। ८९। प्रणवष्टेः। ९०। याज्यान्तः। ९१। ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः।
९२। अग्नीत्प्रेषणे परस्य च। ९३। विभाषा पृष्टप्रतिवचने हेः। ९४। निगृह्यानुयोगे च।
९५। आम्रेडितं भर्त्सने। ९६। अङ्गयुक्तं तिङाकाङ्क्षम्। ९७। विचार्यमाणानाम्।
९८। पूर्वं तु भाषायाम्। ९९। प्रतिश्रवणे च। १००। अनुदात्तं प्रश्नान्ताभिपूजितयोः।
१०१। चिदिति चोपमार्थे प्रयुज्यमाने। १०२। उपरिस्विदासीदिति च।
१०३। स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु। १०४। क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्।
१०५। अनन्त्यस्यापि प्रश्नाख्यानयोः। १०६। प्लुतावैच इदुतौ।
१०७। एचो ऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ।

अथ

भाषावृत्तिः।

अष्टमोऽध्यायः। तृतीयः पादः।

१। मतुवसो रु सम्बुद्धौ छन्दसि।

रुःसम्बुद्धावित्यधिक्रियते। शेषम्छान्दसः।

(क) विभाषा भवद्भगवदघवतामोश्चावस्य। एषां सम्बुद्धौ रुर्वा स्यादव-शब्दस्य चौकारः। हे भोः हे भवन् वा। हे भगोः हे भगवन् वा। हे अघोः हे अघवन् वा। भोःशब्दोऽप्यव्ययमस्ति। भो विप्र। भो विप्रौ। भो विप्राः। स्त्रियाश्च। भो ब्राह्मणि।

२। अत्रानुनासिकः पूर्वस्य तु वा।

यस्य रुत्वं कृतं तत्पूर्वस्यानुनासिको वा स्यादित्यधिक्रियते।

३। आतोऽटि नित्यम्।

छान्दसम्।

४। अनुनासिकात् परोऽनुस्वारः।

अन्यशब्दोऽत्राध्याहार्य्यः। अनुनासिकादन्यस्य रोः पूर्वस्यानुनासिकाभावे परोऽनुस्वारागमो वेदितव्यः। तद्यथा—

५। समः सुटि।

समो रुः स्यात् सुटि परे। सँस्कर्त्ता संस्कर्त्ता वा। सँस्करोति संस्करोति वा। इह समो मलोप इति भाष्यम्। लोपपक्षेऽप्यनुनासिका-नुस्वाराविष्येते। सँस्कर्त्ता संस्कर्त्ता वा। किञ्चात्र संपुंकानां सो वक्तव्य इति भाष्यम्। सँस्कर्त्ता संस्कर्त्ता वा। पुँस्कामा पुंस्कामा वा। कांस्कान् काँस्कान् वा। रुत्वपक्षे वा शरीति (८।३।३६) विसर्गः कुप्वोः ✕क ✕पौ

चेति (८।३।३७) वा स्याताम्। वा शरीति (८।३।३६) व्यवस्थितविभाषया न भवतीति वामनवृत्तिः। अत्र च संस्करोतेः कैयटश्रुतपालयोर्मतभेदात् षोडश रूपाणि ग्रन्थविस्तरभयान्न दर्शितानि। (21)

६। पुमः खय्यम्परे।

पुमो रुः स्यादम्परे खयि परतः। पुँस्कली पुंस्कली वा। पुँस्कोकिलः पुंस्कोकिलो वा। पुँस्कामा पुंस्कामा वा। पुँस्त्वम् पुंस्त्वं वा। अम्परे किम्? पुंक्षीरम्। खयि किम्? पुंगवः। पुंदासः।

७। नश्छव्यप्रशान्।

नान्तस्य पदस्य रुःस्याच्छवि। भवांश्चिनोति भवाँश्चिनोति वा। भवांश्छादयति भवाँश्छादयति वा। भवांष्टीकते भवाँष्टीकते वा। भवांष्ठकारः भवाँष्ठकारः वा। भवांस्तरति भवाँस्तरति वा। छवि किम्? भवान् करोति। अप्रशान् किम्? प्रशाञ्चिनोति। अम्पर इत्येव। भवान् त्सरुकः। पदस्येव। भवन्तौ। पचन्तौ। संहितायामित्येव। भवान् चिनोति। भवान् छादयति। कथं त्वन्तरसीति? अत्र न भवति। परमवर्णासिद्धेः। इह

८। उभयथर्क्षु।

९। दीर्घादटि समानपादे।

छन्दःसूत्रद्वयम्।

१०। नॄन् पे।

नॄनित्यस्य रुः स्यात् पवर्णे। नॄँः पाहि नॄंः पाहि वा। नॄँः प्रीणीहि नॄंः प्रीणीहि वा। पे किम्? नॄन् भोजयति। संहितायामित्येव। नॄन् पाहि। (22)

---

(21) अत्र "सम्पुंकानां सत्व"मिति वार्त्तिकम् (8. 3. 12)। "समो वा लोपमेके" इति भाष्यम्। तेन संस्स्कर्त्ता संस्स्कर्त्ता संस्कर्त्ता संस्कर्त्तेति रूपचतुष्टयम्। ततोऽनचि चेति (८।४।४७) सकारद्वित्वम्। अनुस्वारस्याच्त्वात्। एतेनाष्टौ रूपाणि। ततः शरः खय इति (८।४।४७, वा) कद्वित्वे षोडश। अन्ये पुनरनुस्वारस्य परहल्त्वात् तस्य च द्वित्वं कुर्वन्ति। अत्र केचिदाहुः समो यदा लोपः सत्व वा, तदा रुत्वाभावेऽनुस्वारानुनासिकत्वं अपि न। तेन सस्कर्त्ता समस्कर्त्तेति। अनयोरपि मकारककारयोर्द्वित्वेऽष्टौ रूपाणीति। तन्न। सत्वलोपयोराष्टमिकत्वेन रुत्वप्रकरणस्थत्वेनानुस्वारानुनासिकयोर्द्वारत्वात्।

(22) अत्र कुप्वोः ≍क≍पौ चेति (८।३।३७) पक्षे उपध्मानीयं नॄँ≍पाहि नॄं≍पाहीत्यपि स्याताम्। चाद् विसर्गः। न तु सत्वम्। इत्थं रूपपञ्चकम्।

११। खतवान् पायौ।

इति च्छान्दसः।

१२। कानाम्रेड़िते।

कानकारस्याम्रेड़िते परे रुः स्यात्। कांस्कान् काँस्कान् वा भोजयति। उक्तो रुः।

१३। ढो ढे लोपः।

ढे परे ढस्य लोपः स्यात्। जढ़म्। निर्व्यूढ़िः। लीढ़म्। लीढ़वान्। लीढ़्वा। ष्टुत्वमिहाश्रयणात् सिद्धम्।

१४। रो रि।

रेफे परे रेफस्य लोपः स्यात्। स्वाराट्। पुनारक्तम्। पुनारमते। इन्दूराजते। हे कर्त्ता राजसे। अहारम्यम्। नीरक्तम्। अग्नीरथः। कथं मनोरथः? रो रिलोपस्यासिद्धत्वाद् हशि (६।१।११४) चेत्युत्वम्। (23)

१५। खरवसानयोर्विसर्जनीयः।

रेफान्तपदस्य विसर्जनीयः स्यात् खरि अवसाने च। विप्रः कर्त्ता। विप्रः साधुः। अवसाने। वृक्षः। प्रातः। नृपतेरपत्यं नार्पत्यमिति बहुत्र-सिद्धत्वात्।

१६। रोः सुपि।

सप्तमीबहुवचने परतो रोरेव विसर्जनीयः स्यात्। पयःसु। सर्पिःषु। न रेफस्य। गीर्षु। चतुर्षु। धूर्षु।

१७। भोभगोअघोअपूर्वस्य योऽशि।

एतत्पूर्वस्य रो र्यकारः स्यादशि परे। भो अत्र भोयत्र। भो आत्मन् भोयात्मन्। भगो अत्र भगोयत्र। अघो अत्र अघोयत्र। भो ददासि। अवर्णपूर्वस्य। क आस्ते कयास्ते। कइह कयिह। नरा आसते नरायासते।

---

(23) अत्र कैयटकृतो संग्रहश्लोकः—"अपास्याः पदमध्येऽपि न चेदस्मिन् पुनारविः। तस्माद्रोरीति सूत्रेऽस्मिन् पदस्येति न बध्यते॥" इति सृष्टिधरधृतः।

एतत्पूर्वस्य किम्? वायुरत्र। रोः किम्? प्रातरत्र। प्रियचत्वारसौ। वाभ्याम्। यग्रहणमुत्तरार्थम्।

१८। व्योर्लघुप्रयत्नतरः शाकटायनस्य।

भोःभगोअघोअवर्णपूर्वयोः पदान्तयोर्व्योर्लघूच्चारणौ वा स्यादशि परे। भोयत्र। भोयिह। भोयिदम्। इन्द्रयिह। विप्रायासते। अस्मायुद्धर। कारवाया-मुष्टभम्। वटवायृथ। द्वावानय। पक्षे ईषत्स्पृष्ट एव। लोपश्च वक्ष्यत इति त्रीणि रूपाणि। ओतो नित्यं लोप इति। तत्र लघुप्रयत्नतरलोपाभ्यां रूपद्वयं सेत्स्यति।

१९। लोपः शाकल्यस्य।

तयोर्व्योः शाकल्यस्य मतेन लोपः स्यात्। क आस्ते। यस्मा उद्धर। कस्मा उद्धर। द्वा आनय। विप्रा आसते। पट आस्ते।

२०। ओतो गार्ग्यस्य।

ओतः परस्य यकारस्य लोपः स्यात्। नित्यार्थं वचनम्। (24) भो अत्र। अघो इदम्।

२१। उञि च पदे।

उञि निपाते पदान्तयोर्व्योर्लोपः स्यात्। स उ पश्यति। द्वा उ पश्यतः। लघुप्रयत्नतरपक्षे सयु पश्यति। द्वावु पश्यत इति रूपद्वयम्।

२२। हलि सर्वेषाम्।

भो भगो अघो अवर्णपूर्वयोः पदान्तयोर्व्योर्हलि परे लोपः स्यात् सर्व-सम्मतः। भो हससि। भगो ददाति। अघो यासि। विप्रा हसन्ति। वकारस्य। वृक्षं वृश्चतीति वृक्षवृट्। तमाचष्टे णिच्। ततो क्विप्। वृक्षव्। वृक्ष गच्छति। अशीत्येव। वृक्षव् करोति। पदान्तयोः किम्? गव्या। गव्यम्।

---

(24) ओतः परयोस्तयोर्व्योर्लोपः स्यात्। नित्यार्थं वचनमिति क्वचित् पुस्तकेषु पाठान्तरम्। तत्र वकारस्यासम्भवात् व्योर्ग्रहणं चिन्त्यम्। प्रकरणाद् भोभगोअघो इत्येवमोदन्ताः। गो इष्टिरित्यादौ लघुत्वाभावे न इष्ट गविष्टिरिति पूर्ववत् (८।३।१८) सिद्धम्।

२३ । मोऽनुस्वारः ।

हलि मस्यानुस्वारः स्यात् । कुण्डं हन्ति । वनं याति । पुंभ्याम् । पुंसु । पदस्येत्येव । रम्यते । गम्यते ।

२४ । नश्चापदान्तस्य झलि ।

झलि अपदान्तस्य नस्य मस्य चानुस्वारः स्यात् । पयांसि यशांसि । मंस्य । आक्रंस्यते । झलि किम् ? हन्यते । गम्यते ।

२५ । मो राजि समः क्वौ ।

क्वौ परे समो मकारस्य मकार एव स्याद् राजि परे । सम्राट् । साम्राज्यम् । राजि किम् ? संयत् । समः किम् ? स्वयंराट् । क्वौ किम् ? संराजिता ।

२६ । हे मपरे वा ।

मपरे हकारे मस्य मो वा स्यात् । किम् ह्मलयति किं ह्मलयति वा ।

(क) यवलपरे यवला वा । सानुनासिका एते स्युः । कियँ ह्यः किं ह्यः वा । किं ह्वलयति किवँ ह्वलयति वा । किलँ ह्लादयति किं ह्लादयति वा ।

२७ । नपरे नः ।

नपरे हकारे मस्य नः स्याद्वा । किन् ह्नुते किं ह्नुते वा ।

२८ । ङ्णोः कुक्टुक् शरि ।

पदान्तयो ङ्णोः कुक्टुकौ वा स्यातां शरि । "प्रत्यङ्क् शस्त्रभृतां रामः ।" "प्रत्यङ् शस्त्रभृतां रामः" वा । प्राङ्क् षष्ठे प्राङ् षष्ठे वा । वषतेर्विच् वण् । वण्श्वेते वण्ट्श्वेते वण्ट्छ्वेते वा । वण्षष्ठे वण्ट्षष्ठे वा ।

२९ । डः सि धुट् ।

डान्तात् सकारे धुड् वा स्यात् । श्वलिट्त्साये श्वलिट्साये वा ।

३० । नश्च ।

नान्तात् पदात् सकारस्य धुड् वा स्यात् । भवान्त्साधुः । भवान् साधुः वा ।

३१। शि तुक्।

ङान्तस्य शकारे तुग्वा स्यात्। भवाञ्छ्शेते भवाञ्छ्छेते भवाञ्छेते भवाञ् शेते वा। महाञ्छेते महाञ्छ्शेते महाञ्छ्छेते महाञ्शेते वा (25)। संहितायामित्येव। कुर्वन् शेते।

३२। ङमो ह्रस्वादचि ङमुण्नित्यम्।

ह्रस्वात् परस्य पदान्तस्य ङणनां ङुण्णुन्नुटः स्युरचि। उदङ्ङास्ते। सुगण्णिह। यण्णिह। कुर्वन्नत्र। ह्रस्वात् किम्? प्राङास्ते। महानयम्। पदान्तग्रहणान्नेह। भणति। दण्डिना। तिङन्तोणादिसनाद्यन्तादयस्तु निपातनात्। (26)।

३३। मय उञो वो वा।

मयः परस्याचि उञो वो वा स्यात्। निपात एकाजनाङिति (१।१।१४) प्रगृह्यत्वेन प्रकृतिभावस्य बाधा। किमु अयं किम्वयं वा।

३४। विसर्जनीयस्य सः।

स्यात्। पटुश्छात्रः। वृक्षष्षण्डे। विप्रस्साधुः। मण्डूकप्लुत्या खरीत्येव। वृक्षः।

३५। शर्परे विसर्जनीयः।

शर्परे खरि विसर्जनीय एव स्यान्न विकारः। रम्यःत्सरुकः। विप्रैः प्सातम्। वासः क्षौमम्।

३६। वा शरि।

शरि विसर्गस्य सो वा स्यात्। वृक्षश्शेते वृक्षः शेते वा। वृक्षष्षण्डे वृक्षः-षण्डे वा। वृक्षस्साधुः वृक्षः साधुः वा। विप्रस्साधुः विप्रः साधुः वा।

---

(25) अत्र शश्छोऽटीति (८।४।६३) शकारस्य पक्षे छत्वम्। तेन चातूरूप्यम्।

(26) विधिरयं न नित्यः। सनाद्यन्ता धातव (३।१।३२) उणादयो बहुलम् (३।३।१) इत्यादिसूत्रप्रयोगात्। सवन्तात्र सनिष्यत (३।१।७) इति सुप्तिङुपग्रहलिङ्गनराणामिति च (३।१।८५) भाष्यप्रयोगात्।

(क) खर्परे शरि वा लोपो विसर्गस्य। नराःस्थूलाः। नरा स्थूलाः। नरास् स्थूलाः वा। खस्थः खःस्थः खस्स्थः वा। निस्स्पृहः। निस्पृहः। निःस्पृहो वा।

३७। कुप्वोः+क≍पौ च।

कुप्वोः खरि विसर्गस्य+क≍पौ वा स्याताम्। चकारात् विसर्जनीयश्च। कपावुच्चारणार्थौ। कखयोर्डमरुत्वम्। पफयोर्गजकुम्भत्वम् (27)। विप्रः कर्त्ता। विप्र+कर्त्ता वा। रम्यः खड्गः। रम्य+खड्गो वा। विप्रः पचति विप्र≍पचति वा। शूद्रः पिबति शूद्र≍पिबति वा। वृक्षः फलति वृक्ष≍फलति वा। कपयोर्बाधामाह।

३८। सोऽपदादौ।

अपदादौ कुप्वोः खरि परतो विसर्गस्य सः स्यात्। पाशकल्पककाम्येषु सम्भवः। "रक्षसाशांस्तमस्कल्पान्।" अयस्कल्पम्। यशस्काम्यति।

(क) अनव्ययस्येति वक्तव्यम्। प्रातः कल्पम्। पुनः काम्यति।

(ख) रोरेव काम्ये। नान्यस्येति वक्तव्यम्। यशस्काम्यति। इह मा भूत्। गीःकाम्यति। धूःकाम्यति। काम्ये नियमादिह स्यादेव। अहस्कल्पमिति।

३९। इणः षः।

कुप्वोरिणः परस्यापदादौ विसर्गस्य षः स्यात्। ज्योतिष्काम्यति। सर्पिष्कल्पम्। धनुष्पाशम्। धानुष्कः। दोर्भ्यां तरति दौष्कः। अपदादौ किम्? अग्निः करोति। अग्निः कर्त्ता। कुप्वोरित्येव। तेन विप्तः (५।२।२६)। सर्पिषणः। अतः परं विसर्गस्य सः। इणः परस्य तु षः। खरि कुप्वोरिति चानुवर्त्तते।

---

(27) +क इति जिह्वामूलीयचिह्नम्। ≍प इत्युपध्मानीयचिह्नम्। प्रथमं डमरुरूपवत्। द्वितीयं गजकुम्भवदिति तात्कालिकलेखनव्यवहारः।

४० । नमस्पुरसोर्गत्योः ।

गतिसंज्ञयोर्नमस्पुरसोर्विसर्गस्य सः स्यात् । नमस्कर्ता । नमस्कारः । नमस्करोति । पुरस्कर्तुम् । पुरस्करोति । (28)

४१ । इदुदुपधस्य चाप्रत्ययस्य ।

इदुदुपधस्याप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः परतः । निर्दुर्बहिः-प्रादुराविश्चतुरां सम्भवः । निष्कुलानि । निष्कौषाति । निष्क्रायः । दुष्पीतिः । दुष्पुत्रः । दुष्पीतम् । दुष्कृतम् । बहिष्कृतम् । बहिष्पचति । बहिष्करोति । प्रादुष्कृतम् । आविष्करोति । चतुष्पानम् । चतुष्कपालम् । चतुष्पार्श्वम् । "चतुष्काण्डं क्षिपन् रामः ।" इदुदुपधस्य किम् ? दोः करोति । कथं नैष्कुल्यम् ? दौष्कुल्यम् ? इदेर्बहिरङ्गाया असिद्धत्वात् । अप्रत्ययस्य किम् ? अग्निः करोति । वायुःपाति । कथं मातुःकरोति । पितुःकरोतीति ? कस्कादिषु षत्वार्थं भ्रातुष्पुत्रशब्दस्य पाठादेकादेशनिमित्तादिणः परस्य विसर्गस्य षत्वं नास्तीति भाष्यम् ।

(क) पुंमुहुसोः प्रतिषेधः । पुंस्कामा । मुहुः करोति । मुहुःकाम्यति ।

४२ । तिरसोऽन्यतरस्याम् ।

अन्तर्धौ गतिसंज्ञकस्य तिरसो विसर्गस्य सः स्याद्वा । तिरस्कर्ता तिरः-कर्ता वा । केचिद् गतिग्रहणमिह नानुवर्त्तयन्ति । अन्तर्धेरन्यथापि तिरस्कारः परिभव इति यथा स्यात् ।

४३ । द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ।

एषां कृत्वसुजर्थवृत्तीनां षत्वं वा स्यात् । द्विष्करोति । त्रिष्पचति । चतुष्कुर्वन् । पक्षे द्विः करोति । त्रिः पचति । चतुः कुर्वन् । कृत्वोऽर्थे किम् ? चतुष्काण्डम् । चतुष्कपटकम् ।

---

(28) पुरोऽव्ययमिति (१।४।६८) पुर इत्यस्य गतित्वं न कथमनु पुरः पश्यामि देवदत्तमिति तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोरिति च कालिदासः ? पुरो रामस्य शुश्रावाश्चकार आश्रमे वधूरिति भट्टिश्च ? सत्वाभाव एव क्रियान्तरं प्रति पुरसो गतित्वात् ।

४४। इसुसोः सामर्थ्ये।

इसुसोर्व्यपेक्षायां षत्वं वा स्यात्। ज्योतिष्करोति ज्योतिः करोति वा। सर्पिष्पिबति सर्पिः पिबति वा। यजुष्कुरु यजुः कुरु वा। सामर्थ्ये किम्। तिष्ठतु सर्पिः पिब त्वमुदकम्। इह पदाधिकारेऽपि व्यपेक्षालक्षणं सामर्थ्यं न लभ्यत इति सामर्थ्यग्रहणम्। तेन पश्य इषांस्तव नदीमित्यादि सिध्यति।

४५। नित्यं समासेऽनुत्तरपदस्थस्य।

इसुसोः समासे नित्यं षत्वं स्यात्। सर्पिष्कुण्डिका। ज्योतिष्करः। धनुष्कोटी। भरुष्करः। अनुत्तरपदस्थस्य किम्? परमसर्पिःकुण्डिका।

४६। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य।

ह्रस्वाकाराद् विसर्गस्य सः स्यात् कृञादिषु परतः। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुम्भः। अयस्कुम्भी। अयस्पात्रम्। अयस्पात्री। अयस्कुशा। अयस्कर्णी। अनव्ययस्य किम्? अन्तःकरणम्। स्वःकामः। पुरःकामः। पुनःकामः। समास इत्येव। यशः कामयते। अनुत्तरपदस्थस्येत्येव। परमायःकारः (29)। अतः किम्? गीःकारः। तपरः किम्? भाःकरणम्।

४७। अधःशिरसी पदे।

अनयोर्विसर्गस्य पदे सः स्यात्। अधस्पदं यस्य निरस्तभूपतेः शिरस्पदं तस्य मतेऽङ्घ्रिपीठकमिति व्योषः।

४८। कस्कादिषु च।

एषु यथायोगं सषौ स्याताम्। कस्कः शृणोति (30)। कौतस्कुतः। यशस्काण्डम्। अयस्काण्डम्। मेदस्पिण्डः। तमस्काण्डम्। भास्करः।

---

(29) कथं तर्हि धर्म्मास्तु कामार्थयशस्करीष्विति भट्टिः? कामार्थयोर्यशस्करीष्विति विग्रहात्। अन्ये तु कामार्थयशःकरीष्वित्येव। तथा च भाष्योदाहरणं (२।४।१०) तथायस्कारमिति। लुङ्मुखस्वरोपचारा इति (१।१।४१ वा) वार्त्तिकप्रत्याख्यानावसरे चाचायःशब्दस्य भाष्ये उत्तरपदस्थत्वं दृढीकृतम्।

(30) कथं नाटकादौ कः कोऽत्र भो इति। कः कः कुत्र न घुर्घुरायितघुरो घोरो घुरेच्छूकर इति च? (वृष्टिधरकृतम्)। चकाराद् यथासम्भवं जिह्वामूलीयादिकमपि।

शुनस्कर्णः। सद्यस्कारः। गोष्पतिः। बर्हिष्कुलम्। भ्रातुष्पुत्र इत्यादि। कुप्वोः ख्परीति निवृत्तम्। इह च्छन्दःषट्सूत्री (31)। पूर्वः पदाधिकारः।

५५। अपदान्तस्य मूर्धन्यः।

अधिकारोऽयमा पादपरिसमाप्तेः।

५६। सहेः साडः सः।

सहेः साड्भूतस्य सस्य मूर्धन्यः स्यात्। तुराषाट्। तुराषाड्भ्याम्। साडः किम्? तुरासाहौ। "तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः।" छान्दसोऽयं प्रयोगः। छन्दसि सहः (३।२।६३) इति ण्वे विधानात्। कथं तर्हि पृतनाषाड् दिवो भुर्व्विति भट्टिः? छान्दसैरपि संज्ञाशब्दैः कवीनां प्रचारात्।

५७। इण्कोः।

इणः कवर्गाच्च परस्य सस्य मूर्धन्यः स्यात्।

५८। नुम्विसर्जनीयशर्व्यवायेऽपि।

नुमादिव्यवायेऽपि मूर्धन्यः स्यात्।

५९। आदेशप्रत्यययोः।

आदेशो यः सकारः प्रत्ययावयवश्च तस्य मूर्धन्यः स्यात्। आदेशस्य। सिषेच। सुष्वाप। प्रत्ययस्य। अग्निषु। वायुषु। भूषु। कर्त्तृषु। केषाम्। गोषु। नौषु। गीर्षु। धूर्षु। कवर्गात्। अपाक्षीत्। धोक्ष्यति। शिड्क्षु। नुमादिव्यवायेऽपि। सर्पींषि। सर्पिःषु। प्रत्येकव्यवायेऽभ्युपगमाच्चेह। निंस्से।

---

(31) यथा—

४९। छन्दसि वाऽप्राम्रेडितयोः। ५०। कःकरत्करतिकृधिकृतेष्वनदितेः।

५१। पञ्चम्याः परावध्यर्थे। ५२। पातौ च बहुलम्।

५३। षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु। ५४। इडाया वा।

नुमा च नुम्स्थानिकानुस्वारोपलक्षणामेह । पुंसु । अपदान्तस्येत्येव । अग्निस्तत्र । इण्कोरित्येव । दास्यति । श्रेयांसि । पयःसु ।

६० । शासिवसिघसीनाञ्च ।

इण्कोरुत्तरस्य एषां सस्य मूर्धन्यः स्यात् । शिष्टः । अन्वशिषत् । उषितः । जक्षतुः । इण्कोरित्येव । शास्ति । वसति । जघास ।

६१ । स्तौतिण्योरेव षण्यभ्यासात् ।

स्तौतेर्ण्यन्तानाञ्च षत्वभूते सनि परतोऽभ्यासादिणः परस्य मूर्धन्यः स्यात् । तुष्टूषति । ण्यन्तानाम् । सिषञ्जयिषति । सिषेचयिषति । नियमः किम् ? सिसिक्षति । सुसूषति । षणीति निर्देशः किम् ? इह नियमो मा भूत् । सुषुप्सति । तिष्ठासति । अभ्यासात् किम् ? प्रतीषिषति ।

६२ । सः स्विदिस्वदिसहीनाञ्च ।

एषां ण्यन्तानां मूर्धन्यापवादः सः स्यात् । सिस्वेदयिषति । सिस्वादयिषति । सिसाहयिषति ।

६३ । प्राक् सितादड्व्यवायेऽपि ।

सितशब्दात् (८।३।७०) प्रागड्व्यवायेऽपि मूर्धन्यः स्यात् । अभिषुणोति । अभ्यषुणोत् ।

६४ । स्थादिष्वभ्यासेन चाभ्यासस्य ।

स्थासेनयादिषु (८।३।७५) प्राक् सितादभ्यासेनापि (८।३।७०) व्यवाये मूर्धन्यः स्यात् । अभ्यासस्य च । अभितष्ठौ । अभिषिषेणयिषति । परिषिषिक्षति ।

६५ । उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ।

प्रादिस्थनिमित्तादिणः परेषां सुनोत्यादीनामेकादशानां सस्य मूर्धन्य स्यात् । अभिषुणोति । अभ्यषुणोत् । अभिषुवति । अभ्यषुवत् । अधिष्ठास्यति । अध्यष्ठात् । परितष्ठौ । अभिषिञ्चति । व्यतिषजति । परिष्वजते ।

इण्कोरित्येव । प्रस्तौति । प्रसिच्यति । सेधते: शपा निर्देशादेव । अभिसिध्यति । कथं सुस्थो दु:स्थ इति ? उपसर्गप्रतिरूपकाभ्याम् ।

६६ । सदिरप्रते: ।

उपसर्गात् सदि: षत्वं भजते । निषीदति । निषाद: । अप्रते: किम् ? प्रतिसीदति ।

६७ । स्तन्भे: ।

स्तम्भे: सस्य षत्वं स्यात् । अभिष्टभ्नाति । अभ्यष्टभ्नात् । व्यष्टभ्नात् ।

६८ । अवाच्चालम्बनाविदूर्य्ययो: ।

अनयोरवात् स्तम्भे: षत्वं स्यात् । आलम्बने । अवष्टभ्य दण्डं स्थित: । आविदूर्य्ये । अवष्टब्धो वृषस्य विनाश: । आलम्बनाविदूर्य्ययो: किम् ? अवस्तब्धो वृषल: शीतेन ।

६९ । वेश्च स्वनो भोजने ।

अत्र वेरवाच्च स्वन: षत्वं स्यात् । विष्वणति नर: । क्रोष्टा डिम्बं व्यष्वणत् । विषष्वाण । अवष्वणति । विष्वण: । नशब्दभोजनादन्यत्र विस्वनति ढक्का । अवस्वनति ढक्का ।

७० । परिनिविभ्य: सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ।

परिनिविभ्य: सेवादीनां षत्वं स्यात् । परिषेवते । परिषेवणम् । निषेवणम् । व्यषेवत । परिषिषेविषते । गता: प्राक्सितीया: । परिषित: । विषय: । परिषीव्यति । परिषहते । परिष्करोति । परिष्कार: । स्तुस्वञ्जी चोत्तरार्थौ ।

७१ । सिवादीनां वाड्व्यवायेऽपि ।

उक्तानां सिवुसहादीनामड्व्यवायेऽपि सस्य षत्वं वा स्यात् । पर्य्यषीव्यत् पर्य्यसीव्यत् वा । व्यषहत व्यसहत वा । पर्य्यषहत पर्य्यसहत वा । पर्य्यष्करोत् पर्य्यस्करोत् वा । न्यष्टौत् न्यस्तौत् वा । व्यष्टौत् व्यस्तौत् वा । पर्य्यष्वजत पर्य्यस्वजत वा ।

७२ । अनुविपर्य्यभिनिभ्यः स्यन्दतेरप्राणिषु ।

एभ्यःस्यन्दतेः षत्वं वा स्यादप्राणिषु । विष्यन्दते विस्यन्दते वा तैलम् । अप्राणिषु किम् ? अनुस्यन्दते मत्स्य उदके ।

७३ । वेः स्कन्देरनिष्ठायाम् ।

वेःस्कन्देः षत्वं वा स्यात् । विष्कन्ता विस्कन्ता वा । अनिष्ठायां किम् ? विस्कन्नः । विस्कन्नवान् ।

७४ । परेश्च ।

परेः स्कन्देः षत्वं वा स्यात् । निष्ठार्थोऽयं योगः । परिष्कन्ता परिस्कन्ता वा । परिष्कण्णः परिस्कन्नः वा ।

७५ । परिस्कन्दः प्राच्यभरतेषु ।

मूर्धन्याभावो निपात्यते पचाद्यचि ।

७६ । स्फुरतिस्फुलत्योर्निर्निविभ्यः ।

एभ्यः स्फुरतिस्फुलत्योः षत्वं वा स्यात् । निःष्फुरति निःस्फुरति वा । निष्फुलति निस्फुलति वा । विष्फुलः विस्फुलः वा ।

७७ । वेः स्कभ्नातेर्नित्यम् ।

अस्य नित्यं षत्वं स्यात् । विष्कभ्नाति । विष्कम्भितुम् । विष्कम्भः ।

७८ । इणः षीध्वंलुङ्लिटांधोऽङ्गात् ।

इणन्तादङ्गात् षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात् । च्योषीढ्वम् । प्लोषीढ्वम् । अच्योढ्वम् । चकृढ्वे । ववृढ्वे । इण्कोरित्यनुवृत्ताविण्ग्रहणं कोर्निवृत्त्यर्थम् । यक्षीध्वम् । पक्षीध्वम् । अङ्गात् किम् ? परिवेविषीध्वम् । एषां किम् ? अस्तुध्वम् ।

७९ । विभाषेटः ।

इणन्तरो विधिरिटः परेषां तेषां वा स्यात् । लविषीध्वं लविषीढ्वं वा । चिण्वदिटोऽपि । कारिषीध्वं कारिषीढ्वं वा । लुङ् । अग्रहीध्वम् । अग्रहीढ्वं

वा। अलविध्वम्। अलविढ्वं वा। लिट्। जगृहिध्वे जगृहिढ्वे वा। अङ्गादिति निवृत्तम्। तेनेहापि स्यात्। दीङो युड्चि (६।४।६३)। उपदिदीयिध्वे। उपदिदीयिढ्वे वा। इण इत्येव। शोभिषीध्वम्। अशोभिध्वम्। शुशुभिध्वे।

८०। समासेऽङ्गुलेः सङ्गः।

अङ्गुलेः सङ्गो मूर्धन्यं भजते। अङ्गुलिषङ्गा यवागूः। वाक्ये तु। अङ्गुलेः सङ्गं पश्य। समासे विधिरितः सप्तसूत्र्याम्।

८१। भीरोः स्थानम्।

भीरोः परस्य स्थानस्य षत्वं स्यात्। भीरुष्ठानम्।

८२। अग्नेः स्तुत्स्तोमसोमाः।

अग्नेः परेषां स्तुदादीनां षत्वं स्यात्। अग्निष्टुत्। अग्निष्टोमः। "अग्नीषोमच्छायया त्वं परीतस्तापाभ्रादौ गत्वरमितेषु कुर्वन्।" इत्यादिदीर्घादिषयम्। इह तु न भवति। अग्निसोमौ माणवकौ।

८३। ज्योतिरायुषः स्तोमः।

ज्योतिरायुर्भ्यां स्तोमस्य षत्वं स्यात्। ज्योतिष्टोमः। आयुष्टोमः।

८४। मातृपितृभ्यां स्वसा।

आभ्यां स्वसुः षत्वं स्यात्। मातृष्वसा। पितृष्वसा।

८५। मातुः पितुर्भ्यामन्यतरस्याम्।

आभ्यां स्वसुः षत्वं वा स्यात्। मातुःष्वसा मातुःस्वसा वा। पितुःष्वसा पितुःस्वसा वा। अलुक्समासोऽयम्। वाक्ये तु मातुः स्वसेत्येव।

८६। अभिनिसस्तनः शब्दसंज्ञायाम्।

अभिनिसः स्तनतेः षत्वं स्यात्। अभिनिष्टानः। विसर्जनीयस्य संज्ञा। अन्यत्र। अभिनिस्तनति मृदङ्गः। समास इति निवृत्तम्।

८७। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः।

आभ्यां परस्यास्तिसकारस्य षत्वं स्याद् यकारपरस्याच्परस्य च।

अभिष्यात् । प्रादुःष्यात् । अभिषन्ति । प्रादुःषन्ति । यच्परस्य किम् ? अभिस्तः ।

८८ । सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।

एभ्यः सुप्यादीनां सस्य षत्वं स्यात् । सुषुप्तः । दुःषुप्तः । सुषूतिः । विषूतिः । दुःषूतिः । "तस्य क्षत्रियदुःषूतेः" । सुषमम् । निःषमम् । विषमम् । एभ्यः किम् ? अभिसुप्तः । सुपीति निर्देशः किम् ? सुस्वपिति ।

८९ । निनदीभ्यां स्नातेः कौशले ।

आभ्यां स्नातेः कौशलगतौ षत्वं स्यात् । निष्णातः शास्त्रे । नदीष्णः । नदीश इत्यर्थः । कौशले किम् । नदीस्नातः ।

९० । सूत्रं प्रतिष्णातम् ।

प्रतिस्नातमन्यत्र ।

९१ । कपिष्ठलो गोत्रे ।

कपिस्थलमन्यत् । गोत्रमिहादिपुरुषः ।

९२ । प्रष्ठोऽग्रगामिनि ।

प्रस्थोऽन्यत्र ।

९३ । वृक्षासनयोर्विष्टरः ।

विस्तरोऽन्यत्र ।

९४ । छन्दोनाम्नि च ।

छन्दोनाम्नि विस्तृणातेः षत्वं स्यात् । घञ् । विष्टारपङ्क्तिर्नाम छन्दः ।

९५ । गवियुधिभ्यां स्थिरः ।

आभ्यां स्थिरस्य षत्वं स्यात् । गविष्ठिरः । युधिष्ठिरः । अतएव निपातनात् सप्तम्यलुक् ।

९६ । विकुशमिपरिभ्यः स्थलम् ।

एभ्यः स्थलस्य षत्वं स्यात् । विष्ठलम् । कुष्ठलम् । "शमीनां कुष्ठले" ।

शमिष्ठलम् । शमीति ङ्यापोः संज्ञाछन्दसोर्बहुलमिति (६।३।६३) ह्रस्वः । परिष्ठलम् ।

९७ । अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ।

एभ्यः परस्य स्थस्य षत्वं स्यात् । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्यष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शङ्कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः । स्थ इति स्वरूपग्रहणान्नेह । गोस्थानम् । कथं सव्येष्ठा सव्येष्ठरौ परमेष्ठीति ? औणादिका एते सुषामादिषु विज्ञेयाः ।

९८ । सुषामादिषु च ।

एषु षत्वं स्यात् । सुषामा । "सुषाम्णी सर्वतेजःसु ।" निःषामा । सुषेधः । निषेधः । सुषन्धिः । अपष्ठु । सुष्ठु । दुष्ठु । उपष्टम्भ इत्येके ।

९९ । एति संज्ञायामगात् ।

हरिषेणः । एकारे किम् ? हरिसिंहः । संज्ञायां किम् ? पृथुसेनो राजा । अगः किम् ? विष्वक्सेनः । इण्कोरित्येव । सर्वसेनः ।

१०० । नक्षत्राद्वा । (32)

संज्ञायां नक्षत्रात् परस्य सस्य षत्वं वा स्यात् । रोहिणिषेणः । रोहिणिसेनो वा । एवं यथादर्शनं सुषामादयः ।

१०१ । ह्रस्वात् तादौ तद्धिते ।

ह्रस्वात् परस्य सस्य षत्वं स्यात् तादौ तद्धिते । सर्पिष्टरम् । सर्पिष्टमम् । यजुष्टमम् । वपुष्टमम् । दीर्घायुष्टम् । चतुष्टयम् । सर्पिष्टा । तादौ किम् ? सर्पिस्सात् भवति । ह्रस्वात् किम् ? गीस्तराम् ।

(क) तिङन्तस्य प्रतिषेधो वक्तव्यः । भिन्द्युस्तराम् ।

---

(32) In some MSS. the reading is इदन्तात् नक्षत्रात् परस्य सस्य षत्वं स्यात् । इतः किम् ? पुनर्वसुसेनः ।

१०२ । निसस्तपतावनासेवने ।

तपतौ निसः षत्वं स्यात् सकृत् करणे । निष्टपति । निष्टापः । निष्टपनम् । सकृत् करणे किम् ? निस्तपति सुवर्णं सुवर्णकारः । पुनः पुनरग्निं स्पर्शयतीत्यर्थः । इत्यष्टौ सूत्राणि छान्दसानि । (33)

१११ । सात्पदाद्योः ।

नेत्येव । अनयोः षत्वं नास्ति । अग्निसात् । मधुसात् । साधुसात् । पदादेः । दधि सिञ्चति । मधु सिञ्चति । व्यतिसे । विस्फोटः ।

११२ । सिचो यङि ।

यङि सिचः षत्वं नास्ति । सेसिच्यते । उपसर्गात् सुनोतीत्यादिनापि (८।३।६५) यङि बाध्यते । "कुर्वाणां परिसेसिचाम् ।" यङि किम् ? अभिषिषिक्षति ।

११३ । सेधतेर्गतौ ।

अस्मात् षत्वं नास्ति । अभिसेधति । गतौ किम् ? प्रतिषेधति ।

११४ । प्रतिस्तब्धनिस्तब्धौ च ।

इमौ निपात्येते । प्रतिस्तब्धो विक्रान्तः । निस्तब्धः । निर्पूर्वस्य तु । निष्टब्धश्छात्रः ।

११५ । सोढः ।

सोढरूपस्य परिनिविभ्यः षत्वं नास्ति । परिसोढुम् । परिसोढः । परिसोढा । निसोढव्यः । निसोढः । विसोढा । सोढ इति निर्देशः किम् ? विषहते ।

---

(33) यथा—

१०३ । युष्मत्तत्ततक्षुःष्वन्तःपादम् । १०४ । यजुष्येकेषाम् । १०५ । स्तुतस्तोमयोश्छन्दसि ।
१०६ । पूर्वपदात् । १०७ । सुञः । १०८ । सनोतेरनः । १०९ । सहेः पृतनर्ताभ्यां च ।
११० । न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ।

११६। स्तम्भुसिवुसहां चङि।

एषां चङि षत्वं नास्ति। पर्य्यतस्तम्भत्। पर्य्यसीषिवत्। पर्य्यसीषहत्। व्यसीषहत्। कथं परस्य षत्वम् ? उपसर्गादिति वक्तव्यम्। तेनोपसर्गादिति प्राप्तिर्निषिध्यते। नाभ्यासात्।

११७। सुनोतेः स्यसनोः।

सुनोतेः स्ये सनि च षत्वं नास्ति। परिसोष्यति। सन्नन्तात् क्विप्। अभिसुसूः। स्यसनोः किम् ? अभिसुषाव। परिसुषाव।

११८। सदिस्वञ्जोः परस्य लिटि।

अनयोर्लिटि परस्य सकारस्य षत्वं नास्ति। विषसाद। परिषस्वजे। संयोगादपि लिटो विभाषा कित्त्वमिच्छन्तीति वामनवृत्तिः। तेन पक्षेऽनुषङ्ग लोपात् परिषस्वज इति (34) सिद्धम्।

११९। निव्यभिभ्योऽड्व्यवाये वा छन्दसि।

छान्दसम्।

इति महामहोपाध्याय[illegible]

अष्टमाध्यायस्य तृतीयः पादः। ८।३॥

सकारस्य सप्तपादः॥

(34) अत सदेः परस्य लिटीत्यपाठ [illegible]। परिषस्वज इति भाष्योदाहरणात् स्वञ्जे लिटि [illegible]। [illegible] परिषस्वजे [illegible]। [illegible] दयितया हृदयेश इति भारविः। [illegible] इति माघस्य। [illegible] कथं मिथुनौ परिषस्वजाते इति [illegible] च प्रयोगः। तमिन्दुः परिषस्वज इति च।

अथ

भाषावृत्तिः।

अष्टमोऽध्यायः। चतुर्थः पादः।

१। रषाभ्यां नो णः समानपदे।

रषाभ्यां परस्य नस्य णत्वं स्यात् समानपदे। विस्तीर्णम्। पुष्णाति। कुष्णाति। समानपदे किम्? वार्निधिः। पितृनाम।

(क) ऋवर्णाच्च। तिसृणाम्। चतसृणाम्। मातॄणाम्। पितॄणाम्।

२। अट्कुप्वाङ्नुम्व्यवायेऽपि।

समानपदेऽड़ादिव्यवायेऽपि रषऋभ्यो नस्य णत्वं स्यात्। करणम्। हरणम्। उरःकेण। म्लङ्गाति। वृक्णः। रोषणः। भूषणम्। वृषेण। मूर्खेण। अर्केण। दर्पेण। गर्भेण। प्राह्णः। पर्य्याणयति। नुमनुस्वारोपलक्षणार्थम्। बृंहणम्। बृंहणीयम्। तृंहणम्। तृंहणीयम्। अड़ादिव्यवाये किम्? चटुतुलशर्व्यवाये मा भूत्। रोचनम्। दर्शनम्। कपर्दकेन। एकपद इत्येव। अग्निरानीयताम्। अड़ादिव्यवायो यावण्णत्वमनुवर्त्तते।

३। पूर्व्वपदात् संज्ञायामगः।

पूर्वपदस्थरषऋभ्यः परस्य नस्य णत्वं स्यात् संज्ञा चेत्। खरणसः। शूर्पणखा। नारायणः। संज्ञायां किम्? दीर्घनयना स्त्री। कथमग्रणीः? ग्रामणि कुलमिति? अग्रग्रामाभ्याञ्चेत्युपसंख्यानात्। अगः किम्? (35) ऋगयनम्। अड़ादिव्यवाय इत्येव। चर्मनसः। अतःपरं पूर्वपदस्थरषऋभ्यो विधिः।

---

(35) अग इति पूर्वपदाद्विशेषणम्। पूर्वपदस्थेन गकारेण नकारस्य व्यवधाननिषेधः। तेन ग्रहणं ज्योतिरित्यत्र इत्यादौ णत्वं भवत्येव। ऋगयनं शब्दस्य तत्र इत्यादौ तु न।

४। वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः।

एभ्यो वननकारस्य संज्ञायां णत्वं स्यात्। पुरगावणम्। मिश्रकावणम्। सिध्रकावणम्। शारिकावणम्। कोटरावणम्। अग्रेवणम्। पूर्वेण सिद्धे नियमान्नेह। इन्द्रवनम्।

५। प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि।

एभ्यो वनस्य संज्ञायामसंज्ञायामपि नस्य णः स्यात्। प्रकृष्टं वनं प्रवणम्। निर्गतो वनान्निर्वणम्। अन्तर्वणम्। शरवणम्। इक्षुवणम्। प्लक्षवणम्। आम्रवणम्। कार्ष्यवणम्। खदिरवणम्। पीयूक्षावणम्।

६। विभाषौषधिवनस्पतिभ्यः।

एभ्यो वनस्य णत्वं वा स्यात्। ओषधेः। दूर्वावणं दूर्वावनं वा। वनस्पतिरिह वृक्षमात्रं गृह्यते। व्याप्तेः। शिरीषवणं शिरीषवनं वा। गम्भारीवणम्। गम्भारीवनं वा। व्यवस्थितविभाषया नेह। इरिकावनम्। तिमिरावनम्। द्व्यक्षरत्र्यक्षरेभ्योऽभिधानान्नेह। देवदारुवनम्। सहकारवनम्। अड़ादिव्यवाय इत्येव। न्यग्रोधवनम्।

७। अह्नोऽदन्तात्।

अदन्तादह्नो नस्य णत्वं स्यात् (36)। पूर्वाह्णः। अपराह्णः। अदन्तात् किम्? निरह्नः।

८। वाहनमाहितात्।

वोढव्याद्वाहनस्य नो णः स्यात्। दर्भवाहणो बटुः। इक्षुवाहणो गौः।

---

(36) अत्राप्यदन्तपूर्वपदस्थाभ्यां रषाभ्यामित्यह्नो नस्य णत्वम्। सर्वाह्णः। सर्वे अहःसु भव इति विग्रहे कालाट् ठञ् (४।३।११)। द्विगोर्लुगनपत्ये इति (४।१।८८) ठञो लुक्। सर्वाह्णप्रियः। तद्धितार्थेत्यादिना (२।१।५१) समासः। सर्वम् अहानि जातस्य यस्य स सर्वाह्णजातः। कालाः परिमाणिनेति (२।२।५) समासः। उत्तरपदेन परिमाणिना द्विगोः समासवचनमित्युपसंख्यानात् (२।१।५१, वार्तिक) त्रिपदि तत्पुरुषः। तपरकरणादिह च न। परागत अहः पराह्णः। यदा तु परशब्देन समासः तदा पराह्णः। दीर्घाह्नी प्रावृडित्यत्र तु क्षुभ्नादित्वान्न णत्वमित्याहुः।

तार्क्ष्यवाहनः। वाहितात् किम्? गर्गसम्बन्धि वाहनं गर्गवाहनम्। यदा तु गर्ग एव वोढव्यस्तदा गर्गवाहणमिति। (37)

९। पानं देशे।

पूर्वपदस्थेभ्यो रषऋभ्यः परस्य पानणकारस्य णत्वं स्याद् देशे। पीयत इति पानम्। सुरापाणाः प्राच्याः। "सक्तुपाणाविषयं तूर्णम्।" देशे किम्? सुरापानो मनुष्यः।

१०। वा भावकरणयोः।

भावे करणे च पानणकारस्य णत्वं वा स्यात्। पीयूषपाणं पीयूषपानं वा। कषायपाणं कषायपानं वा। सुरापाणं वर्त्तते सुरापानं वा। करणे क्षीरपाणः कंसः क्षीरपानो वा। कथं निष्पानं दुष्पानमिति? षात् पदान्तादिति (८।४।३५) निषेधात्।

(वा) गिरिनद्यादीनामुपसंख्यानम्। गिरिणदी गिरिनदी वा। स्वर्णदी स्वर्नदी वा।

११। प्रातिपदिकान्तनुम्विभक्तिषु च।

एषु नस्य णत्वं वा स्यात्। प्रातिपदिकान्ते। माषवापिणौ माषवापिनौ वा। व्रीहिवापिणौ व्रीहिवापिनौ वा। नुम्। माषवापाणि माषवापानि वा। व्रीहिवापाणि व्रीहिवापानि वा। विभक्तौ। परमाह्णा परमाह्ना वा। कथं प्रपक्वानि? क्षत्रिययूनेति? क्षुभ्नादित्वात् (38)। यङादिव्यवाय इत्येव। गर्दभवाहिनौ।

१२। एकाजुत्तरपदे णः।

एकाजुत्तरपदेषु तेषु नो नित्यं णः स्यात्। वृत्रहणौ। क्षीरपाणि। क्षीरपेण। यङादिव्यवाय इत्येव। व्रीहिजानि। णग्रहणं नित्यार्थम्।

---

(37) कुबेरं नागेन्द्रमिवेन्द्रवाहनमिति माघः। पक्षे धनदस्य नरवाहनसम्पद इति रघुकाव्ये। नरवाहनः कुबेरः।

(38) अत्र—"क्षुभ्नादीनां प्रतिषेधः।" इति वार्त्तिकं च वर्त्तते।

१३। कुमति च।

कवर्गवदुत्तरपदे तेषु नो नित्यं णः स्यात्। नगरवर्केण। नगरकाकेण। दृषमक्षेण। दृषमुक्षेण। हकमुक्षेण। युजाक्रीडेति (३।२।१४२) घिनुण्। वस्त्रयोगिणौ। पुष्पयोगिणः। पुष्पयुगाणि। वृषभयुगाणि। सर्वाङ्गाणि। वृषयुगीण। वर्षभोग्येण। मूर्खौघेण। अट्कादिव्यवाये किम्? व्रीहित्यागिनः। कथं शास्त्रवाक्यानि कुवमुख्यानाम् प्रष्ठोऽग्रगामिनि छायगामिना चन्द्रगोमि-नेति? क्षुभ्नादित्वात् (८।४।३९)। (39)

१४। उपसर्गादसमासेऽपि णोपदेशस्य।

असमासे समासे च प्रादिस्थरषऋभ्यो धातोर्नस्य णत्वं स्यात्। प्रणमति। प्रणिनीषति। प्रणायकः। निर्णयः। णोपदेशस्य किम्? प्रनर्दति। कथं दुर्नयः? क्षुभ्नादित्वात्। (40) अतःपरमुपसर्गस्थरषऋभ्यो विधिः।

---

(39) "प्रष्ठोऽग्रगामिनीति (८।१।१२) सूत्रनिर्देशादेव कुमति चेत्यनित्यमिति कैयटः। एवञ्च बनाम कुवमुख्यानां नगरं नावसायमिति भारतप्रयोगे ते णत्वं नित्यमर्थमिति न्यूढिचरः। The author holds here छायगामिना as with the dental न, but the काशिकाकार gives छायगामिणा with the cerebral. So what is the guarantee that the classical authors are all of one view regarding the णत्व in such words as शास्त्रवाक्याणि &cc? As to the णत्व in अग्रगामिनि, we quote here our remarks made in our edition of the न्यास viz:—"There is some controversy regarding णत्व in the word अग्रगामिनि। काशिका gives अग्रगामिणी as an illustration of कुमति च (8. 4. 13). My MSS.—(the Bengali one is of 1715 saka)—also spell अग्रगामिणि here with the cerebral ण। In the MSS. of the प्रक्रियाकौमुदी about 500 years old, the cerebral ण is found in the word. On the other hand मैत्रेय रक्षित asserts that प्रष्ठोऽग्रगामिनि had been given with the dental न by the सूत्रकार. In annotating the वार्त्तिक, युवादीनां प्रतिषेधः, says he in his तन्त्रप्रदीप on the Rule प्रातिपदिकान्तनुम्विभक्तिषु च (8. 4. 11), that युवादीनां प्रतिषेधो वक्तव्य इत्येतस्य णत्व-प्रतिषेधे प्रष्ठोऽग्रगामिनीत्येवमादयो निर्देशाः प्रमाणम्।' So there is at least one classical पाणिनीय grammarian who vouches for the dental न in the word अग्रगामिनि। But others maintain नानार्थोपिविरचौति and therefore they allow the Rule कुमति च (8. 4. 13) to prevail". So all such words as शास्त्रवाक्याणि, कुवमुख्याणाम्, अग्रगामिणि, छायगामिणा, चन्द्रगोमिणा, &cc. have the cerebral ण according to this view.

(40) दुरः णत्वसम्बन्धोपसर्गत्वप्रतिषेधो गमश्च (१।४।६०, वा) इत्यनेनैवात्र णत्वनिरास इत्यर्थे।

१५ । हिनुमीना ।

अनयोर्नस्य णत्वं स्यात् । प्रहिणोति । प्रहिणुतः । प्रमीणाति । प्रमीणीतः ।

१६ । आनि लोट् ।

लोडानिनकारस्य णत्वं स्यात् । प्रवपाणि । परिवपाणि । अड़ादि-व्यवाय इत्येव । प्रददानि । आनीति किम् ? प्रवपन्तु । लोटः किम् ? प्रवपाणि मांसानि ।

१७ । नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्राति-प्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ।

एषु नेर्णत्वं स्यात् । प्रणिगदति । अड़ादिव्यवाय इत्येव । प्रण्यगदत् । घु । प्रणिदाता । प्रणिधाता । मेति माङ्मेङोर्ग्रहणम् । प्रणिमिमीते । प्रणिमयते । एवं यावत् प्रणिदेग्धि ।

१८ । शेषे विभाषाऽकखादावषान्त उपदेशे ।

धातुपाठे अकखादौ धातौ अषान्ते च ने र्णो वा स्यात् । प्रणिपक्ता प्रनिपक्ता वा । प्रणिजानाति प्रनिजानाति वा । शेषे किम् ? गदादिषु मा भूत् । प्रणिगदति । प्रणिगदनम् । अकखादौ किम् ? प्रनिकर्त्ता । प्रनिखा-दति । अषान्ते किम् ? प्रनिपिनष्टि । प्रनिपेक्ष्यति । उपदेशे किम् ? प्रणिवेष्टा प्रनिवेष्टा वा । इह मा भूत् । प्रनिचकार । प्रनिचखाद । प्रनिपेक्ष्यति ।

१९ । अनितेः ।

अनितेर्नस्य णत्वं स्यात् । प्राणिति ।

२० । अन्तः ।

अनितेरन्तभूतस्यापि नस्य णत्वं स्यात् । क्विप् । हे प्राण् । केशववृत्तौ तु विकल्प उक्तः । हे प्रान् हे प्राण् वा ।

२१ । उभौ साभ्यासस्य ।

साभ्यासस्यानितेरुभौ नकारौ णौ स्याताम् । प्राणिणिषति ।

२२। हन्तेरत्पूर्वस्य।

हन्तेर्नो णत्वं स्यात्। प्रहण्यते। परिहण्यते। प्रहणनम्। अत्पूर्वस्य किम्? प्रघ्नन्ति। तपरः किम्? प्राघानि।

२३। वमोर्वा।

वमयोः परतो हन्तेर्नकारस्य णत्वं वा स्यात्। प्रहण्वः प्रहन्वो वा। प्रहण्मः प्रहन्मः वा।

२४। अन्तरदेशे।

अदेशे अन्तःशब्दाद्धन्तेर्नकारस्य णत्वं स्यात्। अन्तर्हणनम्। अन्तर्हण्यते। कथमन्तर्हन्ता? णत्वेऽनुस्वारपरसवर्णस्यासिद्धत्वात् कुर्वन्तिवत्। अदेशे किम्? अन्तर्हननो देशः।

२५। अयनञ्च।

अन्तःशब्दादुत्तरस्यादेशेऽयनस्य नो णत्वं स्यात्। अन्तरयणं वर्त्तते। अदेशे किम्? अन्तरयनो देशः। इह।

२६। छन्दस्यृदवग्रहात्।

२७। नश्च धातुस्थोरुषुभ्यः।

छन्दःसूत्रद्वयम्।

२८। उपसर्गाद्बहुलम्।

उपसर्गात् परस्य नःशब्दस्य नो णत्वं स्यात्। प्रणसम् मुखम्। परिणसम् मुखम्। बहुलग्रहणं छन्दोभागार्थम्।

२९। कृत्यचः।

उपसर्गस्थान्निमित्तात् कृत्स्थस्याचः परस्य नस्य णत्वं स्यात्। अनमानानीयानीनिनिनिष्ठादेशेषु सम्भवः। प्रयाणम्। प्रमाणम्। प्रयायमाणम्। प्रयाणीयम्। अप्रयाणिः। प्रयायिणौ। प्रहाणिः। परिहाणिः। प्रक्षीणः। निर्वाणम्। कथं प्रख्यानम् पर्य्याख्यानम्? कार्य्योऽत्र यत्नः। अथवा कृत्यादि-

त्वात् (41)। अचः किम्? प्रमग्नः। उपसर्गादित्येव। नरयानम्। अड़ादि-व्यवाय इत्येव। प्रयोजनम्। प्रतियानम्। प्रदानम्। प्रधानम्। प्रेन्वनम्। कथं निर्विण्ण इति? उपसंख्यानात्।

३०। णेर्विभाषा।

ण्यन्तात् कृत्यच इति (८।४।२९) प्राप्तिर्वा स्यात्। प्रयापणं प्रयापनं वा। प्रहापणीयं प्रहापनीयं वा।

३१। हलश्चेजुपधात्।

हलादेरिजुपधाद् विहितस्य कृत्यच इति (८।४।२९) प्राप्ति र्वा स्यात्। प्रगोपणं प्रगोपनं वा। निगूहणं निगूहनं वा।

३२। इजादेः सनुमः।

कृत्यच इति (८।४।२९) णत्वं सनुमो हलन्ताद् यदि स्यात् तदिजादेरेव। प्रेङ्खणम्। परीङ्खणम्। प्रेङ्गणम्। नुमोऽनुस्वारमात्रोपलक्षणात् प्रोम्भणम्। इजादेः किम्? प्रमङ्गनम्।

३३। वा निंसनिक्षनिन्दाम्।

प्रादिस्थनिमित्तादेषां नो णत्वं स्याद्वा। णोपदेशप्राप्तेर्विकल्पः। प्रणिंसे प्रनिंसे वा। प्रणिक्षकः प्रनिक्षकः वा। प्रणिन्दति प्रनिन्दति वा। (42)

३४। न भाभूपूकमिगमिप्यायिवेपाम्।

प्रादिस्थनिमित्तादेषां कृत्यच (८।४।२९) इति णत्वं नास्ति। प्रभानम्। प्रभानीयम्। प्रभवनम्। प्रपवनम् (43)। प्रकमनम्। प्रगमनम्। प्रप्यायनम्। प्रवेपनम्।

---

(41) एतत्तु कात्यायनेनैव कृतः। तथाहि पठितः [illegible] (२।४.५४) वार्त्तिकेषु पठितं [illegible] णत्वं विभाषेति णत्वं पर्याख्यान इति द्वे वार्त्तिके। एवं हि तदर्थः। [illegible] वचनं कर्त्तव्यम्। तेन [illegible] णत्वम्। विस्तरस्तु ग्रन्थान्तरादवबोध्यः।

(42) अत्र आपभट्टोजिप्रभृतयस्तु कृत्येवार्थं विकल्प इति मन्यन्ते। तेषां तु नित्यं णत्वम्।

(43) अत्र "भादिषु पूञ् ग्रहण"मिति वार्त्तिकम्। तेन पूञो न। पूङस्तु भवत्येव णत्वम्। प्रपवणीयः सोमः। प्रपवणं सोमस्य।

(क) ण्यन्तानां भादीनामुपसंख्यानं कर्त्तव्यम्। प्रभापनम्। प्रभापनीयम्। कृत्यच इति (८।४।२९) प्राप्तेर्निषेधार्थमेव। प्रभवाणि। प्रभाणि। आनि लोडिति (८।४।१६) णत्वम्। उक्तमुपसर्गात्।

३५। षात् पदान्तात्।

नस्य पदान्तात् षकारात्णत्वं नास्ति। सर्पिष्पानम्। यजुष्पानम्। दुष्पानम्। दुष्पीयमानम्। निष्पीयमानम्। दुष्खेन। षादिति किम्? निर्णयः। दुर्णयः। (44)

३६। नशेः षान्तस्य।

णत्वं नास्ति। प्रनष्टः। प्रनङ्क्ष्यति। षान्तस्य किम्? प्रणश्यति। प्रणाशः।

३७। पदान्तस्य।

नकारस्य णत्वं नास्ति। वृक्षान्। गिरीन्। व्रीहिवापान्। खरमुखान्। हे कारिषन्।

३८। पदव्यवायेऽपि।

पदेन व्यवाये णत्वं नास्ति। व्रीहिकुम्भवापेन। रोषभीमसुखेन प्रविपानम्। (45)

(क) अतद्धित इति वक्तव्यम्। आर्द्रगोमयेण। शुष्कगोमयेण। कुमति चेति (८।४।१३) णत्वम्।

३९। क्षुभ्नादिषु च।

एषु णत्वं नास्ति। क्षुभ्नाति। क्षुभ्नीतः। नरीनृत्यते। नरीनर्त्ति। नृनमनो नाम कश्चित्। तृप्नोति। परिनर्त्तनम्। वार्धीनः। पुनर्नवा। दौर्भागिनेयः। हरिनन्दी। नर्त्तनः। दुर्नयः। दुर्नाम। आकृतिगणोऽयम्। उक्तं णत्वम्।

---

(44) इदं चिन्त्यम्। क्षुभ्नादित्वस्यानवधानात्। तथाच दुर्णय इति प्रभृत्युदाहरणं वैयाकरणप्रमादात्। दुर्णयत्वमप्येतत् पुरुषोत्तमीयादावसिद्धम्:।

(45) एवञ्च प्राक्पदेन पराङ्गत्वानामित्यादिष्वपि न णत्वम्।

४० । स्तोः श्चुना श्चुः ।

सस्य श स्तवर्गस्य चवर्गः स्यात् । कदा ? श्चुभ्यां योगे । वाश्च्योतते । वाक्चिनोति । वाश्शेते । कश्चात्रः । अग्निचिच्छेते । भवाञ्छेते । भवाञ् । अश्ले छते श्चुत्वम् । ततः शरि चेति (८।४।५४) चर्त्वम् । तच्चिनोति । तच्छिनत्ति । तज्जयति । प्रश्नाच्चिनोति । प्रश्नाञ्जुहुवे । श्चुनेति तृतीयानिर्देशात् पूर्वेणापि योगे श्चुत्वम् । यज्ञः । याच्ञा । मस्जो मज्जति । लस्जो लज्जते । इह झषि जश्त्वस्यासिद्धत्वात् सस्य श्चुत्वेन शः । तस्य जश्त्वेन जकारः । संहितायामित्येव । कः चिनोति । अग्निचित् शेते । तत् चिनोति । तत् जयति । पदस्येत्यधिकारो (८।१।१६) मण्डूकप्लुत्या क्वचिदेवोपयुज्यते । इह स्तोरिति श्चुरिति च समाहारेऽप्यनपुंसकत्वम् । सौत्रत्वात् ।

४१ । ष्टुना ष्टुः ।

सस्य ष स्तवर्गस्य टवर्गः स्यात् । कदा ? ष्टुभ्यां योगे । काष्षण्डे । काष्टीकते । पष्टा । पेष्टा । अश्नोष्ट । अच्योष्ट । यष्टा । ईट्टे । ईड्डे । उड्डीनम् । तट् टीकते । तड्ढौकते । भवाण्डीनः । भवाण्ढयङ्काम् । लिखष्षकारः । तष्षकारः । लीढम् । गूढम् ।

४२ । न पदान्ताट्टोरनाम् ।

(वा) अनामिति नाम्नवतिनगरीणामिति वाच्यम् । पदान्तात् टवर्गात् स्तोः ष्टुत्वं नास्ति । श्वलिट् साधुः । श्वलिट् तरति । मधुलिट् साधुः । मधुलिट् तरति । नेह । षण्णाम् । षण्णवतिः । षण्णगरी ।

४३ । तोः षि ।

तवर्गस्य षकारे ष्टुत्वं नास्ति । अग्निचित् षण्डे । महान् षण्डे ।

४४ । शात् ।

शकारात् तोः श्चुत्वं नास्ति । प्रश्नः । विश्नः । अश्नुत्वम् । अश्नाति ।

४५ । यरोऽनुनासिकेऽनुनासिको वा ।

यरः पदान्तस्य अनुनासिके परेऽनुनासिको वा स्यात् । वाग्नेता वाङ्नेता वा । त्वग् नकारः त्वङ्नकारः वा । ककुम्नाथः ककुब्नाथः

वा। मधुलिण्नयति मधुलिड् नयति वा। तन्मात्रा तद्मात्रा वा। पदान्तानु-वृत्तिः किम् ? वेद्मि।

(क) प्रत्यये नित्यवचनम्। वाङ्मयम्। षण्णाम्। मधुलिण्मात्रम्। मधुलिण्मात्रम्। तन्मात्रम् (46)।

४६। अचो रहाभ्यां द्वे।

अचः परौ यौ रहौ ताभ्यां परस्य यरो द्वे स्यातां वा। अर्क्कः अर्कः वा। मूर्क्खः मूर्खः वा। स्वर्ग्गः स्वर्गः वा। अर्घ्घः अर्घः वा। निर्ज्झरः निर्झरः वा। अर्त्थः अर्थः वा। आर्द्द्रः आर्द्रः वा। वर्द्धनं वर्धनं वा। बर्हिर्ण्णयति बर्हिर्णयति वा। दर्प्पः दर्पः वा। निर्भरः निर्ब्भरः वा। दर्ब्भः दर्भः वा। धर्म्मः धर्मः वा। घर्म्म घर्म वा। कार्य्यं कार्यं वा। ब्रह्मा ब्रह्म्मा वा। अपह्नुते अपह्न्नुते वा। अचः किम् ? ह्नुते।

४७। अनचि च।

अचः परस्य यरोऽचि द्वे स्यातां वा। उग्ग्रः उग्रः वा। विग्ग्रः विग्रः वा। मत्स्यः मत्त्स्यः वा। पुत्रः पुत्त्रः वा। युद्ध्यते युध्यते वा। बुध्यते बुद्ध्यते वा। सिध्यति सिद्ध्यति वा। दद्ध्यत्र दध्यत्र वा। मध्वत्र मद्ध्वत्र वा। वद्ध्रः वध्रः वा। इन्द्रः इन्न्द्रः वा। लक्ष्मः लक्ष्म्मः वा। ग्रीष्मः ग्रीष्म्मः वा। ग्रस्तं ग्रस्त्तं वा। अस्थि अस्त्थि वा। अच इति किम् ? स्मितम्। अनचीति किम् ? दधि तिष्ठति।

(क) यणो मयः।

(1) द्वे वा भवतः। उल्का उल्क्का वा।

(2) मयश्च यण इत्येके। दध्यत्र दध्य्यत्र वा। मध्वः मध्व्वः वा। मध्वत्र मध्व्वत्र वा। शक्रः शक्क्रः वा।

(ख) शरः खयः।

(1) द्वे वा स्याताम्। स्थाली स्थ्थाली वा। स्थानम् स्थ्थानं वा।

---

(46) तन्मात्रतन्मात्रादिष्वनुनासिकवाचित्वेन दकारस्यानुनासिकादिषु च नकारस्यालोपः प्राति-पदिकान्तस्येति (८।२।७) नकारलोपो नास्ति।

(ख) खयश्च शरं इत्येके । वत्सः वत्स्सः वा । क्षीरम् । क्ष्षीरं वा । अप्सराः अप्स्सराः वा ।

(ग) अवसाने द्वे वा भवतः । वाक् वाक्क् वा । षट् षट्ट् वा । यर इत्येव । दधि ।

(घ) चयो द्वितीयाः शरि पौष्करसादेः ।

(1) चयःस्थाने द्वितीया वर्णा आदिश्यन्ते शरि वा । वाक्शेते वाख्शेते वा । अप्सराः अफ्सराः वा । अप्सु अफ्सु वा । क्षीरं ख्षीरं वा । वृक्षः वृख्षः वा । मधुलिट्सु मधुलिठ्सु वा । श्वलिठ्सु श्वलिट्सु वा । वत्सः वथ्सः वा । भवत्सु भवथ्सु वा ।

(2) चयः परे द्वितीया वर्णा आगमरूपा भवन्तीत्यन्ये । क्ख्षीरं क्षीरं वा । वत्सः वत्थ्सः वा । मधुलिट्ठ्सु मधुलिट्सु वा । भवत्थ्सु भवत्सु वा । अप्फ्सराः अप्सराः वा ।

(3) चयो द्वितीया द्विरुच्यन्त इत्यपरे । क्षीरं क्ख्ख्षीरं वा । अप्सराः अप्फ्फ्सराः वा । भवत्सु भवत्थ्थ्सु वा ।

४८ । नादिन्याक्रोशे पुत्रस्य ।

आदिनी परे आक्रोशे गम्यमाने पुत्रस्य द्वित्वं नास्ति । पुत्रादिनी । आक्रोशे किम् ? पुत्त्रादिनी शिशुमारी ।

(क) तत्परे चेति वक्तव्यम् । पुत्रपुत्रादिनी ।

(ख) वा हतजग्धयोश्च वा । पुत्त्रजग्धी पुत्रजग्धी वा । पुत्रहती पुत्त्रहती वा ।

४९ । शरोऽचि ।

शरस्तामचि द्वे न स्याताम् । आदर्शः । कर्षः । वर्षा । कार्सरम् । अचि किम् ? दर्श्यते दर्श्श्यते वा । ईर्ष्यते ईर्ष्ष्यते वा । ईर्ष्या ईर्ष्ष्या वा ।

५० । त्रिप्रभृतिषु शाकटायनस्य ।

एतन्मतेन त्रिप्रभृतिषु द्वे न स्याताम् । इन्द्रः । राष्ट्रम् ।

५१। सर्वत्र शाकल्यस्य।

शाकल्यमतेन सर्वत्र द्वित्वमसम्मतम्। अर्कः। ब्रह्मा। दध्यत्र। युध्यते। सिध्यतीति उदाहृतमेव। आचार्य्योपादानं पूजार्थम्। नेत्यनुवृत्त्या सिद्धेः।

५२। दीर्घादाचार्य्याणाम्।

आचार्य्याणां मतेन द्वित्वं न स्याद् दीर्घात् परस्य। पात्रम्। दात्रम्। सूत्रम्। गोत्रम्।

५३। झलाञ्जश् झशि।

झशि परे झलां जशः स्युः। लब्धा। दोग्धा। मज्जति। बोद्धा।

५४। अभ्यासे चर्च्च।

अभ्यासे झलाञ्चरः स्यु र्जशश्च। चिच्छिनिषति। तिष्ठासति। पिफक्षिषति। प्रकृतिचरां प्रकृतिचरः। चचार। पिपासति। जशः खल्वपि। जिघत्सति। बिभर्त्ति। डुढौके। प्रकृतिजशां प्रकृतिजशः स्युः। ददौ। बुबुधे।

५५। खरि च।

खरि परे झलाञ्चरः स्युः। भेत्ता। छेत्ता। युयुत्सुः। आरिप्सते। नचिनोति। बुभुत्सते। बिभित्सति।

५६। वावसाने।

विरामे झलाञ्चरः स्युर्वा। वाक् वाग् वा। श्वलिट् श्वलिड् वा। हृषात् हृषाद् वा। ककुप् ककुब् वा।

५७। अणोऽप्रगृह्यस्यानुनासिकः।

अवसानेऽणोऽनुनासिकः स्याद्वा। कर्म वा कर्मँ। खट्वा वा खट्वाँ। दधि वा दधिँ। भवति वा भवतिँ। कुमारो वा कुमारीँ। अप्रगृह्यस्य किम्? अग्नी। वायू। अण इति किम्? कर्त्तृ। हर्त्तृ।

५८। अनुस्वारस्य ययि परसवर्णः।

स्यात्। अङ्किता। उञ्छिता। कुण्ठिता। कुर्वन्ति। कम्पिता। ययि किम्? आक्रंस्यते।

५६ । वा पदान्तस्य ।

पदान्तस्यानुस्वारस्य यथि परसवर्णः स्याद्वा । त्वं कथं नयसि । त्वङ् कथन्नयसि वा । इहान्तःस्था यवला द्विप्रभेदा रेफवर्जिताः सानुनासिका निरनुनासिकाश्च । तेषामनुस्वारस्य यथि परसवर्णोऽन्तरतमः सानुनासिकः स्यात् । किंयुक्तः । कियँ्युक्तः । पुंयन्नः । पुयँ्यन्नः । पुंलिङ्गः । पुलँ्लिङ्गः । धान्यं लुनाति । धान्यलँ्लुनाति । संवत्सरः । सवँ्वत्सरः । ग्रामं वहति । ग्रामवँ्वहति । गां वहति गावँ्वहति ।

६० । तोर्लि ।

तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लुनाति । तल्लिखति । भवाँल्लुनाति । भवाँल्लिखति ।

६१ । उदः स्थास्तम्भोः पूर्वस्य ।

उदः परयोरनयोरादेरलः स्थाने पूर्वसवर्णः स्यात् । उत्थाता । उत्थितः । उत्तम्भिता । उत्तम्भितुम् । (74)

(वा) स्कन्देः रोगे चेति वक्तव्यम् । उत्कन्दको नाम रोगः ।

६२ । झयो हो ऽन्यतरस्याम् ।

झयः परस्य हस्य पूर्वसवर्णो वा स्यात् । वाग्घसति वाग्हसति वा । अज्झलौ अज्हलौ वा । तद्धितम् । तद्हितं वा ।

६३ । शश्छोऽटि ।

(वा) अमीति वक्तव्यम् । झयः परस्य शस्य छो वा स्यात् । अटीत्यत्रा-मीति वक्तव्यम् । वाक्छेते वाक्शेते वा । वाक्छ्लोकेन वाक्श्लोकेन वा । तच्छेते तच्शेते वा । भवाञ्छूरः भवाञ्शूरः वा । शि तुक् (८।३।३१) पक्षे भवाञ्च्छूरः भवाञ्च्शूरो वा । तच्छ्लोकेन तच्श्लोकेन वा । तच्छ्मशानम् । तच्श्मशानं वा । अमीति किम् ? तत्श्चोतति । वाक्श्चोतति ।

---

(47) उत्तम्भितो भुभिरमीषनरां शिरोभिरिति माघः ।

६४ । हलो यमां यमि लोपः ।

हलः परेषां यमां यमि वा लोपः स्यात् । यथासंख्यमेव । आस्ये भवमास्य्यम् आस्यं वा । यमि किम्? कुमार्य्यः ।

६५ । झरो झरि सवर्णे ।

हलः परस्य झरो झरि सवर्णे वा लोपः स्यात् । प्रत्तम् प्रत्त्तं वा । यथासंख्यमत्र नास्ति । सवर्णमात्र एव लोपः । शिण्ड्ढि शिण्ढि वा । पिण्ड्ढि पिण्ढि वा । बन्द्धि बन्धि वा । बन्द्धुम् बन्धुं(48)वा । सवर्णे किम्? तर्प्ता । इत्र

६६ । उदात्तादनुदात्तस्य स्वरितः ।

६७ । नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ।

छन्दः सूत्रे द्वे ।

६८ । अ अ इति ।

अकारस्य शास्त्रे विवृतोपदेशः प्रतिज्ञातः । स प्रयोगे संवृतो भवति । वृक्षः । सिचिः । इति ।

काशिकाभागवृत्त्योश्चेत् सिद्धान्तं बोद्धुमस्ति धीः ।
तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरियं मम ॥ १ ॥ (49)

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्ता-
वष्टमाध्यायस्य चतुर्थः पादः ॥८। ॥

समाप्तश्च रेफपादोऽष्टमोऽध्यायश्च ॥

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृता भाषावृत्तिः समाप्ता ॥

---

(48) ऊर्ग् मीयते ऊर्गीयते वा । ऊर्ग् घ्रायते ऊर्घ्रायते वा । अमार्द् डीनः अमार्डीनः वा । भिन्द्न्नः भिन्नः वा । अभिन्त्थाः अभिन्थाः वा । अग्निः अग्न्निः वा । झरः किम्? शार्ङ्गिणः । शार्ङ्गम् । झरि किम्? सकृण्णा । प्रियपञ्चः । हलः परस्य किम्? वाक्ष्मी । अत्ता । दात्ता । लिङ्ढीकते । सवर्णे किम्? तर्प्ता । ईर्त्स्यति । अर्त्सनम् ।

(49) काशिकाभागवृत्त्योश्चेद् व्याख्यातुं मतमस्ति धीः ।
तदा विलोक्यतां भ्रातर् भाषावृत्तिरियं मम ॥ १ ॥ इति पाठान्तरम् ।

THE APPENDIX.

(१) अथ गणपाठः ।

प्रथमोऽध्यायः ।

सर्वादिः ।१।१।२७॥ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । (1) पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । (2) स्वमज्ञातिधनाख्यायाम् । (3) अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥ १ ॥

स्वरादिः ।१।१।३७॥ स्वर् अन्तर् प्रातर् । अन्तोदात्ताः । पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् । पृथक् । आद्युदात्ताः । ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् जोषम् तूष्णीम् बहिस् अधस् अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ इद्धा अद्धा सामि । अन्तोदात्ताः । वत् [५।१।११५] ब्राह्मणवत् क्षत्रियवत् । सना सनत् सनात् उपधा तिरस् । आद्युदात्ताः । अन्तरा । अन्तोदात्तः । अन्तरेण ज्योक् कम् शम् सहसा अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । (1) क्त्वातोसुन्कसुनः । (2) कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् समम् नमस् हिरुक् । (3) तसिलादयस्तद्धिता एधाच्पर्यन्ताः [५।३।७—४६] शस्तसी कृत्वसुच् सुच् आस्थालौ । (4) च्व्यर्थाश्च । अम् अथ आम् प्रताम् प्रशान् । आकृतिगणोऽयम् । तेनान्येऽपि । तथाहि । माङ् श्रत् कामम् प्रकामम् भूयस् परम् साक्षात् साचि सत्यम् मंक्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् संततम् ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अथो मिथु विषक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् अम्नर् स्थाने वरम् दुष्ठु बलात् अर्वाक् सुदि वदि इत्यादि । तसिलादयः प्राक् पाशपः [५।३।२६] । शस्प्रभृतयः प्राक् समासान्तेभ्यः [५।४।४३—६८] मान्तः कृत्वोर्थः । तसिवती । नानाञाविति ॥ २ ॥

चादिः । १ । ४ । ५७ ॥ च वा ह अह एव एवम् न नूनम् शश्वत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा त्वै द्वै रै श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ लृ ए ऐ ओ औ आदह उञ् उकञ् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा धिक् हाहा हेहै पाट् प्याट् आहो उताहो हो अहो नो अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन वत् सम् वशम् सनुकम् छंवट् शङ्के शुकम् खम् सनात् सनतर् नहिकम् सत्यम् ऋतम्

अद्धा इद्धा नोचेत् नचेत् नहि जातु कथम् कुतः कुत्र अव अनु हा हे है आहोस्वित् शम् कम् दिष्ट्या पशु वट् सह अङ्ग फट् ताजक् भाजक् अये अरे वाट् कुम् खुम् घुम् अम् ईम् सीम् सिम् वै। (१) उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः। आकृतिगणोऽयम् ॥ ३ ॥

प्रादिः ।१।४।५४ ॥ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप ॥ ४ ॥

ऊर्यादिः १।४।६१ ॥ ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला संशकला ध्वंसकला भ्रंसकला गुलुगुधा सजूस् फलु फली विक्ली आक्लोथी केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वश्मशा मस्मसा मसमसा श्रौषट् वौषट् श्रौषट् वषट् स्वाहा स्वधा पांपी प्रादुस् श्रत् आविस् ॥ ५ ॥

साक्षात्प्रभृतिः ।१।४।७४ ॥ साक्षात् मिथ्या चिन्ता भद्रा रोचना आस्था अमा श्रद्धा प्राजर्या प्राजरुहा बीजर्या बीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने विहसने प्रतपने प्रादुस् नमस्। आकृतिगणोऽयम् ॥ ६ ॥

द्वितीयोऽध्यायः ।

तिष्ठद्ग्वादिः ।२।१।१७ ॥ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् अपरदक्षिणम् संप्रति असंप्रति। (१) इच्प्रत्ययः समासान्तः। [५।४।१२७॥ ५।४।१२८] ॥१॥

शौण्डादिः ।२।१।४० ॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण ॥ २ ॥

पात्रेसमितादिः ।२।१।४८ ॥ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्ष्वेडी गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भेतृप्तः आखनिकबकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरचुरा। आकृतिगणोऽयम् ॥ ३ ॥

व्याघ्रादिः । २।१।५६ ॥ व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव ॥ आकृतिगणोऽयम्। तेन मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥ ४ ॥

श्रेण्यादिः कृतादिः । २।१।५० ॥ श्रेणि एक पूग मुकुन्द राशि निचय विषय निधान पर इन्द्र देव मुण्ड भूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय पटु पण्डित कुशल चपल निपुण कृपण ॥ १ ॥

कृत मित मत भूत उक्त समाम्नात समाम्नात समाख्यात संभावित अवधारित अवकल्पित निराकृत उपकृत उपाकृत कलित दलित उदाहृत विश्रुत उदित । २ । आकृतिगणोऽयम् ॥ ६ ॥

शाकपार्थिवादिः । २।१।६० ॥ (A) शाकपार्थिव कुतपसौश्रुत अजातौल्वलि ॥ आकृतिगणोऽयम् । कृतापकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका ॥ ७ ॥

श्रमणादिः । २।१।७० ॥ श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ ८ ॥

मयूरव्यंसकादिः २।१।७२ ॥ मयूरव्यंसक छात्रव्यंसक काम्बोजमुण्ड यवनमुण्ड । (1) छन्दसि हस्तेगृह्य हस्तगृह्य पादेगृह्य पादगृह्य लाङ्गूलेगृह्य लाङ्गूलगृह्य पुनर्दाय । (2) एहीडादयोऽन्यपदार्थे । एहीडं कर्म एहियवम् एहिवाणिजा क्रिया अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया प्रेहिद्वितीया एहिकटा अपेहिकटा प्रेहिकटा आहरकटा प्रेहिकर्दमा प्रोहकर्दमा विधमचूडा उद्धमचूडा उद्धरचूडा आहरचेला आहरवसना आहरसेना आहरवनिता कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् नखप्रचम् निश्चप्रचम् अकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया । (3) जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोडः (जहिजोडम्) जहिस्तम्बम् (जहिस्तम्बः) (उज्जहिस्तम्बम्) । (4) आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता खादताचमता आहरनिवपा आहरनिष्किरा आवपनिष्किरा उत्पचविपचा भिन्धिलवणा छिन्धिविचक्षणा पचलवणा पचप्रकूटा ॥ आकृतिगणोऽयम् ॥ तेन अकुतोभयः कान्दिशीकः कान्देशीकः आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् अवश्यकार्यम् ॥ ९ ॥

याजकादिः २।२।९ ॥ याजक पूजक परिचारक परिषेचक परिवेषक स्नापक अध्यापक उत्सादक उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक ॥ १० ॥

३२० किट ३२१ कटी गतौ। ३२२ मडि भूषायाम्। ३२३ कुडि वैकल्ये। ३२४ मुट मर्दने। ३२५ चुडि अल्पीभावे। ३२६ मुडि खण्डने॥ पुडि चेत्येके॥ ३२७ रुटि ३२८ लुटि स्तेये॥ ३२९ स्फुटिर् विशरणे॥ स्फुटि इत्यपि केचित्॥ ३३० पठ व्यक्तायां वाचि। ३३१ वठ स्थौल्ये। ३३२ मठ मदनिवासयोः। ३३३ कठ कृच्छ्रजीवने। ३३४ रट परिभाषणे॥ रठ इत्येके॥ ३३५ हठ प्लुतिशठत्वयोः॥ बलात्कारे इत्यन्ये॥ ३३६ रुठ ३३७ लुठ ३३८ उठ उपघाते॥ ऊठ इत्येके॥ ३३९ पिठ हिंसासंक्लेशनयोः। ३४० शठ कैतवे च। ३४१ शुठ प्रतिघाते॥ ३४२ कुठि च। ३४३ लुठि आलस्ये प्रतिघाते च। ३४४ शुठि शोषणे। ३४५ रुठि ३४६ लुठि गतौ। ३४७ चुड्ड भावकरणे। ३४८ अड्ड अभियोगे। ३४९ कड्ड कार्कश्ये॥ चुड्डादयस्त्रयो दोपधाः॥ ३५० क्रीडृ विहारे॥ ३५१ तुडृ तोडने॥ तूडृ इत्येके॥ ३५२ हुडृ ३५३ हूडृ ३५४ होडृ गतौ। ३५५ रौडृ अनादरे। ३५६ रोडृ ३५७ लोडृ उन्मादे। ३५८ अड उद्यमे॥ ३५९ लड विलासे। लल इत्येके॥ ३६० कड मदे॥ कडि इत्येके॥ ३६१ गडि वदनैकदेशे॥ शौड्रादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ३६२ तिपृ ३६३ तेपृ ३६४ ष्टिपृ ३६५ ष्टेपृ क्षरणार्थाः। तुपृ कम्पने च॥ ३६६ ग्लेपृ दैन्ये। ३६७ टुवेपृ कम्पने ३६८ केपृ ३६९ गेपृ ३७० ग्लेपृ च। ३७१ मेपृ ३७२ रेपृ ३७३ लेपृ गतौ। ३७४ त्रपूष् लज्जायाम्। ३७५ कपि चलने। ३७६ रबि ३७७ लबि ३७८ अबि शब्दे। ३७९ लबि अवस्रंसने च। ३८० कबृ वर्णे। ३८१ क्लीबृ अधार्ष्ट्ये। ३८२ क्षीबृ मदे। ३८३ शीभृ कत्थने। ३८४ चीभृ च। ३८५ रेभृ शब्दे॥ अभि रभि क्वचित् पठ्यते॥ ३८६ ष्टभि ३८७ स्कभि प्रतिबन्धे। ३८८ जभि ३८९ जृभी गात्रविनामे। ३९० शल्भ कत्थने। ३९१ वल्भ भोजने। ३९२ गल्भ धार्ष्ट्ये। ३९३ श्रम्भु प्रमादे॥ दन्त्यादिश्च॥ ३९४ ष्टुभु स्तम्भे॥ तिपाद्य उदात्ता अनुदात्तेत आत्मनेभाषाः॥ तिपिस्त्वनुदात्तः॥ ३९५ गुपू रक्षणे। ३९६ धूप संतापे। ३९७ जप ३९८ जल्प व्यक्तायां वाचि। ३९९ जप मानसे च। ४०० चप सान्त्वने। ४०१ षप समवाये। ४०२ रप ४०३ लप व्यक्तायां वाचि। ४०४ चुप मन्दायां गतौ। ४०५ तुप ४०६ तुम्प ४०७ त्रुप ४०८ त्रुम्प ४०९ तुफ ४१० तुम्फ ४११ त्रुफ ४१२ त्रुम्फ हिंसार्थाः। ४१३ पर्प ४१४ रफ ४१५ रफि ४१६ अर्ब ४१७ पर्ब ४१८ लर्ब ४१९ बर्ब ४२० मर्ब ४२१ कर्ब ४२२ खर्ब ४२३ गर्ब ४२४ शर्ब ४२५ षर्ब ४२६ चर्ब गतौ। ४२७ कुबि आच्छादने। ४२८ लुबि ४२९ तुबि अर्दने। ४३० चुबि वक्त्रसंयोगे। ४३१ षृभु ४३२ षृम्भु हिंसार्थौ॥ सिभु सिम्भु इत्येके॥ ४३३ शुभ ४३४ शुम्भ भाषणे॥ भासन इत्येके। हिंसायामित्यन्ये॥ गुपादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ४३५ घिणि ४३६ घुणि ४३७ घृणि ग्रहणे। ४३८ घुण ४३९ घूर्ण भ्रमणे। ४४० पण व्यवहारे स्तुतौ च। ४४१ पन च। ४४२ भाम क्रोधे। ४४३ क्षमूष् सहने। ४४४ कमु कान्तौ॥ घिण्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः॥ ४४५ अण ४४६ रण ४४७ वण ४४८ भण ४४९ मण ४५० कण ४५१ क्वण ४५२ व्रण ४५३ भ्रण ४५४ ध्वण शब्दार्थाः॥ धण इत्यपि केचित्॥ ४५५ ओणृ अपनयने। ४५६ शोणृ वर्णगत्योः। ४५७ श्रोणृ संघाते। ४५८ श्लोणृ च। ४५९ पैणृ गतिप्रेरणश्लेषणेषु। ४६० ध्रण शब्दे॥ बण इत्यपि केचित्॥ ४६१ कनी दीप्तिकान्तिगतिषु। ४६२ ष्टन ४६३ वन शब्दे। ४६४ वन ४६५ षण संभक्तौ। ४६६ अम गत्यादिषु। ४६७ द्रम ४६८ हम्म ४६९ मीमृ गतौ। ४७० चमु ४७१ छमु ४७२ जमु ४७३ झमु अदने। ४७४ क्रमु पादविक्षेपे॥ अणादय उदात्ता

उदात्तेतः परस्मैभाषाः ॥ ४७५ चय ४७६ वय ४७७ पय ४७८ मय ४७९ चय ४८० तय ४८१ णय गतौ । ४८२ दय दानगतिरक्षणहिंसादानेषु । ४८३ रय गतौ । ४८४ ऊयी तन्तुसंताने । ४८५ पूयी विशरणे दुर्गन्धे च । ४८६ क्नूयी शब्दे उन्दे च । ४८७ क्ष्मायी विधूनने । ४८८ स्फायी ४८९ ओप्यायी वृद्धौ । ४९० तायृ संतानपालनयोः । ४९१ शल चलनसंवरणयोः । ४९२ वल ४९३ वल्ल संवरणे संचरणे च । ४९४ मल ४९५ मल्ल धारणे । ४९६ भल ४९७ भल्ल परिभाषणहिंसादानेषु । ४९८ कल शब्दसंख्यानयोः । ४९९ कल्ल अव्यक्ते शब्दे ॥ ५०० तेवृ ५०१ देवृ देवने । ५०२ षेवृ ५०३ गेवृ ५०४ ग्लेवृ ५०५ पेवृ ५०६ मेवृ ५०७ म्लेवृ सेवने ॥ शेवृ खेवृ क्लेवृ इत्येके ॥ ५०८ रेवृ प्लवगतौ ॥ चयादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ५०९ मव्य बन्धने । ५१० सूर्क्ष्य ५११ ईर्क्ष्य ५१२ ईर्ष्य ईर्ष्यार्थाः । ५१३ हय गतौ । ५१४ शुच्य अभिषवे । चुच्य इत्येके ॥ ५१५ हर्य गतिकान्त्योः ५१६ अल भूषणपर्याप्तिवारणेषु ॥ अयं स्वरितेदित्येके ॥ ५१७ ञिफला विशरणे । ५१८ मील ५१९ श्मील ५२० स्मील ५२१ क्ष्मील निमेषणे । ५२२ पील प्रतिष्टम्भे । ५२३ णील वर्णे । ५२४ शील समाधौ । ५२५ कील बन्धने । ५२६ कूल आवरणे । ५२७ शूल रुजायां संघोषे च । ५२८ तूल निष्कर्षे । ५२९ पूल संघाते । ५३० मूल प्रतिष्ठायाम् । ५३१ फल निष्पत्तौ । ५३२ चुल्ल भावकरणे । ५३३ फुल्ल विकसने । ५३४ चिल्ल शैथिल्ये भावकरणे च । ५३५ तिल्ल गतौ ॥ तिल इत्येके ॥ ५३६ वेलृ ५३७ चेलृ ५३८ केलृ ५३९ खेलृ ५४० क्ष्वेलृ ५४१ वेल्ल चलने । ५४२ पेलृ ५४३ फेलृ ५४४ शेलृ गतौ । षेलृ इत्येके । ५४५ स्खल संचलने । ५४६ खल संचये । ५४७ गल अदने । ५४८ षल गतौ । ५४९ दल विशरणे । ५५० श्वल ५५१ श्वल्ल आशुगमने । ५५२ खोलृ ५५३ खोरृ गतिप्रतिघाते । ५५४ धोरृ गतिचातुर्ये । ५५५ त्सर छद्मगतौ । ५५६ क्मर हूर्च्छने । ५५७ अभ्र ५५८ वभ्र ५५९ मभ्र ५६० चर गत्यर्थाः ॥ चरतिर्भक्षणेऽपि ॥ ५६१ ष्ठिवु निरसने । ५६२ जि जये । ५६३ जीव प्राणधारणे । ५६४ पीव ५६५ मीव ५६६ तीव ५६७ णीव स्थौल्ये । ५६८ क्षीवु ५६९ क्षेवु निरसने । ५७० उर्वी ५७१ तुर्वी ५७२ थुर्वी ५७३ दुर्वी ५७४ धुर्वी हिंसार्थाः । ५७५ गुर्वी उद्यमने । ५७६ मुर्वी बन्धने । ५७७ पुर्व ५७८ पर्व ५७९ मर्व पूरणे । ५८० चर्व अदने । ५८१ भर्व हिंसायाम् । ५८२ कर्व ५८३ खर्व ५८४ गर्व दर्पे । ५८५ अर्व ५८६ शर्व ५८७ षर्व हिंसायाम् । ५८८ इवि व्याप्तौ । ५८९ पिवि ५९० मिवि ५९१ णिवि सेचने ॥ सेवन इत्येके ॥ ५९२ हिवि ५९३ दिवि ५९४ धिवि ५९५ जिवि प्रीणनार्थाः । ५९६ रिवि ५९७ रवि ५९८ धवि गत्यर्थाः । ५९९ कृवि हिंसाकरणयोश्च । ६०० मव बन्धने । ६०१ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु ॥ मव्यादय उदात्ता उदात्तेतः परस्मैभाषाः । जिस्त्वनुदात्तः ॥ ६०२ धावु गतिशुद्ध्योः उदात्तः स्वरितेदुभयतोभाषः ॥ ६०३ धुक्ष ६०४ धिक्ष संदीपनक्लेशनजीवनेषु । ६०५ वृक्ष वरणे । ६०६ शिक्ष विद्योपादाने । ६०७ भिक्ष भिक्षायामलाभे लाभे च ॥ ६०८ क्लेश अव्यक्तायां वाचि ॥ ६०९ दक्ष वृद्धौ शीघ्रार्थे च । ६१० दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । ६११ ईक्ष ६१२ ईष गतिहिंसादर्शनेषु । ६१३ भाष व्यक्तायां वाचि । ६१४ वर्ष स्नेहने । ६१५ गेषृ अन्विच्छायाम् ॥ ग्लेषृ इत्येके ॥ ६१६ पेषृ प्रयत्ने । ६१७ जेषृ ६१८ णेषृ ६१९ एषृ ६२० प्रेषृ गतौ ६२१ रेषृ ६२२ हेषृ ६२३ ह्रेषृ अव्यक्ते शब्दे । ६२४ कासृ शब्दकुत्सायाम् । ६२५ भासृ दीप्तौ ६२६ णासृ ६२७ रासृ शब्दे ।

६२८ वस कौटिल्ये। ६२९ भ्यस भये। ६३० आङः शसि इच्छायाम्। ६३१ ग्रसु ६३२ ग्लसु अदने। ६३३ ईह चेष्टायाम्। ६३४ बहि ६३५ महि वृद्धौ। ६३६ अहि गतौ। ६३७ गर्ह ६३८ गल्ह कुत्सायाम्। ६३९ बर्ह ६४० बल्ह प्राधान्ये। ६४१ वर्ह ६४२ वल्ह परिभाषणहिंसाच्छादनेषु। ६४३ प्लिह गतौ। ६४४ वेहृ ६४५ जेहृ ६४६ वाहृ प्रयत्ने॥ जेहृ गतावपि॥ ६४७ द्राहृ निद्राक्षये॥ निक्षेपे इत्येके॥ ६४८ काशृ दीप्तौ। ६४९ ऊह वितर्के। ६५० गाहू विलोडने। ६५१ गृहू ग्रहणे। ६५२ ग्लह च। ६५३ घुषि कान्तिकरणे॥ घष इति केचित्॥ घुषादय उदात्ता अनुदात्तेत आत्मनेभाषाः॥ ६५४ घुषिर् अविशब्दने। ६५५ अक्षू व्याप्तौ। ६५६ तक्षू ६५७ त्वक्षू तनूकरणे। ६५८ उक्ष सेचने। ६५९ रक्ष पालने। ६६० णिक्ष चुम्बने। ६६१ त्रक्ष ६६२ ष्ट्रक्ष ६६३ णक्ष गतौ। ६६४ वक्ष रोषे॥ संघाते इत्येके॥ ६६५ मृक्ष संघाते॥ म्रक्ष इत्येके॥ ६६६ तक्ष त्वचने। ६६७ सूर्क्ष आदरे। ६६८ काक्षि ६६९ वाक्षि ६७० माक्षि काङ्क्षायाम्। ६७१ द्राक्षि ६७२ ध्राक्षि ६७३ ध्वाक्षि घोरवाशिते च। ६७४ चूष पाने। ६७५ तूष तुष्टौ। ६७६ पूष वृद्धौ। ६७७ मूष स्तेये। ६७८ लूष ६७९ रूष भूषायाम्। ६८० शूष प्रसवे। ६८१ यूष हिंसायाम्। ६८२ जूष च। ६८३ भूष अलंकारे। ६८४ ऊष रुजायाम्। ६८५ ईष उञ्छे। ६८६ कष ६८७ खष ६८८ शिष ६८९ जष ६९० झष ६९१ शष ६९२ वष ६९३ मष ६९४ रुष ६९५ रिष हिंसार्थाः। ६९६ भष भर्त्सने। ६९७ उष दाहे। ६९८ जिषु ६९९ विषु ७०० मिषु सेचने। ७०१ पुष पुष्टौ। ७०२ श्रिषु ७०३ श्लिषु ७०४ प्रुषु ७०५ प्लुषु दाहे। ७०६ पृषु ७०७ वृषु ७०८ मृषु सेचने॥ मृषु सहने च॥ इतरौ हिंसासंक्लेशनयोश्च॥ ७०९ घृषु संघर्षे। ७१० हृषु अलीके। ७११ तुस ७१२ ह्रस ७१३ ह्लस ७१४ रस शब्दे। ७१५ लस श्लेषणक्रीडनयोः। ७१६ घस्लृ अदने। ७१७ जर्ज ७१८ चर्च ७१९ झर्झ परिभाषणहिंसातर्जनेषु। ७२० पिसृ ७२१ पेसृ गतौ। ७२२ हसे हसने ७२३ णिश समाधौ। ७२४ मिश ७२५ मश शब्दे रोषकृते च। ७२६ शव गतौ। ७२७ शश प्लुतगतौ। ७२८ शसु हिंसायाम्। ७२९ शंसु स्तुतौ॥ ७३० चह परिकल्कने। ७३१ मह पूजायाम्। ७३२ रह त्यागे। ७३३ रहि गतौ। ७३४ दृह ७३५ दृहि ७३६ बृह ७३७ बृहि वृद्धौ॥ बृहि शब्दे च। बृहिर् इत्येके॥ ७३८ तुहिर् ७३९ दुहिर् ७४० उहिर् अर्दने। ७४१ अर्ह पूजायाम्॥ घुषिरादय उदात्ता उदात्तेतः परस्मैभाषाः। घसिस्त्वनुदात्तः॥ ७४२ द्युत दीप्तौ। ७४३ श्विता वर्णे। ७४४ ञिमिदा स्नेहने। ७४५ ञिष्विदा स्नेहनमोचनयोः॥ ञिक्ष्विदा चेत्येके॥ ७४६ रुच दीप्तावभिप्रीतौ च। ७४७ घुट परिवर्तने। ७४८ रुट ७४९ लुट ७५० लुठ प्रतिघाते। ७५१ शुभ दीप्तौ। ७५२ क्षुभ संचलने। ७५३ णभ ७५४ तुभ हिंसायाम्॥ ७५५ स्रंसु ७५६ ध्वंसु ७५७ भ्रंसु अवस्रंसने॥ ध्वंसु गतौ च। भ्रंशु इत्यपि केचित्॥ ७५८ स्रम्भु विश्वासे। ७५९ वृतु वर्तने। ७६० वृधु वृद्धौ॥ ७६१ शृधु शब्दकुत्सायाम्। ७६२ स्यन्दू प्रस्रवणे। ७६३ कृपू सामर्थ्ये॥ द्युतादय उदात्ता अनुदात्तेत आत्मनेभाषाः। वृत्॥ ७६४ घट चेष्टायाम्। ७६५ व्यथ भयसंचलनयोः। ७६६ प्रथ प्रख्याने। ७६७ प्रस विस्तारे। ७६८ म्रद मर्दने। ७६९ स्खद स्खदने। ७७० क्षजि गतिदानयोः। ७७१ दक्ष गतिहिंसनयोः। ७७२ क्रप कृपायां गतौ च। ७७३ कदि ७७४ क्रदि ७७५ क्लदि वैक्लव्ये। वैक्लव्ये इत्येके। ७७६ ञित्वरा संभ्रमे॥ घटादयः षितः उदात्ता अनुदात्तेत आत्मनेभाषाः॥ ७७७ ज्वर रोगे। ७७८ गड सेचने। ७७९ हेड वेष्टने। ७८० वट ७८१ भट परिभाषणे। ७८२ णट नृत्तौ॥ गतावित्यन्ये॥ ७८३ ष्टक प्रतिघाते। ७८४ चक

गतौ। ७८५ कखे हसने। ७८६ रगे शङ्कायाम्। ७८७ लगे सङ्गे। ७८८ ह्रगे ७८९ ह्लगे ७९० षगे ७९१ ष्टगे संवरणे। ७९२ कगे नोच्यते। ७९३ अक ७९४ अग कुटिलायां गतौ। ७९५ कण ७९६ रण गतौ। ७९७ चण ७९८ शण ७९९ श्रण दाने च॥ ८०० श्रथ ८०१ श्नथ ८०२ क्नथ ८०३ क्रथ हिंसार्थाः। ८०४ वन च। ८०५ वनु नोच्यते। ८०६ ज्वल दीप्तौ। ८०७ ह्वल ८०८ ह्मल चलने। ८०९ स्मृ आध्याने। ८१० दॄ भये। ८११ नॄ नये ८१२ श्रा पाके। मारणतोषणनिशामनेषु ८१३ ज्ञा। कम्पने ८१४ चलिः। ८१५ छदिर् ऊर्जने। जिह्वोन्मथने ८१६ लडिः। ८१७ मदी हर्षग्लेपनयोः। ८१८ ध्वन शब्दे। ८१९ दलि ८२० वलि ८२१ स्खलि ८२२ रणि ८२३ ध्वनि ८२४ त्रपि ८२५ क्षपि च ८२६ स्वन अवतंसने॥ घटादयो मितः॥ ८२७ (1) जनी ८२८ जृष् ८२९ क्नसु ८३० रञ्जो ८३१ ऽमन्ताश्च। ८३२ (2) ज्वल ८३३ ह्वल ८३४ ह्मल ८३५ नमामनुपसर्गाद्वा। (3) ८३६ ग्ला। ८३७ स्ना ८३८ वनु ८३९ वमां च। (4) न ८४० कम्य ८४१ मि ८४२ चमाम्। (5) ८४३ शमोऽदर्शने। ८४४ (6) यमोऽपरिवेषणे। ८४५ (7) स्खदिर् अवपरिभ्यां च। ८४६ फण गतौ॥ घटादयः फणान्ता मितः। वृत्। ज्वरादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ८४७ राजृ दीप्तौ॥ उदात्तः स्वरितेदुभयतोभाषः॥ ८४८ टुभ्राजृ ७४९ टुभ्राशृ ८५० टुभ्लाशृ दीप्तौ॥ उदात्ता अनुदात्तेत आत्मनेभाषाः॥ ८५१ स्यमु ८५२ स्वन ८५३ ध्वन शब्दे। ८६४ षम ८५५ ष्टम अवैकल्ये॥ वृत्॥ ८५६ ज्वल दीप्तौ। ८५७ चल कम्पने। ८५८ जल घातने। ८५९ टल ८६० ट्वल वैक्लव्ये। ८६१ ष्ठल स्थाने। ८६२ हल विलेखने। ८६३ णल गन्धे॥ बन्धने इत्येके॥ ८६४ पल गतौ। ८६५ बल प्राणने धान्यावरोधने च। ८६६ पुल महत्त्वे। ५६७ कुल संस्त्याने ८६८ शल ७६९ हुल ८७० पत्लृ गतौ। ८७१ क्वथे निष्पाके। ८७२ पथे गतौ। ८७३ मथे विलोडने। ८७४ टुवम उद्गिरणे। ८७५ भ्रमु चलने। ८७६ क्षर संचलने॥ स्यमादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ८७७ षह मर्षणे॥ उदात्तोऽनुदात्तेदात्मनेभाषः॥ ८७८ रमु क्रीडायाम्॥ अनुदात्तोऽनुदात्तेदात्मनेभाषः॥ ८७९ षद्लृ विशरणगत्यवसादनेषु। ८८० शद्लृ शातने। ८८१ क्रुश आह्वाने रोदने च॥ षदादयस्त्रयोऽनुदात्ता उदात्तेतः परस्मैभाषाः॥ ८८२ कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। ८८३ बुध अवगमने। ८८४ रुह बीजजन्मनि प्रादुर्भावे च। ८८५ कस गतौ॥ वृत्। कुचादय उदात्ता उदात्तेतः परस्मैभाषाः। रुहिस्त्वनुदात्तः॥ ८८६ हिक्क अव्यक्ते शब्दे। ८८७ अञ्चु गतौ याचने च॥ अचु इत्येके। अचि इत्यपरे॥ ८८८ टुयाचृ याच्ञायाम्। ८८९ रेटृ परिभाषणे। ८९० चते ८९१ चदे याचने। ८९२ प्रोथृ पर्याप्तौ। ८९३ मिदृ ८९४ मेदृ मेधाहिंसनयोः। एतौ थान्तावित्यन्ये ८९५ मेधृ संगमे च। ८९६ णिदृ ८९७ णेदृ कुत्सासंनिकर्षयोः। ८९८ शृधु ८९९ मृधु उन्दने। ९०० बुधिर् बोधने। ९०१ उबुन्दिर् निशामने। ९०२ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु॥ नान्तोऽप्ययम्॥ ९०३ खनु अवदारणे। ९०४ चीव आदानसंवरणयोः। ९०५ चायृ पूजानिशामनयोः। ९०६ व्यय गतौ। ९०७ दाशृ दाने ९०८ भेषृ भये॥ गतावित्येके॥ ९०९ भ्रेषृ ९१० भ्लेषृ गतौ। ९११ अस गतिदीप्त्यादानेषु॥ अष इत्येके॥ ९१२ स्पश बाधनस्पर्शनयोः। ९१३ लष कान्तौ। ९१४ चष भक्षणे। ९१५ छष हिंसायाम्। ९१६ झष आदानसंवरणयोः। ९१७ भक्ष ९१८ भ्लक्ष अदने। ९१९ दासृ दाने। ९२० माहृ माने। ९२१ गुहू संवरणे॥ हिक्कादय उदात्ताः स्वरितेत उभयतोभाषाः॥ ९२२ श्रिञ् सेवायाम्॥ उदात्त उभयतोभाषः। ९२३ भृञ्

भरणे । ९२४ हृञ् हरणे । ९२५ धृञ् धारणे । ९२६ णीञ् प्रापणे ॥ भृञादयश्चत्वारोऽनुदात्ता उभयतोभाषाः ॥ ९२७ धेट् पाने । ९२८ ग्लै ९२९ म्लै हर्षक्षये । ९३० द्यै न्यक्करणे । ९३१ द्रै स्वप्ने । ९३२ ध्रै तृप्तौ । ९३३ ध्यै चिन्तायाम् । ९३४ रै शब्दे । ९३५ स्त्यै ९३६ ष्ट्यै शब्दसंघातयोः । ९३७ खै खदने । ९३८ क्षै ९३९ जै ९४० षै क्षये । ९४१ कै ९४२ गै शब्दे । ९४३ शै ९४४ श्रै पाके । ९४५ पै ९४६ ओवै शोषणे । ९४७ ष्टै वेष्टने । ९४८ ष्णै वेष्टने ॥ शोभायां चेत्येके ॥ ९४९ दैप् शोधने । ९५० पा पाने । ९५१ घ्रा गन्धोपादाने । ९५२ ध्मा शब्दाग्निसंयोगयोः । ९५३ ष्ठा गतिनिवृत्तौ । ९५४ म्ना अभ्यासे । ९५५ दाण् दाने । ९५६ ह्वृ कौटिल्ये । ९५७ स्वृ शब्दोपतापयोः । ९५८ स्मृ चिन्तायाम् । ९५९ ह्वृ संवरणे । ९६० सृ गतौ । ९६१ ऋ गतिप्रापणयोः । ९६२ गृ ९६३ घृ सेचने । ९६४ ध्वृ हूर्च्छने । ९६५ स्रु गतौ । ९६६ षु प्रसवैश्वर्ययोः । ९६७ श्रु श्रवणे । ९६८ ध्रु स्थैर्ये । ९६९ दु ९७० द्रु गतौ । ९७१ जि ९७२ ज्रि अभिभवे ॥ धेटादयोऽनुदात्ताः परस्मैभाषाः ॥ ९७३ ष्मिङ् ईषद्धसने । ९७४ गुङ् अव्यक्ते शब्दे । ९७५ गाङ् गतौ । ९७६ कुङ् ९७७ घुङ् ९७८ उङ् ९७९ ङुङ् शब्दे ॥ उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्यन्ये ॥ ९८० च्युङ् ९८१ ज्युङ् ९८२ प्रुङ् ९८३ प्लुङ् गतौ ॥ क्रुङ् इत्येके ॥ ९८४ रुङ् गतिरेषणयोः । ९८५ धृङ् अवध्वंसने । ९८६ मेङ् प्रणिदाने । ९८७ देङ् रक्षणे । ९८८ श्यैङ् गतौ । ९८९ प्यैङ् ९९० त्रैङ् पालने ॥ स्मिङादयोऽनुदात्ता आत्मनेभाषाः ॥ ९९१ पूङ् पवने । ९९२ मूङ् बन्धने । ९९३ डीङ् विहायसा गतौ ॥ पूङादयस्त्रय उदात्ता आत्मनेभाषाः ॥ ९९४ तॄ प्लवनतरणयोः ॥ उदात्तः परस्मैभाषः ॥ ९९५ गुप गोपने । ९९६ तिज निशाने । ९९७ मान पूजायाम् । ९९८ बध बन्धने ॥ गुपादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ९९९ रभ राभस्ये । १००० डुलभष् प्राप्तौ । १००१ ष्वञ्ज परिष्वङ्गे । १००२ हद पुरीषोत्सर्गे ॥ रभादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ १००३ ञिक्ष्विदा अव्यक्ते शब्दे ॥ उदात्त उदात्तेत् परस्मैभाषः ॥ १००४ स्कन्दिर् गतिशोषणयोः । १००५ यभ मैथुने । १००६ णम प्रह्वत्वे शब्दे च । १००७ गम्लृ १००८ सृप्लृ गतौ । १००९ यम उपरमे । १०१० तप संतापे । १०११ त्यज हानौ । १०१२ षञ्ज सङ्गे । १०१३ दृशिर् प्रेक्षणे । १०१४ दंश दंशने । १०१५ कृष विलेखने । १०१६ दह भस्मीकरणे । १०१७ मिह सेचने ॥ स्कन्दादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ १०१८ कित निवासे रोगापनयने च ॥ उदात्तेत् परस्मैभाषः ॥ १०१९ दान खण्डने । १०२० शान तेजने ॥ उदात्तौ स्वरितेतावुभयतोभाषौ ॥ १०२१ डुपचष् पाके । १०२२ षच समवाये । १०२३ भज सेवायाम् । १०२४ रञ्ज रागे । १०२५ शप आक्रोशे । १०२६ ॥ त्विष दीप्तौ । १०२७ यज देवपूजासंगतिकरण-दानेषु । १०२८ डुवप् बीजसंताने छेदनेऽपि । १०२९ वह प्रापणे ॥ पचादयोऽनुदात्ताः स्वरितेत उभयतो-भाषाः । वसिमुदात्तः ॥ १०३० वस निवासे ॥ अनुदात्त उदात्तेत् परस्मैभाषः ॥ १०३१ वेञ् तन्तुसंताने । १०३२ व्येञ् संवरणे । १०३३ ह्वेञ् स्पर्धायां शब्दे च ॥ वेञादयस्त्रयोऽनुदात्ता उभयतोभाषाः ॥ १०३४ वद व्यक्तायां वाचि । १०३५ टुओश्वि गतिवृद्ध्योः ॥ वद । श्वि इत्युदात्तौ परस्मैभाषौ ॥

इति शप्विकरणा भ्वादयः ॥ १ ॥ आकृतिगणोऽयमित्येके ।

अथादादयः ॥ २ ॥

अद भक्षणे । २ हन हिंसागत्योः ॥ अनुदात्तावुदात्तेतौ परस्मैपदिनौ ॥ ३ द्विष अप्रीतौ । ४ दुह प्रपूरणे । ५ दिह उपचये । ६ लिह आस्वादने ॥ द्विषादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ ७ चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेऽपि ॥ अनुदात्तोऽनुदात्तेदात्मनेपदी ॥ ८ ईर गतौ कम्पने च । ९ ईड स्तुतौ । १० ईश ऐश्वर्ये । ११ आस उपवेशने । १२ आङःशासु इच्छायाम् । १३ वस आच्छादने । १४ कसि गतिशासनयोः ॥ कस इत्येके । कश इत्यपि ॥ १५ णिसि चुम्बने । १६ णिजि शुद्धौ । १७ शिजि अव्यक्ते शब्दे । १८ पिजि वर्णे ॥ संपर्चने इत्येके । उभयत्रेत्यन्ये । अवयवे इत्येके अव्यक्ते शब्दे इतीतरे । पृजि इत्येके ॥ १९ वृजी वर्जने ॥ वृजि इत्यन्ये २० पृची संपर्चने ॥ ईरादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ २१ षूङ् प्राणिगर्भविमोचने । २२ शीङ् स्वप्ने ॥ उदात्तावात्मनेभाषौ ॥ २३ यु मिश्रणेऽमिश्रणे च । २४ रु शब्दे । २५ णु स्तुतौ । २६ टुक्षु शब्दे । २७ क्ष्णु तेजने । २८ ष्णु प्रस्रवणे ॥ युप्रभृतय उदात्ता उदात्तेतः परस्मैभाषाः ॥ २९ ऊर्णुञ् आच्छादने ॥ उदात्त उभयतोभाषः ॥ ३० द्यु अभिगमने । ३१ षु प्रसवैश्वर्ययोः । ३२ कु शब्दे । ३३ ष्टुञ् स्तुतौ ॥ द्युप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ स्तौतिरुभयतोभाषः ॥ ३४ ब्रूञ् व्यक्तायां वाचि ॥ उदात्त उभयतोभाषः ॥ ३५ इण् गतौ । ३६ इङ् अध्ययने । ३७ इक् स्मरणे । ३८ वी गति-व्याप्तिप्रजनकान्त्यसनखादनेषु । ३९ या प्रापणे । ४० वा गतिगन्धनयोः । ४१ भा दीप्तौ । ४२ ष्णा शौचे । ४३ श्रा पाके । ४४ द्रा कुत्सायां गतौ । ४५ प्सा भक्षणे । ४६ पा रक्षणे । ४७ रा दाने । ४८ ला आदाने ॥ ४९ दाप् लवने । ५० ख्या प्रकथने । ५१ प्रा पूरणे । ५२ मा माने । ५३ वच परिभाषणे ॥ इण्प्रभृतयोऽनुदात्ताः परस्मैभाषाः । इङ् त्वात्मनेपदी ॥ ५४ विद ज्ञाने । ५५ अस भुवि । ५६ मृजू शुद्धौ । ५७ रुदिर् अश्रुविमोचने ॥ विदादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ५८ ञिष्वप् शये । उदात्तः परस्मैभाषः ॥ ५९ श्वस प्राणने । ६० अन च । ६१ जक्ष भक्षहसनयोः ॥ वृत् ॥ ६२ जागृ निद्राक्षये । ६३ दरिद्रा दुर्गतौ । ६४ चकासृ दीप्तौ । ६५ शासु अनुशिष्टौ ॥ श्वसादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ६६ दीधीङ् दीप्तिदेवनयोः । ६७ वेवीङ् वेतिना तुल्ये ॥ उदात्तावात्मनेभाषौ ॥ ६८ षस ६९ सस्ति स्वप्ने ॥ ७० वश कान्तौ ॥ षसादय उदात्ता उदात्तेतः ॥ ७१ चर्करीतं च । ७२ ह्नुङ् अपनयने ॥ अनुदात्त आत्मनेभाषः ॥

इति लुग्विकरणा अदादयः ॥ २ ॥

अथ जुहोत्यादयः ॥ ३ ॥

१ हु दानादनयोः ॥ आदाने चेत्येके ॥ २ ञिभी भये । ३ ह्री लज्जायाम् ॥ जुहोत्यादयोऽनुदात्ताः परस्मैभाषाः ॥ ४ पॄ पालनपूरणयोः ॥ पृ इत्येके ॥ उदात्तः परस्मैभाषः ॥ ५ डुभृञ् धारणपोषणयोः ॥ अनुदात्त उभयतोभाषः ॥ ६ माङ् माने शब्दे च । ७ ओहाङ् गतौ ॥ अनुदात्तावात्मनेपदिनौ ॥ ८ ओहाक् त्यागे ॥ अनुदात्तः परस्मैपदी ॥ ९ डुदाञ् दाने । १० डुधाञ् धारणपोषणयोः ॥ दाने इत्यप्येके ॥

अनुदात्तावुभयतोभाषौ ॥ ११ णिजिर् शौचपोषणयोः । १२ विजिर् पृथग्भावे । १३ विष्लृ व्याप्तौ ॥ णिजिरादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ १४ घृ क्षरणदीप्त्योः । १५ हृ प्रसह्यकरणे । १६ ऋ १७ सृ गतौ ॥ घृप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ १८ भस भर्त्सनदीप्त्योः ॥ उदात्त उदात्तेत् परस्मैपदी ॥ १९ कित ज्ञाने ॥ अनुदात्तः परस्मैपदी ॥ २० तुर त्वरणे । २१ धिष शब्दे । २२ धन धान्ये । २३ जन जनने ॥ तुरादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ २४ गा स्तुतौ ॥ अनुदात्तः परस्मैभाषः । घृप्रभृतय एकादश छन्दसि । इयर्ति भाषायामपि ॥

इति श्लुविकरणा जुहोत्यादयः ॥ ३ ॥

अथ दिवादयः ॥ ४ ॥

१ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । २ षिवु तन्तुसन्ताने । ३ स्रिवु गतिशोषणयोः । ४ ष्ठिवु निरसने । ५ ष्णसु अदने ॥ आद्यान्ते इत्येके । अदर्शने इत्यपरे ॥ ६ क्ष्णसु निरसने । ७ क्नसु ह्वरणदीप्त्योः । ८ व्युष दाहे । ९ प्लुष च । १० नृती गात्रविक्षेपे । ११ त्रसी उद्वेगे । १२ कुथ पूतीभावे । १३ पुथ हिंसायाम् । १४ गुध परिवेष्टने । १५ क्षिप प्रेरणे । १६ पुष्प विकसने । १७ तिम १८ ष्टिम १९ ष्टीम आर्द्रीभावे । २० व्रीड चोदने लज्जायां च । २१ इष गतौ । २२ षह २३ षुह चक्यर्थे । २४ जॄष् झॄष् २५ वयोहानौ ॥ दिवादय उदात्ता उदात्तेतः परस्मैभाषाः । क्षिपिस्त्वनुदात्तः । २६ षूङ् प्राणिप्रसवे । २७ दूङ् परितापे ॥ उदात्तावात्मनेभाषौ ॥ २८ दीङ् क्षये २९ डीङ् विहायसा गतौ । ३० धीङ् आधारे ३१ मीङ् हिंसायाम् । ३२ रीङ् स्रवणे । ३३ लीङ् श्लेषणे । ३४ व्रीङ् वृणोत्यर्थे ॥ वृत् ॥ स्वादय ओदितः ॥ ३५ पीङ् पाने । ३६ माङ् माने । ३७ ईङ् गतौ । ३८ प्रीङ् प्रीतौ । दीङादय आत्मनेपदिनोऽनुदात्ताः । डीङ् तूदात्तः ॥ ३९ शो तनूकरणे । ४० छो छेदने । ४१ षो अन्तकर्मणि । ४२ दो अवखण्डने ॥ शोप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ ४३ जनी प्रादुर्भावे । ४४ दीपी दीप्तौ । ४५ पूरी आप्यायने । ४६ तूरी गतित्वरणहिंसनयोः । ४७ धूरी ४८ गूरी हिंसागत्योः । ४९ घूरी ५० जूरी हिंसावयोहान्योः । ५१ शूरी हिंसास्तम्भनयोः । ५२ चूरी दाहे । ५३ तप ऐश्वर्ये वा । ५४ वृतु वरणे । ५५ क्लिश उपतापे । ५६ काशृ दीप्तौ । ५७ वाशृ शब्दे ॥ जन्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः । तपिस्त्वनुदात्तः ॥ ५८ मृष तितिक्षायाम् । ५९ ईशुचिर् पूतीभावे ॥ उदात्तौ स्वरितेतावुभयतोभाषौ ॥ ६० णह बन्धने । ६१ रञ्ज रागे । ६२ शप आक्रोशे ॥ णहादयस्त्रयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ ६३ पद गतौ । ६४ खिद दैन्ये । ६५ विद सत्तायाम् । ६६ बुध अवगमने । ६७ युध संप्रहारे । ६८ अनो रुध कामे । ६९ अण प्राणने ॥ अन इत्येके ॥ ७० मन ज्ञाने । ७१ युज समाधौ । ७२ सृज विसर्गे । ७३ लिश अल्पीभावे ॥ पदादयोऽनुदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ७४ राधोऽकर्मकाद्वृद्धावेव । ७५ व्यध ताडने । ७६ पुष पुष्टौ । ७७ शुष शोषणे । ७८ तुष प्रीतौ । ७९ दुष वैकृत्ये । ८० श्लिष आलिङ्गने । ८१ शक विभाषितो मर्षणे । ८२ ष्विदा गात्रप्रक्षरणे । ८३ क्रुध क्रोधे । ८४ क्षुध बुभुक्षायाम् । ८५ शुध शौचे । ८६ षिधु संराद्धौ ॥ राधादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ ८७

रध हिंसासंराद्ध्योः। ८८ णश अदर्शने। ८९ तृप प्रीणने। ९० दृप हर्षमोहनयोः। ९१ द्रुह जिघांसायाम्। ९२ मुह वैचित्त्ये। ९३ ष्णुह उद्गिरणे। ९४ ष्णिह प्रीतौ॥ वृत्। रधादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ९५ शमु उपशमे। ९६ तमु काङ्क्षायाम्। ९७ दमु उपशमे। ९८ श्रमु तपसि खेदे च। ९९ भ्रमु अनवस्थाने। १०० क्षमू सहने। १०१ क्लमु ग्लानौ। १०२ मदी हर्षे॥ वृत्॥ १०३ असु क्षेपणे। १०४ यसु प्रयत्ने। १०५ जसु मोक्षणे। १०६ तसु उपक्षये। १०७ दसु च। १०८ वसु स्तम्भे। १०९। व्युष विभागे॥ व्युस इत्यन्ये॥ युस इत्यपरे॥ ११० प्लुष दाहे। १११ बिस प्रेरणे। ११२ कुस संश्लेषणे। ११३ बुस उत्सर्गे। ११४ मुस खण्डने। ११५ मसी परिणामे॥ ११६ लुठ विलोडने। ११७ उच समवाये। ११८ भृशु ११९ भ्रंशु अधःपतने। १२० वृश वरणे। १२१ कृश तनूकरणे। १२२ ञितृषा पिपासायाम्। १२३ हृष तुष्टौ। १२४ रुष १२५ रिष हिंसायाम्। १२६ डिप क्षेपे। १२७ कुप क्रोधे। १२८ गुप व्याकुलत्वे। १२९ युप १३० रुप १३१ लुप विमोहने। १३२ लुभ गार्द्ध्ये। १३३ क्षुभ संचलने। १३४ णभ १३५ तुभ हिंसायाम्॥ क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते॥ १३६ क्लिदू आर्द्रीभावे। १३७ ञिमिदा स्नेहने। १३८ ञिक्ष्विदा स्नेहनमोचनयोः। १३९ ऋधु वृद्धौ। १४० गृधु अभिकाङ्क्षायाम्॥ वृत्। शमुप्रभृतय उदात्ता उदात्तेत परस्मैभाषाः॥

इति श्यन्विकरणा दिवादयः॥ ४॥ दिवादिराकृतिगण इत्येके।

अथ स्वादयः॥ ५॥

१ षुञ् अभिषवे। २ षिञ् बन्धने। ३ शिञ् निशाने। ४ डुमिञ् प्रक्षेपणे। ५ चिञ् चयने। ६ स्तृञ् आच्छादने। ७ कृञ् हिंसायाम्। ८ वृञ् वरणे। ९ धुञ् कम्पने॥ धूञ् इत्येके॥ स्वादयोऽनुदात्ता उभयतोभाषाः। वृञ् उदात्तः॥ १० टुदु उपतापे। ११ हि गतौ वृद्धौ च। १२ पृ प्रीतौ। १३ स्पृ प्रीतिपालनयोः॥ प्रीतिचलनयोरित्यन्ये। १४ आपॢ व्याप्तौ। १५ शकॢ शक्तौ। १६ राध १७ साध संसिद्धौ। दुनोतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः॥ १८ अशू व्याप्तौ संघाते च। १९ ष्टिघ आस्कन्दने॥ अशिष्टिघी उदात्तावनुदात्तेतावात्मनेभाषौ॥ २० तिक २१ तिग गतौ च। २२ षघ हिंसायाम्। २३ ञिधृषा प्रागल्भ्ये। २४ दम्भु दम्भने। २५ ऋधु वृद्धौ। २६ तृप प्रीणने छन्दसि॥ २७ अह व्याप्तौ॥ २८ दघ घातने पालने च। २९ चमु भक्षणे। ३० रि ३१ चि ३२ चिरि ३३ जिरि ३४ दाश ३५ दृ हिंसायाम्॥ चिरि भाषायाम् इत्येके। क्षीत्यजादिरित्येके। रेफवानित्यन्ये। वृत्। तिकादय उदात्ता उदात्तेतः परस्मैभाषाः॥

इति श्नुविकरणाः स्वादयः॥ ५॥

अथ तुदादयः ॥ ६ ॥

१ तुद व्यथने । २ णुद प्रेरणे । ३ दिश अतिसर्जने । ४ भ्रस्ज पाके । ५ क्षिप प्रेरणे । ६ कृष विलेखने ॥ तुदादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ ७ ऋषी गतौ ॥ उदात्त उदात्तेत्परस्मैपदी । ८ जुषी प्रीतिसेवनयोः । ९ ओविजी भयचलनयोः । १० ओलजि ११ ओलस्जी व्रीडायाम् ॥ जुषादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ १२ ओव्रश्चू छेदने । १३ व्यच व्याजीकरणे । १४ उछि उञ्छे । १५ उछी विवासे । १६ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु । १७ मिच्छ उत्क्लेशे । १८ जर्ज १९ चर्च २० झर्झ परिभाषणभर्त्सनयोः । २१ त्वच संवरणे । २२ ऋच स्तुतौ । २३ उब्ज आर्जवे । २४ उज्झ उत्सर्गे । २५ लुभ विमोहने । २६ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु ॥ रिह इत्येके ॥ २७ तृप २८ तृम्फ तृप्तौ ॥ द्वावपि प्रथमान्तावित्येके ॥ २९ तुप ३० तुम्प ३१ तुफ तुम्फ हिंसायाम् । ३२ दृप ३३ दृम्फ उत्क्लेशे ॥ प्रथमोऽपि द्वितीयान्त इत्येके ॥ ३४ ऋफ ३५ ऋम्फ हिंसायाम् । ३६ गुफ ३७ गुम्फ ग्रन्थे । ३८ उभ ३९ उम्भ पूरणे । ४० शुभ ४१ शुम्भ शोभार्थे । ४२ दृभी ग्रन्थे । ४३ चृती हिंसाग्रन्थनयोः । ४४ विध विधाने । ४५ जुड गतौ ॥ जुन इत्येके । ४६ मृड सुखने । ४७ पृड च । ४८ पृण प्रीणने । ४९ वृण च । ५० मृण हिंसायाम् । ५१ तुण कौटिल्ये । ५२ पुण कर्मणि शुभे । ५३ मुण प्रतिज्ञाने । ५४ कुण शब्दोपकरणयोः । ५५ शुन गतौ । ५६ द्रुण हिंसागतिकौटिल्येषु । ५७ घुण ५८ घूर्ण भ्रमणे । ५९ षुर ऐश्वर्यदीप्त्योः । ६० कुर शब्दे । ६१ खुर छेदने । ६२ मुर संवेष्टने । ६३ क्षुर विलेखने । ६४ घुर भीमार्थशब्दयोः । ६५ पुर अग्रगमने । ६६ वृहू उद्यमने ॥ बृहू इत्यन्ये ॥ ६७ तृहू ६८ स्तृहू ६९ तृन्हू हिंसार्थाः । ७० इष इच्छायाम् । ७१ मिष स्पर्धायाम् । ७२ किल श्वैत्यक्रीडनयोः । ७३ तिल स्नेहे । ७४ चिल विकसने । ७५ चल विलसने । ७६ इल स्वप्नक्षेपणयोः । ७७ विल संवरणे । ७८ बिल भेदने । ७९ णिल गहने । ८० हिल भावकरणे । ८१ शिल ८२ सिल उञ्छे । ८३ मिल श्लेषणे । ८४ लिख अक्षरविन्यासे । ८५ कुट कौटिल्ये । ८६ पुट संश्लेषणे । ८७ कुच सङ्कोचने । ८८ गुज शब्दे । ८९ गुड रक्षायाम् । ९० डिप क्षेपे । ९१ छुर छेदने । ९२ स्फुट विकसने । ९३ मुट आक्षेपमर्दनयोः । ९४ त्रुट छेदने । ९५ तुट कलहकर्मणि । ९६ चुट ९७ छुट छेदने । ९८ जुड बन्धने । ९९ कड मदे । १०० लुट संश्लेषणे । १०१ कृड घनत्वे । १०२ कुड बाल्ये । १०३ पुड उत्सर्गे । १०४ घुट प्रतिघाते । १०५ तुड तोडने । १०६ थुड १०७ स्थुड संवरणे । खुड छुड इत्येके ॥ १०८ स्फुर १०९ स्फुल संचलने ॥ स्फुल स्फुरणे स्फुल संचलने इत्येके । स्फर इत्यन्ये ॥ ११० स्फुड १११ चुड ११२ व्रुड संवरणे ॥ ११३ क्रुड ११४ भृड निमज्जने इत्येके ॥ कुटादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ११५ गुरी उद्यमने ॥ उदात्तोऽनुदात्तेदात्मनेपदी । ११६ णू स्तवने । ११७ धू विधूनने ॥ उदात्तौ परस्मैभाषौ ॥ ११८ गु पुरीषोत्सर्गे । ११९ ध्रु गतिस्थैर्ययोः ॥ अनुदात्तौ परस्मैपदिनौ ॥ १२० कुङ् शब्दे ॥ उदात्त आत्मनेपदी । ङित् ॥ १२१ पृङ् व्यायामे । १२२ मृङ् प्राणत्यागे ॥ अनुदात्तावात्मनेभाषौ ॥ १२३ रि १२४ पि गतौ । १२५ धि धारणे । १२६ क्षि निवासगत्योः ॥ रियत्यादयोऽनुदात्ताः परस्मैभाषाः ॥ १२७ षू प्रेरणे । १२८ कॄ विक्षेपे । १२९ गॄ निगरणे ॥ उदात्ताः परस्मैभाषाः ॥ १३० दृङ् आदरे । १३१ धृङ् अवस्थाने ॥ अनुदात्तावात्मनेभाषौ ॥ १३२ प्रच्छ ज्ञीप्सायाम् ॥ अम् ॥ १३३ सृज विसर्गे । १३४ टुमस्जो शुद्धौ । १३५ रुजो भङ्गे । १३६ भुजो कौटिल्ये । १३७ छुप स्पर्शे १३८ रुश १३९ रिश हिंसायाम् । १४० लिश गतौ । १४१ स्पृश संस्पर्शने । १४२ विच्छ गतौ ।

१४३ विश प्रवेशने। १४४ मृश आमर्शने। १४५ णुद प्रेरणे। १४६ षद्लृ विशरणगत्यवसादनेषु। १४७ शद्लृ शातने॥ पृच्छादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः। विच्छस्तूदात्तः॥ १४८ मिल संगमे॥ उदात्तः स्वरितेदुभयतोभाषः॥ १४९ मुच्लृ मोक्षणे। १५० लुप्लृ छेदने। १५१ विद्लृ लाभे। १५२ लिप उपदेहे। १५३ षिच क्षरणे॥ मुचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः। विन्दतिस्तूदात्तः॥ १५४ कृती छेदने॥ उदात्त उदात्तेत्परस्मैपदी॥ १५५ खिद परिघाते। अनुदात्त उदात्तेत् परस्मैपदी। १५६ पिश अवयवे॥ उदात्त उदात्तेत्परस्मैपदी। वृत्॥

इति शविकरणास्तुदादयः॥ ६॥

अथ रुधादयः॥ ७॥

१ रुधिर् आवरणे। २ भिदिर् विदारणे। ३ छिदिर् द्वैधीकरणे। ४ रिचिर् विरेचने। ५ विचिर् पृथग्भावे। ६ क्षुदिर् संपेषणे। ७ युजिर् योगे॥ रुधादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः॥ ८ उच्छृदिर् दीप्तिदेवनयोः। ९ उतृदिर् हिंसानादरयोः॥ उदात्तौ स्वरितेतावुभयतोभाषौ॥ १० कृती वेष्टने॥ उदात्त उदात्तेत्परस्मैपदी॥ ११ ञिइन्धी दीप्तौ॥ उदात्तोऽनुदात्तेदात्मनेपदी॥ १२ खिद दैन्ये। १३ विद विचारणे॥ अनुदात्तावनुदात्तेतावात्मनेपदिनौ॥ १४ शिष्लृ विशेषणे। १५ पिष्लृ संचूर्णने। १६ भञ्जो आमर्दने। १७ भुज पालनाभ्यवहारयोः॥ शिषादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः॥ १८ तृह १९ हिंसि हिंसायाम्। २० उन्दी क्लेदने। २१ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। २२ तञ्चु संकोचने। २३ ओविजी भयचलनयोः। २४ वृजी वर्जने। २५ पृची संपर्के॥ तृहादय उदात्ता उदात्तेतः परस्मैपदिनः॥ वृत्॥

इति श्नम्विकरणा रुधादयः॥ ७॥

अथ तनादयः॥ ८॥

१ तनु विस्तारे। २ षणु दाने। ३ क्षणु हिंसायाम्। ४ क्षिणु च। ५ ऋणु गतौ। ६ तृणु अदने। ७ घृणु दीप्तौ॥ तनादय उदात्ताः स्वरितेत उभयतोभाषाः॥ ८ वनु याचने। ९ मनु अवबोधने। उदात्तावनुदात्तेतावात्मनेभाषौ॥ १० डुकृञ् करणे॥ अनुदात्त उभयतोभाषः। वृत्।

इति उविकरणास्तनादयः॥ ८॥

अथ क्र्यादयः॥ ९॥

१ डुक्रीञ् द्रव्यविनिमये। २ प्रीञ् तर्पणे कान्तौ च। ३ श्रीञ् पाके। ४ मीञ् हिंसायाम्। ५ षिञ् बन्धने। ६ स्कुञ् आप्रवणे। ७ युञ् बन्धने॥ क्र्यादयोऽनुदात्ता उभयतोभाषाः॥ ८ क्नूञ् शब्दे ९ द्रूञ् हिंसायाम्। १० पूञ् पवने। ११ लूञ् छेदने। १२ स्तॄञ् हिंसायाम्। १३ कॄञ् हिंसायाम्। १४ वॄञ् वरणे। १५ धूञ् कम्पने। क्नूप्रभृतय उदात्ता उभयतोभाषाः॥ १६ शॄ हिंसायाम्। १८ पॄ पालनपूरणयोः।

१८ वृ वरणे ॥ भरणे इत्येके ॥ १९ भृ भर्त्सने । २० मृ हिंसायाम् । २१ दृ विदारणे । २२ जृ वयोहानौ ॥ झृ इत्येके । धृ इत्यन्ये ॥ २३ नृ नये । २४ कृ हिंसायाम् । २५ ऋ गतौ । २६ गृ शब्दे ॥ वृप्रभृतय उदात्ता उदात्तेतः परस्मैपदिनः ॥ २७ ज्या वयोहानौ । २८ री गतिरेषणयोः । २९ ली श्लेषणे । ३० व्ली वरणे । ३१ प्ली गतौ ॥ वृत् ॥ ३२ व्री वरणे । ३३ भ्री भये ॥ भरे इत्येके ॥ ३४ क्षीष् हिंसायाम् । ३५ ज्ञा अवबोधने । ३६ बन्ध बन्धने ॥ ज्यादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ ३७ वृङ् संभक्तौ ॥ उदात्त आत्मनेपदी ॥ ३८ श्रन्थ विमोचनप्रतिहर्षयोः । ३९ मन्थ विलोडने । ४० श्रन्थ ४१ ग्रन्थ संदर्भे । ४२ कुन्थ संश्लेषणे ॥ संक्लेशे इत्येके । ४३ मृद क्षोदे । ४४ मृड च ॥ अयं सुखेऽपि ॥ ४५ गुध रोषे । ४६ कुष निष्कर्षे । ४७ क्षुभ संचलने । ४८ णभ ४९ तुभ हिंसायाम् । ५० क्लिशू विबाधने । ५१ अश भोजने । ५२ उध्रस उञ्छे । ५३ इष आभीक्ष्ण्ये । ५४ विष विप्रयोगे । ५५ प्रुष ५६ प्लुष स्नेहनसेवनपूरणेषु । ५७ पुष पुष्टौ । ५८ मुष स्तेये । ५९ खच भूतप्रादुर्भावे ॥ वान्तोऽयमित्येके ॥ ६० हेठ च ॥ श्रन्थादय उदात्ता उदात्तेतो विषिवर्जं परस्मैभाषाः ॥ ६१ ग्रह उपादाने । उदात्तः स्वरितेदुभयतोभाषः ॥

इति श्नाविकरणाः क्र्यादयः ॥ ९ ॥

अथ चुरादयः ॥ १० ॥

१ चुर स्तेये । २ चिति स्मृत्याम् । ३ यत्रि संकोचे । ४ स्फुडि परिहासे ॥ स्फुटि इत्यपि ॥ ५ लक्ष दर्शनाङ्कनयोः । ६ कुद्रि अनृतभाषणे । ७ लड उपसेवायाम् । ८ मिदि स्नेहने । ९ ओलडि उत्क्षेपणे ॥ ओकारो धात्ववयव इत्येके । न इत्यपरे । उलडि इत्यन्ये ॥ १० जल अपवारणे ॥ लज इत्येके ॥ ११ पीड अवगाहने । १२ नट अवस्यन्दने । १३ श्रथ प्रयत्ने ॥ प्रस्थाने इत्येके ॥ १४ बध संयमने ॥ १५ पॄ पूरणे । १६ ऊर्ज बलप्राणनयोः । १७ पक्ष परिग्रहे । १८ वर्ण १९ चूर्ण प्रेरणे । वर्णं वर्णने इत्येके ॥ २० प्रथ प्रख्याने । २१ पृथ प्रक्षेपे ॥ पथ इत्येके ॥ २२ षम्ब संबन्धने । २३ शम्ब च ॥ साम्ब इत्येके ॥ २४ भक्ष अदने । २५ कुट्ट छेदनभर्त्सनयोः ॥ पूरणे इत्येके ॥ २६ पुट्ट २७ चुट्ट अल्पीभावे । २८ अट्ट २९ षुट्ट अनादरे । ३० लुण्ठ स्तेये । ३१ शठ ३२ श्वठ असंस्कारगत्योः ॥ श्वठि इत्येके ॥ ३३ तुजि ३४ पिजि हिंसाबलादाननिकेतनेषु ॥ तुज पिज इति केचित् । लजि लुजि इत्येके ॥ ३५ पिस गतौ । ३६ षान्त्व सामप्रयोगे । ३७ श्वल्क ३८ वल्क परिभाषणे । ३९ ष्णिह स्नेहने ॥ स्फिट इत्येके ॥ ४० स्मिट अनादरे ॥ ष्मिङ् इत्येके ॥ ४१ श्लिष श्लेषणे । ४२ पथि गतौ । ४३ पिच्छ कुट्टने । ४४ छदि संवरणे । ४५ श्रण दाने । ४६ तड आघाते । ४७ खड ४८ खडि ४९ कडि भेदने । ५० कुडि रक्षणे । ५१ गुडि वेष्टने ॥ रक्षणे इत्येके । कुठि इत्यन्ये । गुठि इत्यपरे ॥ ५२ खुडि खण्डने । ५३ वटि विभाजने ॥ ५४ मडि भूषायां हर्षे च । ५५ भडि कल्याणे । ५६ छर्द वमने । ५७ पुस्त ५८ बुस्त आदरानादरयोः । ५९ चुद संचोदने । ६० नक्क ६१ धक्क नाशने । ६२ चक्क ६३ चुक्क व्यथने । ६४ क्षल शौचकर्मणि । ६५ तल प्रतिष्ठायाम् । ६६ तुल उन्माने । ६७ दुल उत्क्षेपे । ६८ पुल महत्त्वे । ६९ चुल समुच्छ्राये । ७० मूल रोहणे । ७१ कल ७२ विल क्षेपे । ७३ बिल भेदने । ७४ तिल

चोदने। ७५ चल भृतौ। ७६ पाल रक्षणे। ७७ लूष हिंसायाम्। ७८ शुल्ब माने। ७९ शूर्प च। ८० चुट छेदने। ८१ मुट संचूर्णने। ८२ पडि ८३ पसि नाशने। ८४ व्रज मार्गसंस्कारगत्योः। ८५ शुल्क अतिस्पर्शने। ८६ चपि गत्याम्। ८७ क्षपि क्षान्त्याम्। ८८ छजि कृच्छ्रजीवने। ८९ श्वर्त गत्याम्। ९० श्वभ्र च। ९१ ज्ञप ज्ञानज्ञापनमारणतोषणनिशाननिशामनेषु॥ मित्येके॥ ९२ यम च परिवेषणे। ९३ चह परिकल्कने॥ चप इत्येके॥ ९४ रह त्यागे च। ९५ बल प्राणने। ९६ चिञ् चयने॥ (1) नान्ये मितोऽहेतौ॥ ९७ घट्ट चलने। ९८ मुस्त संघाते। ९९ खट्ट संवरणे। १०० षट्ट १०१ स्फिट्ट १०२ चुबि हिंसायाम्॥ १०३ पूल संघाते॥ पूर्ण इत्येके। पुल इत्यन्ये॥ १०४ पुंस अभिवर्धने। १०५ टकि बन्धने। १०६ धूस् कान्तिकरणे। मूर्धन्यान्त इत्येके। तालव्यान्त इत्यन्ये॥ १०७ कीट वर्णे। १०८ चूर्ण संकोचने। १०९ पूज पूजायाम्। ११० अर्क स्तवने॥ तपने इत्येके॥ १११ शुठ आलस्ये। ११२ शुठि शोषणे। ११३ जुड प्रेरणे। ११४ गज ११५ मार्ज शब्दार्थौ। ११६ मर्च च। ११७ घृ प्रस्रवणे॥ स्रावणे इत्येके॥ ११८ पचि विस्तारवचने। ११९ तिज निशाने। १२० कृत संशब्दने। १२१ वर्ध छेदनपूरणयोः। १२२ कुबि आच्छादने। कुभि इत्येके॥ १२३ लुबि १२४ तुबि अदर्शने॥ अर्दने इत्येके॥ १२५ ह्लप व्यक्तायां वाचि॥ क्लप इत्येके॥ १२६ चुटि छेदने। १२७ इल प्रेरणे। १२८ म्रक्ष म्लेच्छने। १२९ म्लेच्छ अव्यक्तायां वाचि। १३० ब्रूस १३१ बर्ह हिंसायाम्॥ १३२ गुर्द पूर्वनिकेतने। १३३ जसि रक्षणे॥ १३४ ईड स्तुतौ। १३५ जसु हिंसायाम्। १३६ पिडि संघाते। १३७ रुष रोषे॥ रुट इत्येके॥ १३८ डिप क्षेपे। १३९ ष्टुप समुच्छ्राये॥ (2) आ कुस्मादात्मनेपदिनः॥ १४० चित संचेतने। १४१ दशि दंशने। १४२ दसि दर्शनदंशनयोः॥ दस इत्यप्येके॥ १४३ डप १४४ डिप संघाते। १४५ तत्रि कुटुम्बधारणे। १४६ मत्रि गुप्तपरिभाषणे। १४७ स्पश ग्रहणसंश्लेषणयोः। १४८ तर्ज। १४९ भर्त्स तर्जने। १५० बस्त १५१ गन्ध अर्दने। १५२ विष्क हिंसायाम्॥ हिष्क इत्येके। १५३ निष्क परिमाणे। १५४ लल ईप्सायाम्। १५५ कूण संकोचे। १५६ तूण पूरणे। १५७ भ्रूण आशाविशङ्कयोः। १५८ शठ श्लाघायाम् १५९ यक्ष पूजायाम्। १६० स्यम वितर्के। १६१ गूर उद्यमने। १६२ शम १६३ लक्ष आलोचने। १६४ कुत्स अवक्षेपणे। १६५ त्रुट छेदने॥ कुट इत्येके॥ १६६ गल स्रवणे। १६७ भल आभण्डने। १६८ कूट आप्रदाने॥ अवसादने इत्येके॥ १६९ कुट्ट प्रतापने। १७० वञ्चु प्रलम्भने। १७१ वृष शक्तिबन्धने। १७२ मद तृप्तियोगे। १७३ दिवु परिकूजने। १७४ गृ विज्ञाने। १७५ विद चेतनाख्याननिवासेषु। १७६ मान स्तम्भे। १७७ यु जुगुप्सायाम्। १७८ कुस्म नाम्नो वा कुत्सितस्मयने॥ इत्याकुस्मीयाः॥ १७९ चर्च अध्ययने। १८० बुक्क भषणे। १८१ शब्द उपसर्गादाविष्कारे च। १८२ कण निमीलने। १८३ जभि नाशने। १८४ सूद क्षरणे। १८५ जसु ताडने। १८६ पश बन्धने। १८७ अम रोगे। १८८ चट १८९ स्फुट भेदने। १९० घट संघाते॥ (3) हन्त्यर्थाश्च॥ १९१ दिवु मर्दने। १९२ अर्ज प्रतियत्ने। १९३ घुषिर् विशब्दने। १९४ आङः क्रन्द सातत्ये। १९५ लस शिल्पयोगे। १९६ तसि १९७ भूष अलंकरणे। १९८ अर्ह पूजायाम्। १९९ ज्ञा नियोगे। २०० भज विश्राणने। २०१ शृधु प्रसहने। २०२ यत निकारोपस्कारयोः। २०३ रक्ष २०४ लग आस्वादने॥ रघ इत्येके। रग इत्यन्ये॥ २०५ अञ्चु विशेषणे। २०६ लिगि चित्रीकरणे। २०७ मुद संसर्गे। २०८ त्रस धारणे॥ ग्रहणे इत्येके। वारणे इत्यन्ये॥ २०९ उध्रस उञ्छे॥ २१० मुच प्रमोचने मोदने च। २११ वस स्नेहच्छेदापहरणेषु। २१२ चर संशये। २१३

चु सहने ॥ इत्यन्ये चेत्येके ॥ चुस इत्येके ॥ २१४ भुवोऽवकल्कने । २१५ कृप च ॥ (4) आ स्वदः सकर्मकात् ॥ २१६ ग्रस ग्रहणे । २१७ पुष धारणे । २१८ दल विदारणे । २१९ पट २२० पुट २२१ लुट २२२ तुजि २२३ मिजि २२४ पिजि (लिजि) २२५ लुजि २२६ भजि २२७ लघि २२८ त्रसि २२९ पिसि २३० कुसि २३१ दशि २३२ कुशि २३३ घट २३४ घटि २३५ बृहि २३६ बर्ह २३७ बल्ह २३८ गुप २३९ धूप २४० विच्छ २४१ चीव २४२ पुथ २४३ लोकृ २४४ लोचृ २४५ णद २४६ कुप २४७ तर्क २४८ वृतु २४९ वृधु भाषार्थाः । २५० घट २५१ लजि २५२ अजि दसि २५४ भृशि २५५ रुशि २५६ शीक २५७ रुसि २५८ नट २५९ पुटि २६० जि २६१ चि २६२ रघि २६३ लघि २६४ अहि २६५ रहि २६६ महि च । २६७ लडि २६८ तड २६९ नल च । २७० पूरी आप्यायने । २७१ रुज हिंसायाम् । २७२ ष्वद आस्वादने ॥ स्वाद इत्येके ॥ (5) आ धृषाद्वा ॥ २७३ युज २७४ पृच संयमने । २७५ अर्च पूजायाम् । २७६ षह मर्षणे । २७७ ईर क्षेपे । २७८ ली द्रवीकरणे । २७९ वृजी वर्जने । २८० वृञ् आवरणे । २८१ जॄ वयोहानौ । २८२ ज्रि च । २८३ रिच वियोजनसंपर्चनयोः । २८४ शिष असर्वोपयोगे । २८५ तप दाहे । २८६ तृप तृप्तौ ॥ संदीपन इत्येके ॥ २८७ छृदी संदीपने ॥ चृप छृप दृप संदीपन इत्येके ॥ २८८ दृभी भये । २८९ दृभ संदर्भे । २९० श्रथ मोक्षणे ॥ हिंसायामित्यन्ये ॥ २९१ मी गतौ ॥ २९२ ग्रन्थ बन्धने । २९३ शीक आमर्षणे । २९४ चीक च । २९५ अर्द हिंसायाम् ॥ स्वरितेत् ॥ २९६ हिसि हिंसायाम् । २९७ अर्ह पूजायाम् । २९८ आङः षद पद्यर्थे । २९९ शुन्ध शौचकर्मणि । ३०० छद अपवारणे ॥ स्वरितेत् । ३०१ जुष परितर्कणे । परितर्पण इत्यन्ये ॥ ३०२ धूञ् कम्पने । ३०३ प्रीञ् तर्पणे । ३०४ श्रन्थ ३०५ ग्रन्थ संदर्भे । ३०६ आपॢ लम्भने ॥ ३०७ तनु श्रद्धोपकरणयोः ॥ उपसर्गाच्च दैर्घ्ये । चन श्रद्धोपहननयो रित्येके ॥ ३०८ वद संदेशवचने ॥ स्वरितेत् । अनुदात्तेदित्येके ॥ ३०९ वच परिभाषणे । ३१० मान पूजायाम् । ३११ भू प्राप्तावात्मनेपदी ॥ ३१२ गर्ह विनिन्दने ॥ ३१३ मार्ग अन्वेषणे । ३१४ कठि शोके । ३१५ मृजू शौचालंकारयोः । ३१६ मृष तितिक्षायाम् ॥ स्वरितेत् ॥ ३१७ धृष प्रसहने ॥ इत्याधृषीयाः । (6) अथादन्ताः ॥ ३१८ कथ वाक्यप्रबन्धे । ३१९ वर ईप्सायाम् । ३२० गण संख्याने । ३२१ शठ ३२२ श्वठ सम्यगवभाषणे । ३२३ पट ३२४ वट ग्रन्थे । ३२५ रह त्यागे ३२६ स्तन ३२७ गदी देवशब्दे । ३२८ पत गतौ । वा अदन्त इत्येके । ३२९ पष अनुपसर्गात् । ३३० स्वर आक्षेपे । ३३१ रच प्रतियत्ने । ३३२ कल गतौ संख्याने च । ३३३ चह परिकल्कने । ३३४ मह पूजायाम् । ३३५ सार ३३६ कृप ३३७ श्रथ दौर्बल्ये । ३३८ स्पृह ईप्सायाम् । ३३९ भाम क्रोधे । ३४० सूच पैशुन्ये । ३४१ खेट भक्षणे ॥ तृतीयान्त इत्येके । खोट इत्यन्ये ॥ ३४२ क्षोट क्षेपे । ३४३ गोम उपलेपने । ३४४ कुमार क्रीडायाम् । ३४५ शील उपधारणे । ३४६ साम सान्त्वप्रयोगे । ३४७ वेल कालोपदेशे ॥ काल इति पृथग्धातुरित्येके ॥ ३४८ पल्यूल लवनपवनयोः ३४९ वात सुखसेवनयोः ॥ गतिसुखसेवनयोरित्येके ॥ ३५० गवेष मार्गणे । ३५१ वास उपसेवायाम् । ३५२ निवास आच्छादने । ३५३ भाज पृथक्कर्मणि । ३५४ सभाज प्रीतिदर्शनयोः ॥ प्रीतिसेवनयोरित्येके ॥ ३५५ ऊन परिहाणे । ३५६ ध्वन शब्दे । ३५७ कूट परितापे ॥ परिदाह इत्यन्ये ॥ ३५८ संकेत ३५९ ग्राम ३६० कुण ३६१ गुण आमन्त्रणे । ३६२ केत आमन्त्रणे निमन्त्रणे च । ३६३ कूण संकोचनेऽपि । ३६४ स्तेन चौर्ये ॥ (7) आगर्वादात्मनेपदिनः ॥ ३६५ पद गतौ । ३६६ गृह ग्रहणे । ३६७ मृग अन्वेषणे ।

३६८ कुह विस्मापने। ३६९ शूर ३७० वीर विक्रान्तौ। ३७१ स्थूल परिबृंहणे। ३७२ अर्थ उपयाच्ञायाम्। ३७३ सत्र संतानक्रियायाम्। ३७४ गर्व माने। इत्याधृषीयाः॥ ३७५ सूत्र वेष्टने। ३७६ मूत्र प्रस्रवणे। ३७७ रूक्ष पारुष्ये। ३७८ पार ३७९ तीर कर्मसमाप्तौ। ३८० पुट संसर्गे। ३८१ धेक दर्शने इत्येके। ३८२ कत्र शैथिल्ये॥ कर्त्त इत्यप्येके॥ (8) प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। (9) तत्करोति तदाचष्टे। (10) तेनातिक्रामति। (11) धातुरूपं च। (12) आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्। (13) कर्तृकरणाद्धात्वर्थे। ३८३ बष्क दर्शने। ३८४ चित्र चित्रीकरणे॥ कदाचिद्दर्शने॥ ३८५ अंस समाघाते। ३८६ वट विभाजने। ३८७ लज प्रकाशने॥ वटि लजि इत्येके॥ ३८८ मिश्र संपर्के। ३८९ संग्राम युद्धे॥ अनुदात्तेत्॥ ३९० स्तोम श्लाघायाम्॥ ३९१ छिद्र कर्णभेदने॥ करणभेदने इत्येके। कर्ण इति धात्वन्तरमित्यपरे॥ ३९२ अन्ध दृष्ट्युपघाते॥ उपसंहारे इत्यन्ये॥ ३९३ दण्ड दण्डनिपातने। ३९४ अङ्क पदे लक्षणे च। ३९५ अङ्ग च। ३९६ सुख ३९७ दुःख तत्क्रियायाम्। ३९८ रस आस्वादन-स्नेहनयोः। ३९९ व्यय वित्तसमुत्सर्गे। ४०० रूप रूपक्रियायाम्। ४०१ छेद द्वैधीकरणे। ४०२ छद अपवारणे। ४०३ लाभ प्रेरणे। ४०४ व्रण गात्रविचूर्णने। ४०५ वर्ण वर्णक्रियाविस्तारगुणवचनेषु॥ (14) बहुलमेतन्निदर्शनम्॥ ४०६ पर्ण हरितभावे। ४०७ विष्क दर्शने। ४०८ क्षिप प्रेरणे। ४०९ वस निवासे। ४१० तुत्थ आवरणे॥ (15) णिङङ्गान्निरसने। (16) श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च। (17) पुच्छादिषु प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धम्॥

इति स्वार्थणिजन्ताश्चुरादयः॥ १०॥ चुरादिराकृतिगण इत्येके।

इति धातुपाठः समाप्तः॥ (B)

---

(३) अथ लिङ्गानुशासनम्।

१ लिङ्गम्। २ स्त्री। ३ ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः। ४ अन्यप्रत्ययान्तो धातुः। ५ अशनिभरण्यरणयः पुंसि च। ६ मिन्यन्तः। ७ वह्निवृष्ण्यग्नयः पुंसि। ८ श्रोणियोन्यूर्मयः पुंसि च। ९ क्तिन्नन्तः। १० ईकारान्तश्च। ११ ऊङाबन्तश्च। १२ यूनस्तिः। १३ विंशत्यादिरा नवतेः। १४ दुन्दुभिरक्षेषु। १५ नाभिरक्षत्रिये। १६ उभावन्यत्र पुंसि। १७ तलन्तः। १८ भूमिविद्युत्सरिल्लतावनिताभिधानानि। १९ यादो नपुंसकम्। २० भास्स्रुक्स्रग्दिग्दृगुष्णिगुपानहः। २१ स्थूणोर्णे नपुंसके च।

(B) धातुपाठे भू सत्तायामित्याद्यर्थनिर्देशो भीमसेनादिकृतः। श्वेधस्पर्ध इत्यादिरेवार्षः पाठः। तथाहि धातुप्रदीपे रचितः—

“मञ्जुघोषप्रसादेन धातूनां वृत्तिमारभे।
बहुशोऽभूत् यथा भीमः प्रोक्तवांस्तद्वदागमात्” ॥१॥ इति।

भट्टोजिश्च—“न च या प्रापण इत्याद्यर्थनिर्देशो नियामकः। तस्यापाणिनीयत्वात्। भीमसेनाद्यो ह्यर्थं निर्दिदिशुरिति स्मर्यते। पाणिनिस्तु श्वेध इत्याद्यपाठीदिति भाष्यवार्तिकयोः स्पष्टम्।” इति (शब्दकौस्तुभ, १।३।१)।

२२ गृहशशाभ्यां क्लीबे। २३ प्रावृड्विप्रुड्रुट्त्विड्त्विषः। २४ दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः। २५ तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः। २६ शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः। २७ प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः। २८ आशीर्धूःपूर्गीर्द्वारः। २९ अप्सुमनःसमासिकतावर्षाणां बहुत्वं च। ३० स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिचः। ३१ तडित्सीमासंध्याः। ३२ चुल्लिवेणिखार्यश्च। ३३ ताराधाराज्योत्स्नादयश्च। ३४ शलाका स्त्रियां नित्यम्॥

१ पुमान्। २ घञबन्तः। ३ घाजन्तश्च। ४ भयलिङ्गभगपदानि नपुंसके। ५ नङन्तः। ६ याच्ञा स्त्रियाम्। ७ क्यन्तो घुः। ८ इषुधिः स्त्री च। ९ देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि। १० त्रिविष्टपत्रिभुवने नपुंसके। ११ द्यौः स्त्रियाम्। १२ इषुबाहू स्त्रियां च। १३ बाणकाण्डौ नपुंसके च। १४ नान्तः। १५ क्रतुपुरुषकपोलगुल्फमेघाभिधानानि। १६ अभ्रं नपुंसकम्। १७ उकारान्तः। १८ धेनुरज्जुकुहूसरयूतनुरेणुप्रियङ्गवः स्त्रियाम्। १९ समासे रज्जुः पुंसि च। २० श्मश्रुजानुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके। २१ वसु चार्थवाचि। २२ मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च। २३ रुत्वन्तः। २४ दारुकशेरुजतुवस्तुमस्तूनि नपुंसके। २५ सक्तुर्नपुंसके च। २६ प्राग्रश्मेरकारान्तः। २७ कोपधः। २८ चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके। २९ कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च। ३० टोपधः। ३१ किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके। ३२ कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च॥ ३३ णोपधः। ३४ ऋणलवणपर्णतोरणरणोष्णानि नपुंसके। ३५ कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च। ३६ थोपधः। ३७ काष्ठपृष्ठसिक्थोक्थानि नपुंसके। ३८ काष्ठा दिगर्था स्त्रियाम्। ३९ तीर्थप्रोथयूथगूथानि नपुंसके च। ४० नोपधः। ४१ जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके। ४२ मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च। ४३ पोपधः। ४४ पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके। ४५ शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च। ४६ भोपधः। ४७ तलभं नपुंसकम्। ४८ जृम्भं नपुंसके च। ४९ मोपधः। ५० रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके। ५१ संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च। ५२ योपधः। ५३ किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके। ५४ गोमयकषायमलयान्वयाव्ययानि नपुंसके च। ५५ रोपधः। ५६ द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रच्छिद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रनक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रछत्त्राणि नपुंसके। ५७ शुक्रमदेवतायाम्। ५८ चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च। ५९ षोपधः। ६० शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके। ६१ यूषकरीषमिषविषवर्षाणि नपुंसके च। ६२ सोपधः। ६३ पनसबिसबुससाहसानि नपुंसके। ६४ चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च। ६५ कंसं चाप्राणिनि। ६६ रश्मिदिवसाभिधानानि। ६७ दीधितिः स्त्रियाम्। ६८ दिनाहनी नपुंसके। ६९ मानाभिधानानि। ७० द्रोणाढकौ नपुंसके च। ७१ खारीमानिके स्त्रियाम्। ७२ दाराक्षतलाजासूनां बहुत्वं च। ७३ नाराचशलाकापदानि अन्ताङ्कपदानि। ७४ मद्गुमनस

हलिजः । ७५ ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः । ७६ ध्वजगजमुञ्जपुञ्जाः । ७७ हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः । ७८ षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः । ७९ वंशांशपुरोडाशाः । ८० ह्रदकन्दकुन्दबुद्बुदशब्दाः । ८१ अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः । ८२ पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्गपुङ्खाः । ८३ सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः ।

१ नपुंसकम् । २ भावे ल्युडन्तः । ३ निष्ठा च । त्वष्यञौ तद्धितौ । ५ कर्मणि च ब्राह्मणादिगुणवचनेभ्यः । ६ यद्यढग्यगञ्ञ्छाश्च भावकर्मणि । ७ अव्ययीभावः । ८ द्वन्द्वैकत्वम् । ९ अभाषायां हेमन्तशिशिरावहोरात्रे च । १० अनञ्कर्मधारयस्तत्पुरुषः । ११ अनल्पे छाया । १२ राजामनुष्यपूर्वा सभा । १३ सुरासेनाच्छायाशालानिशाः स्त्रियां च । १४ शिष्टः परवत् । १५ रात्राह्नाहाः पुंसि । १६ अपथपुण्याहे नपुंसके । १७ संख्यापूर्वा रात्रिः । १८ द्विगुः स्त्रियां च । १९ इसुसन्तः । २० अर्चिः स्त्रियां च । २१ छदिः स्त्रियामेव । २२ मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि । २३ सीरार्थोदनाः पुंसि । २४ वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च । २५ अटवी स्त्रियाम् । २६ लोपधः । २७ तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि । २८ शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च । २९ शतादिः संख्या । ३० शतायुतप्रयुताः पुंसि च । ३१ लक्षाकोटी स्त्रियाम् । ३२ शङ्कुः पुंसि । ३३ सहस्रः क्वचित् । ३४ मन्द्व्यच्कोऽकर्तरि । ३५ ब्रह्मन् पुंसि च । ३६ नामरोमणी नपुंसके । ३७ असन्तो द्व्यच्कः । ३८ अप्सराः स्त्रियाम् । ३९ त्रान्तः । ४० यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव । ४१ भृत्रामित्रच्छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि । ४२ पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च । ४३ बलकुसुमशुल्वयुद्धपत्तनरणाभिधानानि । ४४ पद्मकमलोत्पलानि पुंसि च । ४५ आहवसङ्ग्रामौ पुंसि । ४६ आजिः स्त्रियामेव । ४७ फलजातिः । ४८ वृक्षजातिः स्त्रियामेव । ४९ वियज्जगत्सकृच्छकृत्पृषच्छकृद्यकृदुदश्वितः । ५० नवनीतावतानानृतामृतनिमित्तवित्तपित्तव्रतरजतवृत्तपलितानि । ५१ श्राद्धकुलिशदैवपीठकुण्डाङ्कदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि । ५२ दैवं पुंसि च । ५३ धान्याज्यसस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि । ५४ द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचकवरवृन्दारकाणि । ५५ अक्षमिन्द्रिये ॥

१ स्त्रीपुंसयोः । २ गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः । ३ मन्युसीधुकर्कन्धुसिन्धुकन्दुरेणवः । ४ गुणवचनमुकारान्तं नपुंसकं च । ५ अपत्यार्थस्तद्धिते ॥

१ पुंनपुंसकयोः । २ घृतभूतमुस्तक्ष्वेलितैरावतपुस्तबुस्तलोहिताः । ३ शृङ्गार्घनिदाघोद्यमशल्यदृढाः । ४ व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चपुच्छाः । ५ कबन्धौषधायुधान्ताः । ६ दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः । ७ गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च ॥

१ अविशिष्टलिङ्गम् । २ अव्ययम् ३ कतियुष्मदस्मदः । ४ ष्णान्ता संख्या । ५ गुणवचनं च । ६ कृत्याश्च । ७ करणाधिकरणयोर्ल्युट् । ८ सर्वादीनि सर्वनामानि ॥

॥ इति लिङ्गानुशासनं समाप्तम् ॥

(४) अथ परिभाषाः ।

१ व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् । २ यथोद्देशं संज्ञापरिभाषम् । ३ कार्यकालं संज्ञापरिभाषम् । ४ अनेकान्ता अनुबन्धाः । ५ एकान्ताः । ६ नानुबन्धकृतमनेकाल्त्वम् । ७ नानुबन्धकृतमनेजन्तत्वम् । ८ नानुबन्धकृतमसारूप्यम् । ९ कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः । १० उभयगतिरिह भवति । ११ कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते । १२ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते । १३ निर्दिश्यमानस्यादेशा भवन्ति । १४ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः । १५ अर्थवद्ग्रहणे नानर्थकस्य । १६ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः । १७ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति । १८ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः । १९ एकयोगनिर्दिष्टानां क्वचिदेकदेशोऽप्यनुवर्तते । २० भाव्यमानेन सवर्णानां ग्रहणं न । २१ भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति । २२ वर्णाश्रये नास्ति प्रत्ययलक्षणम् । २३ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । २४ प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् । २५ प्रत्ययग्रहणे चापञ्चम्याः । २६ उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् । २७ स्त्रीप्रत्यये चानुपसर्जने । २८ संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति । २९ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् । ३० पदाङ्गाधिकारे तस्य च तदन्तस्य च । ३१ व्यपदेशिवदेकस्मिन् । ३२ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति । ३३ व्यपदेशिवद्भावोऽप्रातिपदिकेन । ३४ यस्मिन् विधिस्तदादावल्ग्रहणे । ३५ सर्वे विधयश्छन्दसि विकल्प्यन्ते । ३६ सर्वो द्वन्द्वो विभाषयैकवद् भवति । ३७ प्रकृतिवदनुकरणं भवति । ३८ एकदेशविकृतमनन्यवत् । ३९ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः । ४० सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव । ४१ पुनः प्रसङ्गविज्ञानात् सिद्धम् । ४२ विकरणेभ्यो नियमो बलीयान् । ४३ कृताकृतप्रसङ्गि नित्यम् । ४४ शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । ४५ असिद्धं बहिरङ्गमन्तरङ्गे । ४६ नाजानन्तर्ये बहिष्ट्वप्रकॢप्तिः । ४७ अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते । ४८ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते । ४९ वार्णादाङ्गं बलीयः । ५० अकृतव्यूहाः पाणिनीयाः । ५१ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति । ५२ क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते । ५३ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् । ५४ मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् । ५५ अनन्तरस्य विधिर्वा प्रतिषेधो वा । ५६ पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । ५७ ताच्छीलिकेषु वासरूपविधिर्नास्ति । ५८ क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति । ५९ लादेशेषु वासरूपविधिर्नास्ति । ६० उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् । ६१ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् । ६२ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः । ६३ साम्प्रतिकाभावे भूतपूर्वगतिः । ६४ बहुव्रीहौ तद्गुणसंविज्ञानमपि । ६५ चानुकृष्टं नोत्तरत्र । ६६ स्वरविधौ व्यञ्जनमविद्यमानवत् । ६७ निरनुबन्धकग्रहणे न सानुबन्धकस्य । ६८ क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते । ६९ समासान्तविधिरनित्यः । ७० सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । ७१ सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः । ७२ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते । ७३ लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य । ७४ अङ्गवृत्ते पुनर्वृत्तावविधिः । ७५ संज्ञापूर्वको विधिरनित्यः । ७६ आगमशास्त्रमनित्यम् । ७७ गणकार्यमनित्यम् । ७८ अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् । ७९ सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् । ८० प्रकृतिग्रहणे

यङ्लुगन्तस्यापि ग्रहणम्। ८१ उपपदविभक्तेः कारकविभक्तिर्बलीयसी। ८२ अनन्त्यविकारेऽन्त्यसदेशस्य। ८३ नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे। ८४ विधिनियमसम्भवे विधिरेव ज्यायान्। ८५ सामान्यातिदेशे विशेषानतिदेशः। ८६ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्। ८७ नामादायग्रहणेष्वविशेषः। ८८ पर्जन्यवल्लक्षणप्रवृत्तिः। ८९ लक्ष्ये लक्षणं सकृदेव प्रवर्तते। ९० अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति। ९१ ज्ञापकसिद्धं न सर्वत्र। ९२ पूर्वत्रासिद्धीयमद्वित्वे। ९३ क्वचिद् विकृतिः प्रकृतिं गृह्णाति।

९४ श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च।
यत्रैकाज्ग्रहणञ्चैव पञ्चैतानि न यङ्लुकि। १॥

९५ अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा इति।

THE END.